इति भर्तामरज्योतिषां अमरादेवाः ज्योतींषिग्रहनक्षत्रादीनि तेषांभर्ताप्रभुः प्रधानइत्यर्थः यतः सर्वेदेवास्तस्योपस्थानंकुर्वंति ग्रहनक्षत्राणांचतद्दर्शनोदयास्तमयाः यदुक्तं तेजसांगोलकः सूर्योग्रहर्क्षाण्यंबुगोलकाः प्रभावंतोहिदृश्यंतेसूर्यरश्मिप्रदीपिताइति एवंगुणाधिक्यादमरज्योतिषांप्रभुः लोकानांप्रलयोद्भवस्थितिविभुरिति लोकाः भूर्लोकादयस्तेषांप्रलयेविनाशे उद्भवेउत्पत्तौस्थितौपालनेप्रभुर्विष्णुः भगवतः अतीतवर्तमानभाविकालत्रयपरिच्छेदचिन्हभूतत्वात् चशब्दोत्रावधारणे अनेकधायः श्रुतौवेदयोऽनेकधानेकप्रकारैःपठ्यते तथाचोक्तम् इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यः ससुपर्णोगरुत्मान् एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुरित्यादि अधुनास्यशास्त्रस्यपरमर्णा

श्रीगणेशायनमः मूर्तित्वेपरिकल्पितःशशभृतोवर्त्माऽपुनर्जन्मनामात्मेत्यात्मविदांक्रतुश्चयजतांभर्तामरज्योतिषां लोकानांप्रलयोद्भवस्थितिविभुश्चानेकधायःश्रुतौवाचंनःसददात्वनेककिरणस्त्रैलोक्यदीपोरविः १ भूयोभिःपटुबुद्धिभिःपटुधियाहोराफलज्ञप्तयेशब्दन्यायसमन्वितेषुबहुशःशास्त्रेषुदृष्टेष्वपि होरातंत्रमहार्णवेप्रतरणेभग्नोद्यमानामहंस्वल्पंवृत्तविचित्रमर्थबहुलंशास्त्रप्लवंप्रारभे २

तत्स्यादानर्थक्यंपरिजिहीर्षुस्तथान्यशास्त्रेभ्योस्यगुणवत्त्वंप्रदर्शयन् शार्दूलविक्रीडितेनाह १ भूयोभिरिति होरायास्तंत्रंहोरातंत्रं अथवाहोराएवतंत्रंहोरातंत्रंतदेवमहार्णवोदुःपारत्वात् तन्त्रेतितार्यते येनार्थस्तत्तंत्रम् अहंहोरातंत्रमहार्णवप्रतरणेभग्नोद्यमानाशास्त्रप्लवंप्रारभेहोरातंत्रमेवमहार्णवोमहासमुद्रः तस्यतरणेप्रतरणविषयेभग्नोद्यमानाभग्नोत्साहानाशास्त्रप्लवंप्रारभेकरोमिशास्त्रमेवप्लवःशास्त्रप्लवः तंशास्त्रप्लवंयथाप्लवस्तितीर्षूणांपरपारगमनमाशुसंपा

दयति तथेदमपि होरातंत्रमहार्णवप्रतरणे भग्नोद्यमानामित्यस्य पूर्वेण साधर्म्यं प्रकृते होरातंत्रमहार्णवप्रतरणे भग्नोद्यमानामित्यत आह भूयो भिर्बहुनरैः किंभूतैः पटुबुद्धिभिः पटुः पट्वी बुद्धिर्येषां ते पटुबुद्धयश्चतुराः प्राज्ञाः तैः शास्त्रेषु दृष्टेषु चिरं विचारितेष्वपि सत्स्वपि किंभूतेषु शब्दन्यायसमन्वितेषु शब्दानां न्यायः शब्दन्यायः मिमांसा तदुक्तम् शब्दानामेव सा शक्तिस्तर्कोयं पुरुषाश्रय इति अथवा शब्दाश्च न्यायाश्च शब्दन्यायाः शब्दोर्थवान्न्यायो मिमांसा तैः समन्वितेषु संयुक्तेषु किमेकवारं दृष्टेषु नेत्याह बहुश इति बहून्वारान्बहुशः व्याससमासैर्बहुप्रकारैरन्वितेषु इत्यर्थः किमर्थं दृष्टेषु पटुधियां होराफलज्ञप्तये चतुरबुद्धीनां होराफलार्थावबोधनाय प्राक्तनकर्मविपाको होरा होरायाः फलं होराफलं तस्य ज्ञप्तिः तत्फलं शुभाशुभं तत् ज्ञानाय किंभूतं शास्त्रमपूर्वम् स्वल्पं लघुग्रंथं वृत्तविचित्रं वृत्तैः शार्दूलविक्रीडितप्रभृतिभिर्विचित्रं रम्यं तस्मात्स्वल्पार्थेनैवास्य गुणवत्त्वम् यतस्तेषामत्राप्युद्यमभंगो न भवति स्वल्पमित्यनेन ग्रहणधारणे सूक्ततं प्रदर्शयति तथा च हस्तिवैद्यकरो वीरसेनः समासोक्तस्य शास्त्रस्य सुखग्रहणधारणे वृत्तविचित्रमित्यनेन सूक्ततां प्रदर्शयति ननु स्वल्पशास्त्रस्य स्वल्पार्थतैव भविष्यतीत्याह अर्थबहुलं बह्वभिधेयं अत एव पूर्वैर्विरचितशास्त्रेभ्योस्य गौरवम् अन्यथा हि शास्त्रसंपातात् पुनरुक्तता दोषः स्यात् एतदुक्तं भवति प्रागभिहितशास्त्राण्यतिविस्तृतान्यतस्तेभ्यो भग्नोद्यमास्तदर्थमहं शास्त्रमपूर्वमारभे ननु कदाचिदल्पप्रज्ञतया ते भग्नोद्यमास्तत्कुतो लब्धम् यथा पूर्वशास्त्राणां महत्त्वाद्भग्नोद्यमास्तदर्थमिदमल्पमित्यत इदमाह पटुधियामिति अनेनैतत्प्रतिपादितं भवति न हि ते बुद्धिहीनत्वात्तेषु शास्त्रेषु भग्नोद्यमाः किं तर्हि शास्त्रदोषात् अन्यत्रापि तेषामुद्यमभंगः स्यात् ध्रुवमपि स्वल्पं च लघुवृत्तमदीर्घं विचित्रं रम्यमर्थबहुलं वित्तपरिपूर्णं एवंविधं तितीर्षूणामतिसुखावहं भवतीति २ अधुना होराशास्त्रस्य पुराकृतकर्मविपाकव्यंजकत्वं वर्णद्वयपरिहारेण शब्दव्युत्पत्तिं प्रदर्शयन्निंद्रवज्रयाह होरेति होरार्थं शास्त्रं होरा तामहोरात्रविकल्पमेके वांछन्ति अहश्च रा

त्रिश्चाहोरात्रशब्देनोच्यते तस्याविकल्पोविकल्पना एकेअन्येहोरांवांछंतिइत्यर्थः कथमुच्यते पूर्वपरवर्णलोपात् अहोरात्रशब्दस्यपूर्वोवर्णोका-रोपरवर्णश्चत्रकारस्तयोर्लोपमदर्शनंकृत्वा होराशब्दोवशिष्यते किमर्थंपुनरहोरात्रशब्दाद्धोराशब्दोव्युत्पाद्यतेइति अत्रोच्यते मेषादयोद्वादश लग्नराशयोहोरात्रातभूताः लग्नस्यचकालवशाज्ज्ञानंलग्नवशाच्छुभाशुभज्ञानम् अतोहोरात्राश्रयत्वात्ततएवहोराशब्दोव्युत्पाद्यते ए तदेवाचार्यस्याप्यभिप्रेतम् यतःपरमतमप्रतिषिद्धंस्वमतमिति तथाचसारावल्याम् आद्यंतवर्णलोपाद्धोरास्माकंभवत्यहोरात्रात् तत्प्रतिषिद्धाः सर्वेग्रहभगणाश्चिंत्यतेयस्मात् किमस्यप्रयोजनमित्याह कर्मार्जितंपूर्वभवेसदादियत्तस्यपंक्तिंसमभिव्यनक्ति पूर्वभवेप्राग्जन्मनियत्सदा दिशुभमशुभंमिश्रंचकर्मार्जितंतस्यपंक्तिंपाकंसम्यक् व्यनक्ति प्रकटीकरोति तथाचलघुजातके यदुपचितमन्यजन्मनिशुभाशुभंतस्यक

होरेत्यहोरात्रविकल्पमेकेवांछंतिपूर्वापरवर्णलोपात् कर्मार्जितंपूर्वभवेसदादियत्तस्यपंक्तिंसमभिव्यनक्ति ३

र्मणःप्राप्तिंव्यंजयति शास्त्रमेतत्तमसिद्रव्याणिदीपइवेति ननुशुभस्याशुभस्यवावश्यंभाविनःकिंव्यनक्ति उच्यते द्विविधंशुभाशुभंदृढकर्मोपार्जितमदृढकर्मोपार्जितंच तत्रदृढकर्मोपार्जितस्यदशाफलंयाक्रमेणव्यनक्ति अशुभदशाफलंज्ञात्वायायादेःपरिहारःकर्तव्यः शुभंज्ञात्वायात्रादेरतिशयेनदानं अदृढकर्मोपार्जितस्याष्टकवर्गेणफलव्यक्तिः तच्चाशुभंज्ञात्वा शांत्यादिभिरुपशमंनयेत् तथाचयवनेश्वरः यद्यद्विधानंनियतंप्रजानांग्रहर्क्षयोगप्रभवंप्रसूतौ भाग्यानितानीत्यभिशब्दयंतिवर्षानुयोगेनिदशांनराणाम् तदप्यभिज्ञैर्द्विविधंनिरुक्तंस्थिराख्यमौत्पातिकसंज्ञितंच कालक्रमाज्जातकनिश्चितंयत्कर्मापिसर्पिःस्थिरमुच्यतेतत् सप्तग्रहाणांप्रथितानियानिस्थानानिजन्मप्रभवानिसद्भिः तेभ्यःफलंचारग्रहक्र-

मस्थादध्युर्यदौत्पातिकसंज्ञितंतत् अनेनस्थिरस्यशांत्यादिभिरुपशमः प्रदर्शितोभवतिउक्तंचभगवताव्यासेनविहन्याद्दुर्बलंदैवंपुरुषेणविपश्चितेति ३ अधुनाव्यवहारार्थंकालाख्यस्यपुरुषस्यमेषादिराशिपूर्वकंशिरःप्रभृत्यंगविभागंशार्दूलविक्रीडितेनाह कालांगानीतिकालस्यांगानिकालांगानितानिचमेषप्रभृतिराशयोनवर्क्षचरणानवभिर्नक्षत्रचरणैर्नक्षत्रपादैःप्रमाणयेषांते अश्विप्रथमा अश्विनीतःप्रभृतिनवनवनक्षत्रपादाएकैकस्यप्रमाणं मेषप्रभृतिराशयोश्विप्रथमैर्नक्षत्रपादैर्युक्ताइत्यर्थः तथाभूताराशयोधातुरवयवाः तथाचयवनेश्वरः द्वेद्वेसपादेभवनगतेति तथाचभगवान्गार्गिः अश्विनीभरणीमेषःकृत्तिकापादमेवच तत्पादत्रितयंब्राह्मंवृषःसौम्यदलंतथा सौम्यार्धमार्द्रामिथुनस्त्वादि

कालांगानिवरांगमाननमुरोहृत्क्रोडवासोभृतोबस्तिर्व्यंजनमूरुजानुयुगलेजंघेततोंघ्रिद्वयम् मेषा
श्विप्रथमानवर्क्षचरणाश्चक्रास्थिताराशयोराशिक्षेत्रगृहर्क्षभानिभवनंचैकार्थसंप्रत्ययाः ४

त्याश्चरणत्रयं तत्पादःपुष्यमाश्लेषाराशिःकर्कटकःस्मृतः पित्र्यंभाग्यमथार्यम्णःपादःसिंहःप्रकीर्तितः तत्पादत्रितयंकन्याहस्तश्चित्रार्धमेवच तथाचित्रादलंस्वातीविशाखाचरणत्रयम् तत्पादंमैत्रदैवत्यंज्येष्ठावृश्चिकउच्यते मूलमाप्यंतथाधन्वीपादोविश्वेश्वरस्यच तत्पादत्रितयंश्रवणंमकरोवासवोदलं तद्दलंवारुणंकुंभस्तथाजाश्चरणत्रयं तत्पादमेकोमीनःस्यादहिर्बुध्न्यंचरेवती चक्रेस्थिताः चक्रस्थिताः चक्रस्थिताराशयः अथवाचक्रवत्स्थिताः अनेकस्थानमेषाप्रदर्शितंभवति तत्रकालाख्यस्यवरांगंशिरोमेषः आननंमुखंतद्वृषः उरोवक्षोमिथुनः तद्धृदयंकर्कटः क्रोडमुदरंसिंहः वासोभृतकटिः कन्याबस्तिर्नाभिव्यंजनयोरंतरंतुला व्यंजनंयेनपुंस्त्वंव्यंज्यतेलिंगंतद्वृश्चिकः ऊरुयुगलंधन्वीजानुयुगलंमकरः जंघेकुंभः अंघ्रिद्वयंपादयुगम्

मीनइति तथाचबादरायणः मेषःशिरोथवदनंवृषभोविधात्तुर्वक्षोभवेन्नृमिथुनंत्हृदयंकुलीरः सिंहस्तथोदरमथोयुवतिःकटिश्चवस्तिस्तुलाभृदथ मेहनमष्टमस्यात् धन्वीचास्योरुयुगलंमकरोजानुद्वयंभवति जंघाद्वितयंकुंभः पादोमस्यद्वयंचेति अस्यप्रयोजनम् जन्मकालेयोराशिः पापग्रहाक्रांतः सकलाख्यस्यपुरुषस्ययस्मिन्नंगेस्थितस्तत्रांगेजातस्योपघातोवक्तव्यः यत्रसौम्यस्थितस्तत्रपुष्टिरिति तथाचसारावल्याम् कालनरस्यावयवाः पुरुषाणांकल्पयेत्प्रसवकाले सदसद्ग्रहसंयोगात्पुष्टाःसोपद्रवाश्चापि इतिराशिक्षेत्रमित्यादि एषांचप्रत्येकस्यराशिरितिसंज्ञा तस्यैवपर्यायनामानिक्षेत्रगृहऋक्षभराशिश्चक्षेत्रंचगृहंचऋक्षंचभंचतानिराशिक्षेत्रमित्यादि एषांचप्रत्येकस्यराशिरितिसंज्ञातस्यैवपवनग्रहणंकृतंतत्सर्वेषांगृहपर्यायाणांग्रहणार्थंऋक्षत्वादपिभग्रहणोसिद्धेयत्पुनर्भग्रहणंतेनैतद्दर्शयति यत्रयत्रहोराशास्त्रेभग्रहणंऋक्षग्रहणंवातत्रतत्रराशेरेवग्रहणंस्यान्नतुनक्षत्रस्य एतेराश्यादयः शब्दाएकार्थसंप्रत्ययाएकार्थाभिधायकाइत्यर्थः ५ अधुनाराशीनांस्वरूपविज्ञानंवसंततिलकेनाह मत्स्याविति मीनोराशिर्मत्स्यौमत्स्यद्वयमन्योन्यपुच्छाभिमुखंएतत्तुकुतोलभ्यते उच्यते तस्यैवोभयोद्वयत्वात् वक्ष्यतिचलग्नंसमेत्युभयतः पृथुरोमयुग्ममिति घटीकुंभः स्कंधासक्तरिक्तघटधारीपुरुषः कुंभः मिथुनोनृमिथुनराशिर्मिथुनंनृमिथुनं स्त्रीपुमांसौतन्मिथुनम् सगदसवीणंपुमान्सगदःस्त्रीसवीणा चापीनरोश्वजघनः धन्वीराशिश्चापिविद्यमानधन्वानरः अश्वजघनः अश्वस्तुरंगोतस्येवजघनंयस्यसोश्वजघनः चतुष्पादित्यर्थः मकरोमृगास्यः मकरोराशिर्मकरएव सचमृगास्यः मृगमुखः तौलीत्यादि तुलाविद्यमानतुलःपुरुषः कन्याकुमारीप्लवगानौकास्यासस्यदहना सस्यानिचदहनश्चतौसस्यदहनौ ताभ्यांसहवर्ततइतिसासस्यदहना शेषाराशयोमेषवृषकर्कटकसिंहवृश्चिकाः स्वनामसदृशाः स्वसंज्ञाविहिताकृतयः तद्यथा मेषोमेषः वृषोवृषभः कर्कटकःकुलीरोजलचरप्राणी सिंहः केसरी वृश्चिकोवृश्चिकएवकीटजातिः छागोवृषभो वीणागदाधरंमिथुनमंभसि कु

लीरः सिंहः शैलेकन्यानौसंस्थादीपसस्यकरा पुरुषस्तुलाधरो वृश्चिकोथधन्वीनरोहयांत्यार्धः मकरोर्धमृगपूर्वंकुंभीपुरुषोझषोमीनः
खचराश्चसर्वे सर्वेद्वादशराशयः खचराः खेषुस्वेषुस्थानेषुचरंति यथादृष्टस्थाननिवासिनइत्यर्थः तद्यथा मेषवृषौवारण्यौदिवारात्रौ मिथु
नोग्राम्यः कर्कटोंबुचरः सिंहआरण्यचारी कन्यादर्शितदेशविभागा तुलापण्यवीथिस्थः वृश्चिकः श्वभ्रचारी धन्वीग्राम्यः मकरः पूर्वभागे
आरण्योन्योजलचरः कुंभोग्राम्यः मीनोजलचरइति तथाचयवनेश्वरः आद्यःस्मृतोमेषसमानमूर्तिः कालस्यमूर्धागदितः पुराणैः साजी-
विकासंचरकंदराद्रिस्तेनाग्निधात्वाकररत्नभूमिः १ वृषाकृतिस्तुप्रथितोद्वितीयः सवक्त्रकंठायतनंविधातुः वनाद्रिसानुद्विपगोकुलानां
कृषीवलानामधिवासभूमिः २ वीणागदाभृन्मिथुनंतृतीयः प्रजापतेस्कंधभुजासदेशः प्रनर्तकोगायनशिल्पकस्त्रीक्रीडारतिद्यूतविहार

मत्स्योघटीनृमिथुनंसगदंसवीणंचापीनरोश्वजघनोमकरोमृगास्यः
तौलीससस्यदहनोप्लवगाचकन्याशेषाःस्वनामसदृशाःखचराश्चसर्वे ५

भूमिः ३ कर्कःकुलीराकृतिरंबुसंस्थोवक्षःप्रदेशोविहितश्चधातुः केदारवापीपुलिनानितस्यदेवांगनारम्यविहारभूमिः ४ सिंहश्चशैलेहृदय
प्रदेशप्रजापतेःपंचममाहुराद्याः तस्याटवीदुर्गगुहावनाद्रिव्याधावनीदुर्गवनप्रदेशाः ५ प्रदीपिकासस्यकरेणकन्यानौस्थाजलेषष्ठमितिब्रुवंति कला
धृधीराजठरंविधातुःसशाद्वलास्त्रीरतिशिल्पभूमिः ६ वीथ्यांतुलापुण्यधरामनुष्यःस्थितःसनाभीकटिबस्तिदेशे शुक्लार्थवीथ्यापणपट्टनाध्वसा
र्थाधिवासोन्नतसस्यभूमिः ७ श्वभ्रोष्टमोवृश्चिकविग्रहस्तुप्रोक्तःप्रभामेढ्रगुदप्रदेशो गुहाविलश्वभ्रविषाश्मगुप्तिवल्मीककीटाजगराहिभूमिः ८

धन्वीमनुष्योहयपश्चिमार्द्धस्तमाहुरूरू भुवनप्रणेतुः समास्थितस्यास्त समस्तवाजीसुरास्त्रभृयज्ञरथाश्वभूमिः ९ मृगार्धपूर्वोमकरोंबुगार्धोजानुप्रदेशंतमुशंतिधातुः नदीवनारण्यसरोजरूपश्चथाधिवासोद्शमःप्रदिष्टः १० स्कंधेतुरिक्तःपुरुषस्यकुंभोजंधेतमेकादशमाहुराद्याः उष्णोदकाधारकुसस्यपक्षीस्त्रीशौंडिकाद्यूतनिवासभूमिः ११ जलेतुमीनद्वयमन्त्यराशिःकालस्यपादौविहितौवरिष्ठौ सपुण्यदेवद्विजतीर्थभूमिर्नदीसमुद्रांबुधराधिवासः १२ प्रयोजनंत्वेतननष्टादिषुद्रव्यस्थानपरिज्ञानं उक्तंचराशिभ्यःकालदिग्देशाइति अधुनाराशिनवमांशद्वादशांशाधिपान्त्रोटकेनाह क्षितिजसितज्ञेति क्षितिजाद्याग्रहाः ग्रहपाः अंशपाश्च ग्रहाणांराशीनांमेषादीनांपतयः स्वामिनोभवंति क्षितिजोंगारकः समेषस्याधिपतिः सितःशुक्रः वृषभस्यज्ञोबुधोमिथुनस्य चंद्रःकर्कटकस्य रविरादित्यः सिंहस्य सौम्योबुधः कन्यायाः सितःशुक्र

क्षितिजसितज्ञचंद्ररविसौम्यसितावनिजाः सुरगुरुमंदसौरिगुरवश्चगृहांशकपाः

स्तुलायाः अवनिजोंगारकोवृश्चिकस्य सुरगुरुर्बृहस्पतिः धन्विनः मंदः शनैश्चरोमकरस्यशौरिः शनैश्चरोमंदइत्यमरः कुंभस्यगुरुर्बृहस्पतिःमीनस्येतिप्रयोजनं होरास्वामिगुरुज्ञवीक्षितयुतेत्यत्र एतएवमेषादिनवांशकाधिपतयः नकेवलंमेषस्यभौमाधिपतिः यावदस्मिन्राशौ मेषनवांशकोदयो भवति तस्यापिभौमोधिपतिःशेषाणामप्येवं तेचनवांशकाः कथंभवंतीत्याह अजमृगतौलिचंद्रभवनादिनवांशविधिरिति अजोमेषः मृगोमकरः तौलीतुला चंद्रभवनंकर्कटकः अजोमेषः मृगोमकरः तौलिस्तुलः चंद्रभवनंकर्कः आदिनवांशविधिरितिप्रत्येकमभिसंबध्यते तत्रैवसंबंधो जायते अजादिर्मृगादिः तौल्यादिः चंद्रभवनादिर्नवांशविधिः सर्वराशीनांविधिर्भवति तत्रादिनवांशविधिः मेषस्यतेनमेषवृषमिथुनकर्कट-

सिंहकन्यातुलावृश्चिकधनुर्धराणांसंबंधिनोनवांशाः मेषस्यभवंति मृगादिर्वृषस्यतेनमकरकुंभमीनमेषवृषमिथुनकर्कटसिंहकन्यासंबंधिनोनवांशाः वृषस्यतुलादिर्मिथुनस्यतेनतुलामकरधनमकरकुंभमीनमेषमिथुनानांसंबंधिनोनवांशाः मिथुनस्यकर्कटादिः कर्कटस्यतेनकर्कटसिंहकन्यातुलावृश्चिकधनुर्मकरकुंभमीनानांसंबंधिनोनवांशाः कर्कटस्य एवंसिंहस्यमेषवत् कन्यायाः वृषवत् तुलायाःमिथुनवत् वृश्चिकस्यकर्कटवत् पुनरपिधनुषःमेषवत् मकरस्यवृषवत्कुंभस्यमिथुनवत्मीनस्यकर्कटवत् तदुक्तंग्रंथांतरे मेषकेसरिधन्वीनांमेषाद्या अंशकाःस्मृताः वृषकन्यामृगाणांच मकराद्यानवस्मृताः १ तुलामिथुनकुंभानांतुलाद्यानवकीर्तिताः कर्कतौलिझषाणांचकर्कराद्यानवांशकाः प्रयोजनम्

अजमृगतौलिचंद्रभवनादिर्नवांशविधिर्भवनसमांशकाधिपतयःस्वगृहात्क्रमशः ६

स्तेनोभोक्तापंडिताद्याइत्यादि भवनसमांशकाधिपतयः स्वगृहात्क्रमशइति भवनसमाअंशकाभवनांशकाः भवनानिद्वादशतत्समाअंशकाद्वादशाशकाइत्यर्थः तेचप्रत्येकस्यराशेःस्वगृहादारभ्यगणनीयाः तद्यथा मेषस्य मेषवृषमिथुनकर्कटसिंहकन्यातुलावृश्चिकधन्विमकरकुंभमीनानांसंबंधिनोद्वादशभागाभवंति तेषांभौमाद्याधिपतयः एववृषस्यवृषाद्यामेषांताः मिथुनस्यमिथुनाद्यावृषांताः कन्यायाःकन्याद्याःसिंहांताः तुलायास्तुलाद्याःकन्यांताः वृश्चिकस्यवृश्चिकाद्यास्तुलांताः धन्विनोधनुराद्याःवृश्चिकांताः मकरस्यमकराद्याधन्वांताः कुंभस्यकुंभाद्याःमकरांताः मीनस्यमीनाद्याःकुंभांताः प्रयोजनंतत्कालिकेंदुसहितोद्विरसांशक इत्यादि ६ ५ ५ ७

अधुनात्रिंशांशकस्याधिपतीनां गणनया परिज्ञानं च पुष्पिताग्रयाह कुजेति कुजोभौमः रविजः सौरिः शनिः गुरुर्बृहस्पतिः ज्ञो बुधः शुक्रोभार्गवः एवंकुजरविजगुरुज्ञशक्राणांक्रमेणभागाः पवनसमीरणकौर्पिजूकलेयाः तद्यथापवनाः वायवः पंचपंचएव भागाः कुजस्य ततऊर्ध्वंसमीरणाः पंचैवरविजस्य एवंदशततऊर्ध्वंकौर्पिसंज्ञाअष्टौगुरोः कौर्प्यौरस्योवृश्चिकः सचगणनयाष्टमः एवमष्टादशततः परंजूकसंज्ञाःसप्तभागाःबुधस्याजूकसंज्ञातुलायाः सचगणनयासप्तमः एवंपंचविंशतिः ततऊर्ध्वंलेयसंज्ञा पंचशुक्रस्यलेयसंज्ञासिंहस्य सचगणनयापंचमः एवंत्रिंशत् किंसामान्येनेत्यत-आह अयुजियुजीति अयुजिविषमराशौ कुजादयोग्रहाः पवनादीनांभागानांयथाक्रमेणाधिपतयः तत्रमेषमिथुनसिंहतुलाधनुःकुंभानांविष

कुजरविजगुरुज्ञशक्रभागाः पवनसमीरणकौर्पिजूकलेयाः अ
युजियुजितुभेविपर्ययस्थाः शशिभवनालिझषांतमृक्षसंधिः ७

मराशीनामेषक्रमः विजिभतु विपर्ययस्थाः युजिसमराशौपवनादिभागग्रहाश्चविपर्ययस्थाः विलोमेनतिष्ठंति तद्यथा तत्रादौपंचशुक्रस्यततः परंसप्तबुधस्य एवंद्वादशततःपरंअष्टौजीवस्यएवंविंशतिःततःपरंपंचशनेः एवंपंचविंशतिः ततःपरंपंच भौमस्य एवंत्रिंशत् तत्र वृषकर्कटकन्यावृश्चिकमकरमीनाः समराशयः एवंत्रिंशद्भागाधिपतयः पंचताराग्रहाः अत्रकेचिदाहुः यथाविपर्ययस्था इत्यनेनानंतराणामेव पवनादिसंख्यानां भागानां विपर्ययेणभवितव्यं नव्यवहितानांकुजादीनां तच्चायुक्तं तस्मात्तुशब्दोत्रपठ्यते सचकुजादिसमुच्चयार्थः तथाचश्रुतकीर्तिः पंचाथपंचचाष्टौ सप्तचपंचैवचौजभवनेषु धरणीसुतमंदसुरगुरुबुधशुक्राणांक्रमेणांशाः पंचैवसप्तचाष्टौपंचपंचायुग्मभवनेषुभागाभार्गवशशिं-

स्फुतसुरेज्यशनिभूमिपुत्राणामितिप्रयोजनं कन्यैवदुष्टाव्रजतीहदास्यंसाध्वीसमायाकुचारित्रयुक्ता भूम्यात्मजर्क्षेक्रमशोंशकेषुवक्रार्किजीवेंदुजभार्गवाणामित्यादि शशिभवनालिझषांतमृक्षसंधिः अंतःशब्दः प्रत्येकमभिसंबध्यते शशिभवनांतमत्यंतंझषांतंचऋक्षसंधिः शशिभवनंकर्कटः अलिर्वृश्चिकः झषोमीनः एतेषामंतं नवमनवांशकं यत्रनक्षत्रराश्योर्युगपत्पर्यवसानंतदृक्षसंधिः यस्मादाश्लेषांतेकर्कटकांतंज्येष्ठांतंवृश्चिकांतंरेवत्यंतंमीनांतमिति एतद्वलोकेगंडांतमितिप्रसिद्धं उक्तंच अश्विनीपित्र्यमूलाद्यामेषसिंहहयादयः विषमर्क्षांत्रिवर्तेतेपादवृद्ध्यायथोत्तरमितिप्रयोजनं संधौपापैः शशिनिचजडः स्यान्मृत्युसौम्यदृष्टइति ७ अधुनाव्यवहारार्थमेषादीनांसंज्ञायथार्थयाह क्रियेति इत्थमेवंप्रकारनामानोमेषाद्याराशयोज्ञेयाः तद्यथा क्रियोमेषः तावुरिर्वृषः जितुमोमिथुनः कुलीरःकर्कटः लेयःसिंहः पाथोनःकन्याजूकस्तुला कौर्प्याख्योवृश्चिकः तौक्षिकोधन्वी आकोकेरोमकरः हृद्रोगःकुंभः अंत्यभंमीनइतिप्रयोजनं गोसिंहौजितुमाष्टमौक्रियतुलेत्यादि ८ अधुनाग्रहस्यक्षेत्रहोराद्रेष्काणनवांशद्वादशभागत्रिंशद्भागानांवर्गसंज्ञानांव्यवहारार्थमिंद्रवज्रयाह द्रेष्काणेति द्रेष्काणादयः षट्पदार्थाः स्वकीयग्रहस्य वर्गसंज्ञा तत्रद्रेष्काणोराशित्रिभागः होराराश्यर्द्धं नवभागोनवांशकः त्रिंशांशकः त्रिंशद्भागः द्वादशांशोद्वादशभागः क्षेत्रराशिः एतत्संज्ञिताश्च एषांसंज्ञाख्यायेषांतेतथा यद्यस्यग्रहस्यक्षेत्रराशिः सतस्यवर्गः वर्गशब्देनात्रषड्वर्गः तेसर्वएवग्रहस्यात्मीयवर्गसंज्ञा एवंषाड्वर्गकल्पोराशिः षट्स्वात्मीयेषुस्थितोवर्गस्थोभवति ननुग्रहस्य

क्रियतावुरिजितुमकुलीरलेयपाथोनजूककौर्प्याख्याः तौक्षिक आकोकेरोहृद्रोगश्चांत्यभंचेत्थं ८ द्रेष्काणहोरानवभागसंज्ञास्त्रिंशांशकद्वादशसंज्ञिताश्च

षड्विकल्पान्नसंभवंति यतश्चंद्रार्कयोस्त्रिंशांशकाभावः भौमादीनांहोराभावः तस्मात्पंचसंभवंति तेनपंचस्वात्मीयेषुस्थितोवर्गस्थः एतदप्युपलक्षणं अतोयथासंभवंस्वादिविकल्पस्थोग्रहोवर्गस्थउच्यते तस्माद्भगवान्गार्गिः क्षेत्रंहोरायद्रेष्काणोनवांशोद्वादशांशकः त्रिंशांशकश्चवर्गोयःसर्वस्यस्त्रउदाहृतः आद्येष्वपिपदार्थेषुस्थितःस्वेषुस्ववर्गगः परवर्गगतोप्येवंग्रहोभवतिनान्यथाइतिप्रयोजनम् एकोपिवक्रोपगतोनराणांशुभाशुभोवापिचतुष्टयस्थः वर्गोपितस्योदयगोविनाशंबहुप्रकारंकुरुतेध्वगानामित्यादि होरालग्नयोःसंज्ञार्थमाह होरेतिलग्नंभवनस्यचार्धमिति होराइतिलग्नमुच्यतेप्रयोजनंहोरास्वामिगुरुज्ञवीक्षितयुतेति भवनस्यचराशेरर्द्धं होराप्रयोजनम् मार्तंडेंद्वोरायुजिसमभेचंद्रभान्वोश्च-होरेति ९ अधुनाराशीनांरात्रिदिनसंज्ञत्वं पृष्ठोदयशीर्षोदयत्वंचवसंततिलकेनाह गोजाश्विकर्किमिथुना गोशब्देनवृषउच्यते अजोमेषः

क्षेत्रंचयद्यस्यसतस्यवर्गोहोरेतिलग्नंभवनस्यचार्द्धं ९

अश्वोस्यास्तीति अश्वीधन्वीकर्कीकुलीरः मिथुनःप्रसिद्धः एतेगोजाश्विकर्किमिथुनाःसमृगाः मृगेणमकरेणसहिताः षडुराशयोनिशाख्याः रात्रिबलसंज्ञा पृष्ठोदयाविमिथुनाः एतएवराशिसंज्ञाविमिथुनाः मिथुनवर्जिताः पृष्ठोदयसंज्ञाभवंति पृष्ठेनउदयंयांतीत्यर्थःमिथुनःपुनःशीर्षोदयः शीर्षोदयाइतिउक्तेभ्यःशेषाः सिंहकन्यातुलावृश्चिककुंभाः शीर्षोदयाः शिरसाउदयंयांतिदिनबलाश्चभवंति अत्ररात्रिदिनबलाख्याइतिसंज्ञामात्र यतस्तेषामुत्तरोत्तरंबलंवक्ष्यति । द्विपदादयोह्निनिशिचप्राप्तेचसंध्याद्वयेइति एवंसत्याचार्यस्यवचनविरोधःस्यात्तस्मासंज्ञामात्रंबलग्रहणं प्रयोजनं रात्रिद्युसंज्ञेषु विलोमजन्म इत्यादि तथापृष्ठोदयकोभयपक्षेगाइति यात्रायांवक्ष्यति चशीर्षोदयेसम-

भिवांछितकार्यसिद्धिः पृष्ठोदयेविपुलताबलबुद्धिनाशः शस्तंदिवादिनबलेनिशिनक्तवीर्येरात्रौविपर्ययबलेगमनंनशस्तं अन्यलग्नेप्योमीनस्य विशेषमाह लग्नंसमेत्युभयतः पृथुरोमयुग्ममिति पृथुरोमामत्स्यः तद्युग्मंमत्स्यद्वयंमीनोराशिः सउभयतः पृष्ठशीर्षाभ्यांलग्नंसमेत्युद्गच्छति १० अथुनाराशीनांक्रूरसौम्यविभागंस्त्रीपुरुषविभागंचरास्थिरद्विस्वभावविभागं दिगाधिपत्वंहोराद्रेष्काणपतीनांविभागंच मंदाक्रांतयाह क्रूरः सौम्यइति तेमेषादयोराशयोयथाक्रमंक्रूरसौम्यसंज्ञाः तत्रमेषः क्रूरवृषः सौम्यः मिथुनः क्रूरः कर्कटः सौम्यः एवंसर्वेषांयोज्यं युक्तंकरणीय मित्यर्थः तत्रविषमराशयः क्रूरसंज्ञाः समराशयः सौम्यसंज्ञाः प्रयोजनंक्रूरेषुजाताः क्रूरस्वभावाः सौम्येषुजाताः सौम्यस्वभावा भवंति तथाचसत्याचार्यः ओजाः पुरुषज्ञेयाः सौम्याः स्त्रीसंज्ञकाः क्रमात् ओजेषूग्राः पुरुषाः सौम्यायुग्मेषु भवनेषु पुरुषवनितेइति तएवमेषादयो यथाक्रम

गोजाश्विकर्किमिथुनाः समृगानिशाख्याः पृष्ठोदयाविमिथुनाः कथितास्तएव शीर्षोदयादिनबलाश्चभवंतिशे
षालग्नंसमेत्युभयतः पृथुरोमयुग्म १०

पुरुषवनिताख्याज्ञेयाः तेनमेषः पुरुषोनरोवृषोवनितास्त्रीएवंसर्वत्रतेनषड्विषमराशयः पुरुषसंज्ञाः षट्समराशयस्त्रीसंज्ञाः प्रयोजनंपुरुषराशिषुजातास्तेजस्विनः स्त्रीराशिषुजातामृदवोभवंति तेचरागद्विदेहाइति तएवमेषादयोयथासंख्यंचरागद्विदेहाख्याभवंति तत्रमेषश्चरः वृषागस्थिरः मिथुनोद्विदेहोद्विस्वभावः एवंकर्कटादिषुयोज्यम् तेनमेषकर्कटतुलामकराश्चराः वृषसिंहवृश्चिककुंभास्थिराः मिथुनकन्याधनुर्मीनाद्विस्वभावाः प्रयोजनंचरराशिषुजाताश्चरस्वभावा भवंति स्थिरेषुस्थिराः द्विस्वभावेषुमिश्रस्वभावाभवंति तथाचसत्यः चरसंज्ञाः स्थिरसंज्ञाद्विप्रकृतिश्चेतिराशयः क्रमशः राशिस्वभावतुल्याजायते प्रकृत

यः प्रसूतानाम् प्रागादीशाङ्गानि क्रियोमेषः वृषः प्रसिद्धः नृयुग्मिथुनः कुलीरः कर्कटकः एते क्रियवृषनृयुक्कर्कटाः स्वत्रिकोणाभ्यां स्वपंचमनवमाभ्यां सहिताः प्रागादिषु पूर्वाद्यासु चतसृषु दिशासु ईशाः स्वामिनः भवन्ति तेन मेषसिंहधन्विनः पूर्वस्याम् वृषकन्यामकरा दक्षिणस्याम् मिथुनतुलाकुम्भाः पश्चिमायाम् कर्कटवृश्चिकमीना उत्तरस्यामिति प्रयोजनम् ह्नतनष्टादौ चौरादेर्द्रव्यस्य वादिग्विज्ञानं सूतिकागृहद्वारज्ञानं च तथा च यातव्यादिङ्मुखगतस्य स्वत्वेन सिद्धिर्व्यर्थश्रमो भवति दिक्प्रतिलोमलग्ने इति मार्तंडहोरिति मार्तंडः सूर्यः इंदुश्चंद्रः अयुज्योजराशौ यथाक्रमं मार्तंडेंदुहोर्होरेश्वरौ भवतः प्रथमा होरा सूर्यस्य द्वितीया होरा चंद्रस्य होराशब्देनात्र राश्यर्द्धमुच्यते समभे चंद्रभान्वोश्चेति समभे समराशौ चंद्रभान्वोः होरेश्वरौ भवतः प्रथमा होरा चंद्रस्य शशिनः द्वितीया भानोः सूर्यस्य प्रयोजनम् सूर्यहोरायां जातास्तेजस्विनः चंद्रस्य होरायां मृदुस्वभावा भवन्ति

क्रूरः सौम्यः पुरुषवनिते ते चरागद्विदेहाः प्रागादीशाः क्रियवृषनृयुक्कर्कटाः सत्रिकोणाः मार्तंडेंद्वोरयुजि समभे
चंद्रभान्वोश्च होरे द्रेष्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम् ११

द्रेष्काणाः स्युरिति द्रेष्काणो राशित्रिभागाः स्वभवनसुतत्रित्रिकोणाधिपानां संबंधिनो द्रेष्काणा भवंति प्रथमो द्रेष्काणः स्वभवनाधिपतेः आत्मीयभवनाधिपतेः द्वितीयः सुतभवनस्य पंचमस्थानाधिपतेः तृतीयः त्रित्रिकोणाधिपतेः नवमस्थानाधिपतेः तेन मेषस्य प्रथमद्रेष्काणो भौमस्य द्वितीयोऽर्कस्य तृतीयो गुरोः वृषस्य प्रथमः शुक्रस्य द्वितीयो बुधस्य तृतीयः शनेः मिथुनस्य प्रथमो बुधस्य द्वितीयः शुक्रस्य तृतीयः शनेः कर्कटस्य प्रथमश्चंद्रस्य द्वितीयो भौमस्य तृतीयो जीवस्य सिंहस्य प्रथमः सूर्यस्य द्वितीयो जीवस्य तृतीयो भौमस्य कन्यायाः प्रथमो बुधस्य द्वितीयः शनेः तृतीयः शु

कस्य तुलायाः प्रथमः शुक्रस्य द्वितीयः सौरस्य तृतीयो बुधस्य वृश्चिकस्य प्रथमो भौमस्य द्वितीयो जीवस्य तृतीयश्चंद्रस्य धन्विनः प्रथमो जीवस्य द्वितीयो भौमस्य तृतीयो रवेः मकरस्य प्रथमः शनेः द्वितीयः शुक्रस्य तृतीयो बुधस्य कुंभस्य प्रथमः सौरस्य द्वितीयो बुधस्य तृतीयः शुक्रस्य मीनस्य प्रथमो जीवस्य द्वितीयश्चंद्रस्य तृतीयो भौमस्येति प्रयोजनं द्विरुन्नमास्वांशकमंत्रिभागगैरित्यादि ११ अधुना मतांतरेण होरा द्रेष्काणपतीनां लक्षणमिंद्रवज्रयाह केचिदिति केचिद्यवनेश्वरादयः प्रथमां होरां भपस्य लग्नाधिपतेर्वांछंति द्वितीयां लाभाधिपतेरेकादशस्थानाधिपस्य यथा मेषस्य प्रथमहोरा भौमस्य द्वितीया सौरस्य एवं सर्वेषामपि योज्यं द्रेष्काणसंज्ञामपीति स्वद्वादशैकादशराशिपानामपि

केचित्तु होरां प्रथमां भपस्य वांछंति लाभाधिपतेर्द्वितीयां द्रेष्काणसंज्ञामपि वर्णयंति स्वद्वादशैकादशराशिपानां १२

एके द्रेष्काणसंज्ञां वांछंति कथयंति प्रथमं स्वाधिपतेरात्मीयस्वामिनः द्वितीयं द्वादशाधिपतेः तृतीयमेकादशराश्यधिपतेः यथा मेषस्य प्रथमो द्रेष्काणो भौमस्य द्वितीयो जीवस्य तृतीयः सौरस्य एवमन्येषामपि ज्ञातव्यम् तथा च यवनेश्वरः आद्या होरा भवनस्य पत्युरेकादशक्षेत्रपतेर्द्वितीया स्वद्वादशैकादशराशिपानां द्रेष्काणसंज्ञाः क्रमशोत्र चोक्ताः एवं यवनेश्वरमतेन सर्वग्रहाणां होराद्रेष्काणाधिपत्यमस्ति एतदाचार्यस्य नाभिप्रेतम् सत्यादीनामपि तथा च सत्यः ओजेषु रवेर्होरा प्रथमा युग्मेषु चोत्तरा शेषाः इंदोः क्रमशो ज्ञेया जन्मानि चेष्टौ स्वहोरास्थौ राशिस्तद्द्रेष्काणस्तत्पंचमनवम १ ५ ९ भवनपतयः स्युः तेषामधिपतयः स्युः स्वद्रेष्काणे ग्रहा बलिन इति १२ ६७

अथग्रहाणामुच्चनीचविभागंपुष्पिताग्रयाह अजादयइति अजादयोराशयोयथाक्रमेणादिवाकरादीनांग्रहाणांतुंगाःउच्चसंज्ञाः तद्यथाअजोमेषः आदित्यस्योच्चः वृषभोवृषः सचंद्रस्यमृगोमकरः सभौमस्यअंगनाकन्याबुधस्यकुलीरःकर्कटःजीवस्यझषोमीनः शुक्रस्यवणिक्तुलाधरःसौरस्यएतएवराशयोदशादिषुभागेषुसूर्यादीनांपरमोच्चसंज्ञाभवंति तत्रआदित्यस्यमेषोदशमेभागेपरमोच्चः चंद्रस्यवृषःशिखिसंख्येतृतीयेभागेभौमस्यमकरोमनुयुक्संख्ये ऽष्टाविंशेभागेपरमउच्चः मनवश्चतुर्दशतेषांयुगंद्विगुणाष्टनवइत्यर्थः बुधस्यकन्यायास्तिथिसंख्येपंचदशेभागेजीवस्यकर्कटइंद्रियसंख्येपंचमेभागेशुक्रस्यमीनःत्रिनवकसंख्येसप्तविंशेसौरस्यतुलोविंशेनतुसर्वएवराशिरुच्चसंज्ञःसचत्रिंशदंशकः तत्रदशादीनांतदंतर्भूतानांसिद्धैवोच्चसंज्ञातत्किंदशाद्युपादानंसत्यम् किंतुपरमोच्चत्वज्ञानार्थंदशादीनांग्रहणम् अथवासर्वएवराशिःउच्चसंज्ञः तेनोक्तराशिदशाद्यंशसंख्याः कथिताग्रहाः परमोच्चस्थाइत्युच्यंते परमोच्चज्ञानेनस्वोच्चव्यतिरिक्तंप्रयोजनमस्ति तथाचभगवान्गार्गिः स्वोच्चगौरविशीतांशुर्जनयेतांनराधिपम् उच्चस्थौधनिनंख्यातंस्वत्रिकोणगतावपि तथाचयवनेश्वरः स्वोच्चेषुसर्वान्परिगृह्यभागांतिष्ठत्सुसर्वेषुबलाधिकेषु लग्नेक्रमेपूर्णवपुष्यतींदौत्रैलोक्यराज्याधिपतिःप्रसूतः अथेदृशाः एवंविधाः सूर्यादयः परमोच्चस्थितादृष्टव्याः अत्रवृत्तभंगभयात्पूरणप्रत्ययातादशादयोआचार्येणनोक्ताः पूरणप्रत्ययांतत्वमेषांयवनेश्वरवाक्यात्ज्ञायते तथाचयवनेश्वरः सूर्यस्यभागेदशमेतृतीयेचंद्रस्यजीवस्यतुपंचमेंशे सौरस्यविंशेत्वधिसमेकेतुविद्याद्भृगोःपंचदशेबुधस्य भौमस्यविंशेऽष्टयुतेपरोच्चेविंशल्लवेसूर्यसुतस्यनीचाइति तेआदित्यादयःग्रहाः अस्तनीचाःअस्तेनीचं

अजवृषभमृगांगनाकुलीराझषवणिजौचदिवाकरादितुंगाः दशाशिखिमनुयुक्तिथींद्रियांशैस्त्रिनवकविंशतिभिश्चतेस्तनीचाः १३

येषांते अस्तसप्तमः प्रकृतित्वात् स्वोच्चात्सप्तमः प्रत्येकस्यनीचसंज्ञा तद्यथा आदित्यस्यस्वोच्चान्मेषात्सप्तमस्तुलासनीचसंज्ञः एवंचंद्रस्यसप्तमोवृश्चिकः भौमस्यसप्तमः कर्कटः बुधस्यमीनः गुरोर्मकरः शुक्रस्यकन्या सौरस्यमेष इति अत्रापिदशादिषुभागेषु परमनीचस्थाद्रष्टव्याः तथाचयवनेश्वरः स्वोच्चात्तुयामित्रमुशंतिनीचांत्रिंशल्लवांयच्चसमानसंख्या अथदशाएवंविधारव्यादयः परमनीचस्थाभवंति परमनीचस्थाना मनिष्टफलंभवतीतिगार्गिणाप्रदर्शितम् तथाचगार्गिः अंधंदिगंबरंमूर्खं परपिंडोपजीविनं कुरुतामतिनीचस्थौ पुरुषं शशिभास्करा विति.

१३ अधुनाग्रहाणांवर्गोत्तममूलत्रिकोणपरिज्ञानंवसंततिलकेनाह वर्गोत्तमेति चरग्रहादिषु चरस्थिरद्विस्वभावेषु राशिषु यथासंख्य पूर्वमध्यपर्यंततः आदिमध्यावसानतः पूर्वमध्यपर्यंतगावापाठः येनवभागास्ते वर्गोत्तमसंज्ञाभवंति वर्गांशकसमूहेषु उत्तमाः प्रधानां

वर्गोत्तमाश्चरगृहादिषुपूर्वमध्यपर्यंततःशुभफलानवभागसंज्ञाः सिंहोवृषः प्रथमषष्ठहयांगतौलिकुंभास्त्रिकोण
भवनानिभवंतिसूर्यात् १४

वर्गोत्तमाः तद्यथा चरेषुमेषकर्कतुलामकरेषुप्रथमोनवांशोवर्गोत्तमाख्योभवति स्थिरेषुवृषसिंहवृश्चिककुंभेषुमध्यमः पंचमोनवांशोकोवर्गोत्तमः द्विस्वभावेषुमिथुनकन्याधन्विमीनेषुपर्यंततः नवमोनवांशकोवर्गोत्तमः एतदुक्तंभवति प्रत्येकस्मिन् राशौ स्वनवमांशकोवर्गोत्तमाख्य इति शुभफलानिनवभागसंज्ञाइति तेचवर्गोत्तमाख्याः नवभागसंज्ञाः जन्मनिशुभफलदाः शुभफलंददति वक्ष्यतिच शुभंवर्गोत्तमेजन्मइति तथाचसत्यः चरभवनेष्वाद्यंशाः स्थिरेषुमध्याद्विमूर्तिषुतथांत्याः वर्गोत्तमाः प्रदिष्टास्तेष्विहजाताः कुलेमुख्याः वर्गोत्तमाख्यामिति तथाचयवनेश्वरः स्वेस्वेगृहेषु स्वगृहांशकाग्रे वर्गोत्तमास्तेयवनैर्निरुक्ता इतिप्रयोजनम् स्वतुंगवक्रोपगतो स्त्रि संपूर्णाद्

रुत्तमेस्त्वांशकभत्रिभागगैरिति सिंहोवृषइत्यादि सिंहादयोराशयः यथापाठक्रमेणसूर्यादीनांग्रहाणांत्रिकोणभवनानिमूलत्रिकोण भवनानि भवंति तद्यथा सिंहः सूर्यस्यादित्यस्य मूलत्रिकोणसंज्ञावृषश्चंद्रस्य प्रथमोमेषोंगारकस्य षष्ठः कन्याबुधस्य हयांगोधन्वी बृहस्पतेः तौलीतुलाशुक्रस्य कुंभासौरस्येतिप्रयोजनम् उच्चस्वत्रिकोणगैर्बलस्थैस्त्र्याद्यैर्भूपतिवंशजानरेंद्राइत्यादि १४ अधुनालग्नादीनांद्वादशानांस्थानानांतन्वाद्याद्वादशसंज्ञास्तृतीयषष्ठदशमैकादशानांचोपचयसंज्ञावसंततिलकेनाह होरादयइति होरादयोलग्नादयः तेषांयथाक्रमेण तन्वादीनिनामानिभवंतीत्यर्थः तत्र लग्नस्यतनुरित्याख्या द्वितीयस्यकुटुंबं तृतीयस्यसहोत्थः सहोत्थोभ्राता चतुर्थस्यबंधुः बंधुशब्दोज्ञातिवाची पंचमस्यपुत्राख्यः अरिः शत्रुस्तदाख्यः षष्ठः पत्न्याख्यः सप्तमः मरणाख्योऽष्टमः शुभाख्योनवमः आस्पदाख्योदशमः आयाख्यएकादशः रिःफाख्योद्वादशः इतिशब्दः प्रकारार्थद्योतकः

होरादयस्तनुकुटुंबसहोत्थबंधुपुत्रारिपत्निमरणानिशुभास्पदायाः रिःफाख्यमित्युपचयान्यरिकर्मलाभदुश्चिक्य
संज्ञितगृहाणिननित्यमेकेः १५

तेनहोरादीनांतन्वादिपर्यायाः अपिसंज्ञाभूताइत्यवगंतव्यं उपचयान्यरिकर्मलाभदुश्चिक्यसंज्ञितगृहाणीति अरिःषष्ठं कर्मदशमं लाभएकादशंदुश्चिक्यसंज्ञंतृतीयं एतानिगृहाणिस्थानानिउपचयसंज्ञानीति ननित्यमेकेइति एकेकेचिन्नानित्यमुपचयानीतिवर्णयंति तेषामयमभिप्रायः यदिपापग्रहेणस्वस्वामिशत्रुणावादृष्टायुक्ता भवंतितदानोपचयास्तत्रचगर्गादिवाक्यम् अथोपचयसंज्ञास्स्यात्त्रिलाभारिपुकर्मणाम् नचेद्भवंतिदृष्टास्तेपापस्वस्वामिशत्रुभिः एतदाचार्यवराहमिहिरस्यनाभिप्रेतंयतोसौसर्वदोपचयाख्यैस्तैर्व्यवहरति सत्यादयोप्येवं तथाचसत्यः दशमैकादशषष्ठतृतीयसंज्ञानिजन्मलग्नाभ्यांउपचयभवनानिस्युः शेषाण्यृक्षाण्यपचयाख्यानि यवनेश्वरश्च षष्ठतृती-

यंदशमंचराशिमेकादशंचोपचयर्क्षमाहुः होराग्रहस्थानशशांकभेभ्यः शेषाणिचैभ्योपचयात्मकानि प्रयोजनम् उपचयग्रहमित्रस्वोच्चगैः पुष्टमिष्टत्वमपचयग्रहनीचाः रातिगैर्नष्टंसंपादित्यार्थः १५ पुनरपिहोरादीनांसंज्ञांतराणिवसंततिलकेनाह कल्पेति एतेषामपिलग्नादीनांद्वादशानांयथाक्रमंकल्पाद्याः संज्ञाभवंति तद्यथा लग्नंकल्पाख्यंकल्पशब्दः शक्तिवाचीद्वितीयंस्वंतृतीयंविक्रमम् चतुर्थंगृहम् पंचमंप्रतिभा षष्ठंक्षतं सप्तमंचित्तोत्थं अष्टमंरंध्रम् नवमंगुरुम् दशममानम् एकादशंभवं द्वादशंव्ययम् लग्नाच्चतुर्थनिधनेइति लग्नाच्चतुर्थस्थानंनिधनमष्टमंचतेचतुरस्रसंज्ञेचतुरस्राख्ये लग्नात्सप्तमंगृहं द्यूनंदशममर्क्षं दशमराशिमाज्ञाख्यं एताः संज्ञाव्यवहारार्थंज्ञेयाः १६ अथकेंद्राणांसंज्ञातत्स्थराशिबलंचत्रोटकेनाह कंटकेति

कल्पस्वविक्रमगृहप्रतिभाक्षतानिचित्तोत्थरंध्रगुरुमानभवव्ययानि लग्नाच्चतुर्थनिधनेचतुरस्रसंज्ञे द्यूनंचसप्तमगृहंदशमर्क्षमा
ज्ञा१६ कंटककेंद्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थकभानां तेषुयथाभिहितेषुबलाढ्याः कीटनराम्बुचराः पशवश्च १७

सप्तमलग्नचतुर्थानिप्रसिद्धानिखमंदशमम् खमाकाशमध्येयत्कालेयद्राशिर्वर्तते तस्यखभमितिसंज्ञा एतेषांसप्तमलग्नचतुर्थखभानांराशीनांप्रत्येकस्यकंटककेंद्रचतुष्टयइतितिस्रः संज्ञाः तेषुस्थानेषुयथाभिहितेषुयथोक्तेषुकीटनराम्बुचराः पशवश्चराशयोबलाढ्याबलिनोभवंति तद्यथाकीटोवृश्चिकः सप्तमेस्थानेबलीनराः नृराशयः मिथुनतुलाकन्याकुंभधन्विपूर्वार्द्धानराः एतेलग्नेस्थिताबलिनः अंबुचराः जलचरराशयः कर्कटमीनमकरपरार्द्धास्तेचतुर्थस्थानेबलिनः पशवश्चतुष्पदाः मेषवृषसिंहधन्विपरार्द्धमकरपूर्वार्द्धाः एतेदशमस्थाबलिनोभवंतीत्यर्थः तथाचभगवान्गार्गिः नृयुक्तुलाघटः कन्यापूर्वार्द्धंपूर्वमर्द्धंचधन्विनः लग्नस्थाबलिनोज्ञेया एतेहिनरराशयः चतुर्थेकर्कटोमीनोमकरार्द्धंचपश्चिमम् विज्ञयाबलिनोनित्यमेतेहिजलराशयः सप्त

मेषाश्चिकः कीटोबलवान्परिकीर्तितः धन्व्यंतार्द्धजगोसिंहाबलिनःरवेश्चतुष्पदाः अत्रार्द्धशब्देनमकरपूर्वार्द्धमपिगृह्यातइति १७ अधुनापारिशिष्टस्थानानांसंज्ञांतराणिवसंततिलकेनाह केंद्रादिति सर्वस्मात्केंद्राद्द्वितीयस्थानंपणफरम् तेनद्वितीयपंचमाष्टमैकादशस्थानंपणफरसंज्ञा परतश्चसर्वमापोक्लिमम् सर्वस्मात्पणफरात्परंसर्वस्थानमापोक्लिमंतेनतृतीयषष्ठनवमद्वादशस्थानानांमापोक्लीमेतिसंज्ञा हिबुकमंबुसुखंचवेश्म वेश्मशब्दोगृहपर्यायः वेश्मेतिचतुर्थस्यप्राक्संज्ञाभिहितातस्यैवहिबुकसंज्ञा अंबुसंज्ञा सुखसंज्ञाच यामित्रमस्तभवनंअस्तभवनंसप्तमस्थानंयतः सर्वएवग्रहाउदयराशेः सप्तमराशावस्तंयांति तदेवास्तभवनंयामित्रंसुतभंत्रिकोणम् सुतभंपंचमस्थानंत्रिकोणसंज्ञं मेषूरणंदशमंदशमस्थानंमेषूरणसंज्ञंच

केंद्रात्परंपणफरंपरतस्तुसर्वमापोक्लिमंहिबुकमंबुसुखंचवेश्म यामित्रमस्तभवनंसुतभं
त्रिकोणंमेषूरणंदशममत्रचकर्मविद्यात् १८ होरास्वामिगुरुज्ञवीक्षितयुतानान्यैश्चवीर्योत्क
टाकेंद्रस्थाद्विपदादयोह्निनिशिचप्राप्तेचसंध्याद्वये

अत्रास्मिन्स्थानेकर्मेत्यपरांसंज्ञाम् विद्यात् जानीयात् १८

अथहोरादीनांबलव्यवहारार्थंप्रमाणंचशार्दूलविक्रीडितेनाह होरेति होरालग्नंस्वामिनातत्पतिनावीक्षितादृष्टावावीर्योत्कटाबलवतीभवेति तथागुरुणाजीवेनवीक्षितायुताचबलवतीभवति ज्ञेनबुधेनवीक्षितायुतावावीर्योत्कटाबलवतीभवति यदिनान्यैरनुक्तैः युक्तादृष्टावानान्यैश्चेति नान्यैर्ग्रहैः स्वामिगुरुज्ञवर्जितैः शेषैर्यदियुतादृष्टानभवति तदावीर्योत्कटोअथवायद्युक्तानुक्तैर्मिश्रैर्युतादृष्टाभवति तदामध्यबला अर्थादेवस्वामिगुरुज्ञवर्जिता अन्यैर्युतादृष्टाबलहीनाभवति तथाचबादरायणः जीवस्वनाथशशिजैर्युतादृष्टाबलवती भवतिहोराशेषैर्बलहीनाः

स्यादेवंभिन्नेस्तु मध्यबला बलहीना यदिसर्वैर्नचेक्षिता नैवयुक्तावा केंद्रेइति वीर्योत्कटा इत्यनुवर्तते अत्रादिशब्दोलुप्तोद्रष्टव्यः केंद्रस्थाःसर्वएवराशयोबलिनोभवंति पणफरस्थामध्यबलाः आपोक्लीमस्थाहीनबलाः अत्रकेचित्तुकेंद्रपणफरापोक्लीमानांद्विपदचतुष्पदकीटानांयथाक्रमंबलवत्वंव्याचक्षते तदयुक्तम् यस्माद्बादरायणः केंद्रस्थानिबलाःस्युर्मध्यबलाः पणफराश्रितास्तेयाःआपोक्लीमस्थाःसर्वेहीनबलाराशयः कथिताइति द्विपदादयोन्हिर्निशिसंप्राप्तेचसंध्याद्वयेइति वीर्योत्कटाइत्यनुवर्तते द्विपदादयोद्विपदचतुष्पदकीटाःयथाक्रममन्हिनिशिप्राप्तेचसंध्याद्वयेवीर्योत्कटा भवंति अन्हिदिनेद्विपदाबलिनः निशिरात्रौचतुष्पदाः संध्याद्वयेकीटाः अत्रनकेवलंवृश्चिकः कीटः यावदाप्याःकीटग्रहणेनज्ञेयाः अत्रचश्रीदेवकीर्तिः मिथुनतुलाकुंभकन्यादिवाबलाधन्विनश्चपूर्वार्द्धम् अजवृषसिंहारात्रौमृगहययोःपूर्वपश्चार्द्धे वृश्चिकमीनकुलीरामकरांत्या

पूर्वार्द्धेविषयादयः कृतगुणामानंप्रतीपंचतद्दुश्चिक्यंसहजंतपश्चनवमंत्वाद्यंत्रिकोणंचतत् १९

र्द्धंचसंध्यायामिति पूर्वार्द्धेविषयादयः कृतगुणाइति विषयाणि इंद्रियाणि तानिपंचतदादयः पंचषट्सप्ताष्टनवदशयावत् एतेसर्वेकृतगुणाश्चतुर्गुणिताः पूर्वार्द्धेमानंकस्यभकृतत्वाद्भचक्रस्यपूर्वार्द्धेप्रथमराशिषट्केइत्यर्थः मेषादीनांषण्णांमानंप्रमाणंचक्रेपूर्वार्द्धेमेषादीनांराशीनांषण्णांप्रमाणंतदवप्रतीपवत्प्रतीपंविपर्ययात्तुलादिषुषट्सुकृतप्रमाणं तद्यथा विषयादयः ५।६।७।८।९।१० एतेचतुर्गुणाजाताः २० २४ २८ ३२ ३६ ४० एतेक्रमेणषण्णांमेषादीनांमानं व्यत्ययाच्चतुलादीनांमानमिति तथाचसत्यः चतुरोत्तरोत्तरोत्तराःस्युर्विंशति भागाभवंति मेषाद्येषुभषट्केषुक्रमात् मानमिहार्द्धेपूर्वेषुभषट्केषुमीनाद्येपश्चाच्चोत्क्रमादर्द्धे भागास्यवहाराश्च क्षेत्रेभागेनैकेनकालेदशघ्नाश्चषट्काभवंति यस्मा

द्याः कलाः क्षेत्रलिप्ताः साकालेप्राणाइति यस्माद्वृद्धब्रह्मगुप्तेनोक्तम् लंकासपश्चिमगम्प्राणेनकलांगमंडलंभ्रमतीति एवमेते भागादशगुणिताश्चषड्भा भवंतितत्रैतज्ज्ञानम्कालेयावद्घटिकास्ताः षष्ट्याधिकेनशतत्रयेणगुणिताः प्राणाभवंति क्षेत्रेचतावंत्यएवलिप्तास्तासांषष्ट्या भागमपहृत्यषड्भागाः क्षेत्रेभवंति एवंमेषादीनांप्रमाणभागादशगुणिताश्चषड्भाभवंतितेनचषड्शतद्वयंमेषमीनयोः प्रमाणएवंचत्वारिंशदधिकंशतद्वयंवृषकुंभयोः शतद्वयमशीत्यधिकंमिथुनमकरयोः शतत्रयंविंशत्याधिकंकर्कटधनुषोः शतत्रयंषष्ट्यधिकंसिंहवृश्चिकयोः शतचतुष्टयंकन्यातुलयोः एतएवषड्भादशविभक्ताभावत्वेन परिकल्पिताः यतः क्षेत्रेदशभिश्चषट्कैर्भागोभवतिननुचरदलवशात्प्रतिदशमन्यरूपेषुराशिषुदयेषुगणितस्कंधसिद्धेषुकिमर्थमेकरूपं तदुदयप्रमाणंदर्शितमाचार्येण अत्रोच्यते नष्टचिंतादिष्वपरिज्ञानायपुरुषाणामवयवानांचिन्हे ह्रस्वदीर्घत्वज्ञानयोरुपयुज्यते तथाचयवनेश्वरः आद्यंतराशेरुदयप्रमाणंद्वौद्वौमुहूर्तौनियतंप्रदिष्टौक्रमोत्क्रमाभ्यामपिपंचमःस्याच्चक्रार्द्धयोर्विद्ध्युदयप्रमाणम् एवंप्रमाणानिगृहाणि बुध्वाह्रस्वानिमध्यानितथायतीनि द्रेक्काणभेदैः सदृशीकृतानिमार्गप्रमाणानिविकल्पयंति अंगभागकल्पनावक्ष्यति कादिविलग्नविभक्तभगात्रइति यत्रयस्मिन्नंगेदीर्घराशिर्भवति दीर्घाधिपोवाग्रहस्तदंगमतीवदीर्घंभवति एवंमध्यमयोर्मध्यमंह्रस्वयोर्ह्रस्वमिति तथाचसारावल्याम् ह्रस्वास्तिमिगोजघटामिथुनधनुः कर्किमृगमुखास्तुसमाः वृश्चिककन्यामृगपतिवणिजोदीर्घाः समाख्याताः एभिर्लग्नादिगतैः शीर्षप्रभृतीनिसर्वजंतूनाम् सदृशानिचजायंतेगगनचरैश्चैवतुल्यानितथाचसत्यः दीर्घाधिपतिर्दीर्घगृहेस्थितोऽवयवदीर्घंकुरुते एवमादिष्वर्थेष्वेतैर्विकल्पनाकार्या लग्नादयनिरूपणानिगणितस्कंधसिद्धांतैरेवकार्यैति दुश्चिक्यंसहजमितिसहजस्यतृतीयस्थानस्य दुश्चिक्यसंज्ञा तपश्चनवमामिति नवमस्यचतपःसंज्ञा त्र्याद्यंत्रिकोणंचतत् तदेवनवमस्थानं त्र्याद्यंत्रिकोणम् त्रिशब्द आद्योयस्यत्रिकोणस्यतत् त्र्याद्यंत्रिकोणमित्य

र्थः त्रिकोणंच तदेवनवमांशमिति १९ अधुनाराशिवर्णान्मंदाक्रांतयाह रक्तइति प्रथमभवनंमेषः तदाद्येषुमेषादिषुराशिषुयथाक्रमंतेवर्णाभवेयुः तत्रमेषोरक्तोलोहितवर्णः वृषःश्वेतः शुक्लः मिथुनः शुकतनुनिभः हरितइत्यर्थः कर्कटः पाटलीपुष्पवर्णः ईषत्कृष्णरक्तइत्यर्थः सिंहोधूम्रपाण्डुरीषत्शुक्लः कन्याचित्रानानावर्णाइत्यर्थः तुलाकृष्णाः वृश्चिकःकनकसदृशःसुवर्णवर्णः धन्वीपिंगलः पीतवर्णः मकरः कर्बुरः श्वेतरक्तः शुक्लकपिलव्यामिश्रवर्णः कुंभो बभ्रुः नकुलवर्णसदृशः मीनः स्वच्छवर्णोमत्स्यवर्णइतिप्रयोजनम् वियोनिवर्णविज्ञानम् लग्नांशकादितिवक्ष्यति प्लवत्वस्वाम्याशाख्यामिति स्वामिनः आशास्वाम्याशा आशादिक् तत्रप्लवत्वंप्लवस्यभावः प्लवत्वंसर्वस्यराशेः स्वाम्याशायांप्लवत्वंनिम्नत्वमित्यर्थः यथामेषवृश्चिकयो

रक्तः श्वेतः शुकतनुनिभः पाटलोधूम्रपांडुश्चित्रः कृष्णः कनकसदृशःपिंगलःकर्बुरश्च बभ्रुः
स्वच्छः प्रथमभवनाद्येषुवर्णाःप्लवत्वंस्वाम्याशाख्यंदिनकरयुताद्भाद्द्वितीयंचवेशिः २०

भौमोधिपतिः तस्यदक्षिणाशादिक् तत्रतौप्लवसंज्ञौ वृषतुलयोःशुक्रोधिपतिः तस्याग्नेयीदिक् तत्रतौप्लवसंज्ञौ मिथुनकन्ययोर्बुधोधिपतिस्तस्योत्तरादिक् तत्रतौप्लवसंज्ञौ कर्कटस्यचंद्रोधिपतिस्तस्यवायवीदिक् वायव्यांप्लवत्वं सिंहस्यादित्योधिपतिस्तस्यपूर्वादिक् तस्यपूर्वस्यांप्लवत्वम् धन्विमीनयोर्जीवोधिपतिस्तस्यैशानीदिक् तत्रतौप्लवसंज्ञौ मकरकुंभयोः सौरोधिपतिस्तस्यपश्चिमादिक् तत्रतौप्लवसंज्ञौ एवंराशिस्वामिनोयादिक् तस्यतत्रप्लवो १२
ज्ञेयः प्रयोजनम् हृतनष्टादिषु तद्दिग्गमनंचोरादेः अन्यच्चयात्रायामुपयुज्यते तथाचसारावल्याम् भवनाधिपदिग्ग्रामप्लवइहयवनैःप्रबंधतः

कथितः तत्सूवगो विनिहन्यादचिरेणमहीपतिः शत्रूनिति दिनकरसुताद्वा द्वितीयंचवेशिः दिनकरः सूर्यः तेनयुतोयोराशिस्तस्माद्द्वितीयोवेशिसंज्ञः प्रयोजनम् यात्रायांवक्ष्यति वेशिर्विलग्नोपगतोपियास्योइति तथाच वशिस्थानेचसद्ग्रहइत्यादि अत्रसंज्ञाध्यायेयासंज्ञाउक्तास्ताः द्विप्रकाराः तत्र काश्चित्संज्ञामात्रप्रयोजनाकाश्चिन्निदर्शनप्रयोजना तत्रेमाः संज्ञामात्रप्रयोजनाः यथालग्नस्यहोरा तृतीयस्यदुश्चिक्यम् चतुर्थस्यहिबुकम् पंचमस्यत्रिकोणम् सप्तमस्यद्यूनम् नवमस्यत्रिकोणसंज्ञा दशमस्यमेषूरणम् द्वादशस्यरिःफम् चतुर्थाष्टमयोश्चतुरस्रसंज्ञा लग्नचतुर्थसप्तमदशमानां कंटककेंद्रसंज्ञा चतुष्टयसंज्ञाच तथाद्वितीयपंचमाष्टमैकादशस्थानानांपणफरसंज्ञाः तृतीयषष्ठनवमद्वादशानामापोक्लिमसंज्ञाः एताःसंज्ञामात्रप्रयोजनाः इमाश्चफलनिर्देशप्रयोजनाः तत्रलग्नस्यतनुःसंज्ञाकल्पसंज्ञाच तेनलग्नाच्छरीरवृद्ध्यन्वेषणंचकार्यम् द्वितीयस्यकुटुंबसंज्ञास्वसंज्ञाच तेनतस्मात्ज्ञातिधनान्वेषणंकार्यम् तृतीयस्यसहजसंज्ञाविक्रमसंज्ञाच तेनतस्माद्भ्रातृणांपुरुषार्थस्यचान्वेषणंकार्यम् चतुर्थस्यबंधुसंज्ञावेश्मसंज्ञासुखसंज्ञाच तेनतस्माद्बंधुसुखगृहाणांचान्वेषणंकार्यम् पंचमस्यबुद्धिसंज्ञापुत्रसंज्ञाच तेनतस्माद्बुद्धिपुत्रयोरन्वेषणंकार्यम् षष्ठस्यारिसंज्ञाक्षतसंज्ञाच अरिशब्दः शत्रुवाचीक्षतशब्दोव्रणवाची तेनतस्मादरातिव्रणान्वेषणंकार्यम् सप्तमस्यदारचित्तोत्थयामित्रसंज्ञाचदारशब्दोभार्यावाची चित्तोत्थशब्दः कामवाची यामित्रशब्दोविवाहवाची तेनतस्माद्भार्याकामविवाहान्वेषणंकार्यम् अष्टमस्यमरणरंध्रसंज्ञाच मरणंमृत्युः रंध्रशब्दः पापपर्यायः तेनतस्मान्मरणपापान्वेषणंकार्यम् नवमस्यशुभगुरुतपःसंज्ञाच शुभशब्देनात्रधर्मोज्ञेयः गुरवोमातृपितृपूर्वकाः तपोव्रतम् तेनतस्माद्धर्ममातृपितृपूर्वकाणांगुरूणांतपसश्चान्वेषणंकार्यम् दशमस्यास्पदकर्मसंज्ञाच आस्पदशब्दःस्थानवाची कर्मास्पदसंज्ञेसुप्रसिद्धे तेनतस्मात्क्रियाभावान्वेषणंकार्यम् एकादशस्यभवायसंज्ञाभवशब्दोत्रविद्यागुणसंपत्प्राप्तिवाची आ-

यशब्दार्थवाची तेनतस्मात्तयोरन्वेषणंकार्यम् व्ययइतिद्वादशस्याख्यातेनतस्माद्व्ययान्वेषणंकार्यम् तृतीयषष्ठदशमैकादशस्थानानां उपचयसंज्ञाउपचयकारकत्वात् इदंचतेषांउपचयकारत्वं यदितत्रस्थाः पापा अपिशुभफलप्रदाभवंति तथाहि षष्ठंस्थानंविनासौम्याः सर्वत्रभावविवृद्धिकराः षष्ठस्थाः पापाः पुनः अरिहानिंतुकुर्वंतिस्वनहानिंच पापास्तूपचयस्थाः भावविवृद्धिंकुर्वाणाअपिषष्ठेषुपचयस्थानंप्राप्य तच्चिंत्यदुष्टभावयापरिस्वतयोरपिहानिंकुर्वंति यतस्तेषामुपचयवराइत्यन्वर्थसंज्ञा उपचयस्थास्तुपापाः भावहानिंकुर्वाणा अपिअष्टमद्वादशस्थानंनित्यमनिष्टभावस्यानिष्टत्वात् स्थानस्योपचयात्मकत्वाद्वृद्धिंप्रापयंति तथाचश्रीदेवकीर्तिः सौम्याःषष्ठेपापास्तन्वर्थरूपस्वारिधर्मधीद्यूनेकुर्युर्भावविपत्तिंशेषोगताश्चतद्वृद्धिमिति एतद्विशेषवचनम् विनासर्वत्रोपतिष्ठंतेति २०

इतिश्रीभट्टोत्पलविरचितायां बृहज्जातकटीकायांराशिभेदः प्रथमोध्यायः १ छ

अथातोग्रहयोनिप्रभेदाध्यायोव्याख्यायते तत्रचराचरंजगद्ग्रहमयमेवप्राक्कालाख्यस्यपुरुषस्यकालाङ्गानीत्येवंमेषादिनाराशिनक्षत्रमयोगविभागः प्रदर्शितः तत्प्रदर्शनेनचग्रहमयएवासौप्रदर्शितोभवति यतोराशिस्वामिनोग्रहाएव अधुनातस्यात्मादीन्भावान्ग्रहमयानेकजगत्पालकांस्तथाराजादीन्ग्रहमयानेवचशार्दूलविक्रीडितेनाह कालात्मादिनकृदिति कालस्यात्माकालात्मादिनकृत्सूर्यः अस्यैवतुहिनगुश्चंद्रोमनः तुहिनेनहिमेनसदृशाः शीतलाः गावोरश्मयोयस्यतुहिनगुः सत्वंकुजोभौमः सत्वस्यलक्षणम् अधिकारकरंसत्वव्यसनाभ्युदयागमेसत्वशब्दोत्रशौर्यपर्यायः यच्चसिंहादीनामस्ति तथाच एकाकिनिवनवासिनिराजलक्षणानीति शास्त्रज्ञेसत्वस्थितेमृगपतौराजेतिगिरः परिणमंति उत्कृष्टतरस्वभावेनेत्यर्थः ज्ञोबुधोवचोगिरः जीवोबृहस्पतिः ज्ञानसुखेज्ञानंचसुखंचज्ञानसुखेसितः शुक्रोमदनः कामः दिनस्येशोदिनेशः सूर्यः तस्मात्मजः पुनः शनैश्चरोदुःखम् अत्रकालग्रहणंकालस्यसर्वगतत्वप्रदर्शनार्थम् अत्रनकेवलका

लपुरुषस्यमेषाद्याराशयः शिरःप्रभृत्यंगविभागेनस्थितायावदादित्यादयश्चात्मविभागेनसर्वस्यजगतःस्थिताः प्रयोजनम् पीडितेग्रहेदेहवतोपितदंगभावात्मगुणपीडनंवक्तव्यम् पुष्टेपुष्टिरिति नकेवलंयावज्जन्मनिबलवद्भिर्ग्रहैरेतएवभावाआत्मादयः शुभाभवंति दुर्बलैर्दुर्बलाः किंतुसौरस्यविपरीतम् तथाचसारावल्याम् आत्माद्योगगनगैर्बलिभिर्बलवत्तराः दुर्बलैर्दुर्बलाज्ञेयाविपरीतंशनेः स्मृतमिति राजानावित्यादिरविरादित्यः शीतगुश्चंद्रः एतौराजानौनृपौ क्षितिर्भूमिरस्याःसुतः पुत्रोंगारकः सेनानीःसेनापतिः कुमारोबुधः कुमारोयुवराजः राजपुत्रइतिकेचित् सूरिर्बृहस्पतिः दानवपूजितः शुक्रः एतौसचिवौमंत्रिणौ सहस्रांशुः सूर्यस्तस्माज्जातःशनैश्चरः सप्रेष्योदासः ननुजगत्पालनकरणेशनैश्चरः प्रेष्यःकिमत्रोच्यते प्रेष्योपिस्वकर्मणा पालकएवप्रयोजनम् जन्मनिप्रश्नकालेवाबलवानुपचयस्थोग्रहोभवति तदुक्तोराजादिकस्तस्यकार्यसाधकोभवति अन्यथाहानिकरः १ अधुनाव्यवहारार्थंसूर्यचंद्रांगारकशनैश्चराणांसंज्ञाशालिन्याहहेलिरिति सूर्यआदित्योहेलिसंज्ञः चंद्रमाःशीतरश्मिसंज्ञः शीताः रश्मयःकिरणाः यस्यसः इंदुपुत्रोबुधःसहेम्नाविज्ज्ञोबोधनः एतास्तस्यसंज्ञाःअवनिर्भूस्तस्याअपत्यस्त्वावनेयोभौमः सआरः वक्रःक्रूरदृक्एताःभौमस्यसंज्ञाःसूर्यपुत्रःसौरःकोणःमंदःअसितःएताःशनैश्चरसंज्ञाः २

कालात्मादिनकृन्मनस्तुहिमगुः सत्वंकुजोज्ञोवचोजीवोज्ञानसुखेसितश्चमदनोदुःखंदिनेशात्मजः
राजानौरविशीतगूक्षितिसुतोनेताकुमारोबुधः सूरिर्दानवपूजितश्चसचिवौप्रेष्यः सहस्रांशुजः १
हेलिः सूर्यश्चंद्रमाःशीतरश्मिर्हेम्नाविज्ज्ञोबोधनश्चेंदुपुत्रः आरोवक्रः क्रूरदृक्चावनेयः
कोणोमंदः सूर्यपुत्रोसितश्च २

जीवोंगिराः सुरगुरुर्वचसांपतीज्यः शुक्रोभृगुर्भृगुसुतः सित आस्फुजिच्च राहुस्तमोगुरसुरश्च शि
खीतिकेतुः पर्यायमन्यमुपलभ्य वदेच्चलोकात् ३ रक्तःश्यामोभास्करोगौरइंदुर्नात्युच्चांगोरक्तगौर
श्चवक्रः दूर्वाश्यामोज्ञोगुरुर्गौरगात्रः श्यामःशुक्रोभास्करिःकृष्णदेहः ४

अधुनागुरुशुक्रराहुकेतूसंज्ञावसंततिलकेनाह जीवइतिजीवोबृहस्पतिः सएवांगिराः सुरगुरुः सुराः देवाः तेषांगुरुः वचसांपतिः ईज्यः पूज्यः देवाः एताः बृहस्पतेः संज्ञाः शुक्रोभार्गवः सएवभृगुः भृगुसुतः सितः आस्फुजित् चशब्दः समुच्चयार्थः एताः शुक्रस्यसंज्ञाः राहुः स्वर्भानुः सएवतमः अगुः नविद्यते गावोरश्मयोयस्यसः अरश्मिरित्यर्थः असुरोदैत्यः एताराहोःसंज्ञाः शिखीतिकेतुः केतोः शिखीतिसंज्ञा शिखाविद्यतेयस्यसशिखी अन्यंपर्यायंलोकादन्यशास्त्रात् उपलभ्यवदेत्ब्रूयात् यथारविस्तीक्ष्णांशुर्दिवाकरोभास्वांस्तीक्ष्णरश्मिर्भानुर्विवस्वानित्यादिकाः सूर्यस्यशशांकः तुहिनगुर्मृगांकः शशीनिशाकरोनक्षत्रपतिरित्याद्याश्चंद्रस्यकुजः लोहितोभौमः क्ष्मातनय इत्याद्याभौमस्यसौम्योरौहिणेयश्चांद्रिर्मृगांकतनयइंदुज इत्याद्याबुधस्यसूरिः सुरेंद्रपूज्योवाक्पतिर्देवपुरोहित इंद्रमंत्रीत्याद्यागुरोः भार्गवः उशनादैत्येज्यः असुरगुरुः दैत्यकविरित्याद्याशुक्रस्ययमः रविजः पातंगिः छायासुतः इत्याद्याः सौरस्यसैंहिकेयः स्वर्भानुः दानवः अमृतचोरः विधुंतुदइत्याद्याराहोरिति ३ अधुनाग्रहवर्णानुशास्तिन्याह रक्तश्यामइति रक्तश्चासौश्यामः पाटलपुष्पवर्ण इत्यर्थः एवंविधोभास्करः आदित्यः इंदुश्चंद्रोगौरः श्वेतवर्णप्रायः वक्रोंगारकोनात्युच्चानातिदीर्घः रक्तगौरः पद्मपत्राभः ज्ञोबुधः सदूर्वाश्यामः शाद्वलमृणालवर्णः गुरुर्बृहस्पतिः सगौरगात्रोगौरशरीरः शुक्रः श्यामवर्णोनातिगौरः

नातिकृष्णः भास्करिः सौरः सत्कृष्णदेहोसितशरीरः वर्णप्रयोजनम् सर्वग्रहेषु योबलवान् तद्वर्णस्तत्कालजातोभवतिप्रश्नकालेचौरादेरपि ४

अधुनाग्रहाणांवर्णस्वाम्येग्रहदेवताश्चादिक्स्वाम्यंसौम्यपापत्वञ्च शार्दूलविक्रीडितेनाह वर्णा इति ताम्रादयोवर्णाः सूर्यादिग्रहनाथाः सूर्यादयोग्रहनाथाःस्वामिनोयेषांते ताम्रवर्णस्यादित्योनाथः स्वामीसितस्य श्वेतस्यचन्द्रः अतिरक्तस्यातिलोहितस्यभौमः हरितस्यशुकवर्णस्यबुधः विशेषणञ्चासमन्तात्पीतस्यहरिद्रासदृशस्यजीवः चित्रस्यनानावर्णस्यशुक्रः असितस्यकृष्णवर्णस्यसौरः प्रयोजनन्तु नष्टादिद्रव्यवर्णज्ञानम् जन्मनि प्रश्नकालेचोक्तद्रव्यलाभः अन्यथाहानिः ग्रहपूजायांतद्वर्णकुसुमपूजा तथाचयाज्ञवल्क्यः वर्णैर्मंडलकेषुचेति वन्हीत्यादिसूर्यादिना-

वर्णास्ताम्रसितातिरक्तहरितव्यापीतचित्रासितावन्ह्यंब्वग्निजकेशवेंद्रशचिकाः सूर्यादिनाथाः क्रमात्
प्रागाद्याऽरविशुक्रलोहिततमःसौरेन्दुवित्सूरयः क्षीणेंद्वर्कमहीसुतार्कतनयाः पापाबुधस्तैर्युतः ५

थाइत्यनुवर्तते सूर्यादीनांनाथाः सूर्यादिनाथाः आदित्यस्यवन्हिरग्निर्नाथःस्वामीचंद्रमसोंबुजलम् भौमस्याग्निजःकुमारःस्वामिकार्तिकेयइत्यर्थः बुधस्यकेशवोविष्णुः गुरोरिंद्रः शतक्रतुः शुक्रस्यशचींद्राणी सौरस्यकः प्रजापतिःब्रह्माइत्यर्थः प्रयोजनम् ग्रहपूजायांग्रहोक्तदेवताः पूज्याः तथाचयवनेश्वरः देवाग्रहाणांजलवन्हिविष्णुप्रजापतिस्कंदमहेंद्रदेवी चंद्रार्कचंड्यर्कजभौमजीवशुक्राश्वयक्षेषुयजेतशश्वत् तथाचौरनामानयनेबलवद्ग्रहोदेवतामाराधनाम् तथाचयाचार्याग्रहदेवतासंपूज्य तद्दिशंयायात्. तथाचसारावल्याम् ताम्रसितारक्तहरीतपीतविचित्रासिताइनादीनाम् पावकजलगुहकेशवशक्रशचीवेधसःपतयः पूर्वादिग्रहदेवास्तन्मंत्रैःसमभिपूज्यतामाशाम् धनकनकगजवाहनादीन् प्रा-

प्रांति नृपारितः शीघ्रं प्रागाद्याइति प्रागाद्याः पूर्वप्रथमादिशस्तासांपूर्वादीनांरव्यादयोनाथाः तत्रपूर्वस्यांदिशिरविरादित्योधिपतिः पूर्वदक्षिणस्यशुक्रः दक्षिणस्यांलोहितोंगारकः दक्षिणपश्चिमायांतमोराहुः पश्चिमायांसौरिः शनैश्चरः पश्चिमोत्तरस्यामिंदुश्चंद्रः उत्तरस्यांवित्बुधः उत्तरपूर्वस्यांसूरिर्बृहस्पतिः प्रयोजनम् केंद्रस्थैर्ग्रहैः सूतिकागृहद्वारज्ञानम् हृतनष्टादिषुचौरादेर्गमनंच क्षीणेंद्वर्केतिक्षीणश्चासाविंदुश्च क्षीणेंदुः कृष्णाष्टम्यर्द्धाच्छुक्लाष्टम्यर्द्धंयावत् क्षीणश्चंद्रः परतः पूर्णः आयुर्दायविधौ कृष्णपक्षत्रयोदश्यांतावत्प्रभृतियावदमावास्यांतेसूर्यमंडलात् नोद्गतस्तावत् क्षीणइति यस्माद्यवनेश्वरः चंद्रस्यपापत्वनकदाचिदपीच्छतितद्वाक्यम् मासेतुशुक्लप्रतिपत्प्रवृत्तेः

बुधसूर्यसुतौनपुंसकाख्यौ शशिशुक्रौयुवतीनराश्चशेषाः

पूर्वेशशीमध्यबलोदशाहे श्रेष्ठोद्वितीयेल्पबलस्तृतीयेसौम्यैस्तुदृष्टोबलवान्सदैव तथाचक्रूरः ग्रहोर्कःकुजसूर्यजौचपापौशुभाः शुक्रशशांकजीवाः सौम्यश्चसौम्योव्यतिमिश्रितोन्यैर्वर्गैस्तुतुल्यप्रकृतित्वमेतीति तस्मादेतावत् क्षीणइति अर्कआदित्यः महीसुतोंगारकः अर्कतनयःसौरः एतेसदैवपापाः बुधस्त्वेर्युतस्तेषामेकतमेनयुक्तः पापएवसौम्याः शेषाः शुक्लपक्षाष्टम्यर्द्धात् कृष्णपक्षाष्टम्यर्द्धंयावत् चंद्रः सौम्योबुधः पापवीक्षितयुतः पापएवजीवशुक्रौ सदैवसौम्याविति प्रयोजनम् पापसौम्यग्रहबलाज्जातः पापात्मकः सौम्यस्वभावश्चभवति ५ अधुनाग्रहाणांप्रकृतिविभागंमहाभूताधिपत्यंत्रोटकेनाह बुधसूर्यइति बुधश्चांद्रिः सूर्यसुतः शनिः एतौनपुंसकाख्यौनपुंसकनामानौ शशीचंद्रः शुक्रोभार्गवः एतौ

द्वौपुंसलिसंज्ञौ शेषारविजीवभौमानराः पुरुषसंज्ञाः पुरुषनामनः प्रयोजनं जन्मनि चिंतायां हतनष्टादिपु बलवंतः स्वस्वरूपमेव कुर्वंति तेषामुपतापेन तदाश्रितानामुपतापः शिखिभूखपयोमरुद्गणानामिति शिख्यादीनां पंचानां महाभूतानां पंचग्रहाः भूमिसुतादयः क्रमेण वशिनः तद्यथा शिखिनोग्नेर्भूमिसुतोंगारको वशी सोमोग्नेः स्वामीत्यर्थः एवंभूमेर्बुधः खस्याकाशस्य जीवः पयसोंभसः शुक्रः मरुतो वायोः शनैश्चरः गणग्रहणं मंत्ररुक्तपूरणार्थं नत्वादित्यचंद्रयोः कस्मान्नोक्तमित्यत्रोच्यते तयोः पूर्वमेवोक्तं चन्द्रार्कौ तावेव प्रसिद्धौ प्रयोजनम् स्वदशायां महाभूतकृतां छायां व्यंजयंति वक्ष्यंति च छायां महाभूतकृतां च सर्वं इति ६ अधुना ग्रहाणां ब्राह्मणादिवर्णाधिपत्यं गुणविभागं चोपजातिकयाह विप्रादित इति ब्राह्मणादेर्वर्णचतुष्टयस्य-

शिखिभूखपयोमरुद्गणानां वशिनो भूमिसुतादयः क्रमेण ६ विप्रादितः शुक्रगुरू कुजार्कौ शशिबु
धश्चेत्यसितोंत्यजानाम् चंद्रार्कजीवाज्ञसितौ कुजार्की यथाक्रमं सत्त्वरजस्तमांसि ७ ६

स्वामिनो ग्रहाधिपतयः शुक्रो भार्गवः गुरुर्बृहस्पतिः एतौ द्वौ ब्राह्मणानामधिपती कुजो भौमः अर्क आदित्य एतौ द्वौ क्षत्रियाणां शशी चंद्रो वैश्यानां शूद्राणां बुधः असितः शनैश्चरः अंत्यजानां वर्णप्रतिलोमभवानां चांडालमागधनिशाचरादीनां प्रयोजनम् हतनष्टादिषु ग्रहबलाच्चोरादीनां ग्रहोक्तवर्णप्रभावः एषामुपयाने तद्गुणोपधानः तथा च सत्यः गुरुशुक्रौ रविरक्तौ चंद्रः सौम्यः शनैश्चरश्चेति विप्रक्षत्रियविट्शूद्रसंकराणां प्रभुत्वकराः अजयज्ञेयथतुष्टान् प्रीतौ विघ्ननाशने लाभे तथ्यपत्त्यश्च कुर्युः गुणांश्च दोषांश्च पक्षांस्तान् चंद्रार्कजीवा इत्यादि चंद्रः शशी अर्क आदित्यः जीवो बृहस्पतिः एते सत्त्वसंज्ञाः ज्ञो बुधः सितः शुक्रः एतौ द्वौ रजः संज्ञौ कुजोंगारकः आर्किः सौरः एतौ द्वौ तमः संज्ञौ एते यथाक्रमं सत्त्वादिगुणाधिपतयो ग्रहाः प्रयोजनं सत्त्वरज-

स्तमोवाधिंशांशेयस्यभास्करस्ताद्दमितिस्वजातके अन्येपुनः ग्रहबलाद्गुणंयंति तथाचश्रीदेवकीर्तिः बलवाद्रिस्तद्गुणोभवेत् जातइति आ-
न्नाचार्यस्य यवनेश्वरेणसहमतभेदः तेनक्षोभः सात्विकउक्तः तथाच तद्वाक्यं सत्वाधिकाभास्करभौमजीवाभृग्वात्मकोराजसिकः शशीचश-
नैश्चरस्तामसिको बुधस्तुसंयोगतोन्याल्लभतेविशेषात् आचार्यस्यसत्ववचनमभिमतंतथाचसत्वः तामसिकौ कुजसौरी राजसिकौभार्गवः
शशिसुतश्चजीवशशिभास्कराः सात्विकाग्रहवत् प्रकृतयोनृणां एवंयत्रयमाचार्यस्ययवनेश्वरेण सहमतभेदस्तच्चसत्यमसत्यमपि अथपूर्वमत-
मभिहितंसत्वंकुजचंद्रार्कजीवाः पुनःकिमित्युक्तउच्यते इहगुणवचनःसत्वशब्दस्तत्रशौर्यपर्यायः कार्याकार्यप्रवृत्तीनांसिंहादीनामप्यस्तियेन ए-

मधुपिंगलदृक्चतुरस्रतनुः पित्तप्रकृतिःसविताल्पकचः तनुवृत्ततनुर्वातकफः प्राज्ञश्चशशी मृदुवाक्शुभदृक् ८

काकिनोपिवनवासिनः तथाच एकाकिनिवनवासिन्यराजलक्ष्मण्यनीतिशास्त्रज्ञेसत्वोत्थितेमृगपतौराजेतिगिरः परिणमंति अथगुणस्वरूपंयः
सात्विकस्तस्यदयास्थिरत्वंसत्यार्जवंब्राह्मणदेवभक्तिः रजोधिकः काव्यकलाशतस्त्रीसंसक्तचित्तः पुरुषोतिशूरः तमोधिकोवंचयितापरेषांमूर्खोलसः
क्रोधपरोतिनिद्रइति ७ अथचंद्रार्कयोःस्वरूपंत्रोटकेनाह मधुपिंगलदृगिति मधुवत्पिंगलादृष्टिर्यस्यसः ईषत्कातराक्षः चतुरस्रतनुः प्रसारि-
तभुजद्वयप्रमाणसमोच्छ्रायः पित्तप्रकृतिः पित्ताधिकः अल्पकचोविरलकेशः एवंविधः सविता आदित्यः तनुवृत्ततनुरित्यादि तन्विचासौवृ-
त्ताच तनुवृत्ता तादृशीतनुर्यस्यस तनुवृत्ततनुः कृशवर्तुलांगइत्यर्थः अथबहुवातकफः प्रभूतमारुतश्लेष्मा प्राज्ञोमेधावी मृदुवाक्कोमल-
भाषी शुभदृक् दर्शनीयाक्षः एवंविधः शशीचंद्रः ८ ७ ७ ७ ७ ७

अथ अंगारकबुधयोः स्वरूपं स्वागतयाह क्रूरइति क्रूरा दुष्टा दृक् दृष्टिर्यस्य स क्रूरदृग् अंगारकः स च तरुणमूर्तिः नित्यं यौवनोपेताकारविग्रहः उदारो दानापेक्षिकः पित्तबहुलः सुचपलोतीवास्थिरचित्तः कृशमध्यस्तनूदरः एवंविधोंगारकः भौमः श्लिष्टवाक् इत्यादि श्लिष्टवाक् गद्गदभाषी सततहास्यरुचिः नित्यपरिहासशीलः पित्तमारुतकफप्रकृतिर्दोषत्रयोल्बणस्वभावः एवंविधोज्ञो बुधः ९ अथ जीवशुक्रयोः स्वरूपं वंशच्छंदसि केनाह बृहत्तनुरिति बृहत्तनुः स्थूलशरीरः मूर्धजाः केशाः ईक्षणे नयने च कपिलपिंगले च यस्य कपिलकेशकानराक्ष इत्यर्थः श्रेष्ठमतिर्धर्मानुगधज्ञः कफात्मकः कफाधिकशरीरः श्लेष्मात्मा एवंविधो बृहस्पतिः भृगुरित्यादि सुखी नित्यं सुखासक्तः कांतवपुर्दर्शनीयशरीरः सुलोचनः शोभनाक्षः कफानिलात्मा श्लेष्म मारुतप्रकृतिः असितवक्रमूर्धजः असिताः कृष्णा वक्राः कुटिलाः मूर्धजाः केशाः यस्य कृष्णकुटिलकेश इत्यर्थः एवंविधो भृगुः शुक्रः १० अधुना शनैश्चरस्वरूपं स्नाय्वादिसारत्वं च ग्रहाश्रयं वसंततिलकेनाह मंदोलस इति अलसः क्रियास्वपटुः कपिलदृक् कातराक्षः कृशांदुर्बलदीर्घउच्चतरगात्रं यस्य गात्राणि वासः दुर्बलोच्चदेहः स्थूलद्विजो बृहद्दंतः परुषरोमकचः रूक्षतनूरुहकेशः आनिलात्मा वातप्रकृतिः एवंविधो मंदः शनैश्चरः स्नाय्वस्थीत्यादि मंदादीनां ग्रहाणां स्नाय्वादिसारत्वं स्नाय्वस्थीनि प्रसिद्धार्थे देहवतां शनैश्चरादित्यौ स्नायुर्मंदः शनैश्चरः शिरासारः अस्थि अर्कः आदित्यः अस्थिसारः असृग्रुधिरं चंद्रमाः त्वक् चर्म तद्बुधः अथ शब्द आनंतर्यार्थे शुक्र रेतः तच्छुक्रः वसा मेदः तत्सुरेज्यो गुरुः मज्जा च अस्थ्यंतर्गतो धा-

क्रूरदृक् तरुणमूर्तिरुदारः पैत्तिकः सुचपलः कृशमध्यः श्लिष्टवाक् सततहास्यरुचिर्ज्ञः पित्तमारुतकफप्रकृतिश्च ९ बृहत्त
नुः पिंगलमूर्धजेक्षणो बृहस्पतिः श्रेष्ठमतिः कफात्मकः भृगुः सुखी कांतवपुः सुलोचनः कफानिलात्मासितवक्रमूर्द्धजः १०

तुविशेषःसप्तमः ग्रहाणांस्वरूपज्ञानप्रयोजनम् लग्ननवांशपतुल्यतनुः स्यादित्यत्रोपयुज्यतेजन्मकालेयोग्रहोबलवान्तत्सदृशस्तत्स्वरूपस्तत्कालजा तोभवति तद्वदनुसारश्चहृतनष्टादिप्रश्नकालेप्येवंविधधातुरूपाश्चौरादयः व्याधिप्रश्नेयल्लग्नंयच्चलग्नेनवांशकोवर्ततेतत्स्वामिनोबलवशादभिहितदो षप्रभवापीडा ११ अधुनाग्रहाणांस्थानवस्त्रद्रव्यंतत्रप्रभुत्वंशार्दूलविक्रीडितेनाह देवाम्बिति अर्कात्प्रभृतितदादीनांग्रहाणांक्रमात् देवादीनि- स्थानानि तत्रदेवस्थानमादित्यस्य अंबुस्थानंचंद्रमसः अग्निस्थानंभौमस्यविहारभूमिः क्रीडास्थानंबुधस्य कोशोभांडारागारंतत्स्थानंबृहस्प तेः शयनस्थानंशुक्रस्य क्षित्युत्करः अवकरराशिस्तत्स्थानं शनैश्चरस्य एतेषांस्थानानांएतेस्वामिनः प्रयोजनंबलवतिगृहेग्रहोक्तस्थाने

मंदोलसःकपिलदृक्कृशदीर्घगात्रःस्थूलद्विजःपरुषरोमकचोनिलात्मा स्नाय्वस्थ्यसृक्त्वगथशुक्रवसाःसमज्जाःमंदार्क
चंद्रबुधशुक्रसुरेज्यभौमाः ११ देवाम्ब्वग्निविहारकोशशयनक्षित्युत्करेशाःक्रमाद्वस्त्रंस्थूलमभुक्तमग्निकहतंमध्यंदृढंस्फाटि
तम् ताम्रंस्यान्मणिहेमयुक्तिरजतान्यर्काच्चमुक्तायसी द्रेष्काणैःशिशिरादयःशशिरुचज्ञाग्वादिषूद्यत्सुवा १२ ६.

प्रसवज्ञानंहृतनष्टादेश्चौरादेः तद्देवस्थानंद्रव्यस्यचवस्त्रमित्यादि अर्कादिनिसर्वत्रानुवृत्तिः तत्स्थूलतंतुकृतमादित्यस्यवस्त्रं अभुक्तंनवंचंद्रस्य- अग्निनाहतंएकदेशदग्धंभौमस्यकेनांबुनाहतंविक्लिन्नंबुधस्य मध्यंनातिनवंनातिजीर्णंबृहस्पतेः दृढंकालांतरस्थायिशुक्रस्यस्फाटितंजीर्णंशनैश्चर स्यप्रयोजनंसूतिकावस्त्रज्ञानं हृतनष्टादिचिंतायांचौरादेर्बलवद्ग्रहवशाद्वस्त्रज्ञानं ताम्रंस्यादित्यादिताम्रमादित्यस्यचंद्रस्यमणयःभौमस्यहेमसुवर्णंबु धस्ययुक्तिःयुज्यतइतियुक्तिःरीतिःकांस्यादिरजतंरौप्यंबृहस्पतेः मुक्ताशुक्रस्यअयःकृष्णलोहंसीसत्रपुणीचशनैश्चरस्य तथाचानेनैवसूक्ष्मजातकेड

क्रम् अर्कादिताम्रमणिहेमंयुक्तिरजतानि मौक्तिकंलोहंवक्तव्यम् बलवद्भिः स्वस्थानेहेमजीवेपितथाचबादरायणः अर्कस्यताम्रंमणयोहिमांशोर्भौमस्य हेमेंदुसुतस्ययुक्तिः जीवस्यरौप्यंस्वगृहेस्थितस्यतस्यैवहेमोशनसश्चमुक्ता तीक्ष्णांशुदेहप्रभवस्यसीसंकृष्णायसंचप्रवदंतितज्ज्ञाः प्रयोजनंसूतिकागृहे बलवद्ग्रहेद्रव्यकर्ताहृतनष्टादिचिंतायांचतद्द्रव्यनाशादिपरिज्ञानं तच्छुभदशायांतस्मिन्नुपचयस्थेतदाप्तिः उक्ताविपरीतेहानिः द्रेष्काणैरित्यादि अत्रशकारादिभिर्गुपर्यंतैर्वर्णैः संज्ञाद्यैः शनैश्चरप्रभृतीनांगुर्वंतानांवृत्तानुरोधान्निर्देशः कृतः शनैश्चरशुक्ररुधिरचंद्रबुधगुरुषूद्यत्सुलग्नगतेषुशिशिरादयः षडृतवोज्ञेयाः तत्रशकारोपलक्षितः शनैश्चरः तस्मिन्नुदयेलग्नस्थेशिशिरर्तुर्विज्ञेयः शुकारोपलक्षितः शुक्रः तस्मिन्नुदयेवसंतः रुकारोपलक्षितोरुधिरोभौमस्तस्मिन्नुदयेग्रीष्मः चकारोपलक्षितश्चंद्रस्तस्मिन्नुदयेवर्षाज्ञेयः ज्ञोबुधस्तस्मिन्नुदयेशरत् गुकारोपलक्षितोगुरुस्तस्मिन्नुदयेहेमंतः आदित्येप्युदयेग्रीष्मः तथाचबादरायणः ग्रीष्मंमध्यंप्रवदंति कुजार्कावितिद्रेष्काणैरित्यस्यवाइत्यनेनव्यवहितेनसंबंधः द्रेष्काणैर्वोदयाद्भिः शनैश्चरादिसंबंधिभिः शिशिराद्याज्ञेयाः एतदुक्तंभवति लग्नेग्रहासंभवेशनैश्चरद्रेष्काणेलग्नगतेशिशिरः एवंशुक्रद्रेष्काणेवसंतः-भौमद्रेष्काणेग्रीष्मः रविद्रेष्काणेग्रीष्मः एवंचंद्रद्रेष्काणेवर्षाः बुधद्रेष्काणेशरत् जीवद्रेष्काणेहेमंतः अत्रचमुख्योग्रहोदयेनर्तुनिर्देशः कर्तव्यः ततदभावेद्रेष्काणेनर्तुर्ज्ञातव्यम् वन्हीनामुदयोपिद्रेष्काणेनैवकेचिद्ग्रहाणामुदयेबलवद्ग्रहेणेतिव्याचक्षते तथाचमाणित्थः रव्याद्येलग्नोपगतेयोबलवान्तद्ग्रहर्तुर्निर्देशइति तत्रैतज्जातलग्नेयोग्रहःस्थितस्तदुक्तऋतुर्वाच्यः बहुषुलग्नगतेषुयोबलवान् ग्रहाभावेद्रेष्काणपतेर्ऋतुनिर्देशः प्रयोजनम् नष्टजातकेऋतुनिर्देशः इतिहृतनष्टादिचिंतायांचेति अत्राचार्येणग्रहाणांशाखाधिपत्यंनोक्तम् उक्तंचस्वल्पजातके ऋगथर्वसामयजुषामधिपागुरुसौम्यभौमसिताः ऋग्वेदाधिपतिर्गुरुः अथर्ववेदाधिपतिःसौम्योबुधः सामवेदाधिपतिर्भौमः यजुर्वेदाधिपतिःशुक्रःप्रयोजनंबलवतिशाखाधिपे

ब्राह्मणादिस्तच्छाखापाठको भवति ब्राह्मणे चौरेज्ञाने शाखाविज्ञानं अनिष्टस्थानस्थे ग्रहे तन्मंत्रैः शांतिरिति १२ अथग्रहाणां दृष्टिस्थानानि निसर्गदृष्टिफलानि च महर्षिण्याह त्रिदशेति यस्मिन्स्थाने ग्रहाः स्थितास्तस्मात्त्रिदशादीनि स्थानानि चरणाभिवृद्धितः पादवृद्ध्याऽवलोकयन्ति ग्रहो यस्मिन्राशौ स्थितः तस्माद्यत्तृतीयदशमं राशीयौतौ चरणपादेन चतुर्थभागदृष्ट्याऽवलोकयन्ति एवं त्रिकोणस्थौ नवपंचमस्थानगतावर्धदृष्ट्या चतुरस्त्रेऽष्टमचतुर्थे अष्टमचतुर्थस्थानस्थौ पादहीनदृष्ट्या सप्तमगं गृहं परिपूर्णदृष्ट्या चरणाभिवृद्धित इत्यत्राभिशब्दो वीप्सायां द्योतयति चरणवृद्ध्या पादवृद्ध्येत्यर्थः यावत्यादृष्ट्या पश्यन्ति तावत्फलं प्रयच्छंति तथा च स्वल्पजातके दशमतृतीये नवमपंचमे चतुर्थाष्टमे कलत्रं च पश्यन्ति पादवृद्ध्या फलानि चैवं प्रयच्छंति अर्थादेव ग्रहा उक्तस्थानानि न पश्यंतीति तथा च सारावल्याम् सद्यः पश्यन्ति सदा ग्रहाश्चरणवृद्धितः सर्वे त्रिदशत्रिकोणचतुरस्त्रसप्तगतान्फलं क्रमेणैव पूर्णं

त्रिदशत्रिकोणचतुरस्त्रसप्तमान्यवलोकयंति चरणाभिवृद्धितः रविजामरेज्यरुधिराः परे च ये क्रमशो भवंति किल वीक्षणेधिकाः १३

पश्यंति रविजस्तृतीयदशमौ त्रिकोणमपि जीवः चतुरस्त्रं भूमिसुतः सितार्कबुधहिमकराः कलत्रं च तथा च यवनेश्वरः द्वौ पश्चिमौ षष्ठमथ द्वितीयं संस्थानराशेः परित्यज्य राशिं शेषान्ग्रहः पश्यति सर्वकालमिष्टेषु चैषां विदिता दृगिष्टा यामित्रभे दृष्टिफलं समग्रं त्र्यपादहीनं चतुरस्त्रयोश्च त्रिकोणयोर्दृष्टिफलार्धमाहुर्दुश्चिक्यसंज्ञे दशमे च पादं रविजामरेज्यरुधिरा इति किलेत्यागमसूचनं चरणाभिवृद्धित इत्यनुवर्तते एते रविजादयश्चरणाभिवृद्धितः पादोपचयाद्वीक्षणे दर्शने क्रमशोधिकफलप्रदा भवन्ति रविजः सौरः सदर्शने पादफलप्रदः अमरेज्यो बृहस्पतिरर्धफलप्रदः रुधिरोंगारकः सः पादहीनफलप्रदः अपरोऽर्कचंद्रबुधशुक्रास्ते वीक्षणे समग्रफलदाः एतन्नैसर्गिकं ग्रहाणां दृष्टिफलम् स्थानवशात्तेषां यथास्वं दृष्टिफलमूलम् एवमेके व्याचक्षते अपरे तु आहुः

स्थानफलमेतत् तेनत्रिदशादिस्थानगतान्ग्रहराशीन्पश्यंति रविजादयोदर्शनेधिकफलप्रदाभवंति तद्यथा तृतीयदशमस्थान्ग्रहान्राशीन्वा शनैश्चरः पश्यन्नन्येभ्योग्रहेभ्योधिकफलप्रदोभवति परिपूर्णपश्यतीत्यर्थः एवंत्रिकोणस्थान्जीवः चतुरस्रगान्भौमः सप्तमस्थान्सूर्यचंद्रबुधशुक्राः एतच्चबहुतराणामाचार्याणांमतं तथाचभगवान्गार्गिः दुश्चिक्यस्त्वमतान्सौरस्त्रिकोणस्थान्बृहस्पतिः चतुर्थाष्टमगान्भौमःशेषाःसप्तमसंस्थितान्भवंतिवीक्षणोनित्यमुक्ताधिकफलाग्रहाइति १३ अधुनाग्रहाणांकालनिर्देशंचवैतालीयेनाह अयनइति भास्करादादित्यात्प्रभृत्ययनादिकालनिर्देशः तत्रायननिर्देशोभास्करात्सूर्यात् क्षणोमुहूर्तस्तन्निर्देशश्चंद्रात् वासरोदिवसस्तन्निर्देशोभौमात् ऋतुर्मासद्वयात्मकस्तन्निर्देशोबुधात् मासनिर्देशोजीवात् मासार्धपक्षस्तन्निर्देशःशुक्रात् समःसंवत्सरस्तन्निर्देशःसौरात् प्रयोजनम् प्रश्नलग्नेयस्यग्रहस्यनवांशकोदयःसःग्रहस्तस्मान्नवांशकाद्यावत् संख्येनवांशके भवति तावत्संख्योयनादिकोग्रहोपलक्षितः कालशुभाशुभफलपंक्तौवाच्यः अन्येत्वेवंव्याचक्षते लग्नेयावत्संख्योनवांशकउदितस्तावत्संख्योऽयनादिकालोंशपतिवशाद्वक्तव्यः तथाचमणित्थः लग्नांशकपतितुल्यः कालोलग्नोदितांशसमतुल्यः वक्तव्योरिपुविजयेगर्भाधानेथकार्यसंयोगेवक्तव्यः कटुकलवणेत्यादि भास्करादादित्यात् कटुकादिरसनिर्देशः तत्रादित्यात्सूर्यात्कटुकस्यरसस्यनिर्देशः कटुकंमरीचादिचंद्रात् लवणस्य भौमात्तिक्तस्यतिक्तंनिंबादिबुधान्मिश्रस्य षड्रसस्यजीवान्मधुरस्यमिष्टस्यशुक्रादाम्लस्यसौरात्कषायस्यप्रयोजनम् आधानकालेयोबलवान्तदुक्तरसस्यदोहदोगर्भिण्याभवति तथाचसारावल्याम् मासतृतीयेस्त्रीणांदोहदकोजायतेवश्यम्मासाधिपस्यभावैर्लग्नप्रयोगादिभिस्त्रिरयम्

अयनक्षणवासरर्तवोमासार्द्धंचसमाश्चभास्करात् कटुकलवणतिक्तमिश्रितामधुराम्लौचकषायइत्यपि १४

भोजननाश्रयेचप्रश्नेग्रहोदयतन्नवांशेवा तदुक्तंरसान्वितभोजनज्ञानमिति १४ अधुनामित्रामित्रविधिंशार्दूलविक्रीडितेनाह जीवइतिसूर्यादीनांग्रहाणांक्रमाज्जीवादयः सुहृदः तत्रादित्यस्यसूर्यस्यजीवोबृहस्पतिःसुहृन्मित्रंजीवबुधौगुरुसौम्यौचंद्रस्यशुक्रबुधौभौमस्यविगतोर्कःसूर्योयेभ्योग्रहेभ्योतेसूर्यवर्जिताःसर्वएवबुधस्य विकुजाविगतांगारकःसर्वएवबृहस्पतेः विंद्वर्काविगतौचंद्रार्कौयेभ्यस्तेसर्वएवशुक्रस्यविकुजेंद्विनाःकुजोभौमइंदुश्चंद्रः इनःसूर्यः एतेविकुजेंद्विनाः सर्वएवसौरस्यशनैश्चरस्य एवंकेषांचिन्मतेन बहूनांअन्नचतेषांशत्रुमित्रव्यवहारएवेष्टोनोदासीनव्यवहारस्तस्मान्मित्रेभ्योन्येत्यमित्राणीतिकेचिद्यवनेश्वरादयः तथाचरवेर्गुरुर्मित्रमतोन्यथान्येगुरोस्तुभौमपरिहृत्यसर्वेचांद्रेरनर्काद्भृगुनंदनस्यव्यर्केंद्वोयैःसुहृदःप्रदिष्टः १ भौमस्यशुक्रौशशिजश्चमित्रमिंदोर्बुधंदेवगुरुंचविंद्यात् सौरस्यमित्राण्यकुजेंदुसूर्याः शेषान्रिपून्विद्धिनृणांचतद्वत् २ सत्योक्तइतिसत्योक्तहोराशास्त्रेस्वत्रिकोण

जीवोजीवबुधौसितेंदुतनयौव्यर्काविभौमाः क्रमाद्वींद्वर्काविकुजेंद्विनाश्चसुहृदः केषांचिदेवंमतं सत्योक्तेसुहृदस्त्रिकोणभवना
त्स्वात्स्वांत्यधीधर्मपाः स्वोच्चायुःसुखपाःस्वलक्षणविधेर्नान्यैर्विरोधादिति १५

भवनादात्मीयमूलत्रिकोणराशेःस्वांत्यधीधर्मपाःस्वोच्चायुः सुखपाश्चतेग्रहाः सुहृदोभवंतितत्रत्रिकोणंमूलत्रिकोणंतस्मात्स्वापोद्वितीयराश्यधिपः तस्मादंत्यपोद्वादशस्थानाधिपः धीस्थानपः पंचमस्याधिपः धर्मपोनवमाधिपः स्वोच्चपोयइउच्चस्यस्वामी आयुपोष्टमस्थानस्याधिपःसुखपश्चतुर्थस्थानाधिपतिःग्रहोमित्रंभवति स्वलक्षणविधेर्विरोधादन्यैःअन्निमस्थानाधिपतिभिर्ग्रहैःसहनायामित्रामित्रविभागःकल्पनीयःविरोधादसुहृद्भूयस्त्वंचतल्लक्षणंचस्वलक्षणंस्वलक्षणोविधिःतेनविरोधस्तस्मात्एतदुक्तंभवतियःस्वविधिःमित्रलक्षणावभागःप्रदर्शितःअतोन्यथानाधिपायेग्रहास्तेग्रहस्यसुहृदोनभवंतितथाचसत्यःसुहृदस्त्रिकोणभवनाद्ग्रहस्यसुहृत

भव्ययेस्य धनभवनेस्वजनेनिधनेधर्मेस्वोच्चेच भवंतिनोशोषाः स्वजनसंज्ञंचतुर्थस्थानंतनोर्द्विराश्याधिपोमित्रसंज्ञः एकराश्याधिपोमध्यमः अनुक्तराश्याधिपः शत्रुः यस्यत्रिचद्व्येकानुक्तभूपान्स्कत्वत्समरिपून्संचिंत्यनैसर्गिकानिति एकराश्याधिपो मध्यस्थ इति यदुक्तं तथाच चंद्रार्कावेकराश्याधिपावपिमित्रसंज्ञौभवतः तयोर्हिराशिद्वयस्याधिपत्याभावात् राशिद्वयस्ययोधिपतिर्ग्रहः सएव यद्युच्चराश्याधिपत्वात् त्रिकोणपत्वंप्राप्नोति तथापिद्विसपत्वएवज्ञातव्यः तस्यस्वराशिव्यतिरेकात् एतन्मंदबुद्धिव्युत्पादनार्थंस्पष्टतरंव्याख्यायते तद्यथादित्यस्यसिंहस्त्रिकोणः तस्माद्द्वादशस्थानस्यकर्कटस्यचंद्रमा अधिपतिः सएकराश्याधिपोपिसन् द्वितीयस्यराश्याधिपत्यस्याभावादादित्यस्यमित्रम् सिंहाच्चतुर्थोवृश्चिकः नवमोमेषः तयोर्भौमोधिपतिः आदित्यस्यस्वोच्चंमेषः तस्याधिपोभौमः मेषस्यसिंहनवमत्वादादित्यस्यस्वोच्चत्वादेकराशित्वंमेषस्यैकत्वाद्वृश्चिकस्यद्वितीयत्वाद्भौमः द्विराश्याधिपोजातः तेनादित्यस्यमित्रंसिंहात्पंचमाष्टमौधन्विमीनौतयोराधिपतिर्जीवः सचोक्तस्थानद्वयस्याधिपतित्वादादित्यस्यमित्रंगुरुः सिंहाद्द्वितीयेकादशौकन्यामिथुनौ· तयोर्बुधः स्वामीतत्रद्वितीयस्थानस्योक्तत्वादेकादशस्यानुक्तत्वात् पठितैकराश्याधिपत्वाद्बुधोरवेर्मध्यमः सिंहात्षष्ठसप्तमस्थानेमकरकुंभौनोक्तौतयोराधिपत्यादादित्यस्यशनैश्चरः शत्रुः सिंहाद्दशमतृतीयेवृषतुले तयोरनुक्तयोः स्थानयोः राश्याधिपत्याच्छुक्रआदित्यस्यशत्रुः एवंरवेः अथचंद्रस्य तथाचंद्रस्यवृषस्त्रिकोणस्तस्माच्चतुर्थस्थानंसिंहस्तस्याधिपः सूर्यः सएकराश्याधिपोपिसद्वितीयस्यराशेराधिपत्याभावाच्चंद्रस्यमित्रं वृषा द्वितीया मिथुनः पंचमः कन्यातयोर्बुधः अधिपतिः सचोक्तस्थानद्वयस्याधिपत्याच्चंद्रस्यमित्रं वृषात्सप्तमद्वादशौवृश्चिकमेषौतयोर्भौमः स्वामीतत्रद्वादशस्योक्तत्वात्सप्तमस्यानुक्तत्वात्पठितैकराश्याधिपत्वाद्भौमश्चंद्रस्यमध्यमः वृषादष्टमैकादशौधन्विमीनौतयोः गुरुः स्वामीतत्रैकादशस्थानस्यानुक्तत्वात् अष्टमस्योक्तत्वात्पठितैकराश्याधिपत्वाज्जीवश्चंद्रस्यमध्यमः चंद्रस्यवृषउच्चः वृषात्षष्ठस्तुलातयोः शुक्रोधिपतिस्तस्यवृषस्योच्चत्वेनोक्तत्वात् षष्ठ

स्यानुक्तत्वात्पठितैकराश्यधिपत्वाच्चंद्रस्य शुक्रो मध्यमः वृषान्नवमदशमौ मकरकुंभौ तयोः स्वामी शनिः तत्र नवमस्योक्तत्वाद्दशमस्यानुक्तत्वात्पठितैकरा
श्यधिपत्वात्सौरः चंद्रस्य मध्यमः एवं चंद्रस्य अथ भौमस्य तद्यथा भौमस्य मेषस्त्रिकोणं मेषाच्चतुर्थस्थानस्य कर्कटस्याधिपश्चंद्रः स एकराश्यधिपोपि सन्द्वि
तीयराशेराधिपत्याभावाद्भौमस्य मित्रं मेषात्पंचमस्य सिंहस्याधिपः सूर्यः स एकराश्यधिपोपि सन्द्वितीयराशेराधिपत्याभावाद्भौमस्य मित्रं मेषान्नवमद्वा
दशौ धन्विमीनौ तयोर्जीवोधिपतिः स चोक्तस्थानद्वयस्याधिपत्याद्भौमस्य मित्रं मेषात्तृतीयषष्ठ मिथुनकन्ये तयोरपठितत्वात् तयोर्बुधस्याधिपत्याद्भौमस्य
बुधः शत्रुः मेषाद्द्वितीयसप्तमौ वृषतुले तयोः शुक्रः स्वामी तत्र द्वितीयस्योक्तत्वात् सप्तमस्यानुक्तत्वात् पठितैकराशाधिपत्याच्छुक्रो भौमस्य मध्यमः मेषाद्द
शमैकादशौ मकरकुंभौ तयोः सौरोधिपतिः भौमस्य मकर उच्चः तस्योक्तत्वादेकादशस्यानुक्तत्वात्पठितैकराश्यधिपत्वात्सौरो भौमस्य मध्यमः एवं भौम
स्य अथ बुधस्य कन्या मूलत्रिकोणं तस्माद्द्वादशस्थानस्य सिंहस्याधिपतिः सूर्यः स एकराश्यधिपोपि सन् द्वितीयराशेराधिपत्याभावात् बुधस्य मित्रं सूर्यः कन्या-
याः द्वितीयनवमौ तुलवृषौ तयोः शुक्रोधिपतिः स चोक्तस्थानद्वयस्याधिपत्वाद्बुधस्य मित्रं कन्यायाः एकादशस्थानस्य कर्कटस्याधिपतिश्चंद्रः तस्यानुक्तत्वाद्बुध
स्य शत्रुः कन्यायाः तृतीयाष्टमौ वृश्चिकमेषौ तयोर्भौमोधिपतिः तत्राष्टमस्योक्तत्वात्तृतीयस्यानुक्तत्वात्पठितैकराश्यधिपत्वात् भौमो बुधस्य मध्यमः कन्यायाश्चतु
र्थसप्तमौ धन्विमीनौ तयोर्जीवोधिपतिस्तत्र चतुर्थस्योक्तत्वात्सप्तमस्यानुक्तत्वात् पठितैकराश्यधिपत्वाज्जीवो बुधस्य मध्यमः कन्यायाः पंचमषष्ठौ मकरकुंभौ तयोः सौरोधि
पतिस्तत्र पंचमस्योक्तत्वात्षष्ठस्यानुक्तत्वात्पठितैकराश्यधिपत्वात्सौरो बुधस्य मध्यमः एवं बुधस्य अथ गुरोः जीवस्य धन्वि त्रिकोणं तस्मादष्टमस्थानस्य कर्कटस्याधि
पतिश्चंद्रः स एकराश्यधिपोपि सन् द्वितीयराशेराधिपत्याभावाज्जीवस्य मित्रं धनुषः पंचमद्वादशौ मेषवृश्चिकौ तयोः भौमोधिपतिः स चोक्तस्थानद्वयस्याधिपति-
त्वाज्जीवस्य मित्रं धनुषो नवमस्य सिंहस्याधिपतिः सूर्यः स एकराश्यधिपोपि सन् द्वितीयस्य राशेराधिपत्याभावाज्जीवस्य मित्रं धनुषः पंचमद्वादशौ मेषवृश्चि-

कोणतयोर्भौमोधिपतिः सत्योक्तस्थानस्याधिपत्याज्जीवस्य मित्रं धनुषो द्वितीयतृतीयौ मकरकुंभौ तयोः सौरोधिपतिः तत्र द्वितीयस्योक्तत्वात्तृतीयस्यानुक्तत्वात्पठितैकराश्यधिपत्वात्सौरो जीवस्य मध्यस्थः धनुषः सप्तदशमौ मिथुनकन्ये तयोर्बुधोधिपतिः स्थानद्वयस्यानुक्तत्वाद्गुरोर्बुधः शत्रुः धनुषः षष्ठैकादशस्थाने वृषतुले तयोः शुक्रोधिपतिः स्थानद्वयस्यानुक्तत्वाच्छुक्रो गुरोः शत्रुः एवं जीवस्य अथ शुक्रस्य शुक्रस्य तुला त्रिकोणं तस्मान्नवमद्वादशस्थाने मिथुनकन्ये तयोर्बुधोधिपतिः सत्योक्तस्थानद्वयस्याधिपतित्वाच्छुक्रस्य मित्रं तुलायाः चतुर्थपंचमौ मकरकुंभौ तयोरधिपतिः सौरिः सत्योक्तस्थानद्वयस्याधिपत्याच्छुक्रस्य सौरः मित्रं तुलाद्वितीयसप्तमौ वृश्चिकमेषौ तयोर्भौमोधिपतिः तत्र द्वितीयस्योक्तत्वात्सप्तमस्यानुक्तत्वात्पठितैकराश्यधिपत्याद्भौमः शुक्रस्य मध्यस्थः तुलातृतीयषष्ठौ धन्विमीनौ तयोर्जीवोधिपतिः तत्र मीनः शुक्रस्योच्चस्योक्तत्वाद्धनुषोनुक्तत्वात्पठितैकराश्यधिपत्याज्जीवः शुक्रस्य मध्यस्थः तुलाद्दशमः कर्कटस्तस्यानुक्तत्वाच्छुक्रस्य चंद्रः शत्रुः तुलादेकादशः सिंहस्तस्याधिपः सूर्यः एकराश्यधिपोपि सन् द्वितीयराशेराधिपत्याभावात् तस्य स्थानस्यानुक्तत्वाच्छुक्रस्यार्कः शत्रुः एवं शुक्रस्य अथ सौरस्य सौरस्य कुंभस्त्रिकोणं तस्मात्पञ्चमाष्टमौ मिथुनकन्ये तयोर्बुधोधिपतिः सत्योक्तस्थानस्याधिपतित्वात्सौरस्य बुधो मित्रं सौरस्योच्चस्तुला कुंभाच्चतुर्थनवमौ वृषतुलौ तयोरधिपतिः शुक्रः सत्योक्तस्थानद्वयस्याधिपतित्वात्सौरस्य शुक्रो मित्रं कुंभाद्द्वितीयैकादशौ मीनधन्विनौ तयोर्जीवोधिपतिः तत्र द्वितीयस्योक्तत्वादेकादशस्यानुक्तत्वात्पठितैकराश्यधिपत्वात्तस्य जीवो मध्यस्थः कुंभात्षष्ठः कर्कटस्तस्याधिपतिश्चंद्रस्तस्यानुक्तत्वात्सौरस्य चंद्रः शत्रुः कुंभात्सप्तमः सिंहस्तस्याधिपतिः सूर्यस्तस्यानुक्तत्वात् सौरस्य सूर्यः शत्रुः कुंभात्तृतीयदशमौ मेषवृश्चिकौ तयोर्भौमोधिपतिस्तयोरनुक्तत्वाद्भौमः सौरस्य शत्रुरिति १५ अधुना सत्योक्तेनैकद्व्येकानुक्तभयावद्ग्रहस्य सुहृन्मध्यस्थशत्रून् शार्दूलविक्रीडितद्वयेनाह शत्रू मंदसिताविति रवेरादित्यस्य मंदः सौरः सितः शुक्रः एतौ द्वौ शत्रू रिपू शशिजो बुधः समो मध्यस्थः न शत्रुर्न मित्रमुदासीन इत्यर्थः शेषाश्च

द्वाश्चंद्रांगारकगुरवोमित्राणीति तीक्ष्णांशुरित्यादि शीतगोश्चंद्रमसः तीक्ष्णांशुः सूर्यः हिमरश्मिजोबुधः एतौद्वौसुहृदौमित्रेशेषाः सर्वएवभौमा
जीवशुक्रसौराः समामध्यस्थाउदासीनाः जीवेदूष्णकराइति कुजस्यभौमस्यजीवोबृहस्पतिः इंदुश्चंद्रः ऊष्णकरः सूर्यः एतेसुहृदोमित्राणिज्ञोबु
धः अरिः शत्रुः सितार्कीशुक्रसौरौ समौमध्यस्थाविति मित्रेसूर्यसिताविति सूर्योरविः सितः शुक्रः एतौद्वौबुधस्यमित्रेसुहृदौहिमगुश्चंद्रमाः शत्रुररिः
अपरेन्येभौमगुरुसौराः समामध्यस्थाइति १६ सूरेरित्यादि सूरेर्बृहस्पतेः सौम्योबुधः सितः शुक्रः एतावरीशत्रू रविसुतः सौरोमध्यस्थः अपरे अन्ये
रविचंद्रभौमाः अन्यथामित्राणीत्यर्थः सौम्यार्कीत्यादि शुक्रस्यसौम्यार्कीत्यादि शुक्रस्यसौम्यार्की बुधसौरौ सुहृदौमित्रे कुजो भौमः गुरुर्जी-

शत्रूमंदसितौसमश्चशशिजोमित्राणिशेषारवेस्तीक्ष्णांशुर्हिमरश्मिजश्चसुहृदौशेषाःसमाःशीतगोः जीवेंदूष्णकराःकु-
जस्यसुहृदोज्ञोरिःसितार्कीसमौमित्रेसूर्यसितौबुधस्यहिमगुःशत्रुःसमाश्चापरे १६ सूरेःसौम्यसितावरीरविसुतोमध्यो
परेत्वन्यथासौम्यार्कीसुहृदौसमौकुजगुरूशुक्रस्यशेषावरी शुक्रज्ञौसुहृदौसमःसुरगुरुःसौरस्यचान्येरयोयेप्रोक्ताःस्वत्रि
कोणभादिषुपुनस्तेमीमयाकीर्तिताः १७

वः एतौद्वौसमौमध्यस्थौ शेषावादित्यचंद्रावरीशत्रू शुक्रज्ञावित्यादि सौरस्यशनेःशु
क्रज्ञौसितबुधौसुहृदौमित्रेसुरगुरुर्जीवः समोमध्यस्थः अन्येचापरेरविशशिभौमाः अरयःशत्रवः येप्रोक्ताइत्यादि येमयास्वत्रिकोणभादिषु
पूर्वंत्रिकोणभवनास्वात्यधीधर्मपाइत्यादिग्रंथेनोक्तास्तएवेहमयाविभज्यपुनर्भूयःप्रकीर्तिताः उदाहरणत्वेनप्रदर्शिताइति १७ एवंनैसर्गिकंमित्रा
मित्रमध्यस्यविभागमुक्त्वाधुनातात्कालिकंमित्रामित्रविभागंशार्दूलविक्रीडितेनाह अन्योन्येति अन्योन्यस्यपरस्परमेतेषुधनादिषुस्थानेषुग्रह-

स्य ग्रहा व्यवस्थितास्तत्काले जन्मनि यात्रायां विवाहे प्रश्ने वा तत्समये सुहृदो मित्राणि भवंति धनस्थानं द्वितीयं व्ययस्थानं द्वादशमायस्थानं एकादश सहजस्थानं तृतीयं व्यापारस्थानं कर्माख्यं दशमं बंधुस्थानं चतुर्थं एतेषु स्थानेषु यो ग्रहः स्थितः स यस्माद्ग्रहाद्व्यवस्थितस्तस्य सुहृन्मित्रं भवति स च तस्यापि भवति यत उक्तमन्योन्यस्येति स्वतुंगभवनेप्येके इति एकेऽन्ये पुनराचार्याः ग्रहस्य यस्योच्चे यो ग्रहः स्थितः स तस्य स्वोच्चस्थितो मित्रमिच्छंति ते च यवनेश्वरादयः तथा च तद्वाक्यं मूलत्रिकोणात्स्वधर्मबंधुपुत्रव्ययस्थानगता ग्रहेंद्राः तात्कालिकास्ते सुहृदो भवंति स्वोच्चे च यो यस्य विकृष्टवीर्य इति एतदप्याचार्यस्य नाभिप्रेतं यस्मादनेनैव स्वल्पजातके उक्तं तत्काले च दशायबंधुसहजस्वांत्येषु मित्रसंस्थिता इति अरयस्त्वन्यथेति अन्यथा अन्येन प्रकारेण ग्रह-

अन्योन्यस्य धनव्ययायसहजव्यापारबंधुस्थितास्तत्काले सुहृदः स्वतुंगभवनेप्येकेरयुस्त्वन्यथा। द्व्येकानुक्त
भपान्सुहृत्समारिपून्संचिंत्य नैसर्गिकान् तत्काले च पुनस्तु तानधिसुहृन्मित्रादिभिः कल्पयेत् १८

स्य ग्रहा व्यवस्थितास्तत्कालेऽरयः शत्रवो भवंति अन्योन्यमिति तद्यथा एकराशिगतः पंचमषष्ठसप्तमाष्टमनवमस्थानस्थश्च तत्काले शत्रुर्ग्रहस्य ग्रहो भवति द्व्येकानुक्तभपानिति पूर्वमेव दर्शितं द्वितीयभपानेकभपाननुक्तभपांश्च मित्रमध्यस्थशत्रून्नैसर्गिकान् शत्रू मंदसितावित्यादिना ग्रंथेनोक्तान्संचिंत्य विज्ञाय ज्ञात्वा तत्काले जन्मादौ तानेवाधिसुहृन्मित्रादिभिरुपलक्षितान् कल्पयेत् तत्र धनादीनि मित्रस्थानानि तेषु नैसर्गिक सुहृत्स्थितोऽधिमित्रं भवति मध्यस्थो मित्रम् शत्रुर्मध्यस्थ इति धनादिवर्जितेष्वन्येषु स्थितो नैसर्गसुहृन्मध्यस्थो भवति मध्यस्थः शत्रुः शत्रुरधिशत्रुरिति अमुना ग्रहाणां चतुर्विधं बलम् स्थानदिक्चेष्टाकालबलाख्यम् १८

७ ७ ७ ७ ७

तत्रतावत्स्थानदिग्बलंदोधकेनाह स्वोच्चसुहृदिति स्वग्रहणंप्रत्येकमभिसंबध्यते तत्रस्वोच्चेस्थितोग्रहोबलवान्भवतितात्कालिकस्यसुहृदोमित्रस्यक्षेत्रे स्थितोबलवानेव स्वत्रिकोणआत्मीयेमूलत्रिकोणेस्थितः स्वनवांशोस्यतः स्वगृहेस्वराशावुपगतः प्राप्तोबलवानेव एतेषामन्यतमे व्यवस्थितोग्रहः स्थानबलयुक्तोभवति अत्रार्कस्यसिंहः स्वत्रिकोणंतदेवगृहं क्षेत्रंचंद्रस्यवृषउच्चः सएवत्रिकोणं भौमस्यमेषः त्रिकोणंतदेव स्वक्षेत्रं बुधस्यकन्याउच्चः सैवमूलत्रिकोणं स्वक्षेत्रंचगुरोः धन्वित्रिकोणंतदेवस्वक्षेत्रंशुक्रस्यतुलात्रिकोणंतदेव स्वक्षेत्रंसौरस्य कुंभस्त्रिकोणंतदेवस्वक्षेत्रं एतेषामाचार्येण विशेषोनोक्तः अस्माभिरन्यहोराशास्त्रादानीयशिष्यहितायेहलिख्यते तथाचसारावल्याम् विंशतिरंशाःसिंहेत्रिकोणमपरेस्वभवनमर्कस्यउच्चभागत्रितयंवृषमिंदोःस्यात्रिकोणमपरेंशाः द्वादशभागामेषेत्रिकोणमपरेस्वभंतु भौमस्यउच्चफलंकन्यायांबुधस्यातिथ्यंशकैःसदाचिंत्यं परतस्त्रिकोणजातंपंच

स्वोच्चसुहृत्स्वत्रिकोणनवांशैःस्थानबलंस्वगृहोपगतेच दिक्षुबुधांगिरसौरविभौमौसूर्यसुतःसितशीतकरौच १९



भिरंशैःस्वराशिजपरतः दशभिर्भागैर्जीवस्यत्रिकोणफलंस्वभंपरंचापे शुक्रस्यतु तिथयोंशास्त्रिकोणमपरेधटेस्वराशिश्चकुंभेत्रिकोणंनिजभंरविजस्यरवेर्यथासिंहएतदर्थाचतुष्टयंदिक्षु बुधांगिरसावित्यादिप्रात्याद्यासुचतसृषुदिक्षुक्रमाद्बुधादयोबलिनोभवंतितत्रपूर्वस्यांबुधांगिरसौतज्ज्ञजीवौबलिनौभवतः लग्नस्थावित्यर्थः दक्षिणस्यांरविभौमौसूर्यांगारकौदशमस्थावित्यर्थः पश्चिमायांसूर्यसुतः शनिःसप्तमस्थइत्यर्थः उत्तरस्यांसितशीतकरौशुक्रचंद्रौचतुर्थस्थावित्यर्थः योग्रहोयत्रबलीसतस्मात्सप्तमस्थानस्थोविबलोभवतिमध्येत्वनुपाततऊह्यमिति सर्वत्रैवेयंपरिभाषाग्रहाणामुच्चनीचभविभागेराशीनांदिग्बलप्रविभागेपि तथाचयवनेश्वरः गुर्वैंदवोपूर्वविल-

२२

ग्मसंस्थौनभस्थलस्थौवा दिवाकरारौ सौरोथवाशशांकनिशाकरौतु तुलोत्थिनाचन्यबलौभवेतामिति अन्यबलेग्रहाणामंतरेनुपाततइत्येवमुक्तमेवयुक्तः एतद्ग्रहाणांदिग्बलमुच्यते १९ अधुनाचेष्टाबलंदोधकेनाह उदगयनेति मकरादिराशिषट्कमुत्तरमयनंकर्कटादिराशिषट्कंदक्षिणमयनमिति उदगयने उत्तरायणे रविसितमयूखौसूर्यचंद्रमसौबलिनौभवतः परिशेषाः भौमबुधगुरुसितसौराः वक्रगाविपरीतगतयोबलिनोभवंति तथाचसमागमगाश्चंद्रेणसहिता बलिनएव चंद्रेणसंयोगोग्रहाणांसमागमशब्दवाच्यः रविणासहास्तमयोभौमादीनांपरस्परंयुद्धंउक्तंचाचार्यविष्णुचंद्रेणादिवसकरेणास्तमयःसमागमः सितरश्मिसहितानांकुसुतादीनांयुद्धंनिगद्यतेन्योन्ययुक्तानामिति विपुलकराइति विपुलाःकरायेषांतेविपुलकराःविस्तीर्णरश्मयो बलिनोभवंति शी

उदगयनेरविसितमयूखौवक्रसमागमगाः परिशेषाः विपुलकरायुधिचोत्तरसंस्थाश्चेष्टितवीर्ययुताःपरिकल्प्याः २०

धकेंद्रेद्वितीयतृतीयपदस्थेग्रहस्यविपुलकरत्वंप्रायःसंभवति वक्रासन्नत्वात् युधिसंग्रामेचोत्तरसंस्थाबलिनएवकुसुतादीनांयुद्धमित्युक्तं तत्र यः उत्तरदिग्भागसंस्थितोजयीसचबलवान्उत्तरसंस्थत्वमत्रोपलक्षणार्थंयस्तेजयीसएवबलवान् तत्रैतज्जयलक्षणंदक्षिणादिकस्थः पुरुषोवेपथुरप्राप्यसन्निवृत्ततनुः अधिरूढोविकृतोनिःप्रभोविवर्णश्चयःसजितः उक्तविपरीतलक्षणसंपन्नोजययुतोविनिर्दिष्टः विपुलःस्निग्धोद्युतिमान् दक्षिणदिक्स्थोपिजययुक्तइति एतच्चशुक्रस्यप्रायःसंभवतियस्मात्पुलिशाचार्यः सर्वेजयिनउदक्स्थादक्षिणदिक्स्थोजयीशुक्रइति एतच्चेष्टाबलम् एषामन्यतमेनसंयुक्तश्चेष्टाबलसंयुक्तोभवति २०

अधुनाग्रहाणांकालबलंनैसर्गिकबलंचमालिन्याह निशीति शशिकुजसौराश्चंद्रभौमशनयः निशिरात्रौवीर्यवंतोबलिनःज्ञोबुधः सर्वदासर्वस्मिन्कालेनिशिदिनेचबली अन्येपरेरविगुरुसिताअन्हिदिनेबलिनः क्रूराः पापाःपापयुक्ताः बहुलपक्षेकृष्णपक्षेबलिनः सौम्याः शुभग्रहाः सितगताः शुक्लपक्षेबलिनः कृष्णपक्षेचंद्रमाअपिक्रूरोबलवान्भवति यस्माद्यवनेश्वरः मासेतुशुक्लप्रतिपत्प्रवृत्तेः पूर्वेशशीमध्यबलोदशाहे श्रेष्ठोद्वितीयेऽल्पबलस्तृतीयेसौम्यैस्तुदृष्टोबलवान्सदैवेतिसितगताः शुक्लपक्षेस्थिताः सौम्याः बलिनः द्व्ययनेतिप्रमाणंयस्यद्व्ययनंतत्तुसर्वस्ववर्षेआत्मीयवर्षेयोग्रहोयत्रवर्षेऽधिपतिः सतत्रबलवान्स्वदिवसेआत्मीयवासरेस्वहोरायांकालहोरायां तथास्वमासेयस्मिन्मासेयोऽधिपतिः सतत्रबलीद्व्ययनदिवसहोरामासपायेऽधिपतयस्तेग्रहैः कालबलोपेतैरुपलक्षणीयंनेकालबलोपेताइत्यर्थः केचिद्व्ययनदिवसहोरामासपैरितिपठंति अन्येस्वदिवसस्वहोरामासगैरितिपठंति एषःसापराधः पा

निशिशशिकुजसौराः सर्वदाज्ञोऽन्हिचान्येबहुलसितगताःस्युःक्रूरसौम्याःक्रमेण द्व्ययनदिवसहोरामासपैःकालवीर्यंशरुबु
गुशुचशाद्यावृद्धितोवीर्यवंतः २१

ठः एतेषुकालेषुसर्वेएवबलिनोभवंति एतन्नृपग्रहाणांकालवीर्यंएषामन्यतमेनसंयुक्तः कालबलसंपन्नोभवति शरुबुगुशुच शाद्याइतिशादयोवर्णाःयेषांशकारआद्यस्तेशाद्याः शकाराद्यः शनैश्चरः सर्वेभ्योबलहीनःरुकाराद्योरुधिरःभौमःशनैश्चराद्बलवान् बुकाराद्योबुधः सभौमाद्बलवान् गुकाराद्योगुरुः सबुधाद्बली शुकाराद्यः शुक्रः सजीवाद्बली चकाराद्यश्चंद्रः सशुक्राद्बली सकाराद्यःसविता सचंद्राद्बलीति एतद्ग्रहाणांनैसर्गिकंबलंयस्मादनेनैवस्वल्पजातकेउक्तं मदारसौम्यवाक्पतिसितनृचंद्रार्कायथोत्तरंबलिनः नैसर्गिकबलमेतद्बलसाम्येस्यादधिकचितेति यत्रग्रहाणांग्रहयोर्वाबलसाम्यंभवति तत्तस्माद्बलाधिक्यं अधिवीर्यवत्ताज्ञेयेति अत्राचार्येणचतुःप्रकारस्यग्रहाणांबलस्यत-

चास्माभिः शिष्यहितहेतवेऽन्यशास्त्राल्लिख्यते तथाचसारावल्याम् उच्चबलेनसमेतः परांविभूतिंग्रहः प्रसाधयतिस्वत्रिकोणबलः पुंसांसान्नितांबलयतित्वंवास्वक्षबलेनचसहितः प्रमुदितधनधान्यसंपदाक्रांतंमित्रभबलसंयुक्तोजनयतिकीर्त्यान्वितपुरुषंतेजस्विनमतिस्फारिवनंस्फूस्थिरविभवंनृपाच्चलब्धधनस्वनवांशकबलयुक्तंकरोति पुरुषमास्मिंश्च सूक्ष्मजातकेउक्तं बलवान्मित्रस्वगृहोच्चनवांशकेष्वीक्षितः शुभैस्त्वथापिचंद्रसितौ स्त्रीक्षेत्रेपुरुषक्षेत्रोपगाः शेषाइति तत्रशुभदृष्टस्यफलंतावत् शुभदर्शनबलसहितः पुरुषंकुर्याद्गुणान्वितंख्यातंस्वभगप्रधानमखिलसुरूपदोहंच सौम्यंचपुंस्त्रीभवनबलेनकरोतिजनपूजितंकलाकुशलम् पुरुषंप्रसन्नचित्तंकल्पंपरलोकभीरुंच आशाबलसमवेतोनयतिस्वदिशंनभश्चरः पुरुषंनीत्वावस्त्रविभूषणवाहनसौख्यान्वितंकुरुते क्वचिद्राज्यंक्वचित्पूजांक्वचिद्द्रव्यंक्वचिद्यशः ददातिविहगश्चित्रंचेष्टावीर्यसमन्वितः वक्रीणस्तुमहावीर्याःशुभाराज्यप्रदाग्रहाः पापाव्यसनदाःपुंसांकुर्वंतिवृथाटनम् स्वस्थशरीरसमागमसुखमाहवजयबलेनविदधातिशुभमतुलंविहगोद्वोराज्यसविनिर्जितारातिरात्रिदिवाबलपूर्णोभृगुजलाभेनशौर्यपरिवृद्ध्यामलिनयतितेचैपक्षंभुंक्तेयोनरःप्रकटःद्विगुणंद्विगुणंद्युवर्षाधिपमाससदिवसहोरेशाः कुर्युर्वृद्ध्यासौख्यंस्वदशासुधनंचकीर्तिंचपक्षबलादिपुनाशरत्नांबरहस्तिसंपदंदद्युःस्त्रीकनकभूमिलाभकीर्तिंनशशांकधवलवरासकलबलसारभरितानिर्मलकरजालभासुराः सततंराज्यग्रहार्विदद्युः सौख्यंचमनोरथातीत आचारसौख्यशुभशौचयुताःसुरूपाः तेजस्विनः कृतविदोद्विजदेवभक्ताः सहस्त्रमाल्यजनभूषणसंप्रियाश्चसौम्यग्रहैर्बलयुतैः पुरुषाभवंतिलुब्धाःकुकर्मनिरतानिजकार्यनिष्ठाःपापान्विताःसकलहाश्चतमोभिभूताःक्रूराःशठाःवधरताःमलिनाःकृतघ्नाःपापग्रहैर्बलयुतैःपिशुनाःकुरूपाःपुराशिषुग्रहैर्धीराःसंग्रामकांक्षिणोबलिनः निःस्नेहाःसुकठोराःक्रूरामूर्खाश्चजायते युवतिभवनेषुचमृदवः संग्रामभीरवः पुरुषाःजलकुंकुमवस्त्रनिरताः सौम्याःकलहैःकृसयुक्ता इति एतत्सर्वंसुगमम् इ-

बृ·टी·
२४

तिश्रीमद्भट्टोत्पलविरचितायांबृहज्जातकविवृत्तौग्रहयोनिभेदाध्यायोद्वितीयः २ अथातोवियोनिजन्माध्यायोव्याख्यायते कःपुनःसवियो
निजन्मेत्युच्यते विविधवियोनिजन्मनांतिर्यक्पक्षिस्थावरादीनामुत्पत्तिर्वियोनिजन्मेत्युच्यते तत्रप्रष्टुःसकाशाज्जातककालंप्रश्नकालंवाविज्ञाय
वियोनिजन्मनिश्चयज्ञानंभवति तत्रवसंततिलकेनाह क्रूरग्रहैःसुबलिभिरिति चंद्रोपगद्विरसभागसमानरूपमिति चंद्रमाउपगतोव्यवस्थितो
यस्मिन्द्विरसभागेद्वादशभागेतत्समानरूपंतत्सदृशंरूपंसत्वंप्राणिनंवियोनिजन्मानंवदेत् सचद्विरसभागोयदिवियोनिसंज्ञोभवति सचद्रेष्काणोद्वाद
शभागोयदिवियोनिसंज्ञस्तदैवंवदेन्नान्यथेति तत्रमेषद्वादशभागव्यवस्थितेचंद्रमसिमेषाख्यस्यवियोनिजन्मज्ञातव्यंअजादेःछागादेः एवंवृषद्वाद

क्रूरग्रहैःसुबलिभिर्विबलैश्चसौम्यैःक्लीबेचतुष्टयगतेतदवेक्षणाद्वा ।
चंद्रोपगद्विरसभागसमानरूपंसत्वंवदेद्यदिभवेत्सवियोनिसंज्ञः १

शभागव्यवस्थितेवृषाख्यस्यमाहिषादेश्चकर्कटद्वादशभागव्यवस्थितेकुलीरादेःसिंहद्वादशभागव्यवस्थितेसिंहद्वीपीसृगालश्वानमार्जारादि
सत्वानांजन्मवृश्चिकद्वादशभागव्यवस्थितेसर्पकीटादेःधनुर्धरद्वादशभागद्वितीयार्द्धेव्यवस्थितेऽश्वगर्दभजन्ममकरद्वादशभागपूर्वार्द्धेव्यवस्थितेमृ
गजन्मअपरेमंडूकादेर्जलचरप्राणिनइच्छंति मीनेमीनस्यैवंकिमेतावतैववियोनिजन्मनिश्चयनेत्याह क्रूरग्रहैरित्यादि क्रूरग्रहैरादित्यांगारक
शनैश्चरैर्बुधेनचतदेकतमेनयुक्तेनक्षीणेनचंद्रमसाएतैःसुबलिभिरितिबलसंयुक्तैःसौम्यैःशुभग्रहैःक्रूरेरपरिशिष्टैर्विबलैर्वीर्यरहितैःक्ली
बशनैश्चरेबुधेवाचतुष्टयगतेकेंद्रस्थेएकोवियोनिजन्मयोगः तदवेक्षणाद्वा चंद्रमसिप्रदर्शितवियोनिजन्मद्वादशभागव्यवस्थितेक्रूरैर्बल

वि·ज·
३

२४

युक्तैः सौम्यैः विर्बलैर्हीनबलैर्यत्रतत्रावस्थिते नबुधेन शनैश्चरेण वा लग्ने दृष्टे वियोनिजन्मज्ञाने द्वितीयो योगः अर्थाद्देवद्विपद द्वादशभागस्थ्यवस्थिते चंद्रमसि पूर्वोक्तयोगाभावे द्विपदजन्म तथाच सारावल्याम् क्रूरैः स्वबलसमेतैर्विबलैः सौम्यैर्वियोनिभागगते चंद्रे ज्ञशनिकेंद्रे तद्वीक्षिते चोदये वियोनिः स्यात् मेषे शशीनदंशे छागादिप्रसवमाहुराचार्याः गोमहिषाणां गोंशे नररूपाणां तृतीयेंशे तत्रचतुर्थे भागे कूर्मादीनां भवेदुदकजानां व्याघ्रादीनां परतः परतो ज्ञेयं नराणांच वणिगंशे नररूपा वृश्चिकभागे तथा भुजंगाद्याः खरतुरगाद्या नवमे मृगासिखिनास्यात्तथा दशमे ज्ञेयाश्चतत्राविविधा वृक्षास्तृणजातयश्चिन्नाः एकादशेच पुरुषाजलजानां विधाश्चांत्ये श्वमार्जारमूषकादीनां संख्यातानश्वप्रभृतीनां प्रभवेयावंतो द्वादशांशका

पापाबलिनः स्वभागगाः पारक्ये विबलाश्च शोभनाः लग्नं च वियोनिसंज्ञकं दृष्ट्वात्रापि वियोनिमादिशेत् २ क्रियः
शिरोवक्त्रगलेवृषोन्ये पादांसकंपृष्ठमुरोथपार्श्वे कुक्षिस्त्वपानाध्र्यथमेढ्रमुष्कौ स्फिक्पुच्छमित्याहचतुष्पदांगे ३ ७

लग्ने तावंति वदेत् ज्ञः पुंस्त्रीसंज्ञान्यपत्यानि १ अथ वियोनिजन्मज्ञानयोगानंतरं वैतालीयेनाह पापा इति चंद्रोपगद्विरसभागसमानरूपनित्यनुवर्त्तते पापाः क्रूराग्रहाः प्रागुक्ता बलिनः सबलाः नकेवलं यावत्स्वभागगाः स्वनवांशस्थाः भागग्रहणेन हि नवांशक एव ज्ञातव्यः शोभनाः सौम्यग्रहाः प्रागुक्ताः पारक्ये परनवांशके विबला वीर्यरहिता व्यवस्थिताः लग्नं तात्कालिकं च यदि वियोनिसंज्ञकं भवति तदा चाप्यस्मिन्नपि योगे चंद्रोपगद्विरसभागसमानरूपं सत्वं जातमिति वदेत् २ अथ वियोनावपि चतुष्पदानां प्राधान्येनोपयोगित्वात्तदंगविभागं राश्यात्मकमुपजातिकयाह क्रिय इति क्रियो मेषश्चतुष्पदादीनां शिरस्तदुपलक्षितमित्यर्थः वृषेवक्त्रागले वक्त्रं मुखं गलं कंठं च वृषः अन्ये मिथुनादयो यथाक्रमं पादादि मिथुनः पा-

दांसकंपादौ पूर्वपादावंसौ स्कंधौ पृष्ठं कर्कटः उरो वक्षः सिंहः अथशब्द आनंतर्ये पार्श्वे पार्श्वद्वयं कन्या कुक्षिद्वयं तुला अपानं गुदो वृश्चिकः अंघ्री पश्चिमपादौ धन्वी अथशब्दः पादपूरणे मेढ्रं लिंगं मुष्कौ वृषणौ मकरः स्फिजौ कुंभः पुच्छं लांगूलं मीन इति शब्दः प्रकारे केचिच्चतुष्पदांगे राशिविभागमाहुः आहेति ब्रुवंत्याचार्या इति वाक्याध्याहारः चतुष्पद्ग्रहणमुपलक्षणार्थं पक्षिणामप्येवं तेषां पूर्वपादस्थाने पक्षपाली शेषं सामान्यं प्रयोजनं राश्युपलक्षितेंगे वर्णोपघातादेर्विज्ञानमिति ३ अथ वियोनीनां वर्णज्ञानं वैश्वदेव्याह लग्नांशादिति लग्ने येन ग्रहेण योगो यस्तत्र व्यवस्थितस्तस्य यो वर्णः प्रागुक्तः वर्णास्ताम्रसितानि रक्तहरितादि इत्याद्याः तद्वर्णं वियोनौ सत्वजाते वदेत् तत्तत्र सादौ वा ईक्षणाद्वेति अथ लग्ने न कश्चिद्ग्रहो भवति तदा येन ग्रहेण लग्नमीक्ष्यते दृश्यते तस्य यो वर्णस्तं वदेत् अथ लग्नं न केनचिद्युतं दृष्टं भवति तदा लग्नांशकात् लग्ने यद्राशिनवांशकोदयो भवति तद्राशिवर्णं

लग्नांशकाद्ग्रहयोगेक्षणाद्वा वर्णान्वदेद्बलयुक्ताद्वियोनौ दृष्ट्या समानान्प्रवदेत्स्वसंख्यया रेखां वदेत्स्मरसंस्थैश्च पृष्ठे ४

रक्तः श्वेत इत्यादिकं वा वदेत् दृष्ट्या समानानिति अथ बहुभिर्ग्रहैर्लग्नं युतं दृष्टं च भवति तदा बहूनेव वर्णान्वदेत् तत्रापि यो वीर्यवान् स बलस्तद्वर्णबहुल्यं यदुक्तं बलयुक्तादिति अथ स्वस्वामिना युतदृष्टस्य राशेः संबंधिनवांशको द्वयोर्लग्नगतो भवति तदा तद्वर्णमेव वदेत् यत्र यो ग्रहो वियोनौ यस्मिन्नंगे व्यवस्थितस्तत्रात्मीयवर्णं करोति एतत्कृतो लब्धः सप्तमस्थानगतैः ग्रहैर्बलवद्ग्रहवर्णां पृष्ठे वियोनौ रेखां वदेत् तथा च सारावल्याम् मेषादिभिरुदयस्थैरंशैर्वा ग्रहयुतैश्च दृष्टैर्वा स्वगृहांशकसंयोगाद्दृष्ट्या वर्णान्परांशकेकक्षान् १ सप्तमसंस्थाः कुर्युः पृष्ठे रेखां स्ववर्णसमां वीक्षंते यावंतो वियोनिवर्णाश्च तावंतः २ बलदीप्तो गगनचरः करोति वर्णं वियोनीनां पीतं करोति जीवः शशीसितभार्गवोधविचित्रंच ३ रक्तोदिनकर

रुधिरोरविजः कृष्णंबुधः शबलं स्वेराशौपरभागेपरराशौस्वेनवांशकेतिष्ठन् ४ पश्यन्ग्रहोविलग्नंस्ववर्णवर्णंतदाकुरुते ४ अधुनापक्षिणोजन्मज्ञानंवंशस्थेनाह खगेति खगेदृक्काणः पक्षिद्रेष्काणस्तत्रपक्षिद्रेष्काणोमिथुनेद्वितीयः सिंहःप्रथमः तुलाद्वितीयः कुंभःप्रथमः एषामन्यतमद्रेष्काणउदयतिशनैश्चरेंद्वीक्षणयोगसंभवाः यथाक्रमंविहगाःपक्षिणः स्थलांबुजाः संभवंति पक्षिद्रेष्काणेशनैश्चरेणयुतेदृष्टेवास्थलजपक्षिणांजन्मवक्तव्यम् एवमिंदुनायुतेदृष्टेवाजलजानांपक्षिणांजन्मइति एकोयोगः अत्रलग्ने प्रथमदशकभागेयोग्रहःस्थितः प्रथमद्रेष्काणस्थः ततःपरमन्यस्मिन् दशकेद्वितीयद्रेष्काणस्थः ततः परन्यस्मिन् दशकेतृतीयद्रेष्काणस्थइतिएवं त्रयोभागालिप्ताश्च विंशतिकलाश्चैकनवांशकप्रमाणंपरिकल्प्य ग्रहस्थितिरन्वेष्या

खगेदृक्काणेबलसंयुतेनवाग्रहेणयुक्तेचरभांशकोदयेबुधां
शकेवाविहगाःस्थलांबुजाःशनैश्चरेंद्वीक्षणयोगसंभवाः ५

सर्वराशिष्वियंपरिभाषा बलसंयुतेनवाग्रहेणयुक्तेचरभांशकोदये यस्यतस्यलग्नस्य चरभेनवांशकोदये बलसंयुतेनग्रहेणसंयुक्ते तथेतिशनिश्चरयुतेदृष्टेस्थलजानांपक्षिणांजन्मचंद्रयुतेदृष्टेजलजानांपक्षिणांजन्मज्ञानं द्वितीयोयोगः बुधांशकेवेति बुधनवांशकेमिथुनकन्यायोरन्यतमेतात्कालिकस्थलग्नस्योदितेतस्मिंश्चबलवद्ग्रहसंयुक्तेशनैश्चरयुतदृष्टेस्थलजानांजन्मचंद्रयुतदृष्टेजलजानामिति तृतीयोयोगः एतेशनैश्चरस्येंदोर्वासंयोगक्षणनवासंभवंतीति तथाचसारावल्याम् विहगादितदृक्काणेग्रहेणबलिनायुतेथचरभांशे बोधांशेवाविहगाःस्थलांबुजाः शनिशशीक्षणाद्योगात् ५

अधुनावृक्षजन्मज्ञानंवसंततिलकेनाह होरेति होरालग्नंइंदुश्चंद्रः सूरिर्जीवः रविरादित्यः एतैर्विबलैर्वीर्यरहितैः प्रष्टातरूणांवृक्षाणांजन्मपृच्छतिइतिवक्तव्यम् तत्रायंविशेषः तोयस्थलइति तत्रतरुभवोवृक्षजन्मांकिं तोयेजलेस्थलेनिर्जलेचेति तत्प्रभेदस्तद्विकल्पोंशकृतोनवांशकविहितः तत्रपरराश्यंशकोदयेतोयसमीपजान् वृक्षाननूपजान् तोयराशयः कर्कटमकरपश्चार्द्धमीनाः एतेरनूपजवृक्षजन्मेतिज्ञान इतरराश्यंशकोदये स्थलवृक्षजन्मज्ञानं-तत्रापिसंख्येयम् लग्नाद्ग्रहइति उदितांशे स्थलचारीजलचारीवाभवति तदधिपति यावत्संख्यराशौलग्नाद्व्यवस्थितस्तावतएवसंख्यास्तरवोवृक्षास्थलजाजलजावावक्तव्याः अत्राप्यंशकपतिवशाद्वक्ष्यमाणायुर्दायविधिनाद्वित्रिगुणत्वंचास्यस्वतुंगवक्रोपगतस्त्रिसंगुणोद्विरुत्तमस्वांशकभागगैरिति

होरेंदुसूरिरविभिर्विबलैस्तरूणांतोयस्थलेतरुभवोंशकृतः प्रभेदः लग्नाद्ग्रहः स्थलजलर्क्षपतिस्तुयावांस्तावंतएव
तरवःस्थलतोयजाताः ९

अत्रद्वित्रिगुणत्वेप्राप्तेयावंत्योगणनाभवंति तावंत्यः कार्याइत्यागमविदः तथाचसारावल्यां लग्नार्कजीवचंद्रैरबलैः शेषैश्च मूलयोनिः स्यात् स्थलजलभवनविभागाद्वृक्षादीनांप्रभेदकराः स्थलजलयोगाल्लग्नाद्यावतिराशौतुतेपितावंतः द्वित्रिगुणत्वंतेषामायुर्दायप्रकारोक्तं ९ अधुनास्थलजलजानामंशस्वामिवशाद्वृक्षाणांविशेषज्ञानमंदाक्रांतयाह अंतःसारानिति रविःसूर्योंशकपतिरंतःसारान्मध्यदृढान्शिंशपादीन्वृक्षान्जनयति उत्पादयति सूर्यसूनुरार्किर्दुर्भगान्इङ्गनसोराप्रियान्कुशप्रभृतीन्जनयति तुहिनकिरणश्चंद्रः क्षीरोपेतान् सक्षीरान् इक्षुप्रभृतीन्जनयति भौमः कुजः कंटकाढ्यान् कंटकबहुलान् खदिरप्रभृतीन्जनयति वागीशज्ञाविति वागीशोबृहस्पतिः ज्ञोबुधः एतौद्वौयथासंख्येनसफलविफलान्वृक्षान्जनयतः तत्रबृहस्पतिः सफलानाम्रवृक्षप्रभृतीन्बुधोविफलान् येषांलोकेपुष्पमेवापरयुज्यतेनफलानितान्जन

यति शुक्रः पुष्पवृक्षान्मालत्यादीन्जनयति इंदुश्चंद्रः भूयः पुनः स्निग्धान्सचिक्कणान्धवदेवदारुप्रभृतीन्जनयति भूमिपुत्रोंगारकः कटुकविषयान्भल्लातकप्रभृतीन्जनयति अत्रापृथग्जनित्वनिर्देशाच्चंद्रभौमयोर्विकल्पनादेशः ७ अथभूतरुशुभाशुभज्ञानसंख्यांत्ववशास्येनाह शुभोशुभर्क्षेति सएवस्थलजलांशपतिर्ग्रहः शुभस्तत्कालमशुभर्क्षेपापग्रहराशौव्यवस्थितोभवति तदारुचिरतरुशोभनंवृक्षंकुभूमिजमशोभनभूमिजातंवदेत् अन्यथाविपर्ययेविपरीतंवृक्षंकरोति अंशपतिरशुभस्तत्कालंशुभग्रहराशिस्थोभवति तदाअशोभनंवृक्षंशोभनभूमिजातंवदेत् अथादेवशुभग्रहशुभक्षेत्रस्थशुभंवृक्षंशोभनभूमिजातंवदेत् अशुभग्रह अशुभक्षेत्रस्थे अशोभनवृक्षमशोभनभूमिजातंवदेत् परांशके यावतीति स्थलजलांशपतिग्रहः स्वकादात्मीयादंशकाद्विच्युतश्चलितोयावत्संख्येपरनवांशकेव्यवस्थितः स्वमंशमतिक्रम्य यावत्संख्येपरनवांशकेवर्तते तत्तुल्यास्तत्संख्यास्तथोक्तस्तज्जातीयाश्चतरवो वृक्षाभवंति तावंतएवस्थलजाजलजावातरवः प्राक्संख्ययात्वथचेति तत्रपुनः संख्याकरणाद्विकल्पेनादेशइति तथाचसारावल्याम् स्वांशात्परांशगामिषुयावत्संख्याभवंतितावंतः स्थलजावाजलजावातरवः प्राक्संख्ययाप्रवदेदिति ८

अंतःसारान्जनयतिरविर्दुर्भगान्सूर्यसूनुः क्षीरोपेतान्तुहिनकिरणःकंटकाढ्यांश्चभौमः वागीशज्ञौसफलविफला
न्पुष्पवृक्षांश्चशुक्रःस्निग्धानिंदुःकटुकविटपान्भूमिपुत्रश्चभूयः ७ शुभोशुभर्क्षेरुचिरंकुभूमिजंकरोतिवृक्षंविप
रीतमन्यथा परांशकेयावतिविच्युतःस्वकाद्भवंतितुल्यास्तरवस्तथाभिधाः ८

श्रीमन्महाराजभक्तजनमानसनिवासायनमः

इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौवियोनिजन्माध्यायस्तृतीयः ३ अथातोनिषेकाध्यायोव्याख्यायते. तत्रादावृतौसतिगर्भाधानमित्यतः ऋतुनिरूपणमृतावपिस्त्रीपुरुषसंयोगज्ञानंवंशस्थेनाह कुजेंदुहेतुरिति कुजोभौमः इंदुश्चंद्रः तौहेतुः कारणंनिमित्तंयस्यरजसः तत्कुजेंदुहेतुप्रतिमासंमासमासंप्रतीतिप्रतिमासंस्त्रीणांप्रतिमासमार्तवं कुजेंदुहेतुप्रतिमासग्रहणेनप्रथमोद्भूतरजोनिवृत्तिंदर्शयन् गर्भग्रहणक्षममार्तवप्रदर्शयति ऋतौभवमार्तवंकथमित्याह गतेतुपीडर्क्षमनुष्णदीधिताविति अनुष्णदीधितौशीतमयूखेचंद्रेपीडर्क्षंगतेप्रकृतत्वात् स्त्रीणामनुपचयग्रहाश्रितेआर्तवकारणंभवति अर्थादेवयदिचंद्रः कुजसंदृष्टोभवति एतदुक्तंभवति स्त्रियोजन्मर्क्षादनुपचयसंस्थश्चंद्रमास्तत्रचयद्यंगार-

इतिश्रीभट्टोत्पलवि॰ बृहज्जा॰ वियोनिज॰ तृतीयः ३ कुजेंदुहेतुप्रतिमासमार्तवंगतेतुपीडर्क्षमनुष्णदीधितौ अ
तोन्यथास्थेशुभपुंग्रहेक्षितेनरेणसंयोगमुपैतिकामिनी १

केण दृश्यते तदागर्भग्रहणमनार्तवहेतुर्भवति अन्यत्रबालवृद्धातुरवंध्याभ्यः अत्रचबादरायणः स्त्रीणांगतोनुपचयर्क्षमनुष्णरश्मिः संदृश्यतेयदि धरातनयेन तासांगर्भग्रहार्तवमुशंतितदा नवध्यारुद्धातुराल्पवयसामपिचैतदिष्टं १ तथाचसारावल्याम् अनुपचयराशिसंस्थेकुमुदाकरबधवेरुधिरदृष्टे प्रतिमासंयुवतीनांभवतीह राजोब्रुवंत्यके इंदुर्जलंकुजोग्निर्जलमस्रंत्वग्निरेवपित्तस्यात् एवंरक्तेक्षोभितेपित्तेनरजः प्रवर्ततेस्त्रीषु एवंयद्भवतिरजोगर्भस्यनिमित्तमेव कथितंतत् उपचयसंस्थेविफलंप्रतिमासंदर्शनंतस्य एवंगर्भग्रहणयोग्यमार्तवंप्रदर्श्य स्त्रीपुरुषसंयोगसंभवासंभवौप्रदर्शयति अतोन्यथास्थइति अतोन्यथा अस्मादुक्तप्रकारादन्यथास्थेविपर्ययस्थेचंद्रमसि तत्रोक्तविपर्ययस्थः पुरुषजन्मराशेरुपचयस्थश्चंद्रमाय-

दिक्षवर्तिनितस्मिन्शशाङ्केनसौम्येनपुंग्रहेणगुरुणेक्षितेदृष्टेकामिनीस्त्रीनरेणपुरुषेणसहसंयोगंमैथुनमुपैतिगच्छतीति वक्तव्यम् नन्वत्रातोन्यथास्त्यइतिस्त्रियाउपचयस्थः कस्मान्नव्याख्यायते अयुक्तमेतत् प्राधान्यात्पुरुषस्यैवयस्माद्बादरायणः पुरुषोपचयग्रहस्थो गुरुणायदि दृश्यते हिममयूखः स्त्रीपुरुषसंयोगं तदावदेदन्यथानैवमिति सारावलीकारेण सामान्येनोक्तम् तद्यथा उपचयभवनशशभृत् दृष्टोगुरुणासुहृद्भिरथवासोपुंसांकरोतियोगंविशेषतः शक्रसंदृष्टः कस्मिन्कालेयंविचारः उच्यते चतुर्थदिनेस्नातायां तथाप्राणित्यः अनुचिरमेस्नातायांयद्युपचयस्थः शशीभवति बलिनागुरुणादृष्टोमित्रासहसंगमश्चतदाराजपुरुषेणरविणाविटेनभौमेन वीक्षितेचन्द्रेसौम्येनचपल

यथास्तराशिर्मिथुनंसमेतितथैववाच्योमिथुनप्रयोगः
असद्ग्रहालोकितसंयुतेस्तेसरोषइष्टैःसविलासहासः २

मतिनाष्टगुणाक्रांतेनरूपवता भृत्येन सूर्यपुत्रेणायातिस्त्रीसंगमंहितदा एकैकेनफलंस्यात् दृष्टेनान्यैः कुजादिभिः पापैःसर्वैः स्वगृहं कृत्वा गच्छतिवेश्यापदंयुवतिः १ अथमैथुनप्रकारज्ञानमिन्द्रवज्रयाह यथास्तराशिरिति अथानुलग्नात्सप्तमलग्नाद्वायोस्तराशिः सप्तमोस्तलग्नं तत्संज्ञकोयोजनुस्तन्मिथुनंस्त्रीपुमांसौयथायेनप्रकारेणसमेतिसंयोगंस्फुरतंयान्ति तथानेनैवप्रकारेणतस्यनरस्यमिथुनप्रयोगः संप्रयोगोवाच्योवक्तव्यः तस्मिन्नेवास्तेसप्तमेस्थानेअसद्ग्रहालोकितसंयुतेपापग्रहैर्दृष्टेयुक्तेवासरोषः सकलहोमिथुनप्रयोगोवाच्यः इष्टैः सौम्यैर्युतदृष्टे सविलासहासः सीत्कारादिसंयुक्तोमिथुनप्रयोगोवाच्यः अर्थादेवनकेनचिद्युतदृष्टेनसरोषोनापिसविलासहासइतिमिश्रयुतदृष्टेसरोषोसविला

सद्वासश्चेति तथाचसारावल्याम् द्विपदादयोविलग्नात्स्फुरतंकुर्वंतिसप्तमेयद्वत् तद्वत्पुरुषाणामपिगर्भाधानंसमादेश्यं अस्तेशुभयुतदृष्टे सरोषकलहं भवेत्तत्र सौम्यैः सौम्यंस्फुरतं वात्स्यायनसंज्ञप्रयोगिकाख्यानम् २ अथगर्भसंभवासंभवज्ञानंवंशस्थेनाह रवीति रविः सूर्यः इंदुश्चंद्रः शुक्रः सितः अवनिजोंगारकः एतैः स्वभागगैर्यत्रराशौस्वनवांशकस्थितैरपत्यंभवति गर्भसंभवोभवतीत्यर्थः यदिच स्वर्वैस्वभागगानस्युस्तदा पुरुषापचयर्क्षगाभ्यांसूर्यसिताभ्यांस्वनवांशकस्थाभ्यामेवंगर्भसंभवोवाच्यः एवंभौमचंद्राभ्यांनार्युपचयर्क्षगाभ्यांस्वनवांशकस्थाभ्यामाधानकालेऽवश्यमेवापत्यंभवति गर्भसंभवोभवतीत्यर्थः यस्मादनेनैवस्वल्पजातकेऽक्तम् बलयुक्तौस्वगृहांशेष्वर्कसिता

रवींदुशुक्रावनिजैः स्वभागगैर्गुरौत्रिकोणोदयसंस्थितेपिवा
भवत्यपत्यंहिविबीजिनामिमेकराहिमांशोर्विदृशामिवाफलाः ३

उपचयर्क्षगौ पुंसांस्त्रीणांवाकुजचंद्रौयदातदागर्भसंभवोभवतिगुरौत्रिकोणोदयसंस्थितेपिवेतिगुरौबृहस्पतौत्रिकोणयोर्नवपंचमयोरुदयलग्नेपिवासंस्थिते एषामन्यतमस्थानस्थेपिअपत्यंभवतिगर्भग्रहणंविबीजिनामिमेइति हियस्मादर्थे इमेहियोगाः विबीजिनांषंढानां विगतंबीजंवीर्यंयेषांस्त्रीपुरुषाणांतेषामफलाविद्यमानाअपिनसंभवंति अत्रोदाहरणं कराहिमांशोर्विदृशामिवाफलाइति यथाहिमांशोः शीतरश्मेः चंद्रस्यकराःरश्मयोविद्यमानाअपिविदृशामंधानामफलानिनिष्फलाविगताः दृशोयेषांतेविदृशः तेषामिवेति ३ अधुनास्त्रीपुंसयोराधानकालवशादाप्रसवावधियावच्छुभाशुभज्ञानंवंशस्थेनाह दिवाकरेति दिवाकरात्सूर्यात्स्मरगौसप्तमस्थानस्थौकुजार्कजौकुजो

गारकोर्कजः सौरिः यदि भवतः तदा पुंगलस्य मनुष्यस्य गदप्रदौ रोगप्रदौ भवतः एतदुक्तं भवति आधानकाले यत्रार्कः स्थितस्तस्मात्सप्तमे स्थाने यदांगारको भवति सौरो वा तदा पुंसो रोगप्रदो भवति स्वमासे एवमिंदोः चंद्रात्सप्तमो भौमः सौरो वा भवति तदा योषितः स्त्रियो रोगप्रदो भवति स्वमासे एव व्ययस्वगौ मृत्युकरावीति तावेव कुजसौरौ व्ययस्वगौ द्वादशद्वितीयगौ तयोर्दिवाकरौद्वोः सकाशादुभयत्र पार्श्वस्थितयोस्तदा पुंगलयोषितोः स्त्रीपुरुषयोर्मृत्युकरो भवतः एतदुक्तं भवति सूर्यादेको द्वादशो द्वितीयो द्वितीयस्तदा तयोर्मध्ये यो बलवान् स स्वमासे मृत्युकरो नरस्य भवति चंद्रादप्येवं व्ययस्थिते चंद्रादेको द्वादशो द्वितीयो द्वितीयस्तदा तयोर्मध्ये यो बलवान् स स्वमासे मृत्युकारो स्त्रिया भवति युतस्तथेति तदिति कुजसौरयोः परामर्शः

दिवाकरेंद्वोः सप्तगौ कुजार्कजौ गदप्रदौ पुंगलयोषितोस्तदा व्ययस्वगौ मृत्युकरौ युतस्तथा तदेकदृष्ट्या मरणाय
कल्पितौ ४ दिवार्कशुक्रौ पितृमातृसंज्ञितौ शनैश्चरेंदू निशि तद्विपर्ययात् पितृव्यमातृस्वसृसंज्ञितौ च तावथौजयुग्म
र्क्षगतौ तयोः शुभौ ५

तयोः कुजसौरयोर्मध्याद्यद्येकेनादित्यो युतः सहितो भवत्यन्येन दृश्यते तदा नरस्य मरणाय कल्पितो निश्चितः एवं चंद्रमा यद्येकेन युक्तो भवत्यपरेण दृष्टः तदा स्त्रियो मरणाय कल्पितः द्वयोर्मध्ये यो बलवान् तस्य मासे इति ४ अथ निषिक्तस्यापितृमातृपितृव्यमातृस्वसॄणां शुभाशुभज्ञानं दर्शयन्नाह दिवार्कशुक्रावीति दिवा दिने निषिक्तस्य जातस्य वा जंतोर्यथाक्रमं पितृमातृसंज्ञितावर्कशुक्रौ भवतः पितृसंज्ञकोर्को मातृसंज्ञकः शुक्रः एवमेव निशि रात्रौ निषिक्तस्य जातस्य वा शनैश्चरेंदू सौरचंद्रौ शनैश्चरः पितृसंज्ञकः चंद्रो मातृसंज्ञकः तद्विपर्ययादिति तद्विपर्ययाद्दिवारात्रिव्यत्ययात्तावेव पूर्वोक्तौ ग्रहौ पितृव्यमातृस्वसृसंज्ञितौ भवतः तत्र दिवा निषिक्तस्य जातस्य वा शनैश्च

रोपितृव्यसंज्ञः चंद्रोमातृस्वसृसंज्ञः रात्रौनिषिक्तस्यजातस्यवार्किः पितृव्यसंज्ञकः शुक्रोमातृष्वसृसंज्ञः तत्संज्ञयोःप्रयोजनंतावथौजयुग्मर्क्षगतौतयोः शुभाविति तावेवयथोक्तौग्रहौतयोरोजयुग्मर्क्षगतौशुभौज्ञेयौ ओजाविषमराशयोयुग्माः समराशयः तत्रदिवार्कोविषमर्क्षगोमेषमिथुनसिंहतुलाधन्विकुंभानामन्यतमस्थः पितुःशुभकृत् रात्रौपितृव्यस्यतथादिवाशुक्रः समर्क्षगोवृषकर्कटकन्यावृश्चिकमकरमीनानामन्यतमस्थोमातुः शुभकृत् रात्रौमातृष्वसुः शनैश्चरोरात्रौविषमर्क्षगतः पितुःशुभकृद्दिवापितृव्यस्यतथाचंद्रोरात्रौसमर्क्षगोमातुःशुभकृत् दिवामातृष्वसुःसामर्थ्याद्वोक्तविपर्ययस्थः सएवोक्तयोरशुभः यथादिवासमर्क्षेत्रगतार्कः पितुरशुभोरात्रौपितृव्यस्यदिवाविषमर्क्षगतः शुक्रोमातुरशुभोरात्रौमातृष्वसुः रात्रौसमर्क्षेत्रगतः शनैश्चरः पितुरशुभोदिवापितृव्यस्यरात्रौविषमर्क्षगतश्चंद्रमामातुरशुभोदिवामातृष्वसुरिति ५ अथाधानप्रश्नमध्येआधानकालवशात्मातुर्मरणयोगद्वयमाह उदयर्क्षमुदयलग्नमसद्भिः पापग्रहैरभिलषद्भिः तत्रोदयलग्नाभिलाषिभिः कश्चिल्लग्नाद्द्वितीयस्थग्रहोव्याख्यातः तेषामभिमतं यथोदयलग्नादनंतरं तदुभयस्यप्रत्यासन्नतयाभिलषत्युदयर्क्षमिति अन्येपुनर्लग्नाद्द्वादशस्थानस्थग्रहस्योदयर्क्षाभिलाषंकथयंति यस्मात्तद्विहायोदयराशिगमनंग्रहः करोति एवंलग्नाद्द्वादशस्थैः पापैर्लग्नेचयदिशुभदृष्टिं सौम्यग्रहदर्शनमयात् अप्राप्तेसौम्यग्रहैरदृश्यमानेस्त्रीयोषिद्गर्भिणीमरणमेतिमृत्युंप्राप्नोति अत्रचभगवान्गार्गिः अशुभैर्द्वादशर्क्षस्थैः शुभदृष्टिविवर्जितैः आधानलग्नेमरणंयोषितः प्रवदेत् बुधइति योगांतरमाह उदयराशिसहितेचयमेत्यादि

अभिलषद्भिरुदयर्क्षमसद्भिर्मरणमेतिशुभदृष्टिमयाते उदयराशिसहितेचयमेस्त्रीविगलितोडुपतिभूसुतदृष्टे ६

यमेशनैश्चरेउदयराशिसहिते लग्नस्थे तस्मिंश्च विगलिते नोडुपतिना नक्षत्रस्वामिना क्षीणचंद्रेन भूसुतेनांगारकेन च दृष्टे वलोकिते स्त्री गर्भिणी मरणमेति ६ अथ योगांतरं वैतालीयेनाह लग्नमुदयराशिरिंदुश्चंद्र एतौ लग्नेंदू पापद्वयमध्यसंस्थितौ लग्नस्थे चंद्रमसि यद्येकः पापग्रहो द्वादशस्थो भवति द्वितीयस्थोऽपरः तथा लग्नेंदू युगपत्तुल्यकालं पापद्वयमध्यगावुच्येते अथ लग्नेंदू विप्रकृष्टांशकान्वितौ भवतस्तत्रैकः पापस्तावदप्राप्य स्थितोऽपरस्तावदतिक्रम्य स्थितस्तथापि लग्नेंदू पापद्वयमध्यगावुच्येते अथवा द्वादशस्थान एकः पापोऽपरो द्वितीये तृतीये चंद्रश्चतुर्थे च पापो भवति तदापि लग्नेंदू पापद्वयमध्यगावुच्येते एवं लग्नेंदू यदि युगपत्पापद्वयमध्यगतौ न च सौम्यवीक्षितौ

पापद्वयमध्यसंस्थितौ लग्नेंदू न च सौम्यवीक्षितौ युगपत्पृथगेव वा वदेन्नारी गर्भयुता विपद्यते ७ क्रूरैः श
शिनश्चतुर्थगैर्लग्नाद्वा निधनाश्रिते कुजे बंध्वंत्यगयोः कुजार्कयोः क्षीणेंदौ निधनाय पूर्ववत् ८ छ

शुभग्रहावलोकितौ न भवतस्तदा नारी स्त्री गर्भयुता विपद्यते म्रियते पृथगेवेति अथवा पृथक्स्थौ लग्नेंदू भवतस्तयोर्मध्यादेकतमोऽपि पापद्वयमध्यगो भवति सौम्यग्रहदृष्टश्च न भवति तदा नारी गर्भयुता विपद्यते म्रियते इति पृथगेवेति अथवा लग्नात्तृतीये चंद्रो द्वितीये चतुर्थे द्वादशस्थाः पापाः तथापि लग्नेंदू पापमध्यगौ भवतः अथवा लग्नादेकादशे चंद्रो द्वितीयतृतीयद्वादशगाः पापास्तथापि लग्नेंदू पापद्वयमध्यगौ भवतः युगपद्ग्रहणं पापपूरणार्थं विस्पष्टार्थं वा तदर्थस्य पृथगेव सामर्थ्याल्लब्धत्वादत्र योगकर्तृणां ग्रहाणां मध्याद्यो बली तन्मासि गर्भिणी मरणं भवतीति सर्वत्र परिभाषा ७ अथान्ययोगांतराणि वैतालीयेनाह क्रूरैरिति शशिनश्चंद्रात्क्रूरैः पापग्रहैः चतुर्थस्थानस्थैर्निधनाश्रि

नेऽष्टमस्थानस्थे कुजे भौमे एको योगः अथवा लग्नाच्चतुर्थैः पापैरष्टमे भौमे चैवं द्वितीयो योगः बंध्वन्त्यगयोः कुजार्कयोरिति लग्नाद्बंधुगते चतुर्थस्थे भौमेऽन्त्यगते द्वादशस्थानस्थेऽर्के सूर्ये यत्र तत्रस्थे क्षीणेंदौ परिक्षीणचंद्रे तृतीयो योगः एषामाधानकाले कतमस्य संभवे मरणाय पूर्ववन्नारी गर्भयुता विपद्यत इति अधुना मातुः शस्त्रनिर्मितमरणयोगं गर्भस्रावं चाधानलग्नवशाद्वैतालीयेनाह उदयास्त इति निषेककाले कुजार्कयोर्भौमसूर्ययोर्यथासंख्यमुदयास्तगयोर्लग्नसप्तमस्थयोर्लग्ने भौमे सप्तमस्थेऽर्के लग्नयुतायाः भार्यायाः स्त्रियः शस्त्रकृतं शस्त्रहेतुकमरणं निधनं वदेत् ब्रूयात् तथा तेनैव प्रकारेणेति नारी गर्भयुता विपद्यत इत्यर्थः मासाधिपताविति गर्भमासेषु मासाधिपान्वक्ष्यति कललघनेत्यादि

उदयास्तगयोः कुजार्कयोर्निधनं शस्त्रकृतं वदेत्तथा मासाधिपतौ निपीडिते तत्कालं स्रवणं समादि-
शेत् ९ शशांकलग्नोपगतैः शुभग्रहैस्त्रिकोणजायार्थसुखास्पदस्थितैः तृतीयलाभर्क्षगतैश्च पापकैः
सुखी तु गर्भो रविणा निरीक्षितः १०

ना तत्र निषेककाले यो ग्रहो भौमादिरन्येन ग्रहेण युद्धे विजितो भवति पराजितो भवति यतः कुस्कृतादीनां युद्धमित्युक्तम् केतुना वाभिधूमित उल्कया वाभिहतः सोऽपि निपीडितग्रह इत्युच्यते सूर्याचंद्रमसौ क्रूरयुक्तौ दृष्टौ वा राहुणा ग्रहणपीडितौ इत्युच्यते तस्यापि निपीडितस्य ग्रहस्य यो भवति मासो यस्मिन्मासे मासाधिपत्यं तस्य भवति तत्कालं तस्मिन्काले गर्भस्य स्रवणं च्युतिं समादिशेत् वदेत् ९ अधुना गर्भपुष्टिज्ञानं वंशस्थेनाह शशांकेति यत्र राशौ शशांकश्चंद्रः स्थितस्तत्रैव शुभग्रहैर्व्यवस्थिते बुधगुरुसितैरित्यर्थः अथवा लग्नस्थैः शुभग्रहैः लग्नव्यवस्थितैः अथवा कैश्चिच्छशांकोपगतैः कैश्चिल्लग्नोपगतैः एवं शशा

कोपगतैः शुभग्रहैरुदयोपगतैर्वा अथवा त्रिकोणजायार्थसुखास्पदास्थितैः त्रिकोणं नवपंचमे जायास्थानं सप्तमं अर्थस्थानं द्वितीयं सुखस्थानं चतुर्थं आस्पदस्थानं दशमं एतेषु त्रिकोणजायार्थसुखास्पदेषु यथासंभवं चंद्राल्लग्नाद्वा द्वयोर्वा समवस्थितैस्तथा पापकैः क्रूरग्रहैश्चंद्राल्लग्नाद्वा तृतीयलाभर्क्षगतैः तृतीयैकादशस्थानस्थैः स्तैर्यथासंभवं द्वयोर्वास्थितैः रविणा सूर्येण यदि निरीक्षितो दृष्टः शशी लग्नं वा भवति यस्मादेकं योगः स च दृश्यते तदा गर्भस्थः सुखी पुष्टिमान्भवति केचिद्गुरुणा निरीक्षित इति पठंति तदयुक्तं यस्मात् सारावल्यामुक्तम् होरेंदुयुतैः सौम्यैस्त्रिकोणजायार्थसुखांबरस्थैर्वा पापैस्त्रिलाभयातैः सुखी च गर्भो निरीक्षितो रविणा १० अथ निषिक्तस्य निषेककालाज्ज्ञातस्य जन्मकालाद् उभयोरपि-

ओजर्क्षेपुरुषांशकेषुबलिभिर्लग्नार्कगुर्विंदुभिः पुंजन्मप्रवदेत्समांशकगतैर्युग्मेषुतैर्योषितः
गुर्वर्कौविषमेनरंशशिसितौवक्रश्चयुग्मेस्त्रियंद्व्यंगस्थाबुधवीक्षणाच्चयमलौकुर्वंतिपक्षेस्वके ११

प्रश्नकालाद्वा पुंस्त्रीविभागज्ञाने शार्दूलविक्रीडितेनाह ओजर्क्षेति ओजर्क्षे पुरुषांशकेष्विति लग्नमुदयलग्नं अर्कः आदित्यः गुरुर्जीवः इंदुश्चंद्रः एतैर्लग्नार्कगुर्विंदुभिरोजर्क्षस्थैर्विषमराशिव्यवस्थितैर्न केवलं यावद्विषमराशिव्यवस्थितैर्विषमनवांशगतैर्बलिभिश्च पुंसो जन्म वदेत् नन्वत्र विषमनवांशग्रहणं नास्ति कथं व्याख्यातं विषमनवांशकगैरिति उच्यते पुरुषांशकेष्विति वचनात्पुरुषराशीनामंशकेष्वित्यर्थः ये एव विषमराशयस्त एव पुरुषराशयः समांशकगतैर्युग्मेष्विति तैरेव लग्नार्कगुर्विंदुभिर्युग्मेषु समराशिषु व्यवस्थितैर्न केवलं यावत्समांशकगतैर्युग्मराशिनवांशकस्थैर्बलिभिश्च योषितः स्त्रियो जन्म वदेत् अथैषां यथाभिहितानां लग्नग्रहाणामुभयविकल्पकानां बाहुल्यात्पुंस्त्रीनिर्दे

शः साम्येवलाधिकत्वात् गुर्वर्काविति गुरुर्जीवः अर्क आदित्यः एतावुभावपिविषमेविषमेराशौगतौयत्रतत्र नवांशकस्थौ नरं मनुष्यं कुरुतः वलग्रहणमप्यत्रानुवर्तते शशीचंद्रःसितःशुक्रः वक्रोंगारकः एतेयदिसवलाः युग्मसमराशौगतायत्रतत्रनवांशकस्थाः स्त्रियंजनयति द्व्यंगस्थाइति एतएवग्रहाद्व्यंगस्थायत्रतत्रराशौद्विशरीरनवांशकस्थाः बुधवीक्षणाच्च बुधदृष्ट्यायमलौद्वौस्वपक्षेकुर्वंतिस्वपक्षेआत्मीयपक्षे आत्मीयपक्षेपुरुषनवांशकेस्त्रीनवांशकेचेत्यर्थः एतदुक्तंभवति चत्वारोद्विस्वभावामिथुनकन्याधन्विमीनाः तत्रमिथुनधन्विनौपुरुषांशकौ कन्यामीनौस्त्र्यंशकौ तेनयथासंभवंमिथुनधन्व्यंशगतावादित्यजीवौयदिबुधेनयत्रतत्रावस्थितेनदृश्येते तदायमलौद्वौपुरुषौवाच्यौ एवंयथासंभवकन्यामीनांशकगताः शशिशुक्रभौमाः यत्रतत्रावस्थितेनबुधेनदृश्यंते तदायमलेद्वेकन्येवाच्ये अथद्वावेववर्गौ यथादर्शितस्थौ बुधःपश्यति तदैकःपुरुषोद्वितीयाचकन्या नन्वत्रांशकग्रहणंनास्ति तत्कथंव्याख्यानं द्विशरीरांशकेस्थितइति अनेनैवस्वल्पजातकेउक्तम् वलिनौविषमेऽर्कगुरूनरंस्त्रियंसमभग्रहेकुजेंदुसिताः यमलौद्विशरीरांशेष्विंदुजदृष्ट्यास्वपक्षसमाविति अन्यथापुनरुक्ततास्यात् ओजर्क्षेपुरुषांशकेष्वित्यनेनैवगतार्थत्वात् वलग्रहणमत्रानुवर्तनीयमिति ११ अथपुंजन्मयोगांतरमुपेंद्रवज्रयाह विहायलग्नमिति उक्तयोगाभावस्यावसरेनान्यथा आधानलग्नंपृच्छाकालिकेलग्नंवालग्नंविहायत्यक्त्वासौरः शनैश्चरोलग्नाद्विषमर्क्षगतस्तृतीयपंचमसप्तमनवमैकादशस्थानानामन्यतमस्थः पुंजन्मकरः पुरुषजन्मकरोभवति प्रोक्तग्रहाणामिति प्रोक्तग्रहाणांकथितयोगकर्तृणांग्रहाणांवीर्यंवलमवलोक्यविचार्यप्रसूतौप्रसवकालेपुरुषोनरोनारीस्त्रीवावक्तव्या एतदुक्तंभवति यत्रपुरुषजन्मसंभवस्तत्रपुरुषोवाच्यः एवंस्त्रीयोगसंभवेस्त्रीवाच्या यत्रपुरुषजन्मयोगसंभवःस्त्रीयोगजन्मसंभवश्चदृश्यते तदायोयोगोबलवत् ग्रहाभिर्नि

मितस्तद्वशात्पुंस्त्रीजन्म वक्तव्यम् १२ अथ क्लीबजन्मयोगान् शार्दूलविक्रीडितेनाह अन्योन्यमिति शशी चंद्रः रविरादित्यः एतौ शशिरवी यथाक्रमं युग्मौजर्क्षगतौ समविषमराशिस्थावन्योन्यं परस्परं यदि पश्यतः समराशिस्थश्चंद्रो विषमराशिगतमर्कं पश्यत्यर्कः शशिनं पश्यति तदा क्लीबजन्मयोग एकः यद्वार्किसौम्यावपि आर्किः सौरः सौम्यो बुधः एतावार्किसौम्यौ यथाक्रमं युग्मौजर्क्षगतौ अन्योन्यं यदि पश्यतस्तदा द्वितीयो योगः वक्रो वा समगमिति वक्रोंगारको विषमर्क्षगः समगः समराशिस्थं दिनेशं सूर्यं पश्यति सूर्यश्चांगारकं पश्यतीति तदा तृतीयो योगः असमे चंद्रोदयौ चेदिति चंद्रः शशी उदयो लग्नमेतावसमे विषमराशाववस्थितौ भूम्यात्मजेनांगारकेण समराशिगेनेक्षितौ दृष्टौ तदा चतुर्थो योगः युग्मौ

विहाय लग्नं विषमर्क्षसंस्थः सौरोपि पुंजन्मकरो विलग्नात् प्रोक्तग्रहाणामवलोक्य वीर्यं वाच्यः प्रसूतौ पुरुषोंगना वा १२
अन्योन्यं यदि पश्यतः शशिरवी यद्वार्किसौम्यावपि वक्रो वा समगं दिनेशमसमे चंद्रोदयौ चेत्स्थितौ
युग्मौजर्क्षगतावपींदुसहजौ भूम्यात्मजेनेक्षितौ पुंभागे सितलग्नशीतकिरणाः स्युः क्लीबयोगाः स्मृताः १३

जर्क्षगतावपीति इंदुश्चंद्रः शशिजो बुधः एतौ यथासंख्यं युग्मौजर्क्षगतौ समविषमराशिगौ भूमिजेन भौमेन यत्र तत्रावस्थितेन वीक्षितौ दृष्टौ तदा पंचमो योगः पुंभाग इति सितः शुक्रः लग्नमुदयलग्नं शीतकिरणश्चंद्रः एते सितलग्नशीतकिरणाः यत्र तत्र राशौ पुंभागे विषमनवांशके व्यवस्थिता भवंति तदा क्लीबजन्मयोगः षष्ठः तथाच बादरायणः अन्योन्यं रविशशिनौ विषमौ विषमर्क्षगौ निरीक्ष्येते इंदुजरविपुत्रौ वा तथैव नपुंसकं कुरुतः वक्रो विषमे सूर्यः समगश्चैवं परस्परालोकात् विषमर्क्षे लग्नेंदू समराशिगः कुजोवलोकयति बुधश्चंद्रौ कुजदृष्टौ विष-

मर्त्येसमर्क्षगौतथैवोक्तौ ओजनवांशकसंस्थालग्नेंदुसितान्स्तथैवोक्ताइति एतेयोगाः पूर्वयोगानामभावेवक्तव्याः तेषांयोगानामेतेषांचसंभवेतेषामेवबलवत्त्वम् १३ अधुनाद्विविगर्भसंभवयोगान्शार्दूलविक्रीडितेनाह युग्मेचंद्रसितावितिचंद्रसितौशशिशुक्रौयुग्मेसमराशौव्यवस्थितौ तथातेनैवप्रकारेणज्ञारजीवोदयाः ज्ञोबुधः आरोंगारकः जीवोबृहस्पतिः उदयोलग्नं एतेसर्वएवौजभवनेविषमराशौस्युर्भवेयुः एवमेतेतिमिथुनंकुर्युः दारिकादारकश्चलग्नेंदूउदयचंद्रौसमगौयुग्मराशिव्यवस्थितौनृनिरीक्षितौनरग्रहेणयेनकेनचिद्दृष्टौभवतस्तथापिमिथुनंगर्भसंस्थंवाच्यम् युग्मेषुवाप्राणिनः तएवपूर्वोक्ताज्ञारजीवोदयाः सर्वएवयुग्मेषुसमराशिषुस्थिताः प्राणिनोबलिनोभवंति तथापिमिथुनंकुर्युः ग्रहोदयगता

युग्मेचंद्रसितौतथौजभवनेस्युर्ज्ञारजीवोदयालग्नेंदूनृनिरीक्षितौचसमगौयुग्मेषुवाप्राणिनः कुर्युस्तेमि
थुनंग्रहोदयगतान्द्व्यंगांशकान्पश्यन्निस्वांशेज्ञान्वितयेज्ञगांशकवशाद्युग्मंत्वमिश्रैः समम् १४ ७ ७

नित्यादिग्रहाः सर्वएवद्व्यंगांशकेषुद्विस्वभावनवांशकेषुगताः प्राप्ताः उदयोलग्नंचद्व्यंगांशकेषुगतः तान्ग्रहोदयगतान्द्व्यंगांशकान्स्वांशेस्वनवांशकस्थैर्ज्ञोबुधःपश्यति सतितदात्रितयंवक्तव्यम् तत्रायंविशेषः ज्ञगांशकवशाद्युग्मंतु इतिज्ञोबुधोगतोव्यवस्थितोयस्मिन्नवांशकेस्थितः तद्वशाद्युग्मं बुधोयस्मिन्नवांशकेव्यवस्थितः सयल्लिंगांशकस्तल्लिंगंतद्गर्भेयुग्मंवक्तव्यम् एकस्तद्विपरीतः एतदुक्तंभवति मिथुनांशकस्थोबुधोयदाग्रहोदयगतान्द्व्यंगांशकान्पश्यति तदागर्भेदारकद्वयंदारिकाचैकावक्तव्या अथकन्यानवांशकस्थोबुधोद्व्यंगांशकव्यवस्थितान्ग्रहोदयान्पश्यतितदागर्भेदारिकाद्वयंएकंचदारकंवक्तव्यम् अमिश्रैः सममिति तैर्ग्रहोदयबुधैरमिश्रास्थितैर्द्विस्वभावसमानलिंगस्थितैस्त्रितयं·

सममेकलिंगंवक्तव्यम् एतदुक्तंभवति मिथुननवांशकव्यवस्थितो बुधोमिथुनधन्व्यंशकव्यवस्थितान्ग्रहोदयान् पश्यति तदागर्भे द्वारकत्रितयंवक्तव्यम् अथकन्यांशकव्यवस्थितोबुधः कन्यामीनांशकव्यवस्थितान्ग्रहोदयान् पश्यति तदागर्भेदारिकात्रितयंवाच्यमिति तथाच सारावल्याम् समराशौशशिसितयोर्विषमेगुरुवक्रसौम्यलग्नेषु योगेस्मिन् गर्भगतंनूनंमिथुनंतुविज्ञेयम् लग्नेंदूवासमगौपुंग्रहदृष्टौच मिथुनजन्मकरौ उदयलग्नज्ञवक्रगुरवोबलिनः समराशिगास्तथैवार्क्काः द्विशरीरांशकयुक्तान् ग्रहान् विलग्नंचपश्यतोदुस्कृतेकन्यांशेद्वेकन्यपुरुषश्चनिर्दिश्यतेगर्भे मिथुनांशेकन्यैकाद्वौपुरुषौत्रितयमेवंस्यात् मिथुनधनराशिगतान्ग्रहान्विलग्नंचपश्यतोदुस्कृतः मिथुनांशस्थाश्चयदापुरुषत्रितयंतदागर्भे कन्यामीनांशकस्थान्विहगानुदययुवतिभागगताःपश्यतिशीतगुतनयः कन्यात्रितयंतदागर्भे १४ अधुनान्यधि-

धनुर्धरस्यांत्यगतेविलग्नेग्रहैस्तदंशोपगतैर्बलिष्ठैः ज्ञेनार्किणावीर्ययुतेनदृष्टेसंतिप्रभूताअपिकोषसंस्थाः १५

कगर्भसंभवयोगज्ञानमुपजातिकयाह धनुरिति धन्विलग्नेधनुर्धरांशकेवोदयलग्नमुपगतेधनुर्धरस्यधनुषोंत्यगगतेविलग्नेधन्व्यंशकेचोपगतेग्रहैः सर्वैरेवतदंशोपगतैर्यत्रतत्रराशौधन्विनवांशकस्थैर्नकेवलंयावद्बलिष्ठैर्वीर्यवद्भिस्तास्मिंश्चलग्नेज्ञेनार्किणा चदृष्टेज्ञेनबुधेनआर्किणाशनैश्चरेणचवीर्ययुतेनबलवतादृष्टेवलोकितेप्रभूताबहवः कोषसंस्थाजरायुवेष्टिताविग्रहागर्भेसंतिभवंतीति पंचसप्तदशायाचत्पूर्वमुक्तंमासाधिपतौनिपीडितेतत्कालंस्रवणंसमादिशेदिति १५ तदधुनागर्भस्यमासाधिपान्त्रोटकेनाह कललइति सितादयाग्रहागर्भस्यप्रथममासात्प्रभृतिकललादीनिभवंति वर्तयंति तद्यथागर्भस्यप्रथमेमासिकललंभवति शुक्रशोणितेघनेसंमिश्रीभूते तत्रगर्भस्य

तस्मिन्मासेसितः शुक्रोधिपतिः द्वितीयेघनताकाठिन्यंभवति तत्रतस्यकुजोंगारकोभौमोधिपतिः तृतीयेंकुरोत्पत्तिर्हस्ताद्यवयवजन्मतत्र-
जीवोबृहस्पतिराधिपतिः चतुर्थेस्थिसंभवः तत्रसूर्योरविराधिपतिः पंचमेचर्मसंभवस्तत्रचंद्रोधिपतिः षष्ठेंगजसंभवोलोमजन्मतत्रार्किःसौ-
रोधिपतिः सप्तमेचेतनतासंभवोभवतिचेतनतास्वभावः तत्रबुधोधिपतिः बुधमासात्परतोयेन्येशेषामासास्तेगर्भस्पर्शनोद्वेगप्रसवकरास्ते-
षुतोदयपतिश्चचंद्रसूर्यनाथाःस्वामिनः क्रमशोगदिताः उक्ताः तत्राष्टमेमासिगर्भस्थोजंतुरशनंकरोति मात्राभुक्तंपीतरसादि तस्यानाभिलग्न
नलिनंसंक्रमत तत्रगर्भाधानलग्नाधिपतिर्योग्रहः समासाधिपतिः नवमेगर्भस्थस्योद्वेगोभवति तत्रचंद्रोधिपतिर्भवति दशमेगर्भस्यप्र-

कललघनांकुरास्थिचर्मांगजचेतनताः सितकुजजीवसूर्यचंद्रार्किबुधाःपरतः उद
यापचयस्तूर्यचंद्रनाथाःक्रमशोगदिताभवंतिशुभाशुभंचमासाधिपतेःसदृशम् १६

सवोप्रसूतिर्भवति तत्रसूर्योरविराधिपतिः तथाचस्वल्पजातके कललघनावयवास्थित्वग्रोमस्मृतिसमुद्भवाः क्रमशः मासेषुशुक्रकुज-
जीवसूर्यचंद्रार्किसौम्यानाम् अशनोद्वेगप्रसवाः परतोलग्नेशचंद्रसूर्याणामिति अत्रप्रथमद्वितीयमासाधिपयोर्यवनेश्वरेणसहमतभेदः त-
थाचतद्वाक्यम् कुजास्फुजिज्जीवरवींदुसौरशशांकलग्नेंदुदिवाकराणाम् मासाधिपत्यंप्रभवंतिचैषांजयोपघातैर्न्हवद्भवंति आद्येतुमासे
कललंद्वितीयेपेशिस्तृतीयेपिभवंतिशाखाः १ अस्थ्यान्यथस्नायुशिरोम्बुतुर्येमज्जात्वचमांप्यपिपंचमेतुषष्ठेलसद्रोमनखोपकुक्षचेतःस्थि-
ताःसप्तममासचेष्टाः तृणाशनास्वादनमष्टमेस्यात्पूर्वापराह्णौनवमेरतिश्च स्रोतोभिरुद्घाटितपूर्णदेहोगर्भोर्कमासेदशमप्रसूते

आचार्यस्यबहुमतमासानामभिमतामितिभवति शुभाशुभंच मासाधिपतेः सदृशंगर्भस्थस्यमासाधिपतिसदृशंशुभमशुभंफलंभवति ए-
तदुक्तंभवति आधानकालेयोग्रहोनिपीडितोभवति तन्मासिगर्भस्यपतनंकलुषेमृदुरश्मौविवर्णेपीडनंनिर्मलेरश्मिजालेसंपन्नेबलवति पु-
ष्टिरिति तथाचसूक्ष्मजातके कलुषैःपीडापतनंनिपीडितैर्निर्मलैःपुष्टिरिति अथचान्यैःशास्त्रकारैर्विशेषउक्तः तत्किंचित्सदृश्यतेतथाचसा-
रावल्याम् तत्रशुभाशुभमपिस्वैःकर्मभिरधिवासिताविषयवृत्तिः गर्भवासेनिपततिसंयोगेशुक्रशोणितयोःमिथुनस्य मनोभावोयादृक्प्रब-
लस्यसंभवति श्लेष्मादिभिश्चदोषैस्तत्तुल्यगुणोनिषिक्तस्य यादृक्पश्यतिसौम्यस्तत्तुल्यबलगुणस्ततःसमाधत्ते पितृजननीसादृश्यंरवेः श-

त्रिकोणगेज्ञेविबलैस्तथापरैर्मुखाङ्घ्रिहस्तैर्द्विगुणस्तदाभवेत्
अवाग्गवीन्दौवशभेभसंधिगैःशुभेक्षितश्चेत्कुरुतेगिरंचिरात् १७

शांकस्यबलयोगात् सबोध्यमेतत् १६ अथाधिकाङ्गमूकचिरलब्धगिरांसंभवयोगान्वंशस्थेनाह त्रिकोणगेति ज्ञे बुधे त्रिकोणगे लग्ने लग्ना-
न्नवपञ्चमस्थेवातस्माद्बुधादपरैरन्यैःसर्वैर्ग्रहैर्यत्रतत्रावस्थितैर्विबलैर्वीर्यरहितैर्मुखाङ्घ्रिहस्तैर्द्विगुणोगर्भस्थोबालः द्विशिरश्चतुष्पाच्चतुर्भु-
जइत्यर्थः त्रिकोणगेज्ञेइत्यत्रकेचिन्मूलत्रिकोणगेबुधेकन्यागतइत्याहुः तच्चायुक्तम् यस्माद्गणानुगार्गैः बलहीनैर्ग्रहैः सर्वैर्नवपञ्चमगैर्बु-
धे द्विगुणाङ्घ्रिशिरोहस्तोभवत्युक्तोदरस्तथा १ अवागिति गवि वृषस्थितेइन्दौचन्द्रे शुभैःपापैश्चसन्धिगैः कर्कटवृश्चिकमीनानामन्त्यनवांशकस्थै-
र्यदासभवेत्तदाअवाङ्मूकोगर्भस्थोबालः शुभेक्षितइतिचेच्छब्दाद्यद्ययमेवंविधेयोगेयदिशुभेक्षितःसौम्यग्रहदृष्टस्तदाभवतितदाजातस्यचिरा-

हुनाकालेनगिरंवाचंकुरुते अर्थादेव पापवीक्षितेवाग्धीनइति एवंयोगेमिश्रग्रहवीक्षितेयदासौम्याबलिनस्तदाचिरेणकालेनलब्धवाग्भवति यदा पापाबलिनस्तदानैवेति अत्रच भगवान्गार्गिः कुलीरालिझषांतस्थैः पापैश्चंद्रेवृषोपगेमूकः पापेक्षितैः सौम्यैश्चिरेणलभतेगिरं मिश्रदृष्टैर्ग्रहैर्हीनैर्मूकोबालश्चवाक्चिरादिति १७ अधुनासदंतकुब्जजडजन्मयोगान्मंदाक्रांतयाह सौम्यर्क्षेति रविजः शनैश्चरः रुधिरोंगारकः यत्र तत्रराशौशनैश्चरांगारकौ सौम्यर्क्षांशौबुधनवांशकौमिथुनांशककन्यांशकौवाभवतः अथवा बुधर्क्षेमिथुनकन्ययोरन्यतमेराशौस्थितौभवतः चेच्छब्दायद्यर्थेयद्येवंतदात्रास्मिन्योगेसदंतोदंतसहितोगर्भस्थोवाच्यः केचित्सौम्यर्क्षांशेमिथुनेमिथुनांशकेकन्यायांकन्यांशकेचनेच्छंतिऋ

सौम्यर्क्षांशेरविजरुधिरौचेत्सदंतोत्रजातः कुब्जःस्वर्क्षेशशिनितनुगेमंदमाहेयदृष्टे
पंगुर्मीनेयमशशिकुजैर्वीक्षितेलग्नसंस्थेसंधौपापेशशिनिचजडःस्यान्नचेत्सौम्यदृष्टः १८

क्षांशयोर्युगपद्ग्रहणात् अंशशब्देनकेवलेनैवासिद्धिः स्यात्तदृक्षग्रहणमतिरिच्यत इति एवंविधेयोगेगर्भस्थः सदंतोभवतिजातोवाकुब्जः स्वर्क्षेइति शशिनिचंद्रेस्वर्क्षे आत्मीयराशौकर्कटस्थिते तथाभूतेचतनुगते तथाभूतेमंदमाहेयदृष्टेमंदेनशनैश्चरेणमाहेयेनांगारकेणचदृष्टेवलोकितेचंद्रेगर्भस्थःकुब्जोवाच्यः पंगुर्मीनइति मीनेलग्नसंस्थेयमशशिकुजैःदृष्टेपंगुर्गर्भस्थोभवति यमः शनैश्चरः शशीचंद्रः कुजः भौमः एतैर्वीक्षितेदृष्टेपंगुः पादविकलोगर्भस्थोवाच्यः संधौपापेइति पापेआदित्यकुजसौराणामन्यतमेशशिनिचचंद्रेसंधौकर्कटवृश्चिकमीनानांनवांशगतेर्यथासंभवंगर्भस्थोजंतुर्जडः श्रोत्रेंद्रियहीनोवाच्यः नचेत्सौम्यदृष्टइति एतेयोगकर्तारोग्रहायथादर्शितानान्वेद्यदिसौम्यैः

शुभग्रहैर्दृष्टानभवंति तदेतद्योगचतुष्टयंपूर्णंवक्तव्यम् सौम्यैर्बलिभिर्निरीक्षितायोगानभवंति मध्यबलैर्हीनबलैर्वादृष्टास्तदा असमग्रफला भवंतिइति १८ अधुनावामनहीनांगौद्वाधिकेनाह सौरशशांकइति मकरांत्यविलग्ने मकरस्यांत्यनवांशकेविलग्नस्थे नवमनवांशकोदयमानः सचमकरस्यभवति इत्यर्थः तस्मिंश्चसौरशशांकदिवाकरदृष्टे सौरः शनैश्चरः शशांकश्चंद्रः दिवाकरः सूर्यः एतैरवलोकिते वामनकोगर्भस्थोवाच्यः धीनवमोदयगैरिति अत्रकेचिदेवंव्याचक्षते यदालग्ने द्वितीयद्रेष्काणोदयोभवतितदातस्यपंचमराशिसंबंधित्वात्षष्ठोद्रेष्काणइत्याख्यातस्मिन् द्वितीयद्रेष्काणे पापग्रहयुते उदयमनुप्राप्ते नवमे तस्मिन् सौरशशांकदिवाकरदृष्टे गर्भस्थो ऽभुजो भुजहीनो वाच्यः

सौरशशांकदिवाकरदृष्टे वामनकोमकरांत्यविलग्ने धीन
वमोदयगैश्चदृक्काणैः पापयुतैरभुजांघ्रिशिराःस्यात् १९

एवंयदालग्नेतृतीयस्यद्रेष्काणस्यउदयोभवतितदातस्यनवमराशिसंबंधित्वान्नवमदृक्काणइत्याख्या तस्मिन्नुदयेपापयुतेसौरशशांकदिवाकरदृष्टे ऽनंघ्रिःपादहीनोगर्भस्थोवाच्यः एवंप्रथमद्रेष्काणस्यलग्नसंबंधित्वादुदयद्रेष्काणइत्याख्यातस्मिन्नुदयगते पापयुतेसौरशशांकदिवाकरदृष्टे ऽशिराः शिरहीनोगर्भस्थोवाच्यः एतेषुयोगेषुसौरशशांकदिवाकराणांदर्शनयोगास्तेऽपियुक्ताइति केवलेनारकेणयुक्तेयोगोभवति अत्राप्यन्येधीनवमोदयगैर्द्रेष्काणैः पापयुतैः केवलमेवाभुजांघ्रिशिरसांसंभवंव्याचक्षते सौरशशांकदिवाकरदृष्टइत्यस्यानुवृत्तिंनेच्छंति अन्येविभुजादिसंभवंयथासंख्यंत्यक्त्वाद्रेष्काणत्रयेपिप्रतिद्रेष्काणंतदुद्भवविकल्पमाहुः विभुजोवानंघ्रिर्वाविशि

रावेति अन्येएवंव्याचक्षते यथालग्नेयदाप्रथमद्रेष्काणोदयोभवति तदापंचमराशौप्रथमद्रेष्काणोनवमोपिप्रथम एवतत्तद्रेष्काणत्रयंय
दिपापयुतंभवतितदाभुजहीनोगर्भस्थोवाच्यः अथलग्नेद्वितीयद्रेष्काणोदयोभवति तदापंचमनवमयोरपितृतीयएवएतद्रेष्काणत्रयंय-
दापापयुतंभवति तदापादहीनोगर्भस्थोवाच्यः अथलग्नेतृतीयद्रेष्काणोदयोभवति तदापंचमनवमयोरपितृतीयेएवएतद्रेष्काणत्रयंयदिपा
पयुतंभवतितदाशिरोविहीनोगर्भस्थोवाच्यः अत्राप्यन्येयथासंख्यंत्यक्त्वान्यप्रकारेपियोगेभुजांघ्रिशिरोहीनानांविकल्पेनगर्भस्थस्यसंभव-
माहुः यथापुनर्वाब्रूमः निषेककालेयः पंचमराशौयोद्रेष्काणः सयद्यंगारकेणयुक्तः सौरशशांकदिवाकरदृष्टश्चभवति तदाविभुजोभवति एवंनव
मस्थानेद्रेष्काणोनवमद्रेष्काणः तथानिषेककालेनवमराशौयोद्रेष्काणः सयद्यंगारकेणयुक्तः सौरशशांकदिवाकरदृष्टश्चभवति तदा

रविशशियुतेसिंहेलग्ने कुजार्किनिरीक्षिते नयनरहितः सौम्यासौम्यैः सबुद्बुदलोचनः

अनंघ्रिर्भवति तदानिषेककालेलग्नस्थोद्रेष्काणः सयद्यंगारकेणयुक्तः सौरशशांकदिवाकरदृष्टश्चभवति तदाअशिरागर्भस्थोवाच्यः एषै
वव्याख्यासाध्वी यस्माद्भगवान्गार्गिः लग्नद्रेष्काणगोभौमः सौरसूर्येंदुवीक्षितः कुर्याद्विशिरसंतद्वत्पंचमेवाङ्घ्रिवर्जितं १ विपदंनवमस्था
नेयदिसौम्यैर्नवीक्षितइति तथाचसारावल्याम् भौमयुतोद्रेष्काणस्त्रिकोणलग्नेषुसंदृष्टाविभुजांघ्रिमस्तकःस्याच्छनिरविचंद्रैर्वदंद्रभं ११
अथविकलजन्मज्ञानार्थंहारिण्याआह रविशशियुतेति सिंहेलग्नेरविशशियुते अर्कचंद्राभ्यांसंयुतेतथाभूते कुजार्किनानिरीक्षिते भौमसौरा-
भ्यांदृष्टेनयनरहितोभवति नेत्ररहितोऽथोगर्भस्थोवाच्यः अर्थादिचकेवलोसिंहलग्नेऽर्केणयुक्तेसौरेगारकेणदृष्टेदक्षिणाक्षिकाणःए-

वसिंहलग्नेकेवलेनचंद्रेणयुक्तेसौरेंगारकेणदृष्टेवामाक्षिकाणः सौम्यासौम्यैःसबुद्बुदलोचनइति तस्मिन्नेवसिंहलग्नेऽर्के चंद्राभ्यांयुक्तेसौम्यासौम्यैः शुभपापग्रहैर्दृष्टेगर्भस्थः सबुद्बुदलोचनः पुष्पिताक्षोवाच्यः अत्राप्येकतमयुक्तेभागवत्पुष्पिताक्षित्वंवाच्यं व्ययग्रहगतइति निषेककाललग्नाज्जन्मलग्नाद्वायस्यचंद्रमाव्ययगृहगतोद्वादशस्थोभवति तस्यवामचक्षुर्हीनास्तिवामाक्षिकाणः सभवतीत्यर्थः एवंरविरादित्योलग्नाद्द्वादशोऽपरंदक्षिणचक्षुर्हिनस्ति अशुभगदितायोगाइति यएतेयोगाः भागाभिहितास्त्रिकोणगेज्ञइत्यादिनाग्रंथेनशुभाशुभफलदास्तेषांसर्वेषामेवयोगानांयदायोगकर्तारोग्रहाः शुभग्रहैः सौम्यग्रहैः दृष्टाभवंति तदातेयोगायाप्याभवंति पूर्णंयथोक्तफलनप्रयच्छंति

व्ययगृहगतश्चंद्रोवामंहिनस्त्यपरंरविर्नशुभगदितायोगायाप्याभवंतिशुभेक्षिताः २०

किंतुकिंचित्प्रयच्छंतीत्यर्थः २० अथप्रश्नाधानकालेयोगवशात्प्रसवकालज्ञानंवसंततिलकेनाह तत्कालमिंदुसहितोति तत्कालमिंदुः तत्काले प्रश्नकालेआधानकालेवायस्मिन्राशौचंद्रमावर्ततेतत्रचयस्मिन्द्वादशभागेव्यवस्थितः सतत्कालमिंदुसहितोद्विरसांशकः केचित्तुतत्कालेंदुसहितोद्विरसांशकइतिपठंति तत्कालिकेंदुनायावत्संख्याद्वादशभाग सहितः तत्तुल्यस्तावत्संख्यामेषादौगणनयायोराशिस्तत्रस्थेचंद्रमसिपुरतोग्रतोदशमेमासिगर्भस्यप्रसवोवाच्यइतिकेचित् तथाचसारावल्याम् यस्मिन्द्वादशभागेगतोधानव्यवस्थितश्चंद्रः तत्तुल्यर्क्षेप्रसवोगर्भस्यसमादिशत्प्राज्ञः १ अन्येपुनरेवंव्याचक्षते आधानकालेयत्रराशौचंद्रमाव्यवस्थितः त

न्यावत्संख्यो द्वादशभागेवर्तते तस्माद्द्वादशभागराशेस्तावत्संख्योयएवपुरतोराशिस्तत्रस्थेचंद्रमसिदशमेमासिप्रसवोवक्तव्यः एषैवसा
ध्वीव्याख्या यस्माद्भगवान्गार्गिःयावत्संख्येद्वादशांशेशीतरश्मिर्व्यवस्थितः तत्संख्योयस्ततोराशिर्जन्मदुस्तद्गतौवदेत् १ अत्रापिनक्षत्रानय
नेयमनुपातोपायः यदिचंद्राक्रांतद्वादशभागप्रमाणेनसकलचंद्रराशिरष्टादशशतालिप्ताप्रमाणंलभ्यतेतदनेनभुक्तद्वादशराशिप्रमाणेनकिमितिल
ब्धंचंद्रराशिभुक्तंलभ्यते नतोऽष्टशतलिप्तापरिकल्पनयानक्षत्रमूह्यं अत्रापिदिनरात्रिकालज्ञानमाह यावानुदेति दिनरात्रिलग्नाः पूर्वंव्याख्या
ताः गोजाश्विकर्किमिथुनाइत्यादि आधानकालेप्रश्नकालेवायल्लग्नंतस्ययः प्राग्विभागः दिनसंज्ञोरात्रिसंज्ञोवायावानुदेति स्वमानात्याव

तत्कालमिंदुसहितोद्विरसांशकोयस्तत्तुल्यराशिसहितेपुरतः शशांके यावानु
देतिदिनरात्रिसमानभागस्तावद्गतेदिननिशोः प्रवदंतिजन्म २१ ७ ७

कालभागोगतस्तावत्येवदिननिशोः स्वमानाद्गतेकालेजन्मभविष्यतीतिवाच्यमेवं दिनस्यरात्रेर्वागतकालंबुध्वाप्रसवकालेलग्नहोरा
द्रेष्काणनवांशकद्वादशभागत्रिंशांशकावाच्याः अत्रयेप्रवदंतिकथयंति तेषांतद्वाक्यं सारावल्याम् तत्कालदिवसनिशासंज्ञः समु
तिराशिभागोयः यावानुदयरनावान्वाच्योदिवसस्यरात्रेर्वा इत्याधानेप्रथमंसूतिकालस्तंनिश्चितंकृत्वा जातकविहितंचविधिंविचि
येत्तत्रगणितज्ञः २१ अधुनाधृतस्यगर्भस्यवर्षत्रयवर्षद्वादशज्ञानमालिन्याह उदयतीति मृदोःसौरस्य भांशेमृदुभांशेनिषेकका
यस्यतस्यलग्नस्योदयेमृदुभांशेशनैश्चरराशिनवांशकेमृगांशके कुंभांशकेवोदयइति तथाभूतेतस्मादेवलग्नात्सप्तमेशनैश्चरेन

त्कालेसप्तमस्थे धूनगते एवंविधे योगे यदिनिषेको आधानंभवति तदाधृतस्यगर्भस्याब्दत्रयेणवर्षत्रयेणसूतिकायाः प्रसवोवक्तव्यः शा नीति एषएवविधिर्यदाशशिनिचंद्रे भवतितदाद्वादशेब्देद्वादशेवर्षेसूतिः प्रसवंकुर्यात् एतदुक्तंभवति यस्यतस्यलग्नस्योदयेयदाकर्क शकोदयोभवति तस्माल्लग्नात्सप्तमश्चंद्रो भवतितदाधृतस्यगर्भस्यद्वादशेब्देप्रसवोवाच्यः निगदितमिहेति इहास्मिन्नाधानाध्याये धानकालयोगवशात् यथाहीनाधिकांगादीनांगर्भः संभवति तथाप्रसूतिकालेपितादृग्योगवशात्तथाभिधानामेवजन्मवक्तव्यम् पितृ तृपितृव्यमातुलभ्रातृस्वसॄणामपिशुभाशुभंजन्मकालवशात्तदनंतरमपिवक्तव्यम् युक्त्येति यत्रसंभवति तत्रवक्तव्यम् यथागर्भा

उदयतिमृदुभांशेसप्तमस्थेचमंदेयदिभवतिनिषेकःसूतिरब्दत्रयेण शशिनितुविधिरेषद्वा
दशाब्देप्रकुर्यान्निगदितमिहचिंत्यंसूतिकालेपियुक्त्या २२ इतिनिषेकाध्यायःसमाप्तः

वादिगर्भप्रसवकालनिर्देशाद्दिवृ एवमाधानकालात् प्रसवकालाच्च यथैवोद्देशः कृतः तथाप्रश्नकालादपिवक्तव्यः उक्तंचजन्मन्या नेप्रश्नकालेवेति इतिश्रीभट्टोत्पलविरचितायां बृहज्जातकविवृत्तौनिषेकाध्यायश्चतुर्थः

अथातोजन्मविधिर्नामाऽध्यायो- व्याख्यायते तत्रादावेवपितुः सन्निधावसन्निधौवाजातइत्यनुष्टुभाह पितुर्जातइति इंदौचंद्रप्रसवलग्नमपश्यतिसतिपितुःपरोक्षस्य नकस्यासन्निधौजातः तत्रापितुरसन्निधानेस्वदेशपरदेशास्थितिज्ञानमाह विदेशस्थस्येति दिवाकरेसूर्येचरभेचरराशिस्थितेमध्याद्द मध्याद्दशमस्थानाद्भ्रष्टेपतिते एकादशद्वादशस्थे नवमाष्टमस्थानस्थेपितुर्विदेशस्थस्य अन्यदेशगतस्यजातः चंद्रमसिप्रसवलग्न

पश्यत्येषयोगोनान्यथेति चंद्रमसवलग्नमपश्यति अर्कोस्थिरराशिस्थेमध्याद्भ्रष्टेस्वदेशस्थस्यपितुः परोक्षेजातः अस्मिन्नेवयोगे द्विस्वभावस्थेर्केमध्याद्भ्रष्टेस्वदेशापरदेशयोर्मध्योपस्थितस्यपरोक्षेजातः मार्गमध्येइत्यर्थः अथादिचचंद्रमसवलग्नमपश्यत्यर्कच रराशिस्थेवाद्विस्वभावराशिस्थेवामध्याद्भ्रष्टेपिवापितुः स्वदेशस्थस्यैवपरोक्षसन्निधौजातइतिवक्तव्यम् तथाचसारावल्याम् होरामनीक्ष्यमाणेपितरिनगेहास्थितेशशिनिजातः मेषूरणाद्यूनेवाचरगेभानौविदेशगते १ अथान्यानपियोगाननुष्टुभाह उदयस्थइति मंदेसौरेउदयस्थेलग्नगतेपितुः परोक्षस्यजातः वाशब्दः प्रकाराय अथवाकुजेभौमेजन्मलग्नादस्तसप्तमस्थानंसमागते

पितुर्जातःपरोक्षस्यलग्नमिंदावपश्यति विदेशस्थस्यचरभेमध्याद्भ्रष्टेदिवाकरे १
उदयस्थेपिवामंदेकुजेवास्तसमागते स्थितेवांतःक्षपानाथेशशांकसुतशुक्रयोः २

गते पितुःपरोक्षस्यजातइति स्थितेवांतइति क्षपानाथेचंद्रेशशांकसुतशुक्रयोर्मध्यस्थेशशांकसुतोबुधः शुक्रोभार्गवः अनयोर्मध्यस्थितेचंद्रेचंद्रादेकोद्वादशेन्योद्वितीये अथचैकस्मिन्राशौमध्यभागेषुचंद्रःस्थितः आद्यंतभागयोर्बुधशुक्रौ तथापिमध्यस्थः एवंविधेयोगेपितुःपरोक्षस्यजातः तथाचस्वल्पजातके चंद्रेलग्नमपश्यतिमध्येवासौम्यशुक्रयोश्चंद्रेजन्मपरोक्षस्यपितुर्यमोदयेवाकुजेचास्तेइति २ अधुनासर्पवेष्टितजन्मज्ञानंचानुष्टुभाह शशांकेति वृश्चिकेशोभौमः वृश्चिकस्वामीत्यर्थः शशा

केचंद्रेवृश्चिकेशनित्रिभागगेभौमद्रेष्काणस्थेचंद्रेतत्रभौमद्रेष्काणाः मेषेप्रथमः कर्कटेद्वितीयःसिंहेतृतीयः वृश्चिकेप्रथमः धनेद्वितीयः मीनेतृतीयः एषामन्यतमस्थस्यचंद्रमसः शुभैःशुभग्रहैः स्वायस्थितैर्द्वितीयैकादशस्थानस्थितैः सर्पउरगोजातइत्येवोक्तपापलग्नेति एवंपापग्रहसंबंधिलग्नोदयेयदाभौमद्रेष्काणोभवति तत्रपापलग्नेभौमद्रेष्काणः मेषप्रथमः कर्कटेद्वितीयःसिंहेतृतीयः वृश्चिकेप्रथमः धनुषिद्वितीयः मीनेतृतीयः एषामन्यतमस्योदयेलग्नाद्यदिशुभग्रहैर्द्व्येकादशस्थैस्तद्दृष्टितः सर्पवेष्टितोज जातइतिवक्तव्यम् अन्येपुनरेवंव्याचक्षते चंद्रेपापलग्नेवाभौमद्रेष्काणस्थेतस्मादेवशुभग्रहैः स्वायस्थितैः विकल्पेनसर्पोवासर्पवेष्टितोवाजातइतिवक्तव्यम् अत्रपूर्वव्याख्या

शशांकेपापलग्नेवावृश्चिकेशत्रिभागगे शुभैःस्वायास्थितैर्जातःसर्पस्तद्वेष्टितोपिवा ३
चतुष्पदगतेभानौशेषैर्वीर्यसमन्वितैः द्वितनुस्थैश्चयमलौभवतःकोशवेष्टितौ ४ ५

साध्वीयस्माद्भगवान्गार्गिः भौमद्रेष्काणगेचंद्रेसौम्यैरायधनास्थितैः सर्पस्तद्वेष्टितस्तद्वत्पापलग्नेविनिर्दिशेत् १ तथाचसारावल्याम् भौमद्रेष्काणगेचंद्रेलग्नेवासंस्थितेचतज्जातम् द्व्येकादशगैःसौम्यैरहिर्वेष्टितकोभुजगोवा ३ अधुनैकजरायुवेष्टितयोर्जन्मज्ञानमनुष्टुभाहचतुष्पदेति भानौसूर्येचतुष्पदराशिगतेमेषवृषसिंहधन्विपरार्धमकरपूर्वार्द्धानामन्यतमस्थेशेषैरन्यैःसर्वग्रहैर्द्वितनुस्थैर्द्विस्वभावराशिस्थितैः स्ववीर्यसमन्वितैर्बलिभिश्चकोशवेष्टितौएकजरायुवेष्टितौयमलौजायेते ४ ५ ५ ५

अधुनानालवेष्टितजन्मज्ञानमनुष्टुभाह छागेति छागोमेषः सिंहः प्रसिद्धः वृषोवृषभः एतैः छागसिंहवृषैर्लग्नस्थिते एषामन्यतमोयदिलग्नगतोभवति तस्थे सौरेऽथवाकुजे तस्मिन्छागसिंहवृषाणामन्यतमे लग्नगतेतत्स्थे तत्रस्थे सौरे शनैश्चरेऽथवाकुजे भौमे तत्रस्थे नालवेष्टितोजन्तुर्जायते नालशब्देन नाड्योभिधीयन्ते कस्मिन्नंगे वेष्टित इत्याह राश्यंशसदृशगात्रे इति राशेरंशो राश्यंशः राशेः लग्नस्य योनवांशकस्तत्कालमुदितः सत्वयद्राशिसंबंधी सत्वराशिर्यस्मिन्नंशे कालपुरुषस्य व्यवस्थितः कालांगनीत्यादिना ग्रंथेन निरूपितस्तत्सदृशगात्रे तस्मिन्नेवांगे नाड्यावेष्टित इति वक्तव्यम् तथाच सारावल्याम् सिंहाजगोभीरुदयस्थसूतेनालेन वेष्टितोजन्तुः लग्नेकुजेथसौरे राश्यंशसमानगात्रेषु ५ अधुनाजारजातकज्ञानं वंशस्थेनाह नलग्नमिति गुरुर्जीवो लग्नमुदयमिंदुश्चन्द्रश्च यदिननिरीक्षते नपश्यति लग्नचन्द्रावेकराशिस्थौ पृथक्स्थौ वा यदो भावपि गुरुणान-

छागेसिंहेवृषेलग्नेतत्स्थेसौरेथवाकुजे राश्यंशसदृशेगात्रेजायतेनालवेष्टितः ५ नलग्नमिंदुंचगु
रुर्निरीक्षतेनवाशशांकरविणासमागतं सपापकोर्केणयुतोथवाशशीपरेणजातंप्रवदंतिनिश्चयात् ६

दृश्यतेतदापरेणजारेणजातइति निश्चयात्प्रवदंति कथयंति मुनयः अत्रयदि लग्नचंद्रौ जीवभागस्थौ जीवनवांशकस्थौ भवतः तदानपरजातइति वक्तव्यम् तस्माद्यवनेश्वरः अजीवभागेप्यनवीक्षितेवा जीवेथ चंद्रेण विलग्नभेवा जातं परोद्भूतमिति ब्रुवंति वात्स्योजनेनाथ बलाबलादिनि १ नवशशांकमिति शशांकं चंद्रं रविणा सूर्येण समागतं संयुक्तं गुरुर्ननिरीक्षते चंद्रार्कावेकराशिस्थौ यदि बृहस्पतिना न दृश्यते तदा परेण जातः अथवा शशी चंद्रः सपापश्च पापग्रहेण भौमेन सौरेण वा युक्तः तथाविधोर्केण सूर्येण यदि युक्तो भवति तथापि परेण जात इति अत्राप्यन्ये जीवदृष्ट्यानुव-

र्तिव्याख्यानंकुर्वंतितदयुक्तंयस्माच्चंद्रार्कावेकराशिगतौपापयुक्तावयुक्तौवाजीवेनदृश्यमानौवाजारजातजन्मकरौ तत्रचंद्रार्कयोर्योगः पापेनसमेत्यकिंकृतंभवति तस्माच्चंद्रार्कावेकराशिगतौअपापौजीवेनदृश्यमानौसपापौजीवेनदृश्यमानौअदृश्यमानौवाजारजातजन्मकरौ निश्चयान्नवदंति अत्रचंद्रमायदिगुरुबृहस्पतिगृहेतद्द्रेष्काणतन्नवांशकद्वादशभागत्रिंशद्भागस्थोभवति अन्यत्रवाराशौगुरुणायुक्तस्तदानजारजातइतियस्माद्भगवान्गार्गिः गुरुक्षेत्रगतेचंद्रेतद्युक्तेवान्यराशिगे तद्द्रेष्काणेतदंशेवानपरैर्जातइष्यते ६ अधुनाजातस्यपितृबंधनयोगज्ञानंवैतालीयेनाह क्रूरर्क्षगतावितिक्रूरर्क्षाणिक्रूरग्रहराशयः मेषसिंहवृश्चिकमकरकुंभाः कृष्णपक्षस्यक्षीणश्चंद्रः कर्कटः पापयुक्तेबुधोपिकन्यामिथुनेअशोभनौपापौशनिभौमौक्रूरर्क्षगतौपापक्षेत्रस्थितौसूर्याद्रवेर्द्यूननवात्मजस्थितौ द्यूनंसप्तमंनवमंप्रसिद्धंआत्मजस्थानंपंचमंएषामन्यतमस्थौभवतस्तदाजातस्यपिताजनकोबद्धोवाच्यः तस्यादित्याक्रांतराशिवशाद्धनदेशज्ञानमाहुः स्वेवाराशिवशाद्थोपथीतिचरराशिस्थेर्केपरदेशेबद्धःस्थिरराशिस्थेर्केस्वदेशेद्विस्वभावेपथिमार्गेएवंराशिवशात्स्थानपरिज्ञानं अथोइत्ययंनिपातोविकल्पेनकेचित्स्वेवाचरराशिवशात्तथापथीतिपठंति ७ अधुनापोतगताप्रसवज्ञानंवैतालीयेनाह पूर्णेतिशशिनिचंद्रेपूर्णेपरिपूर्णमंडलेतस्मिंश्चस्वराशिगेकर्कटस्थितेतथासौम्येबुधेलग्नगतेउदयस्थेशुभेजीवेएवंसुखेचतुर्थस्थेपोतगतानौस्थाप्रसूयतेइतिवक्तव्यम् तत्रान्यशुभैःसुखेइतिपठंतिपठित्वात्वेवंव्याचक्षंतेशुभैःसुखेचतुर्थभवनेशुभैरिति

क्रूरर्क्षगतावशोभनौसूर्याद्द्यूननवात्मजस्थितौ बद्धस्तुपिताविदेशगःस्वेवाराशिवशादथोपथि ७
पूर्णेशशिनिस्वराशिगेसौम्ये लग्नगतेशुभेसुखे लग्नेजलजेस्तगेपिवाचंद्रेपोतगताप्रसूयते ८

बहुवचनंनघटतेलग्नेबुधउक्तः शक्रबृहस्पतीशेषौशुभाशुभमित्येवंप्राप्नोति यत्क्रियतेशुभैरितितस्मादेवमवसीयतेपूर्णश्चंद्रमाः शुक्रबृहस्पतिभ्यांयुक्तोभवति तदाशुभैरितिभवति एतच्चमेषलग्नेतत्रस्थेबुधेपूर्णेचंद्रेशक्रबृहस्पतिभ्यांसमायुक्तेकर्कटव्यवस्थितेसर्वंयुज्यतइति अथपाठोमह्याख्यानेनयुक्तः यस्मान्मकरावस्थितेऽर्के कर्कटस्थश्चंद्रमाः पूर्णोभवति मकरव्यवस्थितेचार्केमकराच्चतुर्थभवनेमेषेबुधस्यसंभवोनास्ति किंपुनर्मकरात्सप्तमराशौकर्कटकेशक्रस्याप्यवस्थानमिति तस्माच्छुभेस्करवेइति सप्तम्येकवचनात्एवपाठोन्याय्यः शक्रेस्करवइति तत्कथंजीवोव्याख्यातः उच्यताबुधोलग्नगतस्तस्माच्चतुर्थेशुक्रस्यावस्थानंनभवति अतोजीवइतिव्याख्यातंकेचित्पूर्वशास्त्रानुसारेणेतिशक्रइच्छंति अथपोतगताप्रसवयोगोद्वितीयः लग्नेजलजइति लग्नेजलजेजलराशौकर्कटमकरपश्चिमार्धमीनानामन्यतमेतस्माद्दत्तगसप्तमस्थानस्थेचंद्रेपूर्णेवा।

आप्योदयमाप्यगःशशीसंपूर्णःसमवेक्षतेथवा मेषूरणबंधुलग्नगःस्यात्सूतिःसलिलेनसंशयः ९

पूर्णेचपोतगतेवप्रसूयतइतिवाशब्दःप्रकारार्थः ८ अथोदकमध्यप्रसवज्ञानंवैतालीयेनाह आप्योदयइति आप्यराशयोमकरपश्चार्धकर्कमीनास्तेषामन्यतमस्योदयेआप्योदयेजलराशिलग्नेभवति शशीचंद्रश्चाप्यगोजलराशिस्थः तदासूतिः प्रसवः सलिलेजलसमीपेनसंशयः निश्चयाद्वाच्यः अथवासंपूर्णः शशीलग्नगमाप्योदयंसमवेक्ष्यतेपश्यति तथापिसलिलेजलसमीपेप्रसूतिः मेषूरणबंधलग्नइति अथवाप्यराशावुपगतेमेषूरणबंधुलग्नगेमेषूरणोदशमेबंधुस्थानेचतुर्थेलग्नेप्राग्लग्नगतेस्थितःस्याद्भवेत्तथापिसलिलेप्रसूतिरितिवदेत् तथाचसारावल्याम् सलिलेलग्नेचंद्रोजलराशौवीक्ष्यतेथवापूर्णः प्रसवसलिलेविद्याद्बुधूदयदशगश्चयदा ९ ७ ७

अधुनाबंधनागारावटयोः प्रसवज्ञानं वैतालीयेनाह उदयेति उदयो लग्नं उडुपश्चंद्रः तयोरुदयोडुपयोरेकराशिस्थयोर्यमे सौरे व्ययस्थिते द्वादशस्थे तस्मिंश्च पापनिरीक्षिते गुप्त्याबंधनागारे प्रसूयतेइति वक्तव्यम् सौरे शनैश्चरे अलिकर्कियुते वृश्चिककुलीरयोरन्यतमस्थे विलग्नगते तस्मिंश्च शीतकरेक्षिते चंद्रदृष्टे ऽवटे श्वभ्रे प्रसूतिर्वक्तव्या १० अथक्रीडागृहदेवालयसोरवरभूमिप्रदेशेषु प्रसवज्ञानं वैतालीयेनाह मंदेति मंदे शनैश्चरे ऽब्जगते जलराशिस्थे तथाभूते विलग्नगे प्राग्लग्नस्थे क्रमात्परिपाट्या बुधसूर्येंदुनिरीक्षिते बुधक्रीडाभवनस्करालयसोरवरभूमिषु च प्रसूयतइति वदेत् एतदुक्तं भवति शनैश्चरे जलराशिस्थे लग्नगते बुधनिरीक्षिते बुधदृष्टे क्रीडाभवने रतिगृहे प्रसूयते एवं सूर्येणार्केण निरीक्षिते सोरवरभूमिषु सवालुकास्थानेषु प्रसूयते

उदयोडुपयोर्व्ययस्थिते गुप्त्यां पापनिरीक्षिते यमे अलिकर्कियुते विलग्नगे सौरे शीतकरेक्षितेऽवटे १०
मंदेऽब्जगते विलग्नगे बुधसूर्येंदुनिरीक्षिते क्रमात् क्रीडाभवनस्करालयसोरवरभूमिषु च प्रसूयते ११

इति ११ अथश्मशानरम्यप्रदेशाग्निशालानृपदेवगृहगोकुलशिल्पालयप्रसवज्ञानमेवोपजातिकयाह नृलग्नगमिति पूर्वश्लोकान्मंद इत्यनुवर्त्तते प्रत्यासन्नत्वात् नृलग्नगं नरराशिलग्ने स्थितं नरराशयो मिथुनकन्यातुलाधन्विपूर्वार्धकुंभाः तत्रगतं शनैश्चरं कुजोंगारकः प्रेक्ष्य दृष्ट्वा सोमो यदि पश्यति तदा श्मशाने प्रसवं जन्म करोति केचिन्नृलग्नदर्शी क्षितिज इति पठंति नृलग्नगं पश्यति तच्छीलो नृलग्नदर्शी क्षितिजः रम्ये सितेंदू इति नरराशिलग्नगतं शनैश्चरयुक्तं सितः शुक्रः इंदुश्चंद्रो वा पश्यन्ति तदा रम्ये रमणीयमंदिरे जन्म एवंविधं सौरं गुरुर्जीवः पश्यति तदा अग्निहोत्रे अग्निशालायां एवंविधं सौरिं रविः पश्य

बृ·टी· ति तदानरेंद्रामरगोकुलेषुनरेंद्रगृहेराजवेश्मनिअमरगृहेदेवागारेवागोकुलेवागोशालायांप्रसूतिःजन्मएवमेवबुधेनदृष्टेसौरेशिल्पालये शिल्पिगृ- ज·वि·
४० हेचित्रपुस्तककरवर्धकिप्रभृतीनांशिल्पिनांप्रसिद्धानामन्यतमस्यगृहेप्रसूतिरिति तथाचसारावल्याम् रविजेजलजविलग्नेक्रीडोद्यानेबुधेक्षितेप्रसवः ५
रविणादेवागारेतथाखरेचैवचंद्रेण १ आरण्यभवनलग्नेगिरिवरदुर्गेतथानरविलग्नेरुधिरेक्षितेश्मशाने शिल्पिक निलयेच सौम्येन तयाच बादरा-
यणः सूर्येक्षितेगोनृपदेववासेशुक्रेंदुजाभ्यांरमणीयदेशे क्रूरेज्यदृष्टेद्विजवन्हिहोत्रे नरोदयेसंप्रवदंतिसूतिम् १२ अथप्रसवदेशज्ञानं वैतालीये
नाह राश्यंशेति राशिश्चअंशश्चतद्राश्यंशंराशिर्लग्नराशिरंशोनवांशकः लग्नराशेस्तन्नवांशकस्यवायःसमानः सदृशस्त्वात्मीयगोचरोविष

नृलग्नगंप्रेक्ष्यकुजःश्मशानेरम्येसितेंदूगुरुरग्निहोत्रे रविर्नरेंद्रामरगोकुलेषुशिल्पालयेज्ञःप्रसवंकरोति १२
राश्यंशसमानगोचरेमार्गेजन्मचरेस्थिरेगृहे स्वर्क्षांशगतेस्वमंदिरेबलयोगात्फलमंशकर्क्षयोः १३

यः खचराश्चसर्वइत्यनेनप्रदर्शितः तत्रयस्मिन्यस्मिन्प्रदेशेयोयोराशिरूपः प्राणीसंचरति तस्यमार्गःपंथास्तस्मिन्जन्मयदि चरलग्न-
स्तन्नवांशकोवायदिनरोभवति अथलग्नराशिस्तन्नवांशकोवास्थिरस्तदाराशिरूपतुल्यस्यप्राणिनः यस्मिन्गृहेयत्रप्रसवेसतितत्स्थानेराशिस्व-
रूपतुल्यस्यप्राणिनोयद्गृहंसमीपस्तत्रप्रसवइत्यर्थः स्वर्क्षांशगतइतिचरस्यास्थिरस्याद्विस्वभावस्यवाराशेर्लग्नगतस्यस्वर्क्षांशआत्मीयनवांशकोदयो-
यदाभवतितदास्वमंदिरेआत्मीयगृहेएवजन्मवक्तव्यं तत्रराश्यंशसमानगोचरेमार्गेजन्मइत्यादिसामान्येनोक्तं नतज्ज्ञायतेकिंलग्नराशिसमानगोचरेकिं ४०
मंशसमानगोचरेप्रसवोदेशः क्रियतांतदर्थमयंनिश्चयः बलयोगादितिअंशकोनवांशकः ऋक्षंराशिः अनयोर्बलयोगात्फलंप्रसवस्थानज्ञानम् ए-

तदुक्तंभवति लग्नराशेर्नवांशकराशेश्चयोर्बलवांस्तत्समानगोचरेमार्गेगृहसमीपेसुप्रसवोवक्तव्यः अत्रपूर्वोक्तयोगाभावेराश्यंशसमानगोचरमार्गादिषु प्रसवोवक्तव्यः तेषांसंभवेयोगोक्तप्रदेशेष्वेवप्रसवोवक्तव्यः १३ अथयस्मिन्योगेजातोमात्रात्यज्यतेयस्मिंश्चयोगेजातस्त्यक्तोपिमात्रादीर्घायुःसुखीचभवति तद्योगद्वयंवैतालीयेनाह आरार्केति चंद्रेशशिन्यारार्कजयोर्भौमसौरयोरेकराशिगतयोस्त्रिकोणगेनवमस्थेपंचमस्थेवाऽस्तेचसप्तमेस्थानेस्थितेजातोंबयामात्राविसृज्यतेत्यज्यते एवंविधेयोगेचंद्रमसि अमरराजमंत्रिणागुरुणादृष्टेमात्रात्यक्तोपिपरहस्तगतोपिदीर्घायुः चिरंजीविसुखभाक्चसुखिभोगीभवति १५ अथयस्मिन्योगेजातोमात्रात्यक्तोविनश्यति तद्वसंततिलकेनाह पापेक्षितइति तुहिनगौचंद्रेपापेक्षितेपापदृष्टेसौरेणार्केणवेत्यर्थः तथाभूतेउदयेलग्नेस्थितेकुजेभौमे ऽस्तेसप्तमस्थानस्थेजातोमात्रात्यक्तोविनश्यतिम्रियतइत्यर्थः कुजार्कजयो

आरार्कज योस्त्रिकोणगेचंद्रेऽस्तेचविसृज्यतेंबया दृष्टेमरराजमंत्रिणादीर्घायुःसुखभाक्चसस्मृतः १४

रिति तथातेनैवप्रकारेणलग्नेचंद्रमसिपापेक्षितेसूर्यदृष्टेकुजार्कजयोर्भौमशनैश्चरयोरायेएकादशस्थितयोर्जातोमात्रात्यक्तोपिविनश्यतिम्रियतइत्यर्थः सौम्येपिपश्यतीतिपूर्वोक्तयोगस्थेचंद्रमसिपापदृष्टेसौम्येशुभग्रहेपिपश्यति सतुजातोमात्रात्यज्यतेत्यक्तोपियादृग्वर्णप्रभुणासौम्यग्रहेणचंद्रमादृष्टस्तथाविधस्यहस्तमेतितादृग्वर्णस्यब्राह्मणादेर्हस्तंगच्छतितेनउत्थापितोजीवतिच अथास्मिन्नवयोगेस्थितश्चंद्रमाःपापेनकुजेनसूर्येणसौरेणवादृश्यतेऽन्येनसौम्यग्रहेणचदृश्यते तदाजातोतयोर्दृष्टग्रहयोर्योबलवान्तादृग्वर्णस्यब्राह्मणादेर्हस्तंगतोपिविनश्यति यदुक्तंसौम्येतरेषुपरहस्तगतोप्यनायुरिति ननुयथायोगस्थेचंद्रमसिसौम्यैःपापैश्चदृश्यमानेमात्रात्यक्तोविनश्यतीत्यभिहितंतत्रक्षत्रियवैश्यशूद्रवर्णसंकरादिषुहस्तगतःसर्वो

एवविनाशमाप्नोतिबहुवक्ष्यमात्रात्यक्ताः क्षत्रियादिवर्णसंकरगताश्चजीवमानादृश्यंते तस्मात्पूर्वश्लोकादृष्टेऽमरराजमंत्रिणादीर्घायुः स्फुरचभाकुचसस्मृतइत्येतद्विहशेषभूतमवगंतव्यंतस्माद्बुधेनशक्रेणवायथादर्शितयोगस्थश्चंद्रमादृश्यतेजीवेननदृश्यतेनदापरहस्तगतोपिम्रियतेयदापापेनसौम्येनवादृश्यमानोपिजीवेनदृश्यतेतदादृष्टग्रहबलवशात्स्तद्गुणस्यब्राह्मणादेर्हस्तगतोजीवतितथाचसारावल्याम् म्रियतेपापैर्दृष्टःशशिनिविलग्नेकुजेस्तगेत्यक्तः लग्नाच्चलाभगतयोर्वसुधासुतमंदयोरेवंपश्यतिसौम्योबलवान्याहग्गृण्हातिताहशोजातःशुभपापग्रहदृष्टेपरैर्गृहीतोप्यासौम्रियतेसर्वेष्वेतेषुयदायोगेषुशशिसुरेज्यसंदृष्टःभवतितदादीर्घायुर्हस्तगतःसर्ववर्णेषु १५ अधुनाप्रसवगृहज्ञानंचैनालीयेनाह पितृमातृइति पितृमातृगृहादिवार्कशक्रा विस्यादिनोक्ताः तद्बलात्पितृमातृगृहवीर्यात्पितृमातृगृहेषुप्रसूयतइतिवदेत् तदार्कशनैश्चरयोरन्यतमेबलवतिपितृगृहेपितृष्वसृपितृव्यादिसंबंधिगृ-

पापेक्षितेतुहिनगावुदयेकुजेऽस्तेत्यक्तोविनश्यतिकुजार्कजयोस्तथाये सौम्येपिपश्यतितथाविधहस्तमेतिसौ
म्येतरेषुपरहस्तगतोप्यनायुः १५

हेप्रसूतिः एवंमातृगृहयोश्चंद्रशुक्रयोरन्यतमेबलवतिमातृगृहेमातृष्वसृमातुलादिगृहेप्रसूतिः तरुशालादिषुनीचगैःशुभैरितिबहुवचनात्सर्वएवशुभग्रहाः यदानीचस्थाभवंतितदातरुषुवृक्षेषुशालासुप्राकारसमीपेषुप्रसवोवाच्यः आदिग्रहणान्नदीकूपारामपर्वतादिप्रदेशेष्वन्यतरेष्विति यदिनैकगतैरितिनीचगैःशुभैरित्यनुवर्ततेसर्वेशुभग्रहाः नीचगतास्तैर्लग्नेदृष्टउदयश्चंद्रश्चाबुभावप्येकराशिगतौग्रहैर्बहुवचनात्त्रिप्रभृतिभिर्यदानदृश्येतेतदाविजनेजनरहितस्थानेऽटव्यांप्रसूतिरिति यदापुनरेकस्थैर्बहुभिर्ग्रहैर्यदालग्नेंदूदृश्येते तदाजनाकीर्णेप्रसूतिरिति तथाचसारावल्याम् पितृमातृग्रहेवर्गेतत्स्वजनगृहेषु बलयोगात् प्राकारतरुनदीषुचप्रसूतिर्नीचाश्रितैः सौम्यैः नेक्षेतेलग्नेंदू यद्येक

स्याग्रहास्तदाटव्याम् १६ अधुनादीपसंभवासंभवभूप्रदेशोप्रसवज्ञानंगर्भमोक्षमातुःक्लेशज्ञानं मंदाक्रांतयाह मंदर्क्षांशइति शशिनिचंद्रेयत्रतत्रराशौमंदर्क्षांशेशनैश्चरस्यनवमभागेमकरकुंभयोरन्यतमांशकस्थेतमस्यंधकारेसूतिकाशयनंवक्तव्यम् हिबुकेलग्नाच्चतुर्थस्थेचंद्रेऽधकारएवशयनम् यत्रतत्रवास्थितेचंद्रेमंदेनसौरेणदृष्टेंधकारएव अब्जगेवाअब्जराशौअत्रकर्कटमीनौद्वौविज्ञेयौमकरकुंभयोरुक्तत्वात् मंदर्क्षांशेत्यादिकेति येनयत्रतत्रराशौकर्कटनवांशकस्थेचंद्रेप्यंधकारएवमीननवांशकस्थेचातमस्यंधकारएवेतितद्युक्तेवेति तद्धिनिसौरः परामृश्यते यत्रतत्रावस्थितेचंद्रेसौरयुक्तेंधकारएव एवंनिषेककालेनशयनमपिसर्वेष्वेतेषुयोगेषुयदार्कदृष्टः चंद्रमाभवतितदाधकारएव यस्माद्भवनेश्वरः सौरांशकस्थेशशिनिसलग्नेजलेजलाख्यांशकमाश्रितेवा स्वांशस्थितेकेंद्रगतेकजेवाजातस्तमिस्रेयदिनार्कदृष्टः १ अन्येषांमतंयथा सूर्येबलवतिसौम्येनदृष्टेसत्स्वपियोगेष्वंधकाराभावः तथाचसारावल्याम् बलवतिसूर्येदृष्टेबहुप्रदीपाधराकुपुत्रेणअन्यैर्व्ययगतवीर्यैःसूतौज्योतिस्तृणेभवति सौरांशेजलजांशेचंद्रेऽर्कयुतेथवाहिबुकेतद्दृष्टेवाकुर्यात्तमसिप्रसवंनसंदेहः नीचसंस्थैश्चभूमौशयनमित्यनुवर्ततेबहुवचनाद्यथासंभवंत्रिप्रभृतिभिर्ग्रहैर्नीचस्थैर्भूमौशयनंवाच्यम् भूशब्देनात्रतृणास्तृताभूर्ज्ञेया केचिल्लग्नस्थेचतुर्थस्थेवानीचगतेचंद्रेभूशयनमिच्छंति यथासारावल्याम् नीचस्थैर्भूशयनंचंद्रेप्यथवाक्षरवेविलग्नेवा यद्वदिति प्रसवलग्नराशिर्यद्वदनेनप्रकारेणहरिजंव्रजत्युदयलेखांपरित्यजति तद्वत्तेनैवप्रकारेणनार्यागर्भमोक्षोवा

पितृमातृगृहेषुतद्बलात्तरुशालादिषुनीचगैःशुभैः यदिनैकगतैस्तुवीक्षितौलग्नेंदूविजनेप्रसू
यते१६ मंददर्क्षांशेशशिनिहिबुकेमंददृष्टेऽब्जगेवातद्युक्तेवातमसिशयनंनीचसंस्थैश्चभूमौ ७

च्यः यत्राकाशंभूम्यासहासक्तंसमंताद्दृश्यतेतद्धरिजं उक्तंचहरिजमितिगगनमवनौसंपृक्तमिवलक्ष्यंते यथोक्तेषुतद्यथाशीर्षोदयेषुलग्नेषुसूतानांस्याच्छिरोदर्श यतोगर्भस्यमोक्षोवाच्यः पृष्ठोदयेष्वधोमुखस्यपृष्ठदर्शयतः मीनोदयेपार्श्वदर्शयतः तथाचसारावल्याम् शीर्षोदयेविलग्नेमूर्ध्नाप्रसवोन्यथोदयेचरणैः उभयोदयेचहस्तैः शुभदृष्टेशोभनोन्यथाकष्टः केचिदेवंव्याचक्षते यथालग्नाधिपोनवांशकाधिपोवालग्नस्थोवाग्रहो वक्रीभवति तदावैपरीत्येनगर्भमोक्षोभवति तथाचमणित्थः लग्नाधिपेंशकपतौलग्नस्थेवक्रितेग्रहेव्ययगवाधिपरीतगतो मोक्षोवाच्योगर्भस्यसंक्लेशः पापैरिति पापग्रहैश्चंद्रगतैः शशिनासहव्यवस्थितैः स्मरगतैर्लग्नात्सप्तमस्थैर्वासुखगतैश्चतुर्थस्थैर्वाप्रसवकालेजनन्याः मातुःक्लेशमाहुः कष्टंकथयंतिसूरयः तथाचसारावल्याम् क्लेशोमातुः क्रूरैर्बंधुस्मरगतैःशशांकयुक्तैर्वा १७ अथदीपगृहद्वारज्ञानमिंद्रवज्रयाह स्नेहः शशांकादिति शशांकाच्चंद्रात्

यद्वद्राशिर्व्रजतिहरिजंगर्भमोक्षस्तुतद्वत्पापैश्चंद्रात्स्मरसुखगतैःक्लेशमाहुर्जनन्याः १७

स्नेहोवाच्यः जन्मकालेपूर्णेचंद्रमसिस्नेहेनपूर्णंदीपभाजनंवक्तव्यम् क्षीणेक्षीणस्नेहाक्तमिति तथाचसारावल्याम् दीपःपूर्णःपूर्णेशशिनिक्षीणेक्षयस्तुतैलस्ययद्येवंतदामावास्यायांसर्वेषामंधकारेप्रसवोभवति तस्माद्युक्तमेतत् तेनयत्रराशौचंद्रमाव्यवस्थितस्तत्रयद्विराशिप्रारंभोस्थितोभवति तदादीपभाजनंस्नेहेनपूर्णंवक्तव्यम् यत्रराश्यवसानेस्थितस्तत्रस्नेहहीनंदीपंस्नेहरहितंमध्यंप्राप्तेऽर्धम् अन्यत्रानुपातादिति उदयाच्चवर्तिः उदयाल्लग्नाद्दीपवर्तिरादेश्यालग्नारंभतत्क्षणदग्धावर्तिरादेश्यामध्येअर्धदग्धवर्तिः लग्नावसानेवर्तिदाहोवाच्यः अंतरेनुपातः तथाचसारावल्याम् यावल्लग्नादुदितंवर्तिर्दग्धातुतावतीभवति दीपोर्कयुक्तर्क्षवशादिति अर्कोरविस्तद्युक्तराशिवशाच्चराद्यो दीपोवाच्यः तत्रचरराशिव्यवस्थितेर्के संचार्य-

माणोदीपआदेश्यः स्थिरराशिस्थेऽर्के एकदेशस्थःदीपः द्विस्वभावस्थेऽर्केचालितः प्रतिषिद्धत इति केचिद्वदंति यथायस्मिन्राशावर्कः स्थितः सराशिर्यस्यांदिशिस्थितः प्रागादीशाः क्रियवृषनृयुक्कर्कटेत्यादिनाप्रदर्शितस्तस्यांदिशिदीपआदेश्यः अन्येएवंवदंति यथायस्यांदिशिअर्कोभ्रमवशेनाष्टप्रहरकल्पनयाष्टासुदिक्षुपरिभ्रमतितेनैवक्रमेणयस्यांदिशिव्यवस्थितः तस्यांदिशिगृहस्यदीपस्थानमिति तथाचसारावल्याम् द्वादशभागविभक्तेवासगृहेव्यवस्थितेसहस्रांशौदीपश्चरस्थिरादिषुतथैववाच्यः प्रसवकालेभ्रमप्राच्यादिगृहंद्वादशधाविभज्यमेषादिगणनयाकराशिर्यत्रभवतितत्रदीपस्थानमिति केचिल्लग्नस्ययादृशोवर्णस्तादृग्वर्णोदीपवर्तिमिच्छंति तथाच्चमणित्थः लग्नस्ययोत्रवर्णोनिर्दिष्टस्तेनवर्तिरादेश्या द्वारंच द्वास्तुनीति त

स्नेहः शशांकादुदयाच्चवर्तिर्दीपोर्कयुक्तर्क्षवशाच्चराद्यैः द्वारं
चतद्वास्तुनिकेंद्रसंस्थैर्ज्ञेयंग्रहैर्वीर्यसमन्वितैर्वा ॥१८॥ ५

द्वारंतुनिसूतिकागृहे लग्नात्केंद्रस्थैर्ग्रहैर्द्वारादेशः कार्यः तस्यगृहस्ययादिक्प्राच्याद्यारविशुक्रलोहिततमेत्यादिनोक्तातद्दिगभिमुखंसूतिकागृहंवक्तव्यम् बहुषुकेंद्रेषुबलवद्ग्रहवशात् शून्येषुकेंद्रेषुतल्लग्नराशिवशात् लग्नस्ययादिक्तदभिमुखंयस्मादनेनैवस्वल्पजातकेउक्तंद्वारंवास्तुनिकेंद्रोपगताद्ग्रहाद्सतिवाविलग्नर्क्षात् अन्येवदंति यथालग्नद्वादशभागराशिदिगभिमुखंसूतिकागृहद्वारं तथाच्चमणित्थः लग्नेयोद्विरसस्तदभिमुखंसूतिकागृहेद्वारं एतच्चसंवादेनापिदृष्टमिति वीर्यसमन्वितादित्युत्तरत्रसंबध्यते केचिद्वदंति यथावीर्यसमन्वितात् ग्रहाद्गृहद्वारंवदेत् तथाचसारावल्याम् वासगृहोद्यानगतंद्वारंदिक्पालकाद्बलोपेतादिति १८ ५ ५ ५

अधुनासूतिकागृहस्वरूपज्ञानं शार्दूलविक्रीडितेनाह जीर्णसंस्कृतमिति चौर्यसमन्वितादित्यनुवर्तते सर्वग्रहेष्वर्कजे सौरे चौर्यवति सबले जीर्णमिति चिरंतनम् भूयःसंस्थितं सूतिकागृहं वक्तव्यं क्षितिसुते भौमे बलवत्यग्निना दग्धं शीतगौ चंद्रे नवं शुक्लपक्षेऽपलिप्तं वदेत् यस्माद्यवनेश्वरः संवर्धिताच्चंद्रमसोपलिप्तमिति काष्ठाढ्यं न दृढं रवाविति रवावादित्ये काष्ठाढ्यं दारुबहुलं नदृढमसारं शशिसुते बुधे नवदृढं अनेकशिल्प्युद्भवं बहुविधशिल्पिरचितं रम्यं चित्रयुतमिति भृगुजे शुक्रे रम्यं रमणीयं मनोरमं च परम् नवं नूतनं चित्रयुतं चित्रकर्मयुक्तम् जीवे गुरौ दृढं चिरकालस्थायि चक्रस्थैः पंचकाधिरूढैर्गृहद्वारि गृहसमीपस्थैरन्यग्रहैः सामंतपूर्वां समंतात्सर्वदिक्षु यथोपदिष्टां वदेत् ब्रूयात् सामंतपूर्वां प्रतिवेश्मिकवेश्मनां सामंतात्क्रमणेत्य

जीर्णंसंस्कृतमर्कजेक्षितिसुतेदग्धंनवंशीतगौकाष्ठाढ्यंनदृढंरवौशशिसुतेतन्नैकशिल्प्युद्भ
वम् रम्यंचित्रयुतंनवंचभृगुजेजीवेदृढंमंदिरंचक्रस्थैश्चयथापदेशरचनासामंतपूर्वांवदेत् १९

र्थः यथा गृहद्वारात् गृहस्य पुरतः पश्चाद्वा पार्श्वयोर्वाऽन्ये ग्रहा व्यवस्थितास्तेनैव क्रमेण सूतिकागृहस्थानानि प्रतिवेश्मगृहाणि वाच्यानि अन्ये सामंतपूर्वामिति पठंति सामंताद्गृहपर्यंतपूर्विकां रचनामिति तथा च सारावल्याम् भवनग्रहसंयोगैः प्रतिवेश्माश्चिंतनीयाश्च देवालया वा पावककोशविहाराद्यवस्करस्थानम् निद्रागृहं च भास्करशशिकुजगुरुभार्गवार्किबुधयोगात् अत्राचार्येण भूमिकाप्रमाणं नोक्तम् त्रिशालद्विशालत्वानं च तदुच्यते बृहस्पतौ कर्कटस्थे परमोच्चाद्भ्रष्टे लग्नात् दशमगे द्विभूमिकमुच्चभागे स्ववांशस्थिते त्रिभूमिकमुच्चभागस्थे चतुर्भूमिकं धनुषि सबले दशमस्थानस्थे गुरौ त्रिशालं तद्गृहं मिथुनकन्यामीनस्थे द्विशालं उक्तं च स्वल्पजातके गुरुरुच्चे दशमस्थे द्वित्रिचतुर्भूमिकं करोति गृहम्

धनुषिसबलेत्रिशालंद्विशालमन्येषुविमलेष्विति १९ अथसमस्तवास्तुनिष्कसूतिकागृहमितितद्विज्ञानंबोधकेनाह मेषेति मेषः प्रसिद्धः कुलीरः कर्कटः तुलातुलएव अलिर्वृश्चिकः घटः कुंभः एषामन्यतमेलग्ने वास्तुनि प्राग्भागेसूतिकास्थानंवक्तव्यम् अंशेवा उत्तरतो गुरुसौम्यगृहे धुगुरुगृहेधन्विमीनौसौम्यगृहे मिथुनकन्येएतेषुलग्नेषुतदंशकेचोत्तरतोवास्तुनिसूतिकागृहंवाच्यं वृषेणतदंशकेनचगृहपश्चिमभागेसूतिकागृहम्मृगसिंहौमकरकेसरिणौदक्षिणभागकराविति दक्षिणभागेसूतिकागृहंकुरुतः २० अथसूतिकागृहेक्षुशयनमितितज्ज्ञानेवैताळीयेनाह प्राच्यादिगृहेति गृहेसूतिकावेश्मनिप्राच्यादिदिशिपूर्वाद्यास्वष्टसुदिक्षुक्रियादयोमेषादयोराशयः द्वौद्वौचतसृषु दिक्षुकोणगताविदिक्स्थाद्वि

मेषकुलीरतुलादिघटैः प्रागुत्तरतोगुरुसौम्यगृहेषु
पश्चिमतश्चवृषेणनिवासोदक्षिणभागकरौमृगसिंहौ २०

मूर्तयोहिस्वभावाः तद्यथामेषवृषयोर्लग्नयोर्गृहस्यप्राग्विभागेसूतिकाशयनंमिथुनेआग्नेय्यांकर्कसिंहयोर्दक्षिणेकन्यायांनैर्ऋत्येतुलावृश्चिकयोःपश्चिमे धनुषिवायव्ये मकरकुम्भयोःउत्तरेमीनेऐशानेइति एषएवविधिः शय्यास्वपिवक्तव्यः अतउक्तंशय्यास्वपिवास्तुवद्वदेदिति किंत्वयंविशेषःपादैःषट्त्रिनवान्त्यसंस्थितैरिति इहखट्वापादाःषट्त्रिनवान्त्यराशयः लग्नात्षष्ठतृतीयनवमद्वादशराशयः पादाःपरिकल्प्याः तत्रैवतज्जातयेनलग्नेनप्रसवस्तदुक्तदिशिशय्यायाः शिरस्तस्मादेवषट्त्रिनवान्त्याः पादाः तत्रद्वादशतृतीयौपूर्वपादौतत्रापितृतीयोदक्षिणःपादोद्वादशोवामः षष्ठनवमौपश्चिमपादौतत्रापिषष्ठोदक्षिणोनवमोवामः लग्नद्वितीयौशीर्षभागः चतुर्थपंचमौदक्षिणमंगंसप्तमाष्टमौपादान्तभागः दशमैकादशौवामांगम्-

योजनंविनतत्वंपापलक्षैः क्रूरैस्तुतुल्यउपघातइतियत्रद्विस्वभावराशयःस्थितास्तत्रविनतत्वंयत्रपापास्तत्सदृशोवोपघातः एवंसदैवानुपपन्नरवद्वां
गमसवः यस्माद्वयंक्वचिदपियमलक्षेणपापग्रहैर्भवितव्यं तस्माद्यत्रयमलक्षेसौम्यग्रहस्वामियुतदृष्टंविनतत्वंपापग्रहोपिस्वांशराशित्रिकोण
मित्रक्षेत्रस्थोरफाभकलकरोनभवतीति २१ अधुनोपसूतिकासंख्यामनुष्टुभाह चंद्रलग्नेतिलग्नादारभ्ययत्रराशौचंद्रमाव्यवस्थितस्तदंतरेतयोर्म-
ध्येयावंतोग्रहाव्यवस्थितास्तेचंद्रलग्नांतरगताग्रहास्तेरुपसूतिकाःस्युः तावत्संख्याउपसूतिकाःसमीपवर्तिन्यःस्त्रियस्युर्भवेयुः ताश्चग्रह-
जातिवयोवर्णरूपाः तथाचसारावल्याम् शशिलग्नविवरयुक्ताग्रहतुल्याःसूतिकाश्चविज्ञेयाः अनुदिनचक्रार्धयुतैरंत र्बहिरन्ययावृदंत्येकेलक्ष
णरूपविभूषणयोगास्तासांशुभैर्योगात् क्रूरैर्विरूपदेहालक्षणहीनाश्चरौद्रमलिनाश्च मिश्रैर्मध्यमरूपाबलसहितेः सर्वमेतदवधार्यबहिरंतश्चे

प्राच्यादिगृहक्रियादयोद्वौद्वौकोणगताद्विमूर्तयः शय्यास्वपिवास्तुवद्वदेत्पादैःषट्त्रिनवांत्यसंस्थितैः २१

तितत्रयावंतोग्रहादृश्यंतेचक्रार्धेव्यवस्थितास्तावत्संख्याउपसूतिकागृहबाह्योवक्तव्याः यावंतश्चादृश्येचक्रार्धेव्यवस्थितास्तावत्संख्याआभ्यं
तरेवक्तव्याः तत्रलग्नस्ययावंतउदिताभागास्तथाद्वादशैकादशदशमनवमाष्टमाराशयस्तथासप्तमराशेर्लग्नोदितभागतुल्यांशाद्दृश्यमर्धंशेषमदृश्य
मितिअन्यथापरेअपरेअन्येआचार्याअन्यथाःन्येनप्रकारेणदृश्यचक्रार्धेअभ्यंतरगतावर्णयंतिअदृश्येबाह्यस्थाज्ञेयाः तथाच्चजीवशर्माउदयराशिमध्य-
स्थैर्ग्रहैःस्युरुपसूतिकास्तत्रउदगर्धस्थैर्बाह्येदक्षिणगैरंतरज्ञेयाः एतदाचार्यस्यनाभिप्रेतयतोनेनैवस्वल्पजातकेउक्तंशशिलग्नांतरसंस्थाग्रहतुल्याःसू ४४
तिकाश्चवक्तव्याः उदगर्धेभ्यंतरगाबाह्याश्चकस्यदृश्यर्धे अत्रचायुर्दायविधिनास्वतुंगवक्रोपगतैस्त्रिसंगुणमित्यादिनाद्विस्त्रिगुणत्वंकृत्वाग्रहस्थानवशा

दुपसूतिकानिश्चयः कार्यः यदिबहुजनप्रसूतियोगानभवंति तथापिग्रहसंख्यासूतिकासंभवायत्रबहुजनप्रसूतियोगेनभवितव्य मिति २२ अथजातस्यस्वरूपादिज्ञानं दोधकेनाह लग्नेतिजन्मकालेलग्नेयोनवांशकउदितस्तस्ययः स्वामीसलग्ननवांशः तत्तुल्यतनुस्तदाकारोजातोवक्तव्यः यथामधुपिंगलदृगित्यादि अथवाजातकालेसर्वग्रहेभ्योयोग्रहोवीर्ययुतोबलवांस्तत्तुल्यतनुर्वावक्तव्यः यदिलग्ननवांशकस्योराशिर्बलवान् भवतितदा तदीशतुल्यातनुर्भवति अथवासर्वग्रहेभ्योयोवीर्यवान् ग्रहस्तत्तुल्यतनुरिति चंद्रसमेतोयोनवांशः शशिनाचंद्रेणसमेतश्चंद्रोयस्मिन्नवांशकेस्थितइत्यर्थः तस्यनवांशराशेर्योधिपतिः सचंद्रसमेतनवांशपतिः तस्ययोवर्णस्तद्वर्णोजातोभवति अत्रचवर्णोरक्तः श्यामोभास्वरागौरहृतिअन्येचंद्राक्रांतराशिवर्णमेवाहुः यथारक्तः श्वेतः शुकतनुनिभइत्यादि अत्रशुकवर्णस्यासंभवादयुक्तमेतत् एतच्चवर्णादिजातिकुलदेशाननुबुध्याव

चंद्रलग्नांतरगतैर्ग्रहैः स्युरुपसूतिकाः बहिरंतश्च चक्रार्द्धे दृश्यादृश्येऽन्यथापरे २२

क्तव्यं उक्तंचबादरिणः सदृशीमूर्तिर्बुध्वाजातिकुलदेशानिति कादिविलग्नविभक्तभगात्रइति आधानविधिनाशीर्षादीनामवयवानांह्रस्वदीर्घत्वंनिरूपयतिकादिभिर्विलग्नभैर्लग्नराशिभिः विभक्तानिगात्राणियस्यसः कादिविलग्नविभक्तभागात्रः तत्रलग्नाद्याराशयः कादिषुशिरःप्रभृतिकालगात्रेषु परिकल्प्याः यथाकालांगानितत्रलग्नंशिरः द्वितीयोराशिर्वक्त्रं तृतीयउरः चतुर्थोहृत् पंचमः क्रोडः षष्ठःकटिः सप्तमोवस्ती अष्टमोशिश्नगुदं नवमोवृषणौ दशमऊरू एकादशोजानुनी द्वादशोजंघापादौ अत्रचराशीनांप्रमाणमुक्तं पूर्वार्द्धविषयाद्यइति तत्रयत्रांगस्येदीर्घराशौदीर्घराश्यधिपोग्रहोव्यवस्थितोभवति सदीर्घकृत् तदंगतस्यदीर्घवक्तव्यम् तथाचसत्यः दीर्घाधिपतिर्दीर्घोग्रहः स्थितोवयवदीर्घकृद्भवति अर्थादेवास्यप्र

माणराशौव्यवस्थितस्तदंगाल्पकृद्भवति दीर्घराश्यधिपोल्पराशिव्यवस्थितः समध्यमकृत् अल्पराश्यधिपोदीर्घराशौव्यवस्थितोंगमध्यमकृत् यत्रांगराशौबहवोव्यवस्थितास्तत्रबलवद्ग्रहवशाद्वाच्यं यत्रनकश्चिद्व्यवस्थितः तत्रराशिप्रमाणतएवांगंवाच्यम् २३ इतिसूतिकाप्रकरणम् अत्रैव सूतिकाध्यायेजातस्यव्रणमशकादिनिरूपणार्थमंगप्रकरणमारभ्यते तत्रलग्नप्रथमद्वितीयतृतीयद्रेष्काणवशेनप्रथमद्वितीयतृतीयशरीरभागपरिच्छेदः तत्राशिरःप्रभृतियावद्धक्कप्रथमोंगविभागः शिरोधस्ताद्यावन्नाभिः तावद्द्वितीयः तदधस्तात्तृतीयः तेषामंगविभागानांराशिविभागं शार्दूलविक्रीडितेनाह कंदृगिति त्रिभिःप्रकारैस्त्रिधा त्रिभिर्द्रेष्काणभागैस्त्रिधाशरीरप्रविभागः तत्रलग्नस्यप्रथमद्रेष्काणेउदयतिप्रथमोमूर्द्धाद्यंगविभागः द्वितीयेद्रेष्काणेउदयतिकंठपूर्वकोद्वितीयोंगभागः तृतीयेद्रेष्काणेउदयतिबस्तिपूर्वकः तृतीयः तत्राप्यंगविभागेवामदक्षिणवत्यवयवज्ञानंकथ

लग्ननवांशपतुल्यतनुःस्याद्वीर्ययुतग्रहतुल्यतनुर्वा चंद्रसमेतनवांशपवर्णः कादिविलग्नविभक्तभगात्रः २३

मित्याह वाममुदितैरिति राशिभिरुदितैः दृश्यभागावस्थितैर्वामांगेंगविभागः लग्नस्योदितभागाः तयाद्वादशैकादशदशनवमाष्टमाः तथासप्तमस्यराशेर्लग्नोदिततुल्यभागाः एषभागोदितः शेषोनुदितः अर्थादनुदितैरदृश्यैर्दक्षिणइति तत्रलग्नानुदितभागास्तथाद्वितीयतृतीयचतुर्थपंचमषष्ठाः सप्तमराशेर्लग्नोदिततुल्यभागाः एवंस्थितेलग्नप्रथमद्रेष्काणोदयेलग्नराशिः कंशिरः कल्पनीयं लग्नाद्द्वितीयद्वादशौ दृक्चक्षणी तत्रद्वितीयोदक्षिणमक्षि द्वादशोवामं तृतीयैकादशौश्रोत्रे तत्रतृतीयोदक्षिणएकादशोवामम् चतुर्थदशमौनासापुटौचतुर्थोदक्षिणं दशमोवामम् पंचमनवमौकपोलौ पंचमोदक्षिणः नवमोवामः षष्ठाष्टमौहनू षष्ठोदक्षिणम् अष्टमोवामः सप्तमोवक्त्रमुखम् एवंराश्याद्युपलक्षितः प्रथमोंगविभागः तेकं

दंशकइति अथद्वितीयोद्रेष्काणोदयः कंठाद्येद्वितीयेंगविभागेपरिकल्प्यः तद्यथा लग्नंकंठोगलकः द्वितीयद्वादशौस्कंधौतत्र द्वितीयो दक्षिणस्कंधोद्वादशोवामः तृतीयैकादशौबाहू तत्रतृतीयोदक्षिण एकादशोवामः चतुर्थदशमौपार्श्वे तत्रचतुर्थोदक्षिणंदशमोवाम पंचमनवमौहृद्भागौ तत्रपंचमोदक्षिणः नवमोवामः षष्ठाष्टमौक्रोडउदरभागौ षष्ठोदक्षिणः अष्टमोवामः सप्तमोनाभिरिति नाभिग्रहणमुदरोपलक्षणार्थं एवंद्वितीयोंगविभागः बस्तिःशिश्नगुदेति लग्नद्रेष्काणेतृतीयेउदयतितेएवंहोरादयस्तृतीयेंगविभागेपरिकल्प्याः तद्यथालग्नंबस्तिः नाभिलिंगयोर्मध्यभागः द्वितीयद्वादशौशिश्नगुदे तत्रद्वितीयोदक्षिणभागः द्वादशोवामः ततोनंतरंतृतीयैकादशौवृषणौतृतीयोदक्षिणः एकादशोवामः चतुर्थदशमौऊरू

कंदृक्छ्रोत्रनसाकपोलहनवोवक्त्रंचहोरादयस्तेकंठांसकबाहुपार्श्वेहृदयंक्रोडानिनाभिस्ततः
बस्तिःशिश्नगुदेततश्चवृषणावूरूततोजानुनीजंघेंघ्रीत्युभयत्रवाममुदितैर्द्रेष्काणभागैस्त्रिधा २४

चतुर्थोदक्षिणः दशमोवामः पंचमनवमौजानुनीपंचमोदक्षिणः नवमोवामः षष्ठाष्टमौजंघेषष्ठोदक्षिणजंघा अष्टमोवामजंघासप्तमः पादद्वयमिति २५ अथअंगज्ञानप्रयोजनंशार्दूलविक्रीडितेनाह तस्मिन्पापयुतइति तत्रप्रथमद्रेष्काणेजातस्यशिरोंगविभागोद्वितीयद्रेष्काणेजातस्य कंठाद्यंगविभागः तृतीयद्रेष्काणेजातस्यबस्त्याद्यंगविभागः तस्मिन्पापयुतेति यत्रांगराशौपापग्रहसंयुक्तेतत्रांगे व्रणंविस्फोटकादिच्छिद्रंमशकादिचिन्हमादिशेत् तस्मिन्पापयुतेंगराशौपापग्रहसंयुतेशुभसंयुतेदृष्टेसौम्यग्रहसंयुक्तेऽवलोकितेवातद्वारयुपलक्षितेंगेलक्ष्मादिशेत् मशकादिचिन्हंवाच्यम् स्वर्क्षांशइति सएवव्रणोव्रणमशकादिकतास्वर्क्षेस्वराशौस्वनवांशकेवास्थितोभवति स्थिरराशौस्थिरांशकेवास्थितस्त

दाव्रणमशकादिकंसहजोत्पन्नंतस्यजंतोर्भवति अन्यथोक्तविपर्यस्थे आगंतुकोजातस्योत्तरकालेकेनचिन्निमित्तेन वक्ष्यमाणेनस्वदशाकालेएव वक्तव्यम् आगंतुकस्यव्रणादेर्ग्रहवशेनतास्मिन्निमित्तमाह मंदेश्मानिलजइतिमंदेशनैश्चरे व्रणकर्तृत्वेप्राप्ते तद्व्रणाद्यश्मनोपाषाणहेतुको ऽनिलजोवातव्याधिहेतुकोवावक्तव्यः भौमस्यव्रणस्यकर्तृत्वेप्राप्तेग्निशस्त्रविषजो ऽग्निहेतुकः शस्त्रहेतुकोविषहेतुकोवावक्तव्यः बुधेभूभवः भूस्थितपतनादुच्छ्रितपाताद्वाभिपातहेतुकोलोष्टप्रहारहेतुकोवासूर्येरवौकाष्ठप्रहारहेतुकश्चतुष्पदप्राणिहेतुकोवावक्तव्यः हिमगौचंद्रेशृंग्यब्जजः शृंग्याभिघातहेतुकः शृंग्यधिष्ठेतेयस्यप्राणिनः सशृंगीतज्जातोअब्जजोवाजलप्राणिहेतुकोवावक्तव्यः अन्यैः शुभैः अन्यैर्ग्रहैर्यत्रांगदेशस्याभवति तत्रशस्त्राद्व्रणादिकंनभवंति तत्रावशेषौगुरुसितौतत्किंबहुवचनंउच्यतेबुधः पापयुक्तोव्रणकरः क्षीणश्चंद्रमास्तथाततोन्यैःशुभमित्युक्तम् २५ अथ व्रणज्ञानंहरिण्याह समनुपतिताइति यस्मिन्भागेवामेदक्षिणेवात्रयःसबुधाग्रहाः त्रयोन्येग्रहाश्चतुर्थेनबुधेनसहिताःसमनुपतिताःसमाश्रितास्तत्रांगेपूर्वोक्तव्रणादेर्निश्चयमान्निश्चयादवश्यंप्राप्तिर्भवति शुभेष्वशुभेषुवातेग्रहाःसबुधाःशुभाःसौम्याःअशुभाःपापावाभवंति तथापितत्रांगेतस्यव्रणाद्याप्तिर्वक्तव्या तेषांमध्याद्योबलीसस्वदशामवाप्यकरोति व्रणकृदिति लग्नात्षष्ठस्थाने अशुभः पापोग्रहोव्यवस्थितोदेहशरीरेव्रणकृद्भवति कस्मिन्स्थानेतनोर्भसमाश्रिते तनोर्लग्नात्सषष्ठस्थोराशिः कालांगानीत्यनेनदर्शितांगविभागेयस्मिन्भवतितस्मिन्भसमाश्रितराशियुक्तेदेहशरीरेभव

तस्मिन्पापयुतेव्रणंशुभयुतेदृष्टेचलक्ष्मादिशेत्तत्वर्क्षांशेशस्थिरसंयुतेषुसहजःस्यादन्यथागंतुकः
मंदेश्मानिलजोग्निशस्त्रविषजोभौमेबुधेभूभुवःसूर्येकाष्ठचतुष्पदेषुहिमगौशृंग्यब्जजान्यैःशुभम् २५

ति अत्रापिस्वक्षांशस्थिरसंयुतेषुसहजः स्यादन्यथागंतुकइत्यनुवर्तनीयं सएवषष्ठस्थानस्थः पापः सौम्येनशुभग्रहेणयदादृष्टोभवति तदातत्रांगेतिलकमशकोद्भवति तिलकः कृष्णोबिंदुः मशकोर्बुदः अथशुभग्रहेणसएवपापोयुतस्तदासलक्ष्मवान्भवतिराश्युपलक्षितमंगसचिन्हं भवति अत्रस्थानोधनालोभनिश्चयोलक्ष्मइति २६ इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौजन्मविधिनामाऽध्यायः पंचमः समाप्तः ५ अथारिष्टाध्यायोव्याख्यायते तत्रतावज्जातस्यारिष्टसंभवेसत्यायुर्दायाष्टकवर्गादेशः कर्तव्यः तस्मात्प्रथमारिष्टाध्यायंवक्ष्यति तत्रारिष्टद्वयंविद्युन्मालयाह संध्यायामिति संध्यायालक्षणंसंहितायामुक्तम् अर्धास्तमयात्संध्याव्यक्तीभूतानतारकायावत् तेजःपरिहानिमुखाद्भानोरर्धोदयोयावत्-

सृमनुपूर्तितायस्मिन्भागेत्रयः सबुधाग्रहाभवंतिनियमात्तस्यावाप्तिः शुभेष्वशुभेषुवा व्रणकृदशुभः षष्ठेदेहेतनो
भसमाश्रितेतिलकमसकृद्दृष्टः सौम्यैर्युतश्चसलक्ष्मवान् २६ इतिजन्मविधिनामाऽध्यायः समाप्तः ५

अस्मिन्संध्याकालइति तत्रजन्मनियस्यसंध्याकालोभवति तत्काललग्नगताहिमदीधितेश्चंद्रस्यहोराभवति यथासंभवंपापैर्भांतगतैः यत्रतत्रराशिस्थोनवमांशगताः पापाभवंतितदैतद्योगोजातस्यनिधनायमरणायभवति प्रत्येकमिति एकमेकमिति प्रत्येकं शशीचंद्रः पापास्त्रयश्चतुर्षुकेंद्रेषुव्यवस्थिताभवंत्येकैकप्रतिययासंभवंचत्वार्यपिकेंद्राण्याक्रांतानिभवंति तथापियस्यजन्मभवतिसविनाशमुपैति म्रियतइत्यर्थः १ अथान्यानरिष्टयोगानिंद्रवज्रयाह चक्रस्येति यावंतोभागालग्नस्योदितास्तावंतएवभागालग्नचतुर्थराशेः परित्यज्यशेषंभागमारभ्यपंचमषष्ठसप्तमाष्टमनवमराशयोदशमराशिलग्नोदितभागतुल्यांशाश्चक्रेपरार्धं तत्रचक्रस्यपूर्वभागेक्रूराःपापाः इतरभागेपश्चिमेसौम्याः शुभग्रहाः कीटलग्नेवृश्चिक-

राशावुदयेकर्कटस्योदयस्थितेजातः शिशुः क्षिप्रमाश्वेवविनाशमुपैतिमरणंप्राप्नोतीत्यर्थः नन्वत्रपूर्वंवृश्चिकः कीटसंज्ञउक्तः पुनरपिद्विपदादयोन्हि निशिचप्राप्तेचसंध्याद्वये इत्यत्रकर्कटवृश्चिकमकरमीनानांकीटत्वमभ्युपगतं तदत्रवृश्चिककर्कटावेवकथंव्याख्यातावित्यत्रोच्यते मकरमीनयोर्जलत्वादपिसमर्सत्वादपिसपक्षत्वात्कीटसंज्ञानाभ्युपगम्यते यस्माद्बादरायणः पूर्वापरभागगतैः शुभाशुभैरलिनिकर्कटेलग्नेजातस्याशिशोर्मरणंसद्यः कथयंतियवनेंद्राः पापैर्विलग्नास्तमयाश्रितश्चेतिपापैः क्रूरग्रहैः विलग्नाश्रितः अस्तमयाश्रितश्चास्थितैश्चसद्योजातः क्षिप्रंशीघ्रमेवविनाशंसमुपैति अत्रकेचिदेवंयोगद्वयंव्याचक्षते आश्रितउभयतः लग्नात्पापैरुभयतइत्येकोयोगः अस्तमयाश्चादाश्रितइतिद्वितीयः तत्रलग्नात्द्वाद

संध्यायांहिमदीधितिहोरापापैर्भांतगतैर्निधनाय प्रत्येकंशशिपापसमेतैः केंद्रैर्वासविनाशमुपैति १ चक्रस्य
पूर्वापरभागगेषुक्रूरेषुसौम्येषुचकीटलग्ने क्षिप्रंविनाशंसमुपैतिजातः पापैर्विलग्नास्तमयाश्रितश्च २

शद्वितीयस्थयोः पापयोर्जातोम्रियते तथालग्नषष्ठाष्टमयोश्चपापयोर्जातोम्रियते तथालग्नसप्तमाच्चापेद्वादशद्वितीये तत्स्थयोश्चपापयोर्जातोम्रियते अन्येपुनरभिशब्दोआभिमुख्येवर्तते इत्यनुवर्णयंति तत्रलग्नाद्योद्वितीयराशौग्रहःस्थितः सउदयमभिलषते लग्नस्याभिमुखोभवति यश्चलग्नादष्टमराशौभवतिसोस्तमयमभिलषतीत्यतः स्तमराशेरभिमुखोभवति तेनैतज्जातमलग्नाद्वितीयाष्टमगतैः सर्वैःपापैर्जातोम्रियतेवयंपुनरभिशब्द आभिमुख्यव्यावृत्तिं ब्रूमः यस्माद्यवनेश्वरः पापेषुग्रहेषुलग्नाभिमुखेषुसर्वेष्वेवामवीर्येषु शुभर्क्षगेष्वपिकिंतुयोलग्नाद्वादशस्थानेस्थितः सउदयमभिलषति लग्नाभिमुखोभवति यश्चषष्ठेस्थितः लग्नात्सोप्यभिमुखोभवति यस्माद्ग्रहाणांप्राङ्मुखी

गतिः उक्तंच प्राग्गतास्तुल्यजवाग्रहाश्चस्वस्वमंडलगाइति नचपूर्वाभिमुखंव्रजतोगच्छतोलग्नाद्द्वितीयस्थस्यतदाभिमुख्यंनसंभवतिनचाष्टमस्थस्यास्ताभिमुख्यं तेनैतज्जातं लग्नाद्द्वादशषष्ठाश्रितैः पापैर्यस्यजन्मसंम्रियतेइति भगवतागार्ग्येणसर्वाण्येवव्याख्यातान्यभिमुखानीतितथाचतद्वाक्यरिपुव्ययगतैः पापैर्यदिवाधनमृत्युगैः लग्नेवापापमध्यस्थे चूनेवामृत्युमाप्नुयादिति २ अथयोगांतरमनुष्टुभाह पापाविति वक्रःपापउदयेलग्नेस्थितोऽन्योस्तेसप्तमेगतः शशीचंद्रमाः यत्रतत्रस्थः क्रूरेणपापेनयुतोभवति सचसौम्यैः शुभग्रहैः यदिनदृष्टः तदोज्जातस्यमृत्युरचिराच्छीघ्रमेवभवेत् ३ अथयोगांतरमनुष्टुभाह क्षीणेति हिमगौचंद्रेक्षीणे लग्नाद्व्ययगेद्वादशस्थेतथापापैःक्रूरग्रहैरुदयाष्टमगैः लग्नस्थैरष्टमगतैश्चकेंद्रेषुकंटकेषुचेद्यदि

पापावुदयास्तगतौक्रूरेणयुतश्चशशी दृष्टश्चशुभैर्नयदामृत्युश्चभवेदचिरात् ३ क्षीणे
हिमगौव्ययगेपापैरुदयाष्टमगैः केंद्रेषुशुभाश्चेन्नचेत्क्षिप्रंनिधनंप्रवदेत् ४ क्रूरेणसयुतः
शशीस्मरांत्यमृत्युलग्नगः कंटकाद्बहिः शुभैरवीक्षितश्चमृत्युदः ५

शुभाश्चनभवंतितदाजातस्याक्षिप्रमाश्वेवनिधनंमरणंप्रवदेद्ब्रूयात् अत्रकेचित्पापैरुदयाष्टमगैरितिनेच्छंति तदयुक्तंयस्माद्भगवान्गार्गिः क्षीणेचंद्रेव्ययगतेपापैरष्टमलग्नगैः केंद्रबाह्यगतैःसौम्यैर्जातस्यनिधनंवदेत् ४ अथारिष्टांतरमनुष्टुभाह क्रूरइति शशीचंद्रः क्रूरेणग्रहेणसंयुतस्तथाभूतः स्मरांत्यमृत्युलग्नगः सप्तमद्वादशाष्टमलग्नानामन्यमस्थस्तथाशुभैः शुभग्रहैः कंटकबाह्यस्थैः केंद्रवर्ज्यअन्यस्थानस्थैः अवीक्षितः नदृष्टोयदिभवतितदाजातस्यमृत्युदोमरणदोभवति अर्थादेवसौम्यैः केंद्रस्थैस्तदारिष्टाभावः तथाचसारावल्याम् व्ययाष्टसप्तोदयगेशशांकेपापैः समेतैः शुभदृष्टिहीनेकेंद्रेषुसौम्यग्रहवर्जितेषुजातस्यसद्यः

कुरुतेप्रणाशं ५ अथारिष्टांतराणिपृथिव्याह शशिनिइति शशिनिचंद्रेअरिविनाशगेलग्नात्षष्टस्थानस्थेऽष्टमस्थेवातत्रचपापानांक्रूराणांमध्याद
न्यतमेनेक्षितेदृष्टेसौम्यग्रहेणादृष्टेतस्यनिधनंमरणमाशुक्षिप्रमेवभवति शुभैरिति अथलग्नात्षष्ठाष्टमगेचंद्रेसौम्यैर्ग्रहैर्दृष्टेपापेनादृश्यमानेजातस्यस
माष्टकंवर्षाष्टकंस्थितिःजीवितंवक्तव्यम् ततोनंतरंमरणमितिसमशब्दोवर्षपर्यायः दलमतइतिलग्नात्षष्ठाष्टमगेचंद्रेमिश्रैःपापैःसौम्यैश्चदृष्टेअतोस्मात्समाष्ट
काद्वर्षाष्टकाद्दलमर्द्धंवर्षचतुष्टयंस्थितिर्निर्दिशेत् ततोमरणमिति अर्थाद्वषष्ठाष्टमस्थेचंद्रमसिनकेनचिद्दृश्यमानेऽरिष्टयोगाभावः चंद्रमायदिषष्टाष्टम-
स्थः सौम्यक्षेत्रगतोभवत्यथवापापक्षेत्रगतः सौम्ययुक्तोभवति तदानमरणप्रदः यस्माद्यवनेश्वरः लग्नाच्छशीनैधनगोऽशुभर्क्षेषष्ठेऽथवापापनिरी

शशिन्यरिविनाशगेनिधनमाशुपापेक्षितेशुभैरथसमाष्टकंदलमितश्चमिश्रैःस्थितिः
असद्भिरवलोकितेबलिभिरत्रमासशुभेकलत्रसहितेचपापविजितेविलग्नाधिपे ६

क्षितश्चसर्वायुराहंतिशुभैर्विमिश्रस्तदीक्षितोब्दाष्टकमर्धकंवा तथायस्यकृष्णपक्षेदिवाजन्मनिशुक्लपक्षेरात्रौजन्मनिलग्नात्षष्ठाष्टमगः शशी
शुभाशुभदृष्टोपिभवतितस्यनमरणप्रदः यस्मान्मांडव्यः पक्षेसितेभवतिजन्मयदिक्षपायांकृष्णेथवाहनिशुभाशुभदृश्यमानः तच्चंद्रमारिपुविना
शगतोपिलग्नादापत्सुरक्षतिपितेवशिशुंनहंति असद्भिरिति अत्रास्मिन्नेवषष्ठेष्टमेवास्थानेशुभेसौम्यग्रहेबुधगुरुसितानामन्यतमेस्थितेतस्मिं
श्चासद्भिः पापैः बलिभिःवीर्ययुक्तैरवलोकितेदृष्टेजातस्यमासंस्थितिःजीवितंवक्तव्यम् ततोमरणमिति अत्रनिर्दिष्टयोगस्थेचंद्रमसिशुभदृष्टे ५८
ऽरिष्टयोगाभावः यस्मात्तेनैवस्वल्पजातकेउक्तम् शशिवत्सौम्याःपापैर्वक्रिभिरवलोकितानशुभदृष्टाः मासेनमरणदास्युः पापजितोलग्नपश्चा

स्ते कलत्रसहितेइति विलग्नाधिपेजन्मलग्नपतौकलत्रसहितेसप्तमस्थानस्थेवापापविजिते क्रूरग्रहेणयुद्धे संग्रामेविजितेविजितलक्षणम् दक्षिणादिक्स्थः पुरुषोवेपथुरप्राप्यसन्निवृत्तोणुः अधिरूढोविकृतोनिः प्रभोविवर्णश्चयः सजितः भौमादीनां आकाशेयुद्धं भवतियः दक्षिणाशास्थः सग्रहः जितः कुरुतादीनांयुद्धमित्युक्तत्वाच्चंद्रदीपिकायां परुषोरूक्षः वेपथुः कंपायमानः अन्यग्रहमप्राप्यसन्निवृत्तः विपरीतगतिमापन्नः अणुः सूक्ष्मः अधिरूढः अन्येनाक्रांतः विकृतः विकारसहितः निष्प्रभो दीप्तिरहितः विवर्णः वर्णरहितः सजितइतिचशब्दात्सास्थितिस्ततो मरणमिति ६ अथारिष्टांतराणिमंदाक्रांतयाह लग्नेक्षीणइति क्षीणेशशिनिचंद्रेक्षीणेलग्ने जन्मलग्नस्थितेतथारंध्रकेंद्रेष्वष्टकेंद्रेषुपापैःक्रूरैः

लग्नेक्षीणेशशिनिनिधनंरंध्रकेंद्रेषुपापैः पापांतस्थेनिधनहिबुकद्यूनयुक्तेचचंद्रे एवं
लग्नेभवनिमदनच्छिद्रसंस्थेश्चपापैः मात्रासार्द्धंयदिचनशुभैर्वीक्षितः शक्तिभृद्भिः ७

स्थितैर्यथासंभवमेवंविधेयोगेजातस्यनिधनंमरणंवक्तव्यम् तथाचंद्रेशशिनिपापांतस्थेपापमध्यगतेनिधनहिबुकद्यूनयुक्तेऽष्टमचतुर्थसप्तमस्थानानामन्यतमस्थेजातस्यमरणंवक्तव्यम् एवमिति एवमनेनैवप्रकारेणलग्नगेपापांतस्थेशशिनितथामदनछिद्रसंस्थेसप्तमाष्टमस्थानयोरन्यतमस्थेपापे क्रूरेयदिशुभैः सौम्यग्रहैः शक्तिभृद्भिः सबलैः चंद्रमानवीक्षितोनदृष्टोभवति तदाजातस्यमात्रासार्द्धंजनन्यासहमरणंवदेत् अथनिर्दिष्टयोगस्यअस्मैचंद्रमाशुभैर्दृश्यतेबलिभिस्तदाजातस्यैवमरणंनतन्मातुरिति ७ अथारिष्टांतराणिइंद्रवज्रयाह राश्यामिति चंद्रेशशिनिराश्यंतगेयत्रतत्रराशौ नवमनवांशकगेतथाभूतेसद्भिः शुभग्रहैरवीक्ष्यमाणेनसंदृष्टेपापैः क्रूरैस्त्रिकोणोपगतैः नवपंचमस्थानस्थैः जातः शिशुः बालकः अशुक्षिप्रमेव

प्राणैरसुभिः वियोगंप्रयातिगच्छतिम्रियतइत्यर्थः अस्तेचपापैरितितुहिनांशौचंद्रेलग्नगेऽस्तेसप्तमेसप्तमस्थानस्थितैःपापैश्चशब्दाच्छिशुरा श्चैचप्रा णैः वियोगंप्रयाति अत्रतुहिनांशुलग्नइति कर्कटलग्नेकेश्चिद्व्याख्यातंतदयुक्तम् यस्मादनेनैवस्वल्पजातकेउक्तम् उदयगतोवाचंद्रः सप्तमराशिस्थितैःपापैरिति ८ अथारिष्टांतराणिहारिण्याह अशुभसहितइति चंद्रेशशिन्यशुभसहितेयद्यपिसामान्येनोक्तंतथाप्यशुभेनपापेनशनैश्चरेण वयुक्तेतथाभूतेलग्नगतेनकेवलंयावत् लग्नगतेऽस्तेराहौराशिगतेलग्नाच्चकुजेंगारकेनिधनाश्रितेऽष्टमस्थानस्थेजननीसुतयोः मातृपुत्रयोः मृत्युर्भवतिरवौतुसशस्त्रजइति एवंविधेयोगेरवावादित्येस्थितेजननीसुतयोर्मृत्युः शस्त्रजः शस्त्रेणायुधेनजातोभवति एतेनैतदुक्तंभवतिशनैश्चरेणबुधेनवायुक्तेऽर्केऽस्तेलग्नगतेकुजेचाष्टमगेजातस्यमात्रासहशस्त्रहेतुकंमरणंवाच्यम् नन्वशुभइतिसामान्येनोक्तंतत्केवलेनशनैश्चरेणायुक्तेचंद्रेशशिनि

राश्यंतगेसद्भिरवीक्ष्यमाणेचंद्रेत्रिकोणोपगतैश्चपापैः प्राणैःप्रयात्याशुशिशुर्वियोगमस्तेचपापैस्तुहिनांशुलग्ने ८ .

इतिकिंव्याख्यातंशनैश्चरेणबुधेनवायुक्तेऽर्केइतिनोक्तं अत्रोच्यते असंभवादेवपौर्णमास्यांचंद्रग्रहणंभवति तत्रतावदर्कसहितेनचंद्रमसानभवितव्यं बुधेनचार्कसमीपवर्तिनासदैवभवितव्यंअष्टमस्थानत्वाद्भौमेनापिचंद्रसहितेननभवितव्यं शनैश्चरंविनाव्यवस्थितेनबुधेनसौम्येनैवभवितव्यंतस्माच्चंद्रग्रहणेशनैश्चरेणेतिव्याख्यातं अर्कग्रहणेतुपुनः बुधेनयदियुक्तोऽर्कोभवति तदार्कसहितत्वात्तस्यपापताभवति इत्यवोर्कस्यबुधसहितत्वमिति व्याख्यातम् क्षीणेंदुयोगादर्कस्यपापयोगायनगण्यते यस्मादवश्यममावास्यांतेऽर्कग्रहणंनभवितव्यम् तत्रचावश्यमर्केणक्षीणचंद्रसहितेन भवितव्यंयद्यर्कः क्षीणेंदुनायुक्तइति आचार्यस्याभिप्रेतःस्यात्तदास्तेऽर्केनिधनाश्रितेकुजेइतिकेवलमकरिष्यत् उदयतिरवावित्यादि रवावादि-

दित्येउदयनिलग्नगतेशीतांशौचंद्रगतेशीतांशौचंद्रेवालग्नगतेतथाअशुभैः पापैस्त्रिकोणविनाशगैः नवपंचमाष्टमस्थैः सर्वैरेवयथासंभवमेवंविधेयोगस्थेरवौचंद्रेवाशुभैः सौम्यग्रहैः वीर्योपेतैः बलवद्भिः नयुक्तेक्षितेनसंयुक्ते नापिदृष्टेजातस्यनिधनंमरणंवदेत् अर्थादेवोक्तयोगस्थेरवौचंद्रेवाबलिभिः शुभैः युतेदृष्टेचारिष्टयोगाभावः ९ अथारिष्टांतरमपरवक्त्रेणाह असितइति असितः सौरः रविरादित्यः शशांकश्चंद्रः भूमिजोंगारकः एतैः शनिरविचंद्रभौमैर्यथाक्रमंव्ययनवमोदयनैधनाश्रितैः द्वादशनवमलग्नाष्टमस्थानस्थैः तत्रैतज्जातं शनैश्चरेद्वादशे अर्केनवमेचंद्रेलग्नगे भौमेष्टमस्थे एतैः सर्वयोगकर्तारोग्रहायदिबलिनावीर्यवतागुरुणानदृष्टास्तदाजातस्यजंतोराश्वेवमरणंप्रवदेत् अन्यदायोगकर्तॄन् ग्रहान् सर्वान् बलवान्गुरुः पंचमस्थः कांश्चित्पश्यति कांश्चिन्न

अशुभसहितेग्रस्तेचंद्रेकुजेनिधनाश्रितेजननिसुतयोर्मृत्युर्लग्नेरवौतुसशस्त्रजः उदयनिरवौशीतां
शौवात्रिकोणविनाशगैर्निधनमशुभैर्वीर्योपेतैः शुभैर्नयुतेक्षिते ९

पश्यति अथवाबलहीनः सर्वानेवपश्यतितदाजातस्यमरणायप्रवदेत् किंतुआशुशीघ्रंनवदेत् अर्थादेवसर्वानेवगुरुः पंचमगः पश्यतितदारिष्टयोगाभावः १० अथारिष्टांतरं पुष्पिताग्रयाह सुतइति शीतरश्मिः चंद्रः स्वक्षीणः अशुभयुतः पापग्रहेणसंयुक्तः सुतमदननवांत्यलग्नरंध्रेषुस्थितः पंचमसप्तमनवमद्वादशोदयाष्टमगतः अथवासुतमदननवांत्यरंध्रेस्थितइतिपाठः एतेषांअन्यतमस्थानस्थः भृगुसुतशुक्रेण शशिपुत्रबुधेन देवपूज्यबृहस्पतिना बलिभिः वीर्यसंयुक्तैर्नयुतोनाप्यवलोकितः एषांग्रहाणांमध्येएकतमेनापिसंयुतोनापिदृष्टस्तदाजातस्यमरणायभवति अर्थादेवभृगुसुतशशिपुत्रदेवपूज्यानामन्यतमेनबलवतादृष्टोयुक्तोवाभवति तदारिष्टयोगाभावः अत्रक्षीणचंद्रग्रहणंनास्तितत्कथंव्याख्यानउच्यते आगमांतरदृष्टत्वात् तथा

चसारावल्याम् निधनास्तव्ययलग्नत्रिकोणगाः क्षीणचंद्रसंयुक्ताः पापा बलिनः शुभैरदृश्यमाना गतायुषां प्रायः ११ अथानुक्तमरणकालानामरिष्टयोगानां कालपरिज्ञानं भ्रमरविलसितेनाह योगेस्थानमिति यस्मिन्नरिष्टयोगे जातस्य मरणकालावधिर्नोक्तस्तस्मिन्नरिष्टयोगे जातस्य योगकर्तारो ये ग्रहास्तेषां मध्याद्यो बलवान् स यस्मिन्राशौ जन्मकालेऽवस्थितः स राशिर्बलिनः तत्स्थानं तत्र चारक्रमाच्चंद्रमसि प्राप्ते जातस्य मरणं वक्तव्यम् अथवा चंद्रे स्वमात्मीयस्थानं गते जन्मकाले यत्र राशौ चंद्रमा व्यवस्थितस्तमेव राशिं पुनरपि चंद्रे गते तत्र तस्य मरणं वक्तव्यम् ननु गृहमथवा तनुगृहं लग्नं वा चारक्रमाद्गते चंद्रमसि जातस्य मरणं वक्तव्यं कदेत्युच्यते वर्षस्यांतः संवत्सराभ्यंतरे एतदुक्तं भवति अनुक्तकालारिष्टजातो वर्षं नातिक्रमतीति

असितरविशशांकभूमिजैर्व्ययनवमोदयनैधनाश्रितैः भवति मरणमाशु देहिनां यदि बलिना गुरुणा न वीक्षिताः १० सुत-
मदननवांत्यलग्नरंध्रेष्वशुभयुतो मरणाय शीततरश्मिः भृगुसुतशशिपुत्रदेवपूज्यैर्यदि बलिभिर्न युतोऽवलोकितो वा ११

नन्वत्र प्रतिमासं चंद्रमसा सर्वाण्येव स्थानानि गंतव्यानि तत्किमित्युक्तं वर्षस्यांतः उच्यते पापैर्दृष्टे बलवतीति एषु निर्दिष्टस्थानेषु मध्याद्यत्र गतश्चंद्रमा बलवान् भवति पापैश्च दृश्यते तदा जातस्य मरणं वक्तव्यम् न केवलं गतमात्र एव चंद्रे किल मुनिगदितं किलेत्यागमसूचने निश्चयेन मुनिगदितमिदमरिष्टलक्षणमित्यागमपारंपर्येण श्रूयत इति अत्रान्यैराचार्यैररिष्टभंगा उक्तास्ते च सत्यरूपाः यतो बहवो जाता अपि सत्स्वपि योगेषु जीवंतो दृश्यंते तोस्माभिः किंचिल्लिख्यंते सर्वाणि मानातिबलः स्फुरदंशुजालो लग्नस्थितः प्रशमयेत्सुरराजमंत्री एको बहूनि दुरितानि सुदुस्तराणि भक्त्या प्रयुक्त इव शूलधरप्रणामः १ लग्नाधिपोऽतिबलवानशुभैरदृष्टः केंद्रस्थितैः शुभफलैरवलोक्यमानः मृत्युं विधूय विदधाति सुदीर्घमायुः सार्धं गुणैर्बहुभिरूर्जितया च लक्ष्म्या २

लग्नादष्टमवर्त्त्यपि गुरुबुधशक्रद्रेष्काणगश्चंद्रः मृत्युमाप्तमपि नरं परिरक्षत्येव निर्व्याजम् ३ चंद्रः संपूर्णतनुः सौम्यर्क्षगतः स्थितः शुभस्यांतः प्रकरोति निरिष्टं भंगं विशेषतः शुक्रसंदृष्टः ४ बुधभार्गवजीवानामेकतमः केंद्रमागतो बलवान् यद्यपि क्रूरसहायः सद्योरिष्टस्य भंगाय ५ रिपुभवनगतोपि शशी गुरुसितचंद्रात्मजदृक्काणस्थः गरुड इव भोगिदुष्टं परिरक्षत्येव निर्व्याजम् ६ सौम्यद्वयांतरगतः संपूर्णः स्निग्धमंडलः शशभृत् निःशेषारिष्टहंता भुजंगलोकस्य गरुड इव ७ शशिभृति पूर्णशरीरे शुक्ले पक्षे निशाभवे काले रिपुनिधनस्थेरिष्टं भवति नैवाच जातस्य ८ प्रस्फुरितकिरणजालः स्निग्धामलमंडले बलोपेते सुरमंत्रिणि केंद्रगते सर्वारिष्टं शमं याति ९ सौम्यभवनोपयाताः सौम्यांशकसौम्यदृक्काणस्थाः गुरुचंद्रकाव्यशशिजाः सर्वारिष्टस्य हंता

योगे स्थानं गतवति बलिनश्चंद्रे स्वं वा तनुं गृहमथवा पापैर्दृष्टे बलवति मरणं वर्षस्यांतः किल मुनिगदितम् १२ इत्यरिष्टाऽध्यायः षष्ठः ६

रः १० चंद्राध्यासितराशेरधिपः केंद्रे शुभग्रहो वापि प्रशमयति रिष्टयोगं पापानि यथा हरिस्मरणं ११ पापा यदि शुभवर्गे सौम्यैर्दृष्टाः शुभेशवर्गस्थैः निघ्नंति तदा रिष्टपतिं विरक्ता यथा युवतिः १२ राहुस्त्रिषष्ठलाभे लग्नात्सौम्यैर्निरीक्षितः सद्यः नाशयति सर्वदुरितं मारुत इव तूलसंघातं १३ शीर्षोदयेषु राशिषु सर्वे गगनाधिवासिनः सूतौ प्रकृतिस्थैश्चारिष्टं विलीयते घृतमिवाग्निस्थं १४ तत्कालस्य यदि विजयी शुभग्रहः शुभनिरीक्षितो वश्यम् नाशयति सर्वारिष्टं मारुत इव पादपान् प्रबलः १५ सर्वैर्गगनभ्रमणैर्दृष्टश्चंद्रो विनाशयति रिष्टं आपूर्यमाणमूर्तिर्यथा नृपः स्वजनपद्वेषीति १६ इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृत्तौ रिष्टाऽध्यायः षष्ठः समाप्तः ६ अथायुर्दायाध्यायो व्याख्यायते तत्र पूर्वोक्तरिष्टाध्यायेऽरिष्टवर्जितस्यायुर्दायः कर्तव्यः तत्रादावेव मययवनमणित्थपराशरमतेन प्रत्येकस्य ग्रहस्य परमायुः प्रमाणं पुष्पिताग्रयाह मययवनेति मयना

मादानवः सूर्यलब्धवरप्रसादः यवनाम्लेंच्छजातीयाहोराविदः मणित्थआचार्यः शक्तिपूर्वः पराशरः शक्तिः पूर्वोयस्यसशक्तिपूर्वः पूर्वशब्देनविना उच्यतेतैः मययवनमणित्थशक्तिपूर्वैः दिवसकरादिष्वादित्यादिषुग्रहेषुवत्सराः संवत्सराः परमायुःप्रमाणाब्दाः प्रदिष्टाः उक्ताः नवतिथिविषयाश्वित्यादि अत्रनवादिभिर्दशसहिताइतिसर्वत्रैवविशेषणभूतंतेननवभिः दशसहिताएकोनविंशतिः परमायुःप्रमाणवत्सरादिवसकरस्यादित्यस्यतिथिभिःपंचदशभिःसहितादशपंचविंशतिश्चंद्रस्य विषयैःपंचभिःसहितादशपंचदशभौमस्य अश्विभ्यांद्वाभ्यांदशसहितादशद्वादशबुधस्यभूतैःपंचभिःसहितादशपंचदशगुरोः रुद्रैरेकादशभिःसहितादशएकविंशतिः शुक्रस्यदशभिःसहितादशविंशतिःसौरस्य एतानिग्रहाणांपरमायुःप्रमाणंवर्षाणिस्वतुं-

मययवनमणित्थशक्तिपूर्वैर्दिवसकरादिषुवत्सराः प्रदिष्टाः
नवतिथिविषयाश्विभूतरुद्रदशसहितादशभिःस्वतुंगभेषु १

गभेषु स्वपरमोच्चांशस्थितेषुभवंति तत्रेदृशाः परमोच्चस्थिताग्रहाआदित्यादयोभवंतितेयथानिर्दिष्टवर्षाणिप्रयच्छंति १९।२५।१५।१२।१५।२१।२० अंकेनापि एतान्यर्कादीनांपरमायुःप्रमाणवर्षाणि १ अथपरमनीचावस्थितानामायुर्दायज्ञानंमंदाक्रांतयाह नीचेतिएतएवदिवसकरादयो नीचेपरमनीचेप्राप्ताअर्धपरमायुःप्रमाणवर्षेभ्यो ऽपहरंति अतएवोक्तंनीचेऽतोस्मात्पूर्वोक्तात्परमायुषोर्धदलंह्रसतिक्षीयते अथेदृशारव्यादयः परमनीचस्थाभवंतिपरमनीचस्थास्तएवपूर्वोक्तायुषोर्धदलंप्रयच्छंतितद्यथारविः नवसार्धानिवर्षाणिप्रयच्छतिचंद्रोद्वादशसार्धानिवर्षाणिप्रयच्छतिएवंभौमः सप्तसार्धानिएवंबुधः षट्एवंबृहस्पतिः सप्तसार्धानिएवंशुक्रोदशसार्धानिएवंशनैश्चरोदशअंकेनापिवर्ष ८ मास ६ अथसूर्यस्यचंद्र

स्यवर्षः १२ मास ६ भौमस्यवर्षः ७ मास ६ बुधस्यवर्ष ७ मास ६ गुरोः वर्ष ७ मास ६ शुक्रस्यवर्ष १० मास ६ शनेः वर्ष १० मास ० ततश्चांतरस्थेनुपात इति ततस्तस्मादुच्चान्नीचाच्चांतरस्थे मध्यवर्तिनिग्रहेऽनुपातः त्रैराशिकः कर्तव्यः सर्वेषांनीचानिअंकतयैवलिख्यंते तत्रतावत्सर्वस्यैवग्रहस्यपरमोच्चपरमनीचांतरालंतावद्वलिप्तापिंडीकृत्यदशसहस्राण्यष्टौचशतानिभवंति तत्रस्वोच्चादधिकग्रहेणयदाभुक्तंभवति तदातत्रस्वोच्चाद्विशोध्यशेषस्य लिप्तापिंडीकार्या अथस्वनीचादधिकंग्रहेणभुक्तंभवति तदातत्रस्वनीचमपास्यावशेषलिप्तापिंडीकार्या तासांग्रहलिप्तानांग्रहभुक्तलिप्ताग इत्याख्या तस्यैवग्रहस्यपरमनीचोक्तानिवर्षाणिमासयुतानिकार्याणि कथमुच्यते वर्षाणिद्वादशभिःसंगुण्यतत्रमासान्योजयेत्तानिचमासीकृतान्या-

नीचेतोर्द्धंह्रसतिहि ततश्चांतरस्थेनुपातो होरात्वंशप्रतिममपरेराशितुल्यंवदंति ॥
हित्वावक्रंरिपुगृहगतैर्हीयतेस्वत्रिभागःसूर्योच्छिन्नद्युतिषुचदलंप्रोज्झ्यशुक्रार्कपुत्रौ २

दित्यादीनांलिख्यंतेतद्यथा चतुर्दशाधिकंशतंरवेः प्राग्वद्विभज्य सार्द्धंशतंचंद्रस्य नवतिर्भौमस्य द्विसप्ततिर्बुधस्य नवतिर्जीवस्य षड्विंशत्याधिकशतंशुक्रस्य विंशत्यधिकशतंसौरस्य अंकेनापि ११४ सू. १५० चं. ९० भौ. ७२ बुध ९० जीव १२६ शुक्रस्य १२० शनेः तत्रत्रैराशिकंप्रतिभगणार्द्धलिप्ताभिः खखाष्टदिक्संख्याभिरेताभिः १०८०० इष्टग्रहपरमनीचमासालभ्यंते तद्ग्रहभुक्तलिप्ताभिःकियंतइति अत्रेदंसूत्रंत्रैराशिकेप्रमाणंफलमिच्छाद्यंतयोः सदृशराशी इष्टफलेनगुणिताप्रमाणभक्ताफलंभवंतितदर्थंग्रहभुक्तिलिप्ताएवग्रहपरमनीचमासैःसंगुण्यभगणार्द्धलिप्ताभिर्विभज्यावाप्तमासाः मासशेषंत्रिंशद्गुणितं ३० प्राग्वद्विभज्यावाप्तदिवसाः दिनशेषंषष्ट्यासंगुण्य प्राग्वद्विभज्यावाप्तंघटिकाः घटिकाशेषंषष्ट्यासंगुण्यप्राग्वद्विभज्यावाप्तंविकला

पलानि एवंमासादिचषकांतः कालआगतः मासानांद्वादशभिः भागमपहृत्यलब्धासंवर्षाणिलभ्यंतेतदेवशेषंमासाः एवमागतवर्षादि परमोच्चायुः दर्शितवर्षेभ्यः संशोध्यावशेषंग्रहेणवर्षादिरायुषः कालोदत्तोभवति एवमुच्चाद्विच्युतनीचमप्राप्तस्यकर्तव्यं नीचाद्विच्युतस्योच्चप्राप्तस्य प्राग्वत्कालमानीयतस्यचग्रहस्यपरमनीचायुषिसंयोज्यग्रहस्यायुषः कालोवर्षादिर्भवति अथवायदिराशिषट्कलिप्ताभिरर्धायुर्वर्षाण्यपचीयंतेतदैताभिः ग्रहभुक्तकलिप्ताभिः किमित्यत्रमध्यमराशिंसवर्णीकृत्यतेनांकेनग्रहभुक्तलिप्तागुणयेत् ततःपरिवर्त्यभागहारच्छेदांशौः छेदंसगुणच्छेदांशांशगुणोभाज्यस्य भागहारःसवर्णितयोरित्यत्रवर्षाणामेवमस्यच्छेदापिकेनभगणार्धेनलिप्ताः संगुण्यखखषट्घनलिप्ताभवंति २१६०० एताभिर्भागमपहृत्यवर्षाणिलभ्यंतेशेषंद्वादशभिः सविकलंसंगुण्याधस्थस्यविकलस्यषष्ट्याभागमपहृत्योपरितनराशौसंयोज्यप्राग्वद्द्विभाज्यमासालभ्यंतेएवंशेषंसविकलंत्रिंशताषष्ट्यासंगुण्य दिनघटिकाविघटिकाश्चानयितव्याः शेषंप्राग्वत्कर्म अथलघुनोपायेनपिंडायुषआनयनंप्रदश्यते तद्यथेष्टग्रहादस्मात्प्रागुक्तमुच्चध्रुवकंविशोध्यावशेषकमभूतौस्थापयेत् अथोच्चध्रुवकेनशुद्ध्यतितदाग्रहराशिंद्वादशकंदत्वातस्मादुच्चमपास्यावशेषंस्थापयेत् ततस्तदावशेषंराशिषट्कादूनंभवतितदाराशिद्वादशकादपास्यशेषंस्थाप्यम् अथराशिषट्कादधिकंभवतितदातदेवगृह्यतत्कर्मभूमौराश्यादिकंविलिप्तांतंस्वपरमायुर्वर्षैः संगुण्यस्वच्छेदैर्विभज्यलब्धमुपर्युपरियोजयेत् अवशेषंस्थापयेत् विलिप्तास्थानेपिषष्ट्याभागानांत्रिंशताराशीनांद्वादशभीराशिभ्योलब्धंवर्षाणितदवशेषंमासाः भागशेषंदिवसाःलिप्ताशेषंघटिकाःविलिप्ताशेषंचषकाइतिएतावतैवकर्मणास्फुटंभवति तथाचसारावल्याम् स्वोच्चशुद्धोग्रहःशोध्यःषड्भास्यूनोभमण्डलात् स्वपिंडगुणितोभक्तोराशिमानेनवत्सराः १।१२।३०।६०।६० इतिहोरात्वंशप्रतिममिति होरालग्नंसाचांशप्रमाणानिवर्षाणिददातियावंतोनवांशालग्नेनभुक्तास्तावंत्येववर्षाणिददातितत्करणंयथातात्कालिकलग्नस्यराशीनपास्यशेषंलिप्तापिंडीकार्यं तत्रशतद्वयेनभागमपहृत्याप्तंभुक्तनवांशकास्तावंत्येववर्षाणिलग्नमायु

दायंप्रयच्छंति अथशेषेणसहत्रैराशिकंकृत्वावर्षाणामधस्तान्मासाद्यंस्थापयितव्यंतद्यथायदिलिप्ताशतद्वयेनद्वादशमासालभ्यंतेतदवशेषलिप्ताभिः कियंतइति तेनावशेषलिप्ता द्वादशभिः संगुण्यशतद्वयेनविभाज्यावाप्तंमासास्तेचवर्षाणामधस्थाप्यमासशेषंत्रिंशतासंगुण्यशतद्वयेनप्राग्वद्विभाज्यावाप्ताश्चदिवसाः तान्मासानामधःस्थापयेत् दिनशेषंषष्ट्यासंगुण्यप्राग्वद्विभज्यावाप्तंघटिकादिवसानामधःस्थाप्या घटिकाशेषंषष्ट्यासंगुण्यप्राग्वद्विभज्यावाप्तंचशेषंघटिकानामधःस्थाप्या एवंलग्नायुर्दायः अपरेराशितुल्यंवदंति अपरेन्येभणित्यादयः आचार्यालग्नस्यराशितुल्यंआयुर्दायमिच्छंतिलग्नेयावंतोराशयोभुक्तास्तावंत्यएववर्षाणिलग्नायुः लग्नस्यभुक्तभागादिकंलिप्तापिंडीकृत्यमासाद्यानयनेत्रैराशिकंकर्तव्यंयद्यष्टादशभिर्लिप्ताशतैर्द्वादशमासालभ्यंतेनतदेताभिः लग्नभुक्तलिप्ताभिः कियंतइति प्राग्वद्वर्षाणामधस्तान्मासाद्यास्थापितव्याः तथाचभणित्थः लग्नराशिसमाश्चाब्दामासाद्यमनुपाततः लग्नायुर्दायमिच्छंतिहोराशास्त्रविशारदाइति तदेवमतंशोभनमित्यस्माकमभिप्रेतं अन्येप्येवमिच्छंति यथालग्नांकेपतौबलवति अंशतुल्यराश्यधिपेबलवतिराशितुल्यंवदंतिकथयंतीत्यर्थः तथाचसारावल्याम् लग्नाद्व्यांशतुल्यंस्यादंतरेचानुपाततः लसदेवबलसंयुक्तेराशितुल्यंचभाधिपेद्वित्वावक्रमिति येनग्रहेणयावत्संख्ययायुर्दायोदत्तस्तत्तस्यसंभवतितस्मात्स्वादायुषोभौमादिकस्यवक्रांविपरीतांगतिंहित्वावर्जयित्वायोग्रहोरिपुग्रहगतःशत्रुक्षेत्रावस्थितोभवतितेनस्वादायुषस्त्रिभागोहीयतेसग्रहस्त्रिभागमपहरतीत्यर्थः वक्रितःपुनःशत्रुक्षेत्रगतोपिनापहरति तथाचवक्रचारंविनाभ्यंशंशत्रुराशौहरेद्ग्रहः एतद्बहूनांमतंआचार्यस्यपुनःएषएवपक्षोभिप्रेतः अन्यथाहित्वाभौमंरिपुग्रहगतैर्हीयतेस्वत्रिभागइत्येवावक्ष्यत् वक्रंहित्वायोग्रहोरिपुराशिगतएवज्ञायते यथावक्रोग्रहोशायुर्दायंबलवत्वात्त्रिगुणंददातितथात्रापिनापहरतीतिनिश्चयः अन्येपुनरेवंव्याचक्षते यथावक्रमंगारकंहित्वायोग्रहोरिपुराशिगस्तेनस्वादायुषस्त्रिभागोहीयते भौमःशत्रुक्षेत्रगतोपिनापहरति अतएवबादरायणः भूम्याःपुत्रंवर्जयित्वारिभस्थाहन्युःस्वस्वादायुषस्ते-

त्रिभागमिति सूर्योच्छिन्नद्युतिषु सूर्येणरविणाउच्छिन्नाकर्तिताद्युतिर्येषांतेसूर्योच्छिन्नद्युतयः आदित्यमंडलेअस्तमितेषुग्रहेषुदलमर्धंहीयतेकिंतुशुक्रा
र्कपुत्रौसितशनैश्चरौ अर्द्धंवर्जयित्वाताववस्तंगतावपिनापहरतः तथाचबादरायणः अस्तयाताः सर्वएवार्धहानिंकुर्युर्हित्वादैत्यपूज्यार्कपुत्रौ २ अथ
ग्रहाणांस्वादायुषश्चक्रपातेनापहानिंप्रहर्षिण्याह सर्वार्धमिति असत्सुपापग्रहेषुव्ययभवनादारभ्यद्वादशस्थानात्प्रभृतिसप्तमांतंयावद्व्यवस्थितेषुवा
मव्युत्क्रमेणयथाक्रमंसर्वार्द्धंद्वयोभागाः क्षीयंते तत्रलग्नाद्द्वादशस्थः पापग्रहः सर्वमायुरात्मीयमेवापहरति एकादशस्थोर्द्धंदशमस्थस्त्रिभागंनवमस्थ-
श्चतुर्भागं अष्टमस्थः पंचभागं सप्तमस्थः षड्भागमिति सत्स्वर्द्धमिति एतेष्वेवव्ययादिषुस्थानेषुसत्सुशुभग्रहेषुव्यवस्थितेष्वशुभग्रहोक्तस्यार्द्धं क्षीयते
तत्रलग्नाद्द्वादशस्थः शुभग्रहः स्वादायुषोर्द्धमपहरति एकादशस्थश्चतुर्भागम् दशमस्थः षड्भागंनवमस्थोष्टमभागं अष्टमस्थोदशमभागंसप्तमस्थो

सर्वार्द्धंत्रिचरणपंचषष्ठभागाः क्षीयंतेव्ययभवनादसत्सुवामम् सत्स्वर्द्धंह्रसतितथैकराशिगानामेकोंशंहरतिबली
तथाहसत्यः ३

द्वादशभागमिति तथैकराशिगानामिति उक्तस्थानेषुयदाग्रहद्वयंभवतिबहवोवास्युस्तदातेषामेकसंस्थितानांमध्याद
कएववीर्यवान् सएवैकोंशभागंयथापठितमपहरतिनान्येतत्रस्थापहरंति एतत्सत्यआह सत्याचार्यःकथयति अंशप्रहरणंयथासंभवं भाग-
प्रदर्शनार्थं तथाचसत्यः एकादशोक्रमात्सप्तमादितिप्राहहरणकर्माणि एकर्क्षगेषुवीर्याधिकः स्वभागंहरेदेकं अर्धंतृतीयमथचतुर्थंतथा पंचमंच-
षष्ठंच आयुः पिंडात्पापाहरंतिसौम्यास्तथार्धानि द्वादशसंस्थः पापःस्वादायंशाभवनस्ततोर्धंतु अपहरतिसर्वमायुर्यथाचयोगस्तमपिवक्ष्ये इतिव
राहमिहिरस्याप्ययंमतम् इहसत्यमतोपन्यासआगमानुस्मृतिप्रदर्शनार्थः ३ ५ ५ ५

अथलग्नस्थः पापाश्चक्रपातवदायुषोंशमपहरति तस्यांशप्रमाणज्ञानं वसंततिलकेनाह सार्द्धोदितइति उदितायेनवांशाः सहार्धोदितेननवांशेन वर्ततइति सार्द्धोदितोदितनवांशाः तात्कालिकस्यस्फुटलग्नस्य ये भुक्ताभागास्तेषांलिप्ताः पिंडीकृत्यशतद्वयेन भागमपहृत्याप्तावांशास्तस्मिन्काले भचक्रस्यच यावंतो नवांशकाउदिताः पश्चादर्धोदितोनवांशकः सततउदितनवांशसमूहेयोज्यः एवंकृते सार्द्धोदितोदितनवांशसमूहो भवति तेनगणितागतं समस्तमेवायुः पिंडंगुणनीयम् एवंकृते सार्द्धोदितोदितनवांशाहतं समस्तमायुः पिंडंभवति तस्मादष्टाधिकशतेन भागेहृते यदवाप्यते वर्षादि तन्नाशमुपैति क्षयंगच्छति किंसर्वेषां नेत्याह क्रूरविलग्नसहितइति यदाविलग्नस्थः क्रूरः आदित्यांगारकशनैश्चराणामन्यतमोभवति तदैव आगतवर्षादि

सार्द्धोदितोदितनवांशहतात्समस्ताद्भागोष्टयुक्तशतसंख्यमुपैतिनाशम्
क्रूरेविलग्नसहितेविधिनात्वनेनसौम्येक्षितेदलमतः प्रलयंप्रयाति ४ छं

समस्तायुः पिंडात्संशोध्य एवंकृते तत्कालजातस्यजंतोरायुर्वर्षादिस्फुटंभवति किंतुमस्येकस्यगृहस्यैतत्कर्मकर्तव्यं येनायुः संक्रान्तानि दशावर्षाणि सर्वेषांभवंति विधिनात्वनेनसौम्येक्षितइति अनेनविधिनासएवलग्नस्थः क्रूरग्रहोयदासौम्येक्षितः शुभग्रहेणदृश्यते तदाविधिनात्वनेनयत्फलमायुः पिंडात्सार्धोदितोदितनवांशहतात्समस्तायुः पिंडादष्टोत्तरशतेनभागेहृतेयत्फलंलब्धं अतोदलमर्धंप्रलयंप्रयाति तदर्धीकृत्यायुः पिंडात्पातयेदेवंकृते आयुःप्रमाणंस्फुटंभवति अन्येएवंव्याचक्षते तात्कालिकेनलग्नेनभुक्तायेनवांशकास्तेसार्धोदितनवांशेनसमाख्याः अयमर्थः तात्कालिकस्यलग्नस्यराशीनपास्यभागालिप्तापिंडीकृत्यशतद्वयेनभागमपहृत्यावाप्तमुदितांशकस्तैः कर्मप्राग्वत्कार्यं एतदपिस्थूलम् तेनलग्नभा

गालितीकृत्यताभिः प्रत्येकगृहदत्तवर्षादिरायुर्दायसंगुण्याधः स्वच्छेदैर्भागमपहृत्योपर्युपरियोजयेत् वर्षस्थाने भगणाकृष्टाभिर्भागमपहृते लब्धं वर्षादि
तस्य भागवृत्यात्रनकार्यं तथाच सारावल्या लग्नाशलिप्तिकाहत्वा प्रत्येकं विहगायुषा भाज्यं मण्डललिप्ताभिर्लब्धं वर्षादि शोधयेत्। स्वायुषोलग्नगेक्रूरेसौम्यदृष्टेच
तद्दलमिति एतदेवशोभनमस्माकंप्रतिभातिनकेवलमत्रयावच्चक्रपातेप्येवंविधिः लग्नादिदृष्टग्रहंविशोध्यावशेषंयदिषड्भागादूनंतदातस्यग्रहस्यचक्रपातोस्ति-
नान्यथेति नेनावशेषेणायुःपिंडस्यभागमपहृत्यलब्धंप्राग्वदायुषःपातयेत् अथरूपादूनोभागहारोभवतितदारूपोद्भागहारसंशोध्यशेषेणायुर्दायसंगुण्य
रूपेणभागमपहृत्यलब्धमेवायुःशुद्धंभवति उक्तंचलग्नंग्रहोनकंषड्भादूनकंयद्यसौहरः आयुःपिंडंभजेत्तेनलब्धंवर्षादिशोधयेत् रूपाद्यदोनोहारःस्याद्रूपा
च्छुद्धेनताडयेत् रूपेणविभजेल्लब्धंतदेवायुःस्फुटंभवेत् अस्मिन्साधोदितेति क्रूरभणिलग्नेयदापापसौम्यौभवतस्तदायोलग्नोदितांशकसमीपवर्ती
सएवग्राह्योनेतरइति तत्रक्रूरशब्देनक्षीणश्चन्द्रमानग्राह्यः तथाचबादरायणः सूर्यांगारकशनीनामेकस्मिंल्लग्नगेभवतिहानिः विधिनात्वनेनसौम्येक्षिते-
दलंपातयेल्लब्धम् ४ अथपुरुषादीनांपरमायुःप्रमाणंतत्तानंशिखरिण्याह समाःषष्टिर्द्विघ्नाइति समाशब्देनवर्षमुच्यतेसमानांवर्षाणांषष्टिर्द्विघ्नाद्विगुणी
कृताविंशत्यधिकंवर्षशतंभवति एवंविंशत्यधिकंवर्षशतंपंचनिशापंचरात्रयःऽहोरात्राणीत्यर्थः मनुजकरिणांमनुजानांमनुष्याणांकरिणांहस्तिनांचपरमा-
युः हयानांअश्वानांद्वात्रिंशद्वर्षाणिपरमायुः खरोगर्दभः करभउष्ट्रः अनयोःपंचककृतिःपंचकस्यकृतिः पंचानांवर्गः पंचविंशतिः परमायुः विरूपासाप्या
युरितिसापंचककृतिः विरूपाविगतोरूपोयस्याः एकोनाचतुर्विंशतिवर्षाणिवृषमहिषयोः वृषाणांमहिषाणांचपरमायुःगोमहिष्योरित्यर्थः श्वना-
सारमेयानांद्वादशवर्षाणिपरमायुः श्वनह्यन्यासर्वेषांनराणामुपलक्षणार्थंनेनासिंहमार्जारादीनामप्येतदेवस्मृतम् छागादीनामिति दशकसंहिता
षट्षोडशवर्षाणिपरमायुःछागादीनांआदिग्रहणाद्द्वयमृगयोरपिपरमायुरिति सर्वेषांशेषभूतंपरमायुर्दायप्रयोजनम् अश्वादीनांजातानामायुः

प्राणज्ञानार्थमिति तद्यथा अश्वादेर्जातस्य पुरुषवदायुः प्रमाणमानीय ततस्त्रैराशिकं कर्तव्यं यदि विंशत्यधिकवर्षशतं पंच दिनाधिकं यस्य पुरुषस्यायुः प्रमाणं तस्येदमायुस्तु द्वात्रिंशद्वर्षायुः प्रमाणस्याश्वस्य किं स्यादिति एवमागतमायुः प्रमाणमश्वस्य तत्कालजातस्य वाच्यम् एवं सर्वेषामभिहितप्राणिनां स्वायुषा परमेण त्रैराशिकं कृत्वा तत्कालजातस्य स्वायुषः प्रमाणनिर्देशः कार्यः अन्ये एवं वदंति यथा पठितं परमायुषः प्रमाणं न कश्चिज्जीवति तदयुक्तम् यस्माद्विंशत्यधिकाद्वर्षशतादभ्यधिकमप्यायुर्गणितकर्मणा भवति यस्मात्परमायुःप्रमाणपठनं त्रैराशिकार्थमवज्ञातव्यमिति ५ अथ यस्मिन्योगे जातस्य परमायुर्भवति तद्योगज्ञानं पुष्पिताग्रयाह अनिमिषपरमांशकेति अनिमिषो मीनः तस्य परमांशको नवमनवांशकः

समाः षष्टिर्द्विघ्ना मनुजकरिणां पंच च निशा हयानां द्वात्रिंशत्खरकरभयोः पंचककृतिः
विरूपा साप्यायुर्वृषमहिषयोर्द्वादश शुनां स्मृतं छागादीनां दशकसहिताः षट्च परमम् ५

तस्मिन्ननिमिषपरमांशके विलग्ने शशितनये बुधे गवि वृषे च पंचवर्गलिप्तास्थिते लिप्ताः पंचविंशतिं भुक्त्वा बुधो वृषे स्थितः सकलाः समस्ता ग्रहा अन्ये सर्व एव यदि स्वतुंगभेषु स्थिताः परमोच्चगता भवंति तदा जातस्य परमायुःप्रमाणं विंशत्यधिकं वर्षशतं पंचदिनाधिकमायुर्भवति तत्र च कर्म तद्यथा आदित्यादयो ग्रहाः सलग्ना ईदृशाः अत्रादित्यादीनां बुधवर्जितानां यथा पठितानि परमायुःप्रमाणवर्षाणि भवंति बुधस्य पुनः क्रियते तत्र तावद्बुधो नीचान्मीनाद्विच्युतः तस्मात्तात्कालिकादस्माद्बुधात् १।०।२५ बुधपरमनीचध्रुवकमिदं ११।१५।०० संशोध्य जातमेता लिप्ता १।१५।२५ एतल्लिप्तापिंडीकृतम् २७।२५ एताभिस्त्रैराशिकं यदि भगणार्धलिप्तानामेताः संगुण्य १०८०० बुधपरमनीचवर्षाणि षट् भवंति तदा तासां नी



चक्रांतलिप्तानां २७।२५ किंस्यादिति अत्रभाग्वत्फलं वर्षादि १।६।५ एतद्बुधपरमनीचगतेष्वेतेषु दत्वाजातं ७।६।५ एतद्बुधस्यपरमायुः तत्रलग्नादेकादशस्थानत्वाद्भौमस्यचक्रपातात् परमायुःप्रमाणंवर्षपंचदशकादर्धं पातयित्वा सार्धानिसप्त ७।६ वर्षाणि सौरस्याष्टमस्थानस्थत्वात्परमायुः प्रमाणाद्वर्षविंशतेः पंचमभागंचत्वारि वर्षाणिपातयित्वाजातानिषोडशवर्षाणि १६ आदित्यचंद्रबृहस्पतिशुक्राणांपरमायुः लग्नस्थनवमनवांशकस्थत्वान्नववर्षाणिभवंति सर्वेषांस्थापनं सूर्यवर्ष १९ चंद्रवर्ष २५ भौमवर्ष ७ मास ६ बुधवर्ष ७ मास ६ दिन ५ जीववर्ष १५ शुक्रवर्ष २१ शनिवर्ष १६ लग्नवर्ष ९ सर्वेषांयोगः वर्ष १२० दिन ५ एवंदर्शितयोगपरमायुःप्रमाणमागतमिति अत्रचादित्यमेषस्थे कन्यास्थत्वं बुधस्यनसंभवतितेन षड्भिर्ग्रहैरुच्चस्थैर्बुधेचवृषस्थेयोगोयंप्रदर्शितः अत्रचपरमोच्चगतेसूर्येबुधस्य वृषाद्भागचतुष्टयंमुक्त्वा स्थितिर्भेषूनिनास्याधिकं यतोमध्यमार्कोदयराशिस्थानेशून्योभवतिभागाः षट्पंचाशल्लिप्ताभवंति तदातस्यस्फुटस्यपरमोच्चगताभवति एषएव सूर्योमध्यमबुध अत्रच यदापरमार्कफलम् परमंचशीघ्रफलम् धनगतंभवति तदाबुधोवृषेभागचतुष्के स्फुटोभवति तत्रयथादर्शितलग्ने यथावस्थितग्रहसंस्थायां वृषेचतुर्थभागे ईदृशोबुधोभवति १।४ अस्मान्नीचध्रुवकमिदम् ११।१५ संशोध्यजातम् १।१९ बुधोएतल्लिप्तापिंडीकृतानां ३९।५० एताभिस्त्रैराशिकंयदिभगणार्धलिप्तानामेतासाम् १०८०० षट्वर्षाणितदेताभिः साका २०।५० नीतिलब्धवर्ष १ मास ७ दिन १८ एतद्बुधपरमनीचवर्षेषु दत्वाजातानिवर्षाणि ७ मास ७ दिन १८ एतद्वाषेषु यथादर्शितवर्षेषु संयोज्य जातवर्षाणां शतं १२० मास १ दिन २३ एतद्दर्शितपरमायुः प्रमाणादधिकमप्यायुः संभवति इति तस्मात्परमायुः प्रमाणपठनं त्रैराशिकार्थमेवव्याख्यातम् अन्येषु-

नः अनिमिषपरमांशकेविलग्नेयोगएवामुंव्याचक्षते यथामीनेवर्गोत्तमगतेलग्नेवृषभस्थेनबुधेनपंचविंशतिलिप्ताभुक्ताभवंत्यन्येचग्रहाः स्वोच्चराशिषुपरमोच्चभागव्यतिरेकेणापियदिस्थितास्तदायोगशक्त्यैवपरमायुः प्रमाणंजातोजीवति अथबुधस्यपरमनीचध्रुवकर्मेदं ११।१४ पूर्वप्रदर्शितम् साम्प्रतकर्मकालेकथमिदम् ११।१५।० प्रदर्शितमित्यत्रोच्यते चतुर्दशभागान्भुक्त्वापंचदशेपठितपरमनीचभागव्यवस्थितोभवति अतश्चतुर्दशभागाः परमनीचस्यस्यप्रदर्शिताः तत्रस्थश्चपरमनीचप्रदर्शितमायुर्भवतितस्माद्यावत्पंचदशोभागोनभुक्तोबुधेनतावत्त्रैराशिकोसत्तिर्नकर्तव्यस्ततः कर्मकालेपंचभागाः प्रदर्शिताः इत्येतत्सर्वेषामेवग्रहाणांत्रैराशिककालेपठितेभागैर्भुक्तैः प्रदर्शयितव्यानितत्रत्रैराशिकार्थमुच्चध्रुवकाःतथात्रैराशि

अनिमिषपरमांशकेविलग्नेशशितनयेगविपंचवर्गलिप्ते
भवतिहिपरमायुषःप्रमाणंयदिसकलाःसहिताःस्वतुंगभेषु ६

सू	चं	मं	बु	बृ	शु	श	ल
०	१	९	५	३	११	६	११
९	२	२७	१४	४	२६	१९	२९

कार्यपरमनीचध्रुवकाःएतैःकर्मकर्तव्यमिति ६ अथास्यापरमतायुर्दायस्यदूषणार्थंशालिन्याह आयुर्दायमिति एतदायुर्दायेनकेवलमयययवक्ष्माणत्य शक्तिपूर्वैरुक्तं यावद्विष्णुगुप्तेनापिचाणक्यापरनाम्नैवमुक्तम् आचार्यदेवस्वामीतथासिद्धसेनश्चैवंचक्रे कृतवानित्यर्थः तथाचविष्णुगुप्तः परमोच्चगतैः सर्वैर्मीनेमीनांशसंस्थितेसौम्येचवृषगेजातः परमायुःसजीवति तथाचदेवस्वामीसूर्याद्यैरुच्चगतैर्मीनेमीनांशसंस्थितेलग्ने सौम्येवृषभयातेजातःपरमायुराप्नोति तथाचसिद्धसेनः मीनेपरमांशगतेसौम्येगविपंचवर्गलिप्तास्थे सर्वैःपरमोच्चगतैर्जातःपरमायुराप्नोति यद्येवंबहुभिराचार्यैरुक्तंतत्कोस्यदोषः तत्रोच्यते वक्ष्यमाणसत्याचार्यमते प्रदर्शितमायुर्दायंबहुतराणामाचार्याणांमतमिति यस्माद्याचार्यवराहमिहिरस्यप्रतिज्ञेयंज्योतिषमागमशा

स्त्वं विप्रतिपत्तौ न योग्यमस्माकं स्वयमेव विकल्पयितुं किंतु बहूनां मतं वक्ष्ये अस्य परमतस्य बहुतरस्याविरुद्धत्वं तावदास्ताम् विद्यादसंभवो दोषोप्यस्ति दोषश्चैषामित्यादि एषामाचार्याणां मते दोषो जायते कीदृश इत्याह अष्टावरिष्टमित्यादि वर्षाष्टकं यावज्जातानामरिष्टमुक्तं तद्वर्षाष्टकं हित्वा त्यक्त्वा वर्षाविंशतेरधस्ताद्दर्शितप्रकारेणायुर्न स्यात् नागच्छति एव वर्षाष्टकादूर्ध्वमरिष्टं नास्ति तस्माद्वर्षाष्टकादूर्ध्वं वर्षविंशतेरधस्तान्न कस्यचिन्मरणमापद्यते यावद्दृश्यते म्रियंत इति अयं तेषां प्रसक्तो दोषः ७ अधुना तेषामेवाचार्याणामायुर्दूषणं शालिन्याह यस्मिन् योगेति अनिमिषपरमांशके विलग्न इत्यस्मिन् योगे विंशत्यधिकं वर्षशतं सपंचदिनं परमायुः पूर्णं प्रदिष्टं तस्मिन् योगे षड्ग्रहाः परमोच्चगता भवंति षड्भिश्च परमोच्चगतैश्चक्रवर्ती भवतीति प्रोक्तं याभिहितमन्यैराचार्यैः तथा च बादरायणः षड्भिः स्याच्चक्रवर्ती त्रिभुवनमखिलं शास्ति सर्वैर्ग्रहेन्द्रैरिति यवनेश्वरश्च षड्राजराजाधिबलोपकर्षप्रदानमानेष्वभिजातशक्तिः

आयुर्दायं विष्णुगुप्तोपि चैवं देवस्वामी सिद्धसेनश्च चक्रे दोषश्चैषां जायतेष्टावरिष्टं हित्वा नायुर्विंशतेः स्यादधस्तात् ७

तत्र परमोच्चगता यावंतः षड्ग्रहा न भवंति तावत्परमोच्चायुर्न प्राप्नोति यदा परमोच्चगता भवंति तदा जातेन चक्रवर्तिना भवितव्यम् एवं पूर्णमायुः विंशत्यधिकं वर्षशतमर्थैर्धनैर्विना वर्जयित्वा बहवः पुरुषा जीवंति तस्मादयमपि तेषामपरो दोषः एतच्च परमतायुर्दायदूषणं शालिनीद्वयसंबंधत्वाद्वराहमिहिरकृतमेव न भवतीति न प्रतिभाति तत्र तावद्यदत्र प्रथमशालिन्या दूषणमुक्तं तस्य दूषणस्यासंबंधत्वमुच्यते सार्द्धोदितोदितनवांशहतात्समस्तादिति न्यायेन यत् क्रूरे विलग्नगते आयुषः पातनं क्रियते तस्य प्रतिलग्नं प्रत्यंशकवशादिष्यते न संभवतीति तत्र पातयित्वा यदायुर्विशिष्यते तस्यापीयत्ता नास्तीति तस्माद्यदुक्तम् नायुर्विंशतेः स्यादधस्तात्तदयुक्तं अत्रोदाहरणं यथा कुंभलग्नस्याद्यंशकोदये आदित्यचन्द्रशुक्राः परमोच्चे बु

धजीवशनैश्चराः परमनीचे भौमश्च कुंभस्थाप्यष्टाविंशतिमं भागं भुक्त्वा स्थितस्तदा तात्कालिका ग्रहाः सलग्नाः अत्र लग्नेन किंचिदुक्तमिति लग्नायुर्दायो नास्ति परमोच्चगतानां परमनीचगतानां चाज्ञात एव भौमस्य क्रियते तात्कालिकाद्भौमादस्मात् १०।२८ भौमस्य परमोच्चध्रुवकमिदं ९।२८ संशोध्य जातं १।० एतत्कला पिंडीकृतम् १८०० अथ त्रैराशिकं यदि भगणार्धलिप्तानामेतासाम् १०८०० भौममनीचमासाः नवतिर्भवंति ९० तदैतासां कियंतु इति लब्धा मासाः १५ एतैर्वर्षं सत्रिमासं जातं वर्ष १ मास ३ एतद्भौमपरमोच्चवर्षेभ्यस्तेषु १५ संशोध्य जातं वर्ष १३ मास ९ एष भौमायुर्दायः अथ जीवस्य लग्नाद्द्वादशस्थत्वाच्चक्रपातेनार्द्धं पातयित्वा जातं जीवायुर्दायः वर्ष २ मास ९ परमोच्चगतानां परमनीचगतानां च शत्रुक्षेत्रत्वात् त्र्यंशा अस्तंगताना-

सू	चं	मं	बु	गु	शु	श	ल.
०	१	१०	११	९	११	०	१०
९	२	२८	१४	४	२६	१९	६
०	०	०	०	०	०	७	०

यस्मिन्योगे पूर्णमायुः प्रदिष्टं तस्मिन्प्रोक्तं चक्रवर्तित्वमन्यैः

मर्द्धं च न पात्यते यस्मादनिमिषपरमांशके विलग्ने इत्यत्र योगे चंद्रमसो वृषभस्थत्वाद्यद्यायुषः त्रिभागः पात्यते तदा पूर्णमायुर्न भवतीति यस्मादस्याचार्यमतमिति तात्कालिकमित्रामित्रविधावक्कुमूलात्रिकोणाद्धनधर्मबंधुपुत्रव्ययस्थानगता ग्रहेंद्राः तात्कालिकाः स्युः सुहृदो ग्रहस्य सौम्यं वयो यस्य विरुद्धवीर्यः १ जामित्रषष्ठाष्टमशत्रुमूर्तिद्यूनत्रिकोणैकगृहे निविष्टाः तात्कालमेते रिपवो भवंतीत्येतानि मित्राणि रिपुंश्च वक्ष्ये २ अनेनापि शुक्रस्य चंद्रमसः तात्कालिकं मित्रत्वं न भवति तस्मान्मीनस्थे शुक्रे वृषस्थश्चंद्रमाः शत्रुग्रहगो भवति तस्य च शत्रुक्षेत्रस्थत्वाद्यद्यायुषस्त्रिभागः पात्यते तदा अनिमिषपरमांशक इत्यत्र योगे पूर्णमायुर्न प्राप्नोतीति तच्चाचार्येण शृंगग्राहिकयैव प्रदर्शितं तेनैतत् ज्ञापयति परमोच्चगतानां परमनीचगतानां च शत्रुक्षेत्रे त्र्यंशमस्तंगता

नांचार्द्धंचनपात्यते तेनयथादर्शितयोगं पृथक्पृथक्गृहायुर्दायवर्षाणि लिख्यंते सूर्यस्यवर्ष १९ चंद्रस्यवर्ष २५ भौमस्यवर्ष १३ मास ९ बुधस्यवर्ष ६ जीवस्य
वर्ष ३ मास ९ शुक्रस्यवर्ष ११ शनेःवर्ष १० लग्नेननकिंचिद्भुक्तमिति लग्नायुर्दायोनास्ति अथैतेषांयोगः वर्ष ९८ मास ६ अथागारकस्यलग्नगतत्वात्तत्रार्द्धंदीयतेति कर्म-
क्रियते तत्रच लग्नेकुंभारंभत्वान्नवति ९० नवांशकाभुक्ताभवंतितेचनवांशकाचक्रस्योदिताउदयगतएकनवतिसमाः ९१ तेनैकनवत्यासर्वायुःपिंडमिदंवर्ष ९८
मास ६ संगुण्यजातं ८९६३६ अस्याष्टाधिकशतेनभागमपहृत्यावाप्तवर्षाणि ८२ मास ११ दिन २८ घटी २० अस्मात् ९८।६ संशोध्यजातवर्ष १५ मास ६
दिन १ घट ४० एवमष्टभ्यऊर्ध्वंविंशतेरधस्तादायुरुत्पन्नमिति तस्माद्युक्तमुक्तंनायुर्विंशतेःस्यादधस्तादिति अत्रान्येवदंति यथाक्रूरहीनंमीनल-
ग्नंत्वदिष्टत्वेतद्वराहमिहिरेणोक्तम् अनिमिषपरमांशकइति अनेनापिप्रकारेणनवक्तव्यम् यथानायुर्विंशतेःस्यादधस्तादित्यत्र धन्विलग्नेक्षीणेचंद्रे
विंशतितमेभागेबुधस्तत्रास्तमितः सर्वेष्वन्येषुपरमनीचस्थेषुयस्यजन्मभवति तस्यचक्रपातेनैवायुर्दायोबहुःपततीति तत्रैवतावत्प्रदर्श्यते तत्रतात्का-
लिकाग्रहाः सलग्नाः तत्रबुधस्यप्राग्वत्कृत्वाजातंवर्षः १० मास १० अन्येषांपरमनीचस्थत्वात्ज्ञापयतेलग्नेनकिंचिद्भुक्तमिति तस्यायुर्दायोनास्तिचंद्रस्यक्षी-
णस्यपापत्वाल्लग्नाद्द्वादशस्थत्वाच्चक्रपातेनसर्वंपतति तदातस्यायुर्दायोनास्ति आदित्यस्यलग्नेकादशत्वाच्चक्रपातेनार्द्धंपातयित्वाजातंवर्ष ४ मास
९ बुधस्यास्तमितत्वादर्धंपातयित्वाजातंवर्ष ५ मास ५ दशमस्थत्वाच्छुक्रः स्वादायुषस्तृतीयमंशमपहरतीति सौम्यत्वात्तदर्धमस्मात्षड्भागाहृपमेकं
नवमासान्पातयित्वाजातान्यष्टौवर्षाणिनवमासाश्चशुक्रस्यवर्ष ८ मास ९ भौमस्यलग्नाष्टमस्थत्वात्पंचमभागंसार्द्धंवर्षंपातयित्वाजातानिवर्षाणिषडिति
एवंसर्वेषांवर्षाणि वर्ष ४ मास ९ सूर्यस्यवर्ष ० मास ० चंद्रस्यवर्ष ६ मास ० भौमस्यवर्ष ५ मास ५ बुधस्यवर्ष ७ मास ६ जीवस्यवर्ष ८ मास ९ शुक्रस्यवर्ष-
१० मास ० शनैश्चरस्यवर्ष ० मास ० लग्नस्यवर्ष ० मास ० सर्वेषांयोगः वर्ष ४२ मास ५ अत्रासंभवेप्यभिगम्यापिब्रूमः एवंविधायुर्दायःसर्वेष्व-

स्त्वंगतायदिभवंतितदासूर्योच्छिन्नद्युतिपुचदलंप्रोज्झ्यशुक्रार्कपुत्राविनिकृत्यात्तथापिपंचत्रिंशद्वर्षाणि मासोनानियतोबुधस्यपूर्वमेवार्धंपातितं एवंद्विचत्वारिंशतोऽधस्तादायुर्नागच्छतीति तथापिविंशतेरधस्तादादित्यसंबद्धं अत्राप्यन्ये एवंवदंतिक्रूरहीनेविलग्नेजाताअष्टभ्यऊर्ध्वविंशतेः अधस्तान्म्रियमाणादृश्यंतेतेनान्याचार्यमतमसंबद्धं अत्रोच्यते अन्याचार्यमतंपूर्वापर्येणविचार्येतद्वदंतियैरेवाचार्यैरनेनमार्गेणायुर्दायः प्रदर्शितः तैरेवायंमृत्युयोगोभिहितःसचेहालिख्यते तथाचबादरायणः षष्ठाष्टमस्थोरिपुदृष्टमूर्तिःपापग्रहः पापग्रहेयदिस्यात् स्वांतर्दशायांमरणायजंतोर्ज्ञेयः सयुद्धेविजितोयदान्यैः १ तथाचयवनेश्वरः षष्ठाष्टमस्थोरिपुदृष्टरौद्रोपापैःसकृद्द्रस्थानगतश्चदृष्टः स्वांतर्दशायांप्रकरोतिमृत्युंपाशाध्वबंधादिपरिक्षयाद्वा १ तथाचसारावल्याम् क्रूरदशायांक्रूरः प्रविशंश्चांतर्दशांयदाकुरुतेपुंसांस्यात्संदेहस्तदारियोगेहिसदैवमहान् १ रवितनयस्यदशायांक्षितिजस्यांतर्दशायदाभवति बहुकालजीविनामपिमरणंनिःसंशयंपुंसां १

सू	चं	मं	बु	गु	शु	श	ल
६	७	३	५	९	५	०	८
९	२	२७	१४	४	२६	१९	०

क्रूरराशौस्थितःपापःषष्ठेवानिधनेपिवा तत्स्थेनवारिणादृष्टःस्वपाकेमृत्युदोग्रहः १ योलग्नाधिपतेःशत्रुर्लग्नस्यांतर्दशांगतः करोत्यकस्मान्मरणंसत्याचार्यःप्रभाषते १ एवंक्रूरहीनेलग्नेयेजातास्तेषांवर्षाष्टकादूर्ध्वंदर्शितकालादधस्तान्मरणंसंभवत्येव तेचापिमृत्युयोगेनानेनमृताइतिज्ञेयाः यस्मात्तस्यांतर्दशादर्शितग्रहसंबंधिनीकदाभवति अत्रायंनियमः तस्मादन्याचार्यमतेनचाष्टाभ्यऊर्ध्वंदर्शितकालादधस्तान्मरणसंभवत्येव तस्मादेतत्दूषणमसंबद्धं प्रथमं अथद्वितीयस्यदूषणस्यासंबद्धत्वमुच्यते अत्रचक्रवर्तित्वयोगोपिविनादीर्घमायुःसंभवति अत्रोदाहरणं यत्रतात्कालिकाग्रहाःसलग्नाः वृषेर्कोदशभागान्भुक्त्वास्थितः एवंमिथुनेचंद्रमास्त्रीन्भागान् कुंभेभौमोष्टाविंशतिभागान् मेषेबुधपंचदशभागान् सिंहेजीवःपंचभागान् मेषेसप्तविंशतिःसत्रिभागान् शुक्रःकुंभेविंशति-

भागान् सौरः धन्विलग्नमंत्येंशे तद्यथाईदशाग्रहाः अत्रपूर्वप्रदर्शितकर्मणागतानिग्रहायुर्दायवर्षाणिलिख्यंते वर्ष १७ मास ५ सूर्यस्यवर्ष २२ मास ११ चंद्रस्य वर्ष १३ मास ८ भौमस्य वर्ष ७ मास ० बुधस्यवर्ष १४ मास ७ जीवस्य वर्ष १८ मास ३ शुक्रस्य वर्ष १५ मास ० शनेः वर्ष ८ मास ० लग्नस्य अथबृहस्पतेर्वर्षाणांचक्रपातादृष्टभागमपास्यजातं वर्ष १३ मास ८ चंद्रस्यषड्भागमपास्यजातं वर्ष १८ मास ८ रवेःगुरुर्मित्रमतोन्यथान्यइति शुक्रः शत्रुः सचार्कमूलत्रिकोणात्सिंहान्नवमेस्थानेस्थितः तस्मात्तात्कालिकेमित्रीभूतः तेनवृषस्थः शत्रुक्षेत्रमध्यास्थितस्तेनतस्यायुर्दायनकिंचित्पतति चंद्रश्चमिथुनेमित्रक्षेत्रेस्थितः तस्यापियथादर्शितान्येवायुर्दायवर्षाणियस्मादुक्तम् इंदोर्बुधंदेवगुरुंचविद्यात् अंगारकः कुंभेशत्रुक्षेत्रेस्थितः यस्मादुक्तम् भौमस्यशुक्रः शशिजश्चमित्रमिति शेषान्रिपून् शेषत्वाच्छनैश्चरस्तस्यशत्रुस्तात्कालिकश्चैकगृहेभिविष्टत्वाच्छनैश्चराधिशत्रुः किंत्वंगारकस्यशत्रुक्षेत्रस्थस्यापिनपततियस्मादुक्तम् हित्वावक्रंरिपुगृहगतैर्हीयतेस्वत्रिभाग इति तस्मादंगारकस्ययथागतमेवायुः चांद्रेरनर्काइतिवचनाद्भौमोबुधस्यामित्रं तेनतस्यमेषस्थत्वाद्यथागतमेवायुर्बुधस्य बृहस्पतेरप्यादित्योमित्रम् यस्मादुक्तम् गुरोश्चभौमपरिहृत्यसर्वे इति यस्मात्सिंहस्थस्यबृहस्पतेः यथागतमेवायुः शुक्रस्यमेषेस्त्वमित्रक्षेत्रेयस्मादुक्तम् भृगुनंदनस्यत्वर्केदुवर्ज्याः सुहृदः प्रदिष्टाः तस्मात्तस्यापियथागतमेवायुः शनैश्चरस्यापिकुंभेस्वक्षेत्रेस्थितत्वाद्यथागतमेवायुः लग्नस्यपातचारहीनत्वात् यथागतमेवायुः एवमायुर्दायवर्षाणि पृथक् पृथक्लिख्यंते वर्ष १७ मास ५ सूर्यस्य वर्ष १८ मास ८ चंद्रस्य वर्ष १३ मास ८ भौमस्य वर्ष ७ मास ० बुधस्य वर्ष १२ मास ८ गुरुः वर्ष १८ मास ३ शुक्रस्य वर्ष ९ मास ० शनेः वर्ष १५ मास ० लग्ने एवंविधचतुर्दशाधिकंवर्षशतमप्यायुः संभवति ११३ मास ११ यदाचंद्र वर्ष २२ मास ९ तदासर्वेषांयोगः ११५ मास ११ एवंविधेयोगे षोडशाधिकंवर्षशतमप्यायुः संभवति केमद्रुमाख्यश्चायंयो

गः यस्माद्वक्ष्यति हित्वार्कं सुनफानफादुरुधरास्वांत्योभयस्थैर्ग्रहैः शीतांशोः कथितोन्यथात्र बहुभिः केमद्रुमोन्यैस्त्वसौ तस्मादेवं विधे योगे जा-
तो दीर्घमायुः प्राप्नोति केमद्रुमत्वाच्च दरिद्रो भवति वक्ष्यति च केमद्रुमे मलिन दुःखितनीचनिःस्वाः प्रेष्याः खलाश्च नृपतेरपि वंशजाताः केवलं
दरिद्रा दीर्घायुषो दृश्यंते न केनचित्कस्यचिद्दरिद्रस्यायुः प्रमाणं ज्ञातं यथायं दरिद्रो विंशत्यधिकेन वर्षशतेन सपंचदिनेन मृत. स्तस्मात्सौदूमेव
दूषणं ज्ञातव्यम् एवमस्य दूषणस्यासंबद्धत्वं प्रदर्शितमिति असंभाव्यत्वाद्वराहमिहिरकृतमेतच्छालिनीद्वयं न संभाव्यते य, च्च दर्शिताच्चार्यम
तेनायुर्दीर्घं त्यक्त्वा सत्यमतो युर्दायमंगीकरिष्यत्याचार्यस्तत्र च सत्यमतस्य बहुतराणामाचार्याणां मतांगीकरणमेव प्रयोजनम् यस्मात्पू-
र्वमेवाचार्यमतेनायुः प्रतिज्ञाव्याख्याता ज्योतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकं स्वयमेव विकल्पयितुं किंतु बहूनां मतं वक्ष्ये अ-

प्रत्यक्षोयं तेषु दोषः परोपि जीवत्यायुः पूर्णमर्थैर्विनापि ८

थ कश्चिदाह ननु योयं योगस्त्वया प्रदर्शितः स केमद्रुम एव न भवति यस्मादाचार्य एव वक्ष्यति केंद्रे शीतकरेथवा ग्रहयुते केमद्रुमो नेष्यत इति
लग्नात्सप्तमस्थः केंद्रस्थश्चंद्रमास्तस्मादयं केमद्रुमो न भवति अत्र ब्रूमः अत्र चंद्रमा न गण्यते यस्माच्चंद्रमसः सकाशाद्ग्रहेणान्येन योगः कर्तव्य इति
यद्येवं तल्लग्नात्केंद्रस्थः कथं करोतीत्यत्रोच्यते चंद्रलग्नयोस्तुल्यत्वात् तथा च यवनेश्वरः मूर्तिं च होरां शशिनं च विद्यात् अत्र च गार्गिः व्ययार्थकेंद्र
गश्चंद्राद्विनाशानुभवेद्ग्रहः कश्चित्स्याद्वा विना चंद्रलग्नात्केंद्रगतोथवा योगः केमद्रुमो नाम तदा स्यात्तत्र गर्हितः भवंति निंदिताचारा दारिद्र्या-
मयसंयुता इति तस्माल्लग्नात्सप्तमस्थे चंद्रमस्यस्य योगस्य केमद्रुमता सिद्धैवेति ८ छ छ छ

अथजीवशर्ममतेन सत्याचार्यमतेनचायुर्दायमौपच्छंदसिकेनाह स्वमतेनेति जीवशर्मानामाचार्यः स्वमतेनात्मीयमतेन परमायुषो विंशत्यधिकस्य वर्षशतस्यस पंचदिनस्य स्वरांशसप्तमभागं प्रत्येकस्यग्रहस्यायुर्दायमाह कथयति किलशब्दस्तथानामप्रदर्शनार्थः तद्यथा परमायुः १२०।०५, अस्यसप्तभिर्भागमपहृत्यावाप्तं वर्षादि १७।१।२२।८।३४ यथान्यान्याचार्यैर्नवतिथिविषये त्वेवमादीनि परमोच्चगतानामादित्यादीनां वर्षाणि पठितानि तथैतानि परमायुः स्वरांशवर्षाण्येकैकस्यजीवशर्मपठितानि नीचेर्द्धं ह्रसतीत्यत्रापि स्थितमेवतत्रार्द्धमेतत् ८।६।२६।४।१७ एतानि परमनीचस्थस्यैकैकस्यग्रहस्य एतैः प्राग्वदेव त्रैराशिकं कृत्वैकैकस्यग्रहस्यायुर्दायः कर्तव्यः अत्रापिचक्रं विनाशत्रुक्षेत्रस्थस्यग्रहस्य त्र्यंशापहानिः शुक्रशनैश्चरौ विनाभौमं विनाचबलवद्ग्रहस्यास्तंगतस्यार्द्धापहानिः सर्वार्द्धत्रिचरणेत्यादिकाचक्रपातापहानिः क्रूरेविलग्नेसार्द्धोदितेति हानिः एतत्सर्वंजीवशर्मणोप्यन्याचार्यैः समानम् तथाचजीवशर्मा सप्तदशाः १७ कौ १ द्वियमौ २२ वसवो ८ वेदाग्नयो ३४ ग्रहेन्द्राणांवर्षाण्युच्चस्थानां नीचस्थानां अतोऽर्द्धंस्यात् मध्येनुपाततः स्यादानयनम् शेषमत्रयत्किंचित्पिंडायुष इवकार्यम् तत्सर्वंगणिततत्त्वज्ञैरिति अत्रानयनसुखोपायेनप्रदर्श्यते स्वोच्चशुद्धो ग्रहः शोध्यः षड्भाद्रूनोभमंडलात् तद्भागाः कुब्धिषड्भोगि ८६४१ हृतावेदाभ्रसायकैः ५०४ भक्तादिनादियल्लब्धं तदायुर्जीवशर्मजम् दिनैस्तुत्रिंशतामासा मासैश्चरविभिः समाः नकेवलंग्रहदाय परमायुषस्वरांशमेतत्तेनोक्तं यावत्स्वमतेनेति अनेनैवप्रतिपादयति यथैतान्यथार्षिकृतेष्वाचार्यकृतेषु वानकेचिच्छास्त्रेषुदृष्टमिति तस्मादस्यायुर्दायस्यजीवशर्मणः स्वमतकरणमेषदोषः एवंसर्वाचार्यमतेनायुर्दायोव्याख्यातः अत्राचार्येणयवनमतेनोपन्यस्तमथयवनमणित्थशक्तिपूर्वैरिति नचयवनेश्वरकृतेशास्त्रेतथाविध आयुर्दायो दृष्टः यस्माद्यवनेश्वरेणोक्तम् आयुस्त्रिराश्यंशराशियोगादिति अत्रोच्यते यवनेश्वरेणस्फुजिध्वजेनान्यच्छास्त्रं कृतम् शककालस्यार्वाक् ज्ञायतेतथा

वस्फुजिध्वजः गतेनसाध्यर्धशतेनयुक्तोप्यंकेन केषांनगताब्दसंख्याकालः शको१०४४ नांशंविशोध्यतस्मादतीतवर्षाद्युगवर्षजानम् एवंचेत्स्फुजिध्वजकृतंशाककालस्यार्वाक्ज्ञायते अन्यैश्चयवनाचार्यैः पूर्वैः कृतमितितदर्थंस्फुजिध्वजोप्याह यवनाऊचुः येसंग्रहे द्विजनजातिभेदाः प्रोक्ताः पुराणैः क्रमशोग्रहस्य तदेतद्विज्ञायते यथावराहमिहिरेणपूर्वयवनाचार्यमतमेवोपन्यस्तं अस्माभिस्तन्नदृष्टम् स्फुजिध्वजकृतमेवदृष्टा पराशरस्यापीयमेववार्ता पराशरीयासंहिताकेवलमस्माभिर्दृष्टानजातकंश्रूयतेस्कंधत्रयमितिपाराशरस्येति तदर्थंवराहमिहिरः शक्तिःपूर्वैरित्याह चित्रंप्रोक्तस्यपाराशरः कथयतेदौर्भाग्यदं योषितामित्येवमादिमयमणित्थयोर्होराशास्त्रेविद्यते तथाच एकोनविंशतिः सूर्यश्चंद्रमाः पंचविंशतिः तिथिसंख्याकुजः सौम्योद्वादशोच्चगतोगुरुः कुजवद्दैत्यपूज्यस्तुवर्षाणामेकविंशतिः एकोनसूर्यपुत्रस्यपरमोच्चगतस्यच आयुर्दायमिदंप्रोक्तमर्द्धंनीचगतस्यतु अंतरेत्वनुपाताच्चकारयेदायुःसंग्रहम् तथाचमणित्थः नवरूपाःशरयमलात्तिथयोर्काःपंचरूपाः क्रमशःरूपयमाकृतिसंख्याः सूर्यादीनांस्वतुंगभेषब्दाः नीचेष्वस्माद्दलमन्यत्रानुपाततःकार्यम् आयुर्दायविधानंहोराराशितुल्यमपि अथवराहमिहिरस्यस्वमतमायुर्दायंयवनेश्वरसत्यमतानुसारीव्याख्यायते ग्रहभुक्तनवांशराशितुल्यमिति यत्रतत्रराशौयस्मिन्नवांशकेग्रहोव्यवस्थितः सचनवांशकोमेषादेरारभ्ययावत्संख्यराशेः संबंधीभवति तावंति एववर्षाणिग्रहः स्वायुर्दायंप्रयच्छति एवंभुक्तनवांशराशितुल्यंभवति यस्मिंश्चनवांशके वर्तते तस्माद्यद्भुक्तंग्रहेणतेनसहत्रैराशिकंकृत्वामासाद्यानयनमपिकर्तव्यम् त्रैराशिककरणंचवक्ष्यामि एवमायुर्दायानयनंचसत्याचार्येणोक्तम् तथाचतद्वाक्यम् राश्यंसकसंयोगादायुरिहसमासतोग्रहाददुः एतच्चसत्यवाक्यम् बहुसाम्यसमुपैति बहुसम्मतंबहूनामाचार्येणसमतम् तथाचयवनेश्वरः आद्यांशराश्यशकचारयोगादिति अत्रतावत्तस्ययवनेश्वरवाक्यस्यव्याख्यानेकेचिद्धिप्रतिपन्नराशेरंशकचारयोगादितिव्याचक्षते यथायस्मिन्राशौग्रहोवर्तते तत्र-

तेन यावंतोनवांशकाभुक्तातावंत्येववर्षाण्यायुः सग्रहोददाति अस्यचव्याख्यानेपरमंग्रहदायसाध्यमानेनवर्षाणिभवंति एतच्चव्याख्यानंबादरायणादिभिरंगीकृतम् तथाचबादरायणः राश्यंशकालाग्गुणिताद्द्वादशनवभिर्ग्रहस्यभगणेभ्यः द्वादशहृतावशेषेब्दमासदिननाडिकाःक्रमशः इहमाचार्यवराहमिहिरेणाविनष्टेवृस्वल्पजातकेभिहिताएतदनुसारेण सत्ययवनेश्वरेणव्याख्यानंक्रियते आयूंषिराश्यंशकचारयोगादिति राशीनामंशकाराश्यंशकाः तेषुचारयोगादितियत्रतत्रराशौमेषांशकस्थोग्रहोवर्षएकंप्रयच्छति वृषनवांशकस्थोग्रहोवर्षद्वयंप्रयच्छति एवमुत्तरोत्तरांशकवृद्ध्यावर्षवृद्धिर्यावन्मीनांतेद्वादशइति पूर्वव्याख्यानेनयवनेश्वरसत्यवाक्ययोराशिग्रहणमनर्थकंभवति अवश्यमेवराश्यंशकेभवितव्यमिति १ अथानेनैवव्याख्यानानुसारेणाचार्यःसएवायुर्दायानयनमार्ययाह सत्योक्तेति सत्योक्तेसत्यमतायुर्दायकरणेताल्का

स्वमतेनकिलाहजीवशर्माग्रहदायंपरमायुषःस्वरांशं ग्रहमुक्तनवांशराशितुल्यंबहुसाम्यंसमुपैतिसत्यवाक्यं १

लिकमिष्टमभिप्रेतम् ग्रहंलिप्तीकृत्यलिप्तापिंडीकृत्वातस्यशतद्वयेनभागमपहृत्ययदवाप्तंतदवाप्ताख्यंस्थाप्यम् अवाप्तमंडलभागविशुद्धेऽब्दाः स्युः मंडलभागशब्देनद्वादशभागउच्यते तेनावाप्तस्यद्वादशभिर्भागमपहृत्यावाप्तंत्याज्यम् यदवशिष्यतेतेऽब्दाःस्युस्तावद्वर्षाणितेनग्रहेणायुषोदत्तानिभवंति शेषात्तुमासाद्याः यदवशेषंस्थापितंतस्माद्द्वादशगुणितान्नैकच्छेदेनविभक्तान्मासालभ्यंते तच्छेषात्त्रिंशद्गुणितादिनानि तच्छेषात्षष्टिघ्नाद्घटिकाः पुनरपिषष्टिघ्नात्प्राग्वद्भक्ताच्चविकलाः लभ्यंतेइति एवमागतंग्रहस्यायुर्दायंभवति तत्रोदाहरणम् तात्कालिकोग्रहः १।८।४५ लिप्तापिंडीकृता:२३२५ अस्यशतद्वयेन २०० भागमपहृत्यावाप्तं ११ जातंअवशेषं १२५ अवाप्तस्यास्यद्वादशभिर्भागेन

प्रयच्छति इतिएतदेवावशेषंतस्माद्ग्रहेणैकादशवर्षाणिदत्तानिभवंति अवशेषं १२५ द्वादशभिर्गुणितंजातं १५०० अस्यशतद्वयेनभागमपहृत्यावाप्तं ७ जातंएवसप्तमासाः अथमासशेषं १०० जातंएतत्त्रिंशता ३० गुणितंजातं ३००० अस्यशतद्वयेनभागमपहृत्यावाप्तम् १५ दिवसाः पंचदशइतिशेषस्याभावात् घटिकाभावः एवमागतमेवंविधान्ग्रहाद्वर्षादिवर्ष ११ मास ७ दिन १५ घटिका ० अथैतद्द्वराश्यंशकलागुणितेतिन्यायेनप्रदर्श्यते तद्यथा राश्यादिग्रहः १।८।४५ अस्यराशिभागेलिप्ताः पृथक्पृथक् द्वादशहताः अथभूयोनवाहता १२।८६।५४०। १०८।८६४।५८६० अत्रलिप्तानामेतासाम् ४८६० षष्ट्याभागेहृतेलब्धं ८१ अवशेषं० एताघटिकालब्धमिदं ८१ भागेलब्धे ८६४ संयोज्यंजातं ८४५ अस्यत्रिंशताभागेहृतेलब्धं ३१ अवशेषं १५ एतेदिवसाः अथलब्धमिदं ३१ राशिष्वेतेषु १८ संयोज्यंजातं १३८ अस्यद्वादशभिर्भागेहृते

सत्योक्तेग्रहमिष्टंलिप्तीकृत्वाशतद्वयेनाप्तं मंडलभागविशुद्धेब्दाःस्युः शेषात्तुमासाद्याः १०

लब्धम् ११ शेषं ७ एतेमासाः लब्धस्यास्य ११ द्वादशभिर्भागंनप्रयच्छतीत्यतएतदेवात्रशेषं ११ एतानिग्रहायुर्दायवर्षाणिएवंवर्ष ११ मास ७ दिन १५ घटी० एतत्पूर्वकृतायुर्दायेसंविहितमितिएवंयवनेश्वरसत्याचार्यबादरायणवराहमिहिरेणायुर्दायःप्रदर्शितइति १० एवमागतस्यायुर्दायस्यसत्याचार्यमतेनैवकर्मविशेषार्थंवंशस्थेनाह स्वतुंगवक्रेति स्वतुंगस्थैः स्वोच्चगतैर्ग्रहैः वक्रोपगतैः विपरीतगत्याश्रितैश्चयत्स्वदत्तमायुः तत्त्रिंशत्संगुणंकार्यम् उत्तमांशोपगतैः वर्गोत्तमांशस्थितैः स्वांशकस्थितैः स्वनवमभागगतैः स्वभस्थैः स्वराश्युपगतैः स्वत्रिभागगैः स्वद्रेष्काणस्थैः एतैः यद्दत्तमायुः तद्द्विसंगुणंकार्यम् इयान्विशेषइति भदत्तशब्देन सत्याचार्योभिधीयते यस्मात्तन्मतमिहप्रमाणीक्रियते पूर्वोक्तवि

धिना मययवनमणित्थशक्तिपूर्वैरित्यादिमतेनायुर्दायः कृतः तस्मात्सत्यभाषिते सत्याचार्यकृते इयानेतावान्विशेषः यदुतत्स्वतुंगवक्रोपगतैस्त्रिसंगुणमिति तत्सत्योक्तमेव समानमन्यदिति अन्यद्यच्छेषं तत्प्रथमेप्युदीरितं प्रथमे मययवनादिमते यदुदीरितमुक्तम् तत्समानमन्यत्रापि तत्तुल्यं एतदुक्तं भवति सत्याचार्यमतेनायुर्दायं कृत्वा वक्रवर्ज्यं शत्रुक्षेत्रगतस्य त्र्यंशं पातनीयं शक्रसौरौ वर्ज्यं अस्तगतस्यार्द्धं पातनीयम् सर्वार्धत्रिचरणेत्यादि चक्रपातोपहानिः कार्या ॥ एवं सत्याचार्यमतेन ग्रहायुर्दायमुक्त्वाधुना लग्नायुर्दायकरणं क्रूरोदये पापहानिः प्राप्ता तदपवादार्थमिंद्रवज्रयाह किमिति अत्रास्मिन्सत्यमतायुर्दाये होरालग्नं भांशंप्रतिमं ददाति मेषादेरारभ्य यावत्संख्यास्य राशेः संबंधी नवांशको लग्नेन भुक्तस्तावंति संख्यानि वर्षाणि लग्नायुर्दायो ददाति शेषभागाधिकात्त्रैराशिकेन मासाद्यानयनमपि कर्तव्यम् एतदुक्तं भवति सत्योक्ते ग्रहमिष्टं लिप्ती

स्वतुंगवक्रोपगतैस्त्रिसंगुणं द्विरुत्तमस्वांशकभत्रिभागगैः इयान्विशेषस्तु भदत्तभाषिते समानमन्यत्प्रथमेप्युदीरितं ॥

कृत्स्नेति न्यायेन लग्नायुर्दायः कर्तव्यः एवं कृत्वा यदि वीर्यान्विता होरा भवति तदा राशिसमानानि राशितुल्यानि वर्षाणि प्रयच्छतीति होरास्वामिगुरुत्वीक्षितयुता नान्यैरिति न्यायेन यदि वीर्यान्विता बलवती होरालग्नं भवति तदा राशिसमं ददाति तत्तुल्यानि वर्षाणि प्रयच्छति भागादिकात्त्रैराशिकेन मासाद्यानयितव्यं कथमुच्यते भागाश्च लिप्ताः पिंडीकृत्य द्वादशभिः संगुण्याष्टादशभिः शतैः भागमपहृत्यावाप्तमासाः अवशेषं त्रिंशता संगुण्य तेनैव छेदेन भागमपहृत्यावाप्तं दिवसाः तदवशेषं षष्ट्या संगुण्य तथैव घटिकाः पुनरपि शेषं षष्ट्या संगुण्य तथैव चषकाः लब्धमासादि तत्रैव योजयेदेवं लग्नायुर्दायो भवति वीर्यान्वितस्य लग्नस्य यत्कर्म तद्वीर्यवर्जितस्य च न कर्तव्यम् अत्र च बादरायणः होरादेयो-

प्येवंबलयुक्तान्यानिराशितुल्यानिवर्षाणिसंप्रयच्छत्यनुपातात्त्वांशकादिफलं एतच्चाचार्यवराहमिहिरेणास्वल्पजातकेविनष्टेचाभिहितम् क्रूरोदय इति मययवनादिमतायुर्दाये क्रूरोदये क्रूरलग्नगते सार्द्धोदितोपिनवांशहृतास्तुमस्तादितिन्यायेनयदायुषोपचयः क्रियतेतदत्रास्मिन्सत्यमतायुर्दायेन कर्तव्यम् अन्यत्सर्वंकर्तव्यम् कार्यंचनाब्दैरितिप्रथमोपदिष्टैः पूर्वकथितैरब्दैः नवतिथिविषयेतियेब्दायवनबादरायणाचार्यमतेनपण्डितजीवशर्ममतेनचयहृदायपरमायुषः स्वांशमिति तैरब्दैस्त्रैराशिकमुक्तंतदिहनसंभवति यथादित्यस्य द्वादशकानामंशकानामेकोनविंशत्यब्दा भवन्ति न दैकस्मिन्नंशकेकिमितिसत्यायुर्दायेनकर्तव्यम् १२ अथमयादिमतमुपन्यस्यजीवशर्ममतंचोपन्यस्यसत्यमतस्यैवांगीकरणमिंद्रवज्रयाह सत्योपदेशइति अत्रास्मिन्मतत्रयेसत्योपदेशोवरःश्रेष्ठइत्यर्थः किंतुतदप्यन्येबहुवर्गिणाभिः बद्धाभिः गुणनाभिरयोग्यंकुर्वन्तिविनाशयन्तिकास्ताः

किंत्वत्रभांशप्रतिमंददातिवीर्यान्विताराशिसमंचहोरा क्रूरोदयेचोपचयःसनात्रकार्यंचनाब्दैःप्रथमोपदिष्टैः १२

गुणनाः स्वतुंगवक्रोपगतैस्त्रिसंगुणमित्यादिकाः तत्रयदिस्वगृहेग्रहोभवतितदाद्विगुणमायुःकुर्वीतसएवस्वगृहांशकेयदिभवतितदाभूयोपिद्विगुणंकुर्वीतसएवस्वद्रेष्काणेयदाभवतितदाभूयोपिद्विगुणंवर्गोत्तमांशेसएववक्रीयदिभवतितदाभूयस्त्रिगुणंकुर्वीतसएवस्वोच्चस्थोभवतितदाभूयोपित्रिगुणंकुर्वीत एवमनवस्था अनेनानवस्थाप्रसंगेनसत्योक्तमप्यायुर्दायमयुक्तंबहुवर्गणाभिः कुर्वन्ति तथाचमयः वर्गोत्तमस्वराशौद्रेष्काणस्वनवांशके-द्विगुणंवक्रोच्चगतेत्रिगुणंद्विगुणंकार्यंयथासंख्य तथाचसारावल्याम् बहुताडनसंप्राप्तायाकरोत्येववर्गिणाम् वराहमिहिराचार्यःसानदृष्टाचिरंतनैरिति एतदयुक्तम् तदत्रकिंकार्यमित्याह आचार्यकत्वंतुबहुघ्नतायामिति एतदाचार्यकत्वमआगमः बहुघ्नतायांप्राप्तायामेकंतुयद्भूरिबहुतरगु-

णं न तदेव कार्यमिति बहुषु गुणना प्राप्तास्वेकैव क्रियते इति बहुवारं यत्र द्विगुणं प्राप्तं तत्र सकृदेव द्विगुणमायुः कर्तव्यम् यत्र द्विगुणत्वं त्रिगुणत्वं च प्राप्तं तत्र सकृदेव त्रिगुणं कर्तव्यम् यत्र वारद्वयं त्रिगुणत्वं प्राप्तं तत्र सकृदेव त्रिगुणे कर्तव्यं एकं तु यद्भूरि तदेव कार्यमिति वचनात् स्वल्पजातकेप्युक्तमाचार्येण वर्गोत्तमे स्वराशौ स्वद्रेष्काणे स्वनवांशके स्वके सकृद्द्विगुणं वक्रोच्चयोस्त्रिगुणितं द्वित्रिगुणत्वे सकृत्त्रिगुणमिति चक्रपातं वर्जयित्वा बहुवर्गे यान्यायेनैतद्देवकर्म शत्रुक्षेत्रस्थो नीचस्थश्च यदा ग्रहो भवति अस्तंगतो वा तदा सकृदेवार्धापहानिः कार्या नीचे तार्द्धं ह्रसतीत्यत्रापि अनुवर्तनीयं उक्तं च स्वल्पजातके शत्रुक्षेत्रे त्र्यंशं नीचेऽर्द्धं सूर्यलिप्तकिरणाश्च क्षपयंतीत्यादायान्नास्तं यातौ रविजशुक्राविति एवं कृतस्य सत्याचार्यमतस्य स्पष्टता भवतीत्याचार्यस्य मतं

सत्योपदेशो वरमत्र किंतु कुर्वंत्ययोग्यं बहुवर्गिणाभिः
आचार्यकत्वं च बहुघ्नतायामेकं तु यद्भूरि तदेव कार्यम् १३

यत्रापहानिः प्राप्ता गुणना च प्राप्ता तत्र सकृदेवापहानिं कृत्वा सकृदपि गुणना कार्या किंत्वपहानौ कर्तव्यायां चक्रपातापहानिं कृत्वा ततः शत्रुक्षेत्रस्थस्यापहानिः सकृदेव कर्तव्या ततः सकृदेव गुणना कार्या अत्र च भगवान् गार्गिः राशितुल्यांशसंख्यानि ग्रहोद्दानि प्रयच्छति लग्नश्च सबलोन्यानि भुक्तराशिसमानि तु मासाद्यानयनं कार्यमनुपातादतः परं सर्वार्धत्रिचतुर्थांशान्वामं पञ्च चतुः समिन् हरंति पापाः स्वादायात्तदर्धमितरे ग्रहाः व्ययाच्चक्रापहानिस्तु क्रियते यत्तथा ध्रुवम् एकत्वे कक्षगेष्वेकं करोति बलवान् ग्रहः शत्रुक्षेत्रगतस्त्र्यंशं नीचेऽर्द्धं सूर्यगस्तथा हंति स्वाद्दायाद्विना वक्रसितादित्यनंदनौ न चावनिसुतस्त्र्यंशं शत्रुक्षेत्रगतस्तथा ध्रुवापहानिः कर्तव्या ततोन्यासु बहुष्वपि प्राप्तास्वेकैव कर्तव्या यास्यास्तासु महत्तरा ततोपि गुणना कार्या प्येकैव महत्तीस-

कृत्द्वाभ्यांवर्गोत्तमेस्वांशेस्वद्रेष्काणेस्वकेगृहे त्रिभिश्चक्रगतस्यायस्त्वोच्चराशिगतस्यच ग्रहदायोभवत्येवंशोध्यक्षेपकृतस्त्रयः अत्रयद्यप्याचार्येणांशायुःप्रमाणीकृतं तथापिलग्नोर्यदिसम्यग्बलीभवतितदांशायुः कर्तव्यंअथार्कोबलवांस्तदापिंडायुःतथाचभणित्थः विलग्नोतिबलोपेतेशकमद्दृष्टेशसम्भवःस्वौ पिंडोद्भवंकुर्यादितिभ्रूमाभिरेतनाः तथाचसारावल्याम् अंशोद्भवंविलग्नात्पिंड्यंभानोर्निसर्गजंचंद्रादिति अन्येप्येवमाहुः यथांशायुःपिंडायुषी द्वे अपिकार्येद्वाभ्यामपिदशातद्दशाविभागपरिकल्पनाकार्यातत्रयदल्पतस्ययानिमातद्दशासैवयद्यधिकस्यतत्कालंवर्त्तते तदाधिकमायुर्जीवति शत्रुदशाचेत्तदात्तत्रैवमरणमित्रदशाचेत्तदापिजीवति मध्यमदशाचेत्तदापीडाभवतितत्रापिजीवति अस्माकंसत्याचार्यमभिमतमिति १३ अथयास्मिन्योगेजातस्यायुःप्रमाणंनज्ञायतेतद्यो-

गुरुशशिसहितेकुलीरलग्नेशशितनयेभृगुजेचकेंद्रयाते भवरिपुसहजोपगैश्चशेषैरमित
मिहायुरनुक्रमाद्विनास्यात् १४ इतिश्रीभ० विरचि० बृहज्जातके वि० आयु० स० ७

गज्ञानंपुष्पिताग्रयाह गुरुरितिकुलीरलग्नेकर्कटोदयेगुरुशशिसहितेजीवचंद्रयुक्ते तथाशशितनयेबुधेभृगुजेचशुक्रेकेंद्रयातेकंटकगतेशेषैःपरिशिष्टैः रविभौमसौरैःभवरिपुसहजोपगतैःभवस्थानमेकादशंरिपुस्थानंषष्ठंसहजस्थानंतृतीयंएतेषुभवरिपुसहजेषुउपगतैःस्थितैः इहास्मिन्योगेजातस्यानुक्रमाद्विनागणितकर्मांतरेणापिविनामितंअपरिमितायुःस्याद्भवेत् एतदुक्तंभवतियदाकर्कटलग्नंभवतितत्रैवचंद्रजीवौव्यवस्थितौभवतःबुधशुक्रौसहितौपृथक्स्थौवालग्नचतुर्थसप्तमदशमस्थानानामन्यतमेयथासंभवंभवतःपरिशेषाःआदित्यांगारकशनैश्चराःपृथक्सहितावायथासंभवमेकादशषष्ठतृतीयगाः भवंतितदाईदृक्योगेयोजातःतस्यामितप्रमाणमायुर्भवति अनुक्रमाद्गणितानीतंविनैवअयमर्थःएवंविधेयोगेदृष्टेआयुर्दायगणनानकर्तव्या यस्मात्तस्यासंभवइ

त्ति अतोन्यथाजातस्ययथागतेनायुषावश्यमेवभावितव्यंनायुःपिंडस्यार्वाक्कृतस्यमृत्युर्भवतिनचायुःपिंडमतिक्रम्यतेनजीवितव्यमितियस्मिन्योगेजात
स्यानाचारस्यैवायुषोध्वंसोभवतिइति तथाचस्मृत्युक्तंपारदारस्यायुष्यंइत्येवमादिकैर्दोषैर्नजीवतिएतद्योगेजातस्यायुर्वेदोक्तैर्विधिसेवितैरसायनैःप्रयोगैर्यथा
भिहितैर्दीर्घमायुरवाप्नोतीति १४ इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौआयुर्दायाध्यायःसप्तमः ७ अथातोदशांतर्दशाध्यायोव्याख्यायते परि
ज्ञातसमस्तायुषःपुरुषस्याजीवितावध्यंतरेस्थितयोःसुखदुःखयोःपरिच्छेदःक्रियतेतत्रचशोध्यक्षेपविशुद्धमापूर्यावस्थमाणंयेनग्रहेणदत्तंतावत्प्रमाणेवतस्य
संबंधिनिदशाभवति तत्रदशाक्रमोनज्ञायतेतज्ज्ञानमालिन्याह उदयोलग्नतनुःरविरादित्यआत्माशशांकश्चंद्रोमनः एषामुदयरविशशांकानांमध्याद्यःप्रा
णीबलवान्तद्बलवशात्तस्यसंबंधिनीप्रथमादशाभवतिप्राधान्याहूहवता तथाचयवनेश्वरः निशाकरादित्यविलग्नमध्येतत्कालयोगादधिकंबलंयः
बिभर्तितस्यादिदशेष्यतेसाशेषास्ततःशेषबलक्रमेणेति उदयश्चरविश्चशशांकश्चोदयरविशशांकाः उदयरविशशांकानांप्राणीउदयरविशशांकप्राणीउ
दयरविशशांकप्राणीचकेंद्रादिसंस्थाश्चोदयरविशशांकप्राणिकेंद्रादिसंस्थाः एवमेषांमध्याद्येनप्रथमादशादत्तातस्यैवकेंद्रादिसंस्थाः केंद्रपणफरापो
क्लीमेषुस्थिताग्रहाःवीर्यापचयक्रमेणदशादद्युः एवंलग्नार्कशशांकानांमध्यादेकस्यबलवतोदशाआदौपरिकल्प्यानंतरंतस्यकेंद्रस्थास्तेषांदशाःपरिक·
ल्प्याःतैःकेंद्रस्थैःप्रथमेवयसिफलंदत्तंभवतियदुक्तंप्रथमवयसिमध्येत्येचदद्युःफलानीतितथाचयवनेश्वरःपूर्वेतुकेंद्रोपगताःफलंतिमध्येवयःपणफरानिविष्टाः
आपोक्लीमस्थाःफलदावयोंत्येयथाबलंस्वंसमुपैतिपूर्वंअथयदिकेंद्रस्थाग्रहाःनभवंतितदाकःप्रथमेवयसिफलंप्रयच्छतीत्याहुःनहिनफलविपा-
कइत्यादिकेंद्रस्थाद्यभावेकेंद्रस्थानांग्रहाणामभावेअसंभवसतिप्रथमेवयसियःफलविपाकःसनाहिनयतोद्वौनृभौमकृत्यर्थंगमयतःपणफर
स्थानामप्यभावेमध्येवयसिफलविपाकोनहिनएतदुक्तंभवतियदाकेंद्रस्थाग्रहानभवंतितदापणफरस्थाःपूर्वफलंप्रयच्छंतितत्रआपोक्ली

मस्थाः अथकेंद्रस्थाः पणफरस्थाश्चनभवंति तदासर्वस्मिन्नेववयसिआपोक्लीमस्थाः फलंप्रयच्छंति यतउक्तंभवतिहिफलपक्तिः पूर्वमापोक्लीमे पिइति एवमापोक्लीमस्थानामभावेप्रथमंकेंद्रस्थाः फलंप्रयच्छंति ततः पणफरस्थाः आपोक्लीमस्थानभवंतिनचपणफरस्थास्तदासर्वस्मिन्नेववयसि केंद्रस्थाः फलंप्रयच्छंति एतदुक्तंभवति लग्नार्कशशांकानांयोबलवांस्तद्दशाभवेत्प्रथमाप्रथमांदशांकल्पयित्वाततस्तत्केंद्रगानांसर्वेषांकल्पनीयातेषांपरि कल्प्यपणफरस्थानांपरिकल्पनीयास्ततः परमापोक्लीमस्थानांकेंद्रस्थानामभावेप्रथमंदशापतेरनंतरंपणफरस्थानांकल्पनीयास्ततः आपोक्लीमस्थानां केंद्रस्थानामभावेपणफरस्थानामप्यभावेआपोक्लीमस्थानामेवकल्पनीयाः अथकेंद्रस्थाभवंतिपणफरस्थानभवंति आपोक्लीमस्थाएवभवंतितदाकें

उदयरविशशांकप्राणिकेंद्रादिसंस्थाः प्रथममवयसिमध्येंत्येचदद्युःफलानि
नहिनफलविपाकःकेंद्रसंस्थाद्यभावेभवतिहिफलपक्तिःपूर्वमापोक्लिमेपि १

द्रस्थानांकल्पयित्वाआपोक्लीमस्थानामेवकल्पनीयाः अथकेंद्रस्थाएवकेवलंभवंतितदातेषामेवकल्पनीयाः अथपणफरस्थाभवंतितदापणफरस्थाना मेवकल्पनीयाः अथापोक्लीमस्थाभवंतितदातेषामेवकल्पनीयाः तथाचस्वल्पजातकेउक्तंलग्नार्कशशांकानांयोबलवांस्तद्दशाभवेत्प्रथमातत्केंद्रपणफ रापोक्लीमोपगानांबलाच्छेषाः १ अथदशाकालप्रमाणंकेंद्रस्थानानामपिदशाक्रमज्ञानमिंद्रवज्रयाह आयुःकृतमितिशोध्यक्षेपविशुद्धमायुर्यच्चव र्षप्रमाणंयेनग्रहेणदत्तंतस्यग्रहस्यसंबंधिनीदशाकल्प्यापरिकल्पनीया तत्रलग्नार्कशशांकानांयोबलवांस्तद्दशाभवेत्प्रथमेतिन्यायेनतद्दशाप्रथमंकल्प यित्वाततस्तत्केंद्रगानांमध्यात्सैवदशाप्रबलस्यातिबलस्यपूर्वंप्रथमंकल्प्या अनंतरंतस्मादूनबलस्यएवक्रमेणयथायथाऊनबलाभवंतितथातथापश्चात्तद्दा

यद्दशाः कल्पनीयाः एवं केंद्रस्थानां दशाः परिकल्प्यास्ततः पणफरस्थानां अनेनैव क्रमेण परिकल्प्याः ततः आपोक्लीमस्थानां अनेनैव क्रमेणेति साम्ये बहूनामिनि केंद्रस्थानां बहूनां ग्रहाणां बलसाम्ये सति बहुवर्षदस्य बहूनि वर्षाणि येन दत्तानि तस्य प्रथमं दशा परिकल्प्या नन्वत्र कथं ग्रहाणां बलसाम्यं भवति यदि द्वावपि स्वक्षत्रिकोणोच्चगतौ भवतस्तदा नैसर्गिकेन बलेन योधिकः स एव बली स्यात् किंतु स्थानदिक्चेष्टाकालबलग्रहदर्शनादि बलानि यावद्गणितविधेनैकी क्रियंते तावद्बलसाम्यं भवति ग्रहाणां यथा सामान्येनोदाहरणं यदि शनैश्चरो बलत्रयेण संयुक्तो भवति भौमो बलद्वयेन तदा तत्र भौमस्य नैसर्गबलवत्वाद्बलसाम्यं भवत्येवं सर्वेषामपि ज्ञेयं तेषां च साम्ये प्रथमोदितस्येति तेषां वर्षाणां साम्ये वर्षदानतुल्येपि प्रथमोदितद्दशा परिकल्प्या प्रथममादावर्कमंडलादुदितउद्गतस्तस्य यदा बलसाम्यं न भवति तदा बहुवर्षदेपि ग्रहे स्थिते तदा प्रथमोदितेपि स्थिते बलाधिकस्यैव पूर्वं दशा परिकल्प्या तेषां च बल

आयुः कृतं येन हि यत्तदेव कल्प्या दशा सा प्रबलस्य पूर्वं साम्ये बहूनां बहुवर्षदस्य तेषां च साम्ये प्रथमोदितस्य २

साम्ये प्रथमोदितस्येत्यत्र हि द्विविध उदयः प्रत्यहं चक्रभ्रमवशादेकः आदित्यविप्रकर्षेणापरः तत्रेहादित्यविप्रकर्षेणोदयो गणितस्कंधोक्तकालांशकवशाज्ज्ञेयः अत्र च भगवान्गार्गिः बलीलग्नेंदुसूर्याणां दशामाद्यां प्रयच्छति तस्मात्ततः प्रयच्छंति केंद्रादिस्थाः क्रमेण तु तत्रापि बलिनः पूर्वं तत्साम्ये बहुदायकाः तत्साम्येपि प्रयच्छंति ये पूर्वं रविविच्युताः २ एवं दशाव्यवस्थायां जातायामंतर्दशापाकग्रहज्ञानं वसंततिलकेनाह एकर्क्षगोर्द्धमिति दशापतिं ना सहैकर्क्षगो ग्रहः एकस्मिन्राशौ व्यवस्थितः दशापतिः दत्तान्दशाकालस्यार्द्धं तदपहृत्य स्वैरात्मीयैर्दशागुणैः परिपाचयति त्र्यंशमिति त्र्यंशं त्रिकोणग्रहगः दशापतेस्त्रिकोणग्रहगो नवपंचमस्थानयोरन्यतमस्थितो दशापतिर्दत्तां तद्दशाकाला त्र्यंशं तृतीयभागमपहृत्य स्वैरात्मीयैः दशागुणैः परिपाच

यति स्मरगः स्मरांशमिति दशापतेः स्मरगः सप्तमस्थानस्थः दशापतिः दत्तांतर्दशाकालात्स्वरांशं सप्तमभागमपहृत्य स्वैर्दशागुणैः परिपाचयति पादफलस्यचतुरस्रगतः दशापतेः चतुरस्रगोऽष्टमचतुर्थस्थानस्थोदशापतिः दत्तान्तर्दशाकालात्पादंचतुर्थभागमपहृत्यस्वैर्दशागुणैः परिपाचयति सहोराः होरालग्नंतथासंहिताः परस्परमन्योन्यमनेनप्रकारेणव्यवस्थिताः स्वैः स्वैर्दशागुणैः परिपाचयंति एतदुक्तंभवति यथादशापतेः सकाशादेकर्क्षादिस्थो ग्रहोयथास्वेपठितमंशंपरिपाचयति तथालग्नमपिपाचयति अत्रदशापतेः प्रथममंशपरिकल्पनांकृत्वापश्चादेकर्क्षादिस्थितानांकर्तव्याः यस्माद्दशापतेर्योभागआगच्छतितदनुसारेणान्ययोर्भागाः परिशेषाणांभवंति अर्थेकस्मिन्स्थानेयदाबहवोग्रहाभवंति तदातेषांमध्येयोबलवान्सएवैकः परिपाचयतिनान्ये कथमेतदवगम्यते उच्यते एकवचननिर्देशात् एकर्क्षगोर्धमपहृत्यददातितुस्वमित्याद्येकवचनात् नकेवलंमिहिराचार्येणैकवचननिर्देशः

एकर्क्षगोर्द्धमपहृत्यददातितुस्वंत्र्यंशंत्रिकोणगृहगः स्मरगः स्वरांश

कृतोयावत्स्वल्पजातकेपितथाचोक्तम् एकर्क्षगोर्द्धंत्र्यंशंत्रिकोणयोः सप्तमेतुसप्तांशंचतुरस्रयोस्तुपादंपाचयतिगतोग्रहःस्वगुणैरितिगर्गादीनामप्येकवचननिर्देशोस्ति तथाचभगवान्गार्गिः एकर्क्षसंस्थितस्यार्द्धंत्रिभागंतुत्रिकोणगः सप्तमस्थःस्वरांशंतुपादंतुचतुरस्रगः लग्नेनसहिताःसर्वेत्वन्योन्यफलदायकाः यवनेश्वरस्याप्येवम् कालार्द्धभागैकगृहाश्रितस्यतदर्धभागंलभतेचतुर्थे त्रिभागभागीत्त्रिकोणसंस्थस्तदर्थभागस्यात्त्वपृथक्त्रिकोणेस्यात्सप्तमेसप्तमभागभागीस्थितोग्रहस्भावशाद्ग्रहस्य एवंसर्वत्रैकवचननिर्देशः तस्माद्विज्ञायते यतएकएवांशहारोभवतिनसर्वेइति तथाचसत्यः अर्धं तृतीयमर्द्धात्तुयान्द्वस्वोच्चसप्तमंभागम् एकर्क्षनवपंचमचतुर्थनिधनाद्यसप्तमानांद्युग्रहाग्रहाणांस्वदशास्वंतर्दशाख्यानांफलकालानिश्चाविवि

धंक्रमेणभेद्याश्चतेप्येवम् एकर्क्षगेषुबलवान्भागहारो मित्रतोरिपोर्वापि मित्रंचपुष्टफलंतस्मिन्कालेरिपुर्नैवंतथाचयम्: एकर्क्षोपगतानांयो भवति बलाधिकोविशेषेण एकः सएव हर्तानान्येतत्रास्थिताविहगाइतिलग्नेपियत्रांशापहारित्वं भाग्नस्तत्रचलग्नेयदाग्रहः स्थितोभवति तदालग्नग्रहयोर्योबलवान्सएवैकः पठितमंशमपहरति नेतर इति अन्येसर्वेषामेकादिराशिगानामंतर्दशाभागमिच्छंति अन्येपुनः एकमेवभागंगृहीत्वाभागस्यैकर्क्षगानां भागीकृत्यतद्भागमिच्छंति ३ अथदशापरिकल्पनाज्ञानामिद्रवज्रयाह स्थानानीति अर्धादिकाभागाः स्थानशब्देनोच्यन्ते तेषामर्धादिकानांभागानांसवर्णनाकार्या सवर्णनासदृशाच्छेदनाछेदनासादृश्यमुत्पाद्यततस्तानिसर्वाणिस्थानानि अधःछेदैः विवर्जितानिकार्याणिछेदानपास्यइत्यर्थः उपरिस्थिता-

पादंफलस्यचतुरस्रगतःसुहोरास्त्वेवंपरस्परगताःपरिपाचयंति ३ स्थानान्यथैतानिसवर्णयि
त्वासर्वाण्यधश्छेदविवर्जितानि दशाब्दपिंडेगुणकायथाशछेदस्तदैक्येनदशाप्रभेदः ४

राशयोयथासंभवंमत्यंशंगुणकाराभवंति छेदस्तदैक्येन तेषांराशीनामैक्येनसंयोगेनछेदोभागहारोभवति कस्मिन्गुणकाराभागहाराइत्याह दशाब्दपिंडेदशावर्षसमूहेतेनैतदुक्तंभवतिदशाब्दान्पृथक्पृथक्गुणकारैः संगुण्यछेदेनविभज्यावाप्तंवर्षाद्यंतर्दशाभवतितद्यथोदाहरणमृदशापतिनैव केवलंकश्चिद्ग्रहः स्थितःअन्यस्थानेपुनकश्चित्स्थितस्तदासएवापहारीतत्रदशापतेःरूपस्यैवस्यैवाधोरूपमेकंन्यसेत् एवमर्द्धहारस्यरूपस्याधोरूपद्वयन्यासः $\begin{matrix}१ & १\\ १ & २\end{matrix}$ अत्रपरस्परछेदगुणावेतौराशीकर्तव्यौकृतौजातौ $\begin{matrix}२ & १\\ २ & २\end{matrix}$ एतौसमच्छेदीभूतौछेदहीनौ १।२ एतौगुणकारौअनयोर्योगः ३ एषभागहारः अत्रदशापतिदत्तायुर्दायः ३।०।०।० एतद्द्वाभ्यांसंगुण्यत्रिभिर्विभज्यावाप्तंफलम् २ इयंमूलदशापतेरंतर्दशा अथपुनरेवमूलदशापतिवर्षाणि

३ व० मा० दि० घ० एकेनसंगुण्यत्रिभिर्विभज्यावाप्तंफलंवर्षादि १ व० मा० दि० घ० इयंदशापतिनासहैकराशिव्यवस्थितस्यांतर्दशा एवंमूलदशापतिदत्तांतर्दशाकालएकराशिगेनग्रहेणार्द्धपाचितोभवति अस्यांतर्दशाकालद्वयस्ययोगोवर्षादि ३।०।०।० जातासैवमूलदशेति अथदशापतेः नवपंचमस्थानयोरेकस्मिन्स्थानेकश्चिद्ग्रहस्थितोभवति नाद्वितीयेनचदशापतिनासहनचतुरस्रयोः नचसप्तमेतदान्यासः $\frac{१}{१}$ । $\frac{१}{३}$ एतौपरस्परच्छेदहतौ $\frac{३}{३}$ । $\frac{१}{३}$ छेदेनहीनौ ३।१ एतौगुणकारौएकीकृतौ ४ एषभागहारः मूलदशापतेः दायः ४।०।०।० अस्यत्रिगुणस्यचतुर्भिर्भागमपहृत्यावाप्तं ३।०।०।० अयंमूलदशापतेरंतर्दशाकालः अथमूलदशापतिदायस्यास्य ४।०।०।० एकगुणस्यचतुर्भिर्भागमपहृत्यावाप्तं १।०।०।० एषात्रिकोणस्थस्यांतर्दशेति एवंमूलदशापतिदत्तांतर्दशाकालंत्रिकोणस्थेनग्रहेणत्रिभागमपहृत्यपाचितंभवति अस्यांतर्दशाकालद्वयस्ययोगःजातः ४।०।०।० सैवमूलदशेति अथदशापतेश्चतुर्थाष्टमयोरेकस्मिन्स्थानेकश्चिद्ग्रहोभवति नद्वितीयेनचदशापतिनासहनत्रिकोणयोः नसप्तमेतदान्यासः $\frac{१}{१}$ । $\frac{१}{४}$ परस्परच्छेदहतौ $\frac{४}{४}$ । $\frac{१}{४}$ छेदहीनौ ४।१ एतौगुणकारौएकीकृतौ ५ एषभागहारः मूलदशापतेःदायः ५।०।०।० अस्यचतुर्गुणस्य २०।०।०।० पंचभिर्भागमपहृत्यावाप्तं ४।०।०।० अयंमूलदशापतेरंतर्दशाकालः अथमूलदशापतिदायस्यास्य ५।०।०।० एकगुणस्यपंचभिर्भागमपहृत्यावाप्तं १।०।०।० एषाचतुरस्रस्थस्यांतर्दशेति एषाचतुरस्रस्थस्यांतर्दशेति एवंमूलदशापतिदत्तांतर्दशाकालाच्चतुरस्रस्थेनपादमपहृतंभवति अस्यांतर्दशाकालद्वयस्ययोगः ५।०।०।० जातासैवमूलदशेति अथदशापतेः सप्तमस्थानेकश्चिद्ग्रहोभवति नदशापतिनासहनत्रिकोणेनचतुरस्रयोस्तदान्यासः $\frac{१}{१}$ । $\frac{१}{७}$ परस्परच्छेदहतौचेतौ $\frac{७}{७}$ । $\frac{१}{७}$ छेदहीनौ ७।१ एतौगुणकारौएकीकृतौ ८ एषभागहारः दशापतेः दायः ८।०।०।० अस्यसप्तगुणस्या ५६ ष्टभिः भागमपहृत्यावाप्तवर्षादिः ७।०।०।० इयंमूलदशापतेरतर्दशा पुनरपिमूलदशापतेः दायः ८।०।०।० अस्यैकगुणस्याष्टभिः भागमपहृत्यावाप्तम् १।०।०।० इयंमूलदशापतेः सप्तमस्थानस्थस्यांतर्द-

भाएवंमूलदशापत्यंतर्दशाकालात्सप्तमोभागः सप्तमस्थेनग्रहेणपाचितोभवति अस्यांतर्दशाकालद्वयस्ययोगः ८।०।०।० जातासैवमूलदशेति एकमेकस्मि
न्दशाधिकस्याः अत्रादौमूलदशापतेरंतर्दशाभवतितदनंतरमंशहृतस्य अथदशापतिनासहैकस्मिन्राशौकश्चिद्ग्रहोभवत्यपरश्चनवमपंचमयोर्मध्यादेकस्मिन्
भवति नद्वितीयेनान्येषुस्थानेषुनचतुरस्रयोः नसप्तमेतदान्यासः १/१।१/२।१/३ एतेराशयः परस्परच्छेदहताजाताः ६/६।३/६।२/६ छेदहीनाः ६।३।२ एतेगुणकाराः एकी
कृताः ११ एषभागहारः अथदशापतिदायः ११।०।०।० अस्यषड्गुणस्यैकादशभिः भागमपहृत्यावाप्तं ६।०।०।० एवंमूलदशापतेरंतर्दशापुनरपिमूलदशापतिदा
यस्यास्य ११।०।०।० त्रिगुणस्यैकादशभिः भागमपहृत्यावाप्तं ३।०।०।० इयमर्धपाचकस्यांतर्दशापुनरपिमूलदशापतिदायस्यास्य ११।०।०।० द्विगुणस्यैकादश
भिः भागमपहृत्यावाप्तं २।०।०।० इयंत्रिकोणावस्थितस्यांतर्दशा अत्रदशापतेः यद्गृहंतदेकगृहावस्थितः पाचयतित्रिभागंचत्रिकोणगः अंतर्दशात्रय-
स्यास्य योगः ११।०।०।० जातासैवमूलदशेति अथदशापतिनासहैकस्मिन्राशौ कश्चिद्ग्रहोभवत्यपरश्चतुरस्रयोः मध्यादेकस्मिन्नद्वितीयेनचान्येषुस्था
नेषुनत्रिकोणयोः नसप्तमेतदान्यासः १/१।१/२।१/४ एतेपरस्परच्छेदहताजाताः ८/८।४/८।२/८ छेदहीनाः ८।४।२ एतेगुणकाराः एकीकृताः १४ एषभागहारः अ
थदशापतिदायस्यास्य १४।०।०।० अष्टगुणस्यचतुर्दशभिः भागमपहृत्यावाप्तं ८।०।०।० इयंमूलदशापतेरंतर्दशापुनरपिमूलदशापतिदायस्यास्य
१४।०।०।० चतुर्गुणस्यचतुर्दशभिः भागमपहृत्यावाप्तं ४।०।०।० इयमर्द्धपाचकस्यांतर्दशापुनरपिमूलदशापतिदायस्यास्य १४।०।०।० द्विगुणस्यचतु
र्दशभिः भागमपहृत्यावाप्तं २।०।०।० इयंचतुर्थभागपाचकस्यांतर्दशा अत्रदशापतेः यद्गृहंतदेकगृहावस्थितः पाचयतिचतुर्भागंचतुरस्रगतः अंतर्दशात्रयस्यास्य
योगः १४।०।०।० जातासैवमूलदशेति अथयत्रदशापतिनासहैकस्मिन्राशौकश्चिद्ग्रहोभवत्यपरश्चसप्तमेनान्येषुस्थानेषुतदान्यासः १/१।१/२।१/७ एतेपरस्परच्छेदहता
जाताः १४/१४।७/१४।२/१४ छेदहीनाः १४।७।२ एतेगुणकाराः एकीकृताः २३ एषभागहारः अथदशापतिदायस्यास्य २३।०।०।० चतुर्दशगुणस्यत्रयोविंशत्याभागमपहृत्या-

वार्तं १८।०।०।० इयंमूलदशापतेरंतर्दशापुनरपिमूलदशापतिदायस्यास्य २३।०।०।० सप्तगुणस्यत्रयोविंशत्याभागमपहृत्यावाप्तं ७।०।०।० इयंपाचकस्थेनसहावस्थस्यांतर्दशापुनरपिमूलदशापतिदायस्यास्य २३।०।०।० द्विगुणस्यत्रयोविंशत्याभागमपहृत्यावाप्तं २।०।०।० इयंसप्तमभागपाचकस्यांतर्दशाअस्यांतर्दशात्रयस्ययोगःजातः२३।०।०।० सैवमूलदशेति अथदशापतेस्त्रिकोणयोः अपिग्रहोव्यवस्थितः नान्येषुस्थानेषु तदान्यासः $\boxed{\begin{matrix}\text{१।१।१}\\\text{१।३।३}\end{matrix}}$ एतेराशयः परस्परच्छेदहताजाताः $\boxed{\begin{matrix}\text{९।३।३}\\\text{९।९।९}\end{matrix}}$ छेदेहीनाः ९।३।३ एतेगुणकाराः एकीकृताः १५ एषभागहारःदशा पतिदायस्यास्य ५।०।०।० नवगुणस्यपंचदशभिः भागमपहृत्यावाप्तम् ३।०।०।० इयंमूलदशापतेरंतर्दशा पुनरपिमूलदशापति दायस्यास्य ५।०।०।० त्रिगुणस्य १५।०।०।० पंचदशभिः भागमपहृत्यावाप्तं १।०।०।० इयंत्रिकोणस्यस्यांतर्दशाद्वितीयस्यैषैव अस्यांतर्दशात्रयस्ययोगः ५।०।०।० जातासैवमूलदशेति अथदशापतेस्त्रिकोणयोः मध्यादेकस्मिन्कश्चिद्ग्रहोव्यवस्थितः चतुरस्रयोः मध्यादेकस्मिन्नपिनान्येषुस्थानेषु तदान्यासः $\boxed{\begin{matrix}\text{१।१।१}\\\text{१।३।४}\end{matrix}}$ एते परस्परच्छेदहताजाः $\boxed{\begin{matrix}\text{१२।४।३}\\\text{१२।१२।१२}\end{matrix}}$ छेदहीनाः १२।४।३ एतेगुणकाराः एकीकृताः १९ एषभागहारः अथदशापतिदायस्यास्य :- १९।०।०।० द्वादशगुणस्यैकोनविंशत्याभागमपहृत्यावाप्तं १२।०।०।० इयंमूलदशापतेरंतरदशापुनरपिदशापतिदायस्यास्य १९।०।०।० चतुर्गुणस्यैकोनविंशत्याभागमपहृत्यावाप्तं ४।०।०।० इयंत्रिकोणभागपाचकस्यांतरदशा पुनरपिदशापतिदायस्यास्य १९।०।०।० त्रिकोणस्यैकेन विंशत्याभागमपहृत्यावाप्तं ३।०।०।० इयंचतुर्भागपाचकस्यांतर्दशा अस्यांतर्दशात्रयस्ययोगः १९।०।०।० जातासैवमूलदशेति अथयन्दशापतेस्त्रिकोणयोर्मध्यादेकस्मिस्थानेकश्चिद्ग्रहोन्यः सप्तमे तदान्यासः $\boxed{\begin{matrix}\text{१।१।१}\\\text{१।३।७}\end{matrix}}$ एतेराशयः परस्परच्छेदहताजाताः $\boxed{\begin{matrix}\text{२१।७।३}\\\text{२१।२१।२१}\end{matrix}}$ छेदहीनाः २१।७।३ एतेगुणकाराः एकीकृताः ३१ एषभागहारःदशापतिदायस्यास्य ३१।०।०।० एकविंशत्याः- संगुणि-

तस्यैकत्रिंशताभागमपहृत्यावाप्तं २१।०।०।० इयं मूलदशापतेरंतर्दशा पुनरपि दशावर्षाणि ३१।०।०।० सप्तभिः संगुण्यैकत्रिंशताभागमपहृत्यावाप्तं ७।०।०।० अयं त्रिभागपाचकस्यांतर्दशा पुनरपि दशावर्षाणि ३१।०।०।० त्रिभिः संगुण्यैकत्रिंशताभागमपहृत्यावाप्तं ३।०।०।० इयं सप्तमभागपाचकस्यांतर्दशा अस्यांतर्दशात्रयस्य योगः ३१।०।०।० जातास्त्वेव मूलदशेति यत्र दशापतेः चतुरस्रयोः द्वयोरेकत्र द्वौ स्थितौ नान्यत्र तदान्यासः $\boxed{\begin{matrix}१।१।१\\१।५।४\end{matrix}}$ एते राशयः परस्परच्छेदहताजाताः $\boxed{\begin{matrix}१६।५।४\\१६।१६।१६\end{matrix}}$ छेदहीनाः १६।५।४ एते गुणकाराः एकीकृताः २५ एष भागहारः मूलदशापतिवर्षाण्येतानि षोडशभिः संगुण्य ९६।०।०।० चतुर्विंशत्या २४ भागमपहृत्यावाप्तम् ४।०।०।० इयं मूलदशापतेरंतर्दशा पुनरपि दशापतेः दायस्यास्य ६००।०।० चतुर्गुणस्य चतुर्विंशत्या भागमपहृत्यावाप्तम् १।०।०।० इयं चतुर्थभागपाचकस्यांतर्दशा द्वितीयस्याप्येवं अस्यांतर्दशात्रयस्य योगः ६।०।०।० सैव मूलदशेति. अथ यत्र दशापतेश्चतुरस्रयोः मध्यादेकस्मिन्कश्चिद्ग्रहो भवति सप्तमेन्यस्तदान्यासः $\boxed{\begin{matrix}१।१।१\\१।५।७\end{matrix}}$ एते राशयः परस्परच्छेदहताजाताः $\boxed{\begin{matrix}२८।७।४\\२८।२८।२८\end{matrix}}$ छेदहीनाः २८।७।४ एते गुणकाराः एकीकृताः ३९ एष भागहारः अथ मूलदशापतिवर्षाणि एता ३६।०।०।० न्यष्टाविंशत्या संगुण्यैकोनचत्वारिंशताभागमपहृत्यावाप्तम् २५।१०।४।३६ इयं मूलदशापतेरंतर्दशा पुनरपि दशावर्षाणि ३६ सप्तभिः संगुण्यैकोनचत्वारिंशताभागमपहृत्यावाप्तम् ६।५।१५।८ इयं चतुर्भागपाचकस्यांतर्दशा पुनरपि दशावर्षाणि ३६ चतुर्भिः संगुण्यैकोनचत्वारिंशताभागमपहृत्यावाप्तं ३।८।९।२५ इयं सप्तमभागपाचकस्यांतर्दशा अस्यांतर्दशात्रयस्य योगः ३६।०।०।० जातासैव मूलदशेति एवं त्रिविकल्पाः अथ यत्र दशापतिनास्त्येकराशौ कश्चिद्ग्रहोऽवस्थितो द्वयोरपि त्रिकोणयोः तदान्यासः $\boxed{\begin{matrix}१।१।१।१\\१।२।३।३\end{matrix}}$ एते राशयः परस्परच्छेदहताजाताः $\boxed{\begin{matrix}१८।९।६।६\\१८।१८।१८।१८\end{matrix}}$ छेदहीनाः १८।९।६।६ एते गुणकाराः एकीकृताः ३९ एष भागहारः अथ मूलदशापतिवर्षाणि ४३।०।०।० अतः प्राग्वदंतर्दशा

न्यासः $\boxed{\begin{matrix}\text{५}&\text{३}&\text{२}&\text{३}\\\text{०}&\text{०}&\text{०}&\text{०}\\\text{०}&\text{०}&\text{०}&\text{०}\\\text{०}&\text{०}&\text{०}&\text{०}\end{matrix}}$ अस्यांतर्दशाचतुष्टयस्ययोगः १३।०।०।० जातासैवमूलदशेति अथयत्रदशापतिनासहैकराशौकश्चिद्व्यवस्थितः त्रिकोणयोः मध्यादेकस्मिन्कश्चित्व्यवस्थितश्चतुरस्त्रयोर्मध्यादेकस्मिन्नेवनान्यत्रतदान्यासः $\boxed{\begin{matrix}\text{१।१।१।१}\\\text{१।२।३।४}\end{matrix}}$ एतेराशयः परस्परच्छेदहताजाताः $\boxed{\begin{matrix}\text{२४।१२।८।६}\\\text{२४।२४।२४।२४}\end{matrix}}$ छेदहीनाः २४।१२।८।६ एतेगुणकाराः एकीकृताः ५० एषभागहारःमूलदशा३६।०।।० अतः प्राग्वच्चतस्मोतर्दशा अस्या $\boxed{\text{१७।३।१०।४८।८।७।२०।२४।५।८।३।३६।४।३।२५।१२}}$ तद्दशाचतुष्टयस्ययोगः ३६।०।०।० जातासैवमूलदशेति अथदशापतिनासहैकस्मिन्राशौकश्चित्व्यवस्थितस्त्रिकोणयोः मध्यादेकस्मिन्नन्यः सप्तमेव्यवस्थितोनान्यत्र तदान्यासः $\boxed{\begin{matrix}\text{१।१।१।१}\\\text{१।२।३।७}\end{matrix}}$ एतेराशयः परस्परच्छेदहताजाताः $\boxed{\begin{matrix}\text{४२।२१।१४।६}\\\text{४२।४२।४२।४२}\end{matrix}}$ छेदहीनाः ४२।२१।१४।६ एतेगुणकाराःएकीकृताः ८३ एषभागहारमूलः दशावर्षाणि १६।०।०।० अतप्राग्वच्च तस्मोंतर्दशाः आनीताः $\boxed{\begin{array}{c|c|c|c}\text{८}&\text{४}&\text{२}&\text{२}\\\text{०}&\text{०}&\text{०}&\text{०}\\\text{०}&\text{०}&\text{०}&\text{०}\\\text{०}&\text{०}&\text{०}&\text{०}\end{array}}$ अस्यांतर्दशाचतुष्टयस्ययोगः १६।०।०।० जातासैवमूलदशेति अथदशापतिनासहैकस्मिन्राशौकश्चिद्द्वयवस्थितः अन्यौद्वयोश्चतुरस्त्रयोस्तत्रन्यासः $\boxed{\begin{matrix}\text{१।१।१।१}\\\text{१।२।४।४}\end{matrix}}$ एतेपरस्परच्छेदहताः $\boxed{\begin{matrix}\text{३२।१६।८।८}\\\text{३२।३२।३२।३२}\end{matrix}}$ छेदहीनाः ३२।१६।८।८ एतेगुणकाराःएकीकृताः ६४ एषभागहारः मूलदशा ३६।०।०।० अतःप्राग्वच्चतरस्मोंतर्दशाः अस्यां $\boxed{\begin{array}{c|c|c|c}\text{१८}&\text{९}&\text{५}&\text{४}\\\text{०}&\text{०}&\text{०}&\text{०}\\\text{०}&\text{०}&\text{०}&\text{०}\\\text{०}&\text{०}&\text{०}&\text{०}\end{array}}$ स्यांतर्दशाचतुष्टयस्ययोगः ३६।०।०।० जातासैवमूलदशेति अथयत्रदशापतिनासहैकस्मिन्राशौकश्चिद्द्वयवस्थितोन्यश्चतुरस्त्रयोः मः ध्यादेकस्मिन्नन्यः सप्तमे तदान्यासः $\boxed{\begin{matrix}\text{१।१।१।१}\\\text{१।२।४।७}\end{matrix}}$ एतेपरस्परच्छेदहताजाताः $\boxed{\begin{matrix}\text{५६।२८।१४।८}\\\text{५६।५६।५६।५६}\end{matrix}}$ छेदहीनाः ५६।२८।१४।८ एतेगुणकाराःएकीकृताः १०६ एषभागहारःमूलदशा ३६।०।०।० अतःप्राग्वच्चतरस्मोंतर्दशाः $\boxed{\text{१।९।६।४८।९।६।३।२५।४।९।१।५२।२।८।१८।६}}$ अस्यांतर्दशाचतुष्टयस्ययोगः जातासैवमूलदशेति ३६।०।०।० अथयत्रत्रिकोणयोः द्वयोः कश्चि

द्वहः स्थितः चतुरस्त्रयोः मध्यादेकस्मिन्नदान्यास १।१।१।१ एतेपरस्परच्छेदहताः जाताः ३६।१२।१२।९ छेदहीनाः ३६।१२।१२।९ एतेगुण
काराः एकीकृताः ६९ एषभागहारः मूलदशा २३।०।०।० १।३।३।४ अतः प्राग्वच्चतस्रोंतर्दशाः ३६।३६।३६।३६ अस्या १२।०।०।०।४।०।०।०।४
०।०।०।३।०।०।०।० स्यांतर्दशाचतुष्टयस्य योगोजातः २३।०।०।० सैवमूलदशेति अथयत्रदशापतेस्त्रिकोणयोर्मध्यादेकस्मिन्नस्थितः कश्चि
द्ग्रहोश्चतुरस्त्रयोश्चतदान्यासः १।१।१।१ एतेपरस्परच्छेदहताजाताः ४८।१६।१२।१२ छेदहीनाः ४८।१६।१२।१२ एतेगुणकाराः एकीकृताः
८८ एषभागहारः मूलदशा २२ १।३।४।४ ।०।०।० अतः प्राग्वच्चतस्रोंत ४८।४८।४८।४८ र्दशाः १२।०।०।०।४।०।०।०।३।०।०।०।३।०।०।०
अस्यांतर्दशाचतुष्टयस्य योगः जातासैव २२।०।०।० मूलदशेति अथयत्रदशापतेस्त्रिकोणयोर्मध्यादेकस्मिन् कश्चित्स्थितः चतरस्त्रयोरप्येक
स्मिन्सप्तमेच कश्चित्स्थितस्तदान्यासः १।१।१।१ एतेराशयः परस्परच्छेदहताजाताः ८४।२८।२१।१२ छेदहीनाः ८४।२८।२१।१२ एतेगु
णकाराः एकीकृताः १४५ एषभागहारः १।३।४।७ मूलदशा ३६।०।०।० अतः प्राग्वच्चतस्रों ८४।८४।८४।८४ तर्दशाः २०।६।५।२। अस्यां
तर्दशाचतुष्टयस्य योगः ३६।०।०।० जातासैवमूलदशेति अथयत्रदशापतेश्चतुरस्त्रयोः द्वयोरपिग्रहास्थितः सप्तमेच चत १०।११।२।११ दान्या
सः १।१।१।१ एतेपरस्परच्छेदहताजाताः ११२।२८।२८।१६ छेदहीनाः ११२।२८।२८।१६ एतेगुणकाराः एकी ७।१२।१६।२२ कृताः
१८४ १।४।७।४ एषभागहारः मूलदशा ११२।११२।११२।११२ ३६।०।०।० अतः प्राग्वच्चतरस्रोंतर्दशाः अस्यां ५१।३८।५८।३३ तर्द
शा २१।१०।२८।४२। ५।५।२२।११।५।५।२२।१०।३।१।१६।५७ चतुष्टयस्य योगः ३६।०।०।० जातासैवमूलदशे
ति एवंचतुर्विकल्पाः अथपंचविकल्पेषुन्यासादेवग्रहावस्थानबोद्धव्यम् न्यासः १।१।१।१।१ / १।२।३।३।४ छेदेनानेन २४ हताजाताः गुणकाराः

२४।१२।८।८।६ भागहारः ५८ न्यासः १।१।१।१।१।१ छेदेनानेनगुणकाराः ४२।२१।१४।१४।६ भागहारः ९७ न्यासः १।१।१।१।१।१
छेदेनानेन २४ गुणकाराः २४।१२।८।८।६। १।२।३।३।७ ६भागहारः ५६ न्यासः १।१।१।१।१।१ छेदेनानेन ५६ गुणका १।२।३।५।४
राः ५६।२८।१४।१४।८ भागहारः १२० न्यासः १।१।१।१।१।१ छेदेनानेन ८४ १।२।४।४।७ गुणकाराः ८४।४२।२८।२१।१२।
भागहारः १८७ न्यासः छेदेनानेनगुणकाराः १।२।३।४।७ १४४।५८।४८।३६।३६ भागहारः ३१२ न्यासः १।१।१।१।१।१ छेदे
नानेन ८४ गुणकाराः ८४।२८।२८।२१।१२ भागहारः १७३ एवंपंचविकल्पाः अथषड्विकल्पाः न्यासः १।१।१।१।१।१।१ १।३।३।४।७ छेदे
नानेन २५२ गुणकाराः २५२।१२६।८४।८४।६३।६३ भागहारः ६४५ न्यासः १।१।१।१।१।१।१ छेदेनानेन १६८ १।२।३।३।४।७ गुणकाराः १६८।८४
५६।४२।४२।२४ भागहारः ४१६ न्यासः १।१।१।१।१।१।१ छेदेनानेन १।२।३।४।४।७ न ९६ गुणकाराः ९६।४८।३२।३२।२४।२४
भागहारः २५६ न्यासः १।१।१।१।१।१।१ छे १।२।३।३।४।४ देनानेन ८४ गुणकाराः ८४।२८।२८।२१।२१।१२ भागहारः १९४
इतिजाताः षड्विकल्पाः १।३।३।४।४।७ चत्वारः अथसप्तविकल्पाः न्यासः १।१।१।१।१।१।१।१ छेदेनानेन १६८ गुणकाराः
१६८।८४।५६।५६।४२।४२।२४ भागहारः ४७२ एवंयावंतोदायहारा १।२।३।३।४।४।७ भवंतितावदेवतत्कर्मउपपद्यते यावंतोनभवंति तावत्कर्मनोपपद्यतइति एकविकल्पोनास्ति द्विविकल्पाश्चत्वारः ४ त्रिविकल्पाः ७ सप्त चतुर्विकल्पानव ९ पंचविकल्पाः सप्त ७ षड्विकल्पाश्चत्वारः ४ सप्तविकल्पएकः १ एवंद्वात्रिंशद्विकल्पाः ३२ यत्रबहवःपाचकाभवंति तत्रप्रथमंमूल दशापतिरेवांतर्दशापाचकोभवति ततः परंयएवदशाविभागक्रमः सएवांतर्दशाविभागक्रमः यस्यादौदशापाचकत्वंतस्यैवांतर्दशापाचकत्वंयस्य पश्चा-

तस्यपश्चादपि दशाक्रमपाचनेयस्यांतर्दशापाचकत्वेनप्राप्तंतस्यनवक्तव्यं तदनंतरंयस्यनप्राप्तंतस्यैववक्तव्यं अत्रान्ये मूलदशापतेरंतर्दशां दत्वानतः परंएकर्क्षस्यददाति ततस्त्रिकोणगतस्य ततश्चतुरस्रगतस्य ततःसप्तमगतस्यत्रिकोणचतुरस्रयोर्यदाग्रहौनदातयोर्बलाधिकस्तस्यादौ तच्चायुक्तं यस्माद्भगवान्गार्गिः आदावंतर्दशापाकोभवत्येवदशापतेः ततःपरंतुवक्तव्यं दशापाकक्रमेणतु ४ एवंदशांतर्दशाविभागेज्ञाते कस्य संबंधिनीदशांतर्दशावाशुभफलाभवति कस्याशुभफलेत्येतन्नज्ञायते तदर्थंदशादेः स्वफलानुरूपाः संज्ञावैतालीयेनाह सम्यग्बलिन इति प्रसूतौपुरुषस्यजन्मकालेयोग्रहः सम्यग्बलवान्भवति पूर्वोक्तैः बलैः सर्वैः युक्तोभवति तत्संबंधिनीसंपूर्णनाम्नीदशाभवति नबलंयावत्स्य·

सम्यग्बलिनःस्वतुंगभागेसंपूर्णाबलवर्जितस्यरिक्ता नी
चांशगतस्यशत्रुभागे ज्ञेयानिष्टफला दशाप्रसूतौ ५, ७

तुंगभागेऽवस्थितस्यपरमोच्चभागगतस्यैवसंपूर्णानाम्नीदशाभवति सम्यग्बलिनइत्युक्त्वा पुनःस्वतुंगभागइत्यनेनैतज्ज्ञापयति यथापरमोच्चगतोग्रहोऽन्यैः बलकारणैः युक्तोनभवति तथापितस्यसंबंधिनीदशासंपूर्णैव संपूर्णायांदशायांअंतर्दशायांचकालेशरीरारोग्यधनवृद्धिभिः पुरुषोभिवर्द्धते अथसमस्तबलैः युक्तोनभवतिकिंचिदूनबलस्तदातस्यसंपूर्णनाम्नीदशाभवति अथपरमोच्चगतो नभवतिकेवलमेवोच्चराशिगतोभवति तदातस्यदशापूर्णैवभवति पूर्णायांच दशायांकालेधनलाभमवाप्नोति तत्रारोग्यं बलवर्जितस्यग्रहस्यरिक्तानाम्नीदशाभवति यश्चनीचराशौस्थितः तस्याः रिक्तैवरिक्तादशाकालेंतर्दशाकालेधनहानिमवाप्नोति नीचांशगतस्येति नीचांशेनीचराशिनवभागेयोग्रहोगतः स्थितोभ

वति यश्चशत्रुभागेशत्रुनवांशेचस्थितस्तस्यदशानिष्टफलाज्ञेयाज्ञातव्या अनिष्टफलदशांतर्दशाकालेधनहानिमनारोग्यंचप्राप्नोति अत्रचभगवान्गार्गिः सर्वैर्बलैरुपेतस्यपरमोच्चगतस्यच संपूर्णाख्यादशाज्ञेयाधनारोग्यविवर्द्धिनी सर्वैर्बलैर्विहीनस्यनीचराशिगतस्यच रिक्तानामदशाज्ञेयाधनारोग्यविनाशिनी स्वोच्चराशिगतस्याथकिंचिद्बलयुतस्यच पूर्णानामदशाज्ञेयाधनवृद्धिकरीशुभा यस्यात्परमनीचस्थस्तथाचारिनवांशके तस्यानिष्टफलानामव्याध्यनर्थविवर्द्धिनी ५ अथदशांतर्दशासंज्ञाः पुनरपींद्रवज्रयाह भ्रष्टस्येति तुंगात्परमोच्चात्भ्रष्टस्यच्युतस्यावरोहिसंज्ञा अवरोहिणीनाम्नीदशाज्ञेया दशापरमोच्चभागादारभ्ययावत्परमनीचभागादिअत्रांतरेयद्राशिषट्कंतत्रावस्थितेनग्रहेणयादत्तादशांतर्दशावासावरोहिणीसंज्ञाभवति

भ्रष्टस्यतुंगादवरोहिसंज्ञामध्याभवेत्साकल्हदुच्चभागे
आरोहिणीनाम्न्यपरिच्युतस्यनीचारिभांशेष्वधमाभवेत्सा ६

यस्मात्परमोच्चाद्भ्रष्टः प्रत्यहमधोवतरतीतिविकल्प्यते यावत्परमनीचमिति अवरोहिसंज्ञादशाऽधमफलाभवति यस्माद्ध्रस्यतिसंज्ञानुरूपाणिफलान्यथैषामिति मध्याभवेत्साकल्हदुच्चभागइति सैवारोहिणी यत्रतत्रराशौव्यवस्थितेनकल्हद्भागेनमित्रांशकस्थेनदत्तादशामध्यानाम्न्येवभवति एवंयत्रतत्रराशौअर्थादेवस्वांशकस्थेनदत्तादशामध्यैव एवंयत्रतत्रराशौस्वोच्चनवांशकस्थेनदशामध्यैव आरोहिणीति निम्नानीचात्परिच्युतस्यचलितस्यग्रहस्यारोहिणीनाम्नीदशाभवति परमनीचांतर्भागादारभ्ययावत्परमोच्चभागादित्रांतरेयद्राशिषट्कंतत्रावस्थितेनग्रहेणयादत्तादशांतर्दशावासारोहिणीनाम्नीदशाभवति यस्मात्परमनीचाद्भ्रष्टः प्रत्यहंताचदारोहतीतिग्रहः परिकल्प्यते यावत्परमोच्चमिति आरोहिणीश्रेष्ठफलाभवति नीचारिभांशइति सैषा-

रोहिणी यत्रतत्रराशौस्वनीचराश्यंशोपगतेनदत्ताधमानाम्नीदशाभवति एवंयत्रतत्रराश्यवरिभांशकस्थेनशत्रुनवांशकस्थेनदत्ताधमैवदशाभवति पूर्वं
शत्रुनवांशकस्थेनदत्तानिष्टफलेत्युक्तमधुनासैवाधमेति तत्किमेतदित्यत्रोच्यते अवरोहिणीशत्रुनवांशकस्थेनदत्तापिअनिष्टफलाज्ञेया आरोहिण्यधमा-
अनयोः कः फलभेदः अत्रोच्यते अनिष्टफलाफलमशक्यंप्रयच्छति अधमाशक्यमेवाल्पमिति एवमवरोहिणीसंज्ञायदाधमसंज्ञाभवति तदासैवानिष्टफल
संज्ञांलभते आरोहिणीयदामध्यसंज्ञाभवति तदासैवपूर्णेतिसंज्ञाज्ञेया अत्रचभगवान्गार्गिः उच्चनीचान्तरस्थस्यदशास्यादवरोहिणी तस्यामल्पमवा
प्नोति फलंक्लेशाच्छुभंनरः मित्रोच्चात्मांशकस्थस्यमध्यामध्यफलातुसा नीचोच्चमध्यगस्योक्ताश्रेष्ठात्वारोहिणीदशा सैवाधमाख्याभवतिनीचराश्यं

नीचारिभांशेसमवस्थितस्यशस्तेगृहेमिश्रफलाप्रदिष्टा
संज्ञानुरूपाणिफलान्यथैषांदशासुवक्ष्यामियथोपयोगं ७

शगस्यतु अवरोहिणीचेदधमाढ्येत्कष्टफला तदा आरोहिणीमध्यफलासंपूर्णापरिकीर्तितेति ६ अथदशांतर्दशासंज्ञाः पुनरप्युपजातिकयाह नीचा
इति शस्तानिगृहाणिस्वोच्चमूलत्रिकोणात्मक्षेत्रमित्रक्षेत्राणितेष्ववस्थितेन नीचराश्यंशकेरिभागेशत्रुनवांशकेसमवस्थितेनचाग्रहेणदत्तायादशांतर्दशा
वासामिश्रफलानाम्न्येव मिश्रफलाशक्यमशक्यंचफलंप्रयच्छति व्याधिसमेतमर्थागममेवमादिशेत् अर्थादेवाशस्तराशिगेन अशस्ताअशस्ताः शत्रु
नीचराशयः तत्स्थेनस्वोच्चमित्रमूलत्रिकोणात्मवर्गोत्तमानवांशकस्थेनापिदत्तामिश्रफलैवभवति संज्ञानुरूपाणिस्वनामसदृशानिफलानिस्वांतर्दशा
सुचज्ञेयानितद्यथासंपूर्णात्यंतश्रेष्ठफलप्रदापूर्णाश्रेष्ठफलदा अधमाशक्यात्मफलदारिक्तार्थापहारिणीअनिष्टफलदात्यंतमशुभकारिणीमिश्रफला-

शुभमशुभंचफलंप्रयच्छन्ति अथैषांदशास्थितिः अथशब्द आनंतर्ये एषामादित्यपूर्वाणांग्रहाणांदशासुयथोपयोगमुत्तरत्रवक्ष्यामियथायेनैवप्रकारेणैवयुज्यन्ते तथातत्कथयिष्यामि कस्यांतद्दशायांकिंफलमुपयुज्यतइति ७ अथलग्नदशायांशुभाशुभज्ञानंवैतालीयेनाह उभयेति उभयेहि स्वभावेराशौलग्नगते द्रेष्काणक्रमेणाधममध्यपूजितादशाज्ञेयाः प्रथमद्रेष्काणेजातस्याऽधमाशोभनानिष्टफलाद्वितीयेद्रेष्काणेमध्यमामिश्रफलातृतीयेद्रेष्काणेपूजिताश्रेष्ठफलाचरभेचरराशावुत्क्रमेणवैपरित्येनतेनप्रथमद्रेष्काणेजातस्यपूजिताद्वितीयेमध्यमा तृतीयेधमानिष्टफला अशुभेष्टसमाः स्थिरक्रमादिति स्थिरेस्थिरराशौप्रथमद्रेष्काणेशुभाद्वितीयेद्रेष्काणेइष्टाश्रेष्ठातृतीयेद्रेष्काणेसमामध्यफला एवंहोरायाः लग्नस्यदशाः परिकल्पिताउक्ताइति ८ अथनैसर्गिका

उभयेधममध्यपूजितादृद्रेष्काणैश्चरभेषुचोत्क्रमात्
अशुभेष्टसमाःस्थिरेक्रमाद्धोरायाःपरिकल्पितादशा ८

णांग्रहाणांदशाकालंशार्दूलविक्रीडितेनाह एकमिति एकाद्याःसमाः एकादीनिवर्षाणिचंद्रादीनांयथाभिहितानिनैसर्गिकाणि तद्यथा जन्मसमयाद्यारभ्यैकाः समाः संवत्सराः एकश्चंद्रस्यततः परंद्वावारस्यांगारकस्य एवंत्रयः ततःपरंनवेंदुजस्यबुधस्य एवंद्वादशततः परंविंशतिः शुक्रस्य एवंद्वात्रिंशत्ततः परंधृतयोष्टादशजीवस्यगुरोः एवंपंचाशत् ततः परंकृतिसंख्याविंशतिः दिनकृतः सूर्यस्य एवंसप्ततिः ततःपरंपंचाशत् दिवाकरेःसौरस्य एवंविंशत्यधिकंवर्षशतम् १२० एतेषुनिसर्गदशाधिपेषुग्रहेषुबलवत्सूपचयस्थितेषुचतद्दशासुशोभनानिदशाफलानिभवंति हीनबलेष्वनुपचयस्थेष्वशोभनानि एतच्चसर्वदाचिंत्यं यतोनिसर्गदशास्थितिसंवादइति तथाचयवनेश्वरः स्तन्योपभोगःशशिनोवयः स्वंभौमस्यविध्यादशनानुजन्मबोधंतु शिक्षापद

कालमाहुरामैथुनेच्छाकुलितप्रवृत्तिः शौक्रंयुवत्वंविधिपूर्वदृष्टमामध्यमाहुर्वसुगुरोर्वदंति रवेर्वयोऽर्द्धात्परमन्यदस्मात्सौरेर्जरादुर्भगकालमाहुरिति नैसर्गिकस्य दशाकालस्य प्रयोजनमाह स्वैस्वैरिति तत्रयस्य ग्रहस्य संबंधिनी पूर्वविधिनाकृता दशांतर्दशावासायदि नैसर्गिकसमाभिः निसर्गकथितवर्षैः स्वैः स्वैः आत्मीयैः युज्यते स्वदशाकालेन समकालंभवति तदा यावत्कालं तस्य दशायुक्ता भवति निसर्गवर्षसमयं यदि प्राप्नोतीत्यर्थः कालद्वयस्यैक्यमुद्वहति तदा यावत्कालं तस्य संबंधिनी दशांतर्दशा भवति तस्याः पुष्टफलापक्तिः तस्याः पुष्टापरिपूर्णफलापक्तिः पाको भवति क्रमात्मनिपाद्या यावद्वर्तते तावच्छुभफले इत्यर्थः अत्र केचिद्वदंति पूर्वविधिना जाता शुभा तदा शुभफलमत्यर्थं प्रयच्छत्यन्यथाशुभा तदाशुभमत्यर्थमिति एतच्चायुक्तं यस्माद्यवनेश्वरः श्रेष्ठो दशास्ववयसि ग्रहस्येति तथा च मत्स्यः एकाब्दिकः शशी द्व्यब्दिकः कुजो द्वादशाब्दिकः सौम्यः द्वात्रिंशद्भृगुपुत्रो गुरुस्तु कथितः शतस्यार्द्धं ५० सप्तत्यब्दः सूर्यो विंशत्यधिकः शनैश्चरोऽब्दशतः वयसो तराणि चैषां स्वदशा नैसर्गिकः कालः स्वं स्वं वयसः सदृशं ग्रहः समासाद्य देहिनां कालं रक्षणपोषणचेष्टास्वभावदाः स्युर्यथासंख्यं अथ लग्नदशा नैसर्गिककालं पुराणयवनमतेनाह अंते लग्नदशा इति विंशत्यधिकाद्वर्षशतादूर्ध्वं यदि कस्यचिदायुषः कालो भवति तदा स कालः सर्व एव लग्नस्य नैसर्गिको भवति तस्मिन्काले पुराणयवनानां मतेन लग्नदशा शोभना भवति विंशत्यधिकाद्वर्षशतादूर्ध्वं इत्येतत्कुतोऽवगम्यते उच्यते तदर्वाक्कालस्यान्यग्रहपरिगृहीतत्वात् लग्नस्यानवकाशादेव अथान्यः कश्चिदाह यथा ननु विंशत्यधिकाद्वर्षशतादधिकं यस्यायुर्नास्ति-किं तस्य लग्ननैसर्गिको दशाकालो नास्ति उच्यते नास्त्येव न केवलं यावद्वर्षसप्ततेरभ्यधिकं यस्यायुर्नास्ति तस्य शनैश्चरसंबंधी नैसर्गिको दशाकालो नास्ति यस्य पंचाशतोऽधिकं नास्ति तस्यादित्यस्य किमपि नास्ति एवमन्येषामपि योज्यम् ननु विंशत्यधिकं वर्षशतं परमायुरत ऊर्ध्वं जीवितांभावात्को लग्नस्य नैसर्गिको दशाकालः उच्यते पूर्वमेव व्याख्याते यथा विंशत्यधिकं वर्षशतं परमायुः त्रैराशिकार्थमन्वादीनामायुर्ज्ञानार्थं प्रदर्शितं ततः तावत्प्रमाणादायुषः परं संभवतीति त

थाच यदा मीनलग्ने बलवति मीनांशकांते च कश्चिज्जातो भवति सर्वे च ग्रहाः यत्र तत्र राशौ मीनांशकावस्थिता भवंति केचिदुच्चगताः केचिच्चक्रवक्रितास्तदा मीनलग्नो द्वादश वर्षाणि ददाति स एव बलयुतस्तदान्यानि द्वादश वर्षाणि ग्रहस्थैकैको मीनांशकांतस्थत्वाद्द्वादश वर्षाणि ददाति तानि च वक्रोच्चस्थत्वात्त्रिगुणानि षट्त्रिंशद्भवति आदित्यवर्ज्यं आदित्यस्य मेषमध्यमांशकस्थितस्य सप्तविंशति वर्षाणि भवंति एवं चंद्रादीनां षण्णां शतद्वयं षोडशाधिकं भवति आदित्यस्य सप्तविंशतिः लग्नस्य चतुर्विंशतिः एवमेकीकृतं शतद्वयं सप्तषष्ट्यधिकं भवति नन्वेतावत्प्रमाणं कालं कश्चिज्जीवमानो न दृश्यते योगस्यातिदुर्लभत्वात् उच्यते कश्चिद्दृश्यत एव वर्जंत्यादिकः नेच्छंति केचित्तथेति तां लग्नदशामंते केचिदाचार्याः श्रुतकीर्तिप्रभृतयः तथा तेनैव प्रकारेण शुभामिति नेच्छंति नो वांछंतीत्यर्थः यस्मादबलत्वे ल

एकं द्वौ नव विंशतिर्धृतिकृती पंचाशदेषां क्रमाच्चंद्रारेंदुजशुक्रजीवदिनकृद्दैवाकरीणां समाः स्वैः स्वैः
पुष्टफलानि सर्गजनितैः पक्तिर्दशायाः क्रमादंते लग्नदशा शुभेति यवना नेच्छंति केचित्तथा ९ ६

ग्नस्य वयोंते तंदशा भवति सा शुभा आचार्येण लग्नदशायां शुभाशुभत्वं बलवशात्प्रोक्तं द्रेष्काणवशादुक्तं उभये अधममध्यपूजिता इति यस्माद्बलहीनस्यापि लग्नस्य वयोंते दशा द्रेष्काणवशाच्छुभा भवति तस्माद्ये आचार्या अंते लग्नदशां नेच्छंति ते निष्कारणमेव नेच्छंति ननु किमागमग्रंथानां कारणेनोच्यते य एवाचार्या अंते लग्नदशां नेच्छंति त एवागमानुत्यक्त्वा यथादर्शितकारणमुपन्यस्य नेच्छंति तेन कारणेन दोष उक्तः तथा च श्रुतकीर्तिः अंते लग्नदशा शुभेति यवना नेन द्वह्नाम तं तस्मिन् हीनबले यतोत्यसमक्षे साम्यादतो नेष्यते एतच्छ्रुतकीर्तिना कारणमुपन्यस्तं तच्च दुष्टमते नैसर्गिके लग्नदशाकाले तद्दशा शुभैवेत्यवगंतव्यम् ९

अथ दशांतर्दशाप्रकरणं शार्दूलविक्रीडितेनाह पाकस्वामीति सौरसावनचांद्रनाक्षत्राणि चत्वारि मानानि तत्र सौरमानं रविभगणभोगः यावता

कालेनार्कोभमेकंभुंक्तेतत्सौरंदिनम् यावताकालेनराशिद्वादशकंभुंक्तेतत्सौरंवर्षंतच्चपंचषष्ट्याधिकैस्त्रिभिः शतैः दिनानांघटिकापंचदशकेनसार्द्धेन भवति। सावनमुदयादुदयः अर्कोदयात्पुनरेवार्कोदयः सावनमहोरात्रंतच्च षष्टिघटिका महोरात्रं अहोरात्रात्रिंशन्मासः मासाद्द्वादशवर्षं एवंषष्ट्याधिकस्त्रिभिः शतैः दिनानांसावनवर्षं चांद्रं तिथिभोगः तच्चस्वमानेन षष्ट्याधिकंशतत्रयंभवति सावनेनमपिमानंशतत्रयंचतुःपंचाशदधिकंदिनानांतच्चवर्षंभवति एवं सौरसावनचांद्राणित्रीणिमानानिप्रत्येकंस्वमानेन षष्ट्याधिकंशतत्रयं भवति नाक्षत्रंचांद्रनक्षत्रभोगः तच्चदिनानांसप्तविंशत्या मासोभवति शतत्रये णचतुर्विंशत्याधिकेनदिनानांवर्षंभुक्तम् रव्यंशभोगोहोरात्रः सौरश्चांद्रमसस्तिथिः चंद्रनक्षत्रभोगस्तुनाक्षत्रः परिकीर्तितःससावनोग्रहर्क्षाणामुदयादु

पाकस्वामिनिलग्नगेसुहृद्वावर्गेस्यसौम्येपिवाप्रारब्धाशुभदादशात्रिदशवाषड्लाभगेषुवापाकपे
मित्रोच्चोपचयत्रिकोणमदनेपाकेश्वरस्यास्थितश्चंद्रः सत्फलबोधनानिकुरुतेपापानिचातोन्यथा १०

दयावधिनाक्षत्रमानेमासःस्यात्सप्तविंशतिवासराः शेषमानेषुनिर्दिष्टोमासस्त्रिंशद्दिनात्मकः इति तस्मात्सावनमानेनायुर्दायगणनाकार्या यस्माच्छोध्यक्षेपविशुद्धमायुः कर्तव्यंतच्चसावनमानंसौरमानेनसंक्रांत्यवधिकोमासः सावनस्त्रिंशद्रात्रः चांद्रोमावास्यांतिकः नाक्षत्रोरेवत्यंतिकः सौरमधिमासयुतंचांद्रंभवति चांद्रमूनरात्रेणसावनंभवति चांद्रशब्देननाक्षत्रमुक्तंच युगवर्षमासपिंडरविमानंसाधमासकंचांद्रं अवमविहीनंसावनमेवंलब्धान्वितंवर्षमितिएव शोध्यक्षेपविशुद्धंसावनमानेनायुर्दायविधिः तथाच मयूरचित्रके भगवान्गार्गिः आयुर्दायविभागश्चप्रायश्चित्तक्रियास्तथा सावनेनैवकर्तव्याःसत्राणामप्युपासनंनन्वर्कोदयादारभ्यार्कोदयंयावदहोरात्रंतत्पुलिशतंत्रेसौरमहोरात्रंपठ्यते वसुसप्तरूपनवमुनिनगातिथयः शतगुणाश्चसौरेणेति एतच्चपुलिशएव-

जानाति यस्मात्पुलिशतंत्रं वर्जयित्वा सर्वसिद्धांतेषु तंत्रेषु सौरमानेन रविभगणभागः सौरमानमधिमासयुक्तं चांद्रं भवति चांद्रमवमरात्रो न सावनं भवति एवं शोध्यक्षेपविशब्दं सावनमानं सर्वसंहितास्कचार्कोदयादारभ्यार्कोदयं यावदहोरात्रं तत्सावनमहोरात्रमिति संज्ञा तथा च भगवान् पराशरः सावनमहोरात्रं गार्गिश्च सावनेन स्मृतो मासस्त्रिंशदुष्णकरोदयः तथा च श्रीमद्ब्रह्मगुप्तः सावनमुदयादुदयइति एवं पुरुषस्य जन्मसमये सावनमहर्गणं कृत्वा तस्मात्तिथिनक्षत्रच्छेदं तात्कालिकं ग्रहलग्नादिकं कृत्वा तथा दशांतर्दशाः कर्तव्याः तत आगामिदशाफलं वक्तव्यं तत्र प्रथमजन्मनि अहर्गणं तात्कालिकं कृत्वा ततस्तत्रांतर्दशाकालं वर्षादिकं दिनीकृत्य योजयेद्वर्षाणि द्वादशभिः संगुण्य तेषु मासान् संयोज्य त्रिंशता पुनः संगुण्य तेषु दिनानि निक्षिपेत् एवं कुते दशाकालो दिनरूपो भवति तच्च तात्कालिके जन्माहर्गणे सविकले सविकलं संयोज्याहर्गणो भवति तत्राधोयद्वरिः कालो भवति तस्यातीताद्रात्रात्परतो गणना कार्या तस्माद्दिष्टदिनमानयेदनेनाचार्यसूत्रेण द्युगणोधोभवगुणितोह्निचरस्तासावपाश्चिकस्याद्रः चांद्रोधरस्तु वेदानागाप्ताअधिमासदिनैर्हीना इति एतत्खंडखाद्यकरणेनैव भवति कोसौ रवियुगणइत्याह शकोगवसशरोनोर्कगुणः चैत्रादिमाससंयुक्तः त्रिंशद्गुणः तिथियुतइति अस्य षष्ट्याधिके नशतत्रयेषां भागमपहृत्य यावत्तं करणाब्दाः शेषास्त्रिंशद्वृताश्चैत्रसिताद्या मासाः शेषा वर्तमानमासे सिताद्यास्तिथयः करणाब्दं खगवसुशरात्संयोज्यातीतः शककालो भवति तस्मिन् शाके यस्मिन्मासे तस्मिन् दिने सोऽहर्गणइति तत्रैव दशाप्रवेशः पुनरप्यन्यमंतर्दशाकालं दिनीकृत्य तस्मिन् योजयेत् एवं यावत्योंतर्दशा भवंति तावंत्यानेनैव प्रकारेण योजनीयाः ततो महान् लग्नं च गुणयेत् अथवान्येन प्रकारेण कालानयनं आदित्ये क्रियमाणे यावंतो गतभगणा भवंति तावंतः करणप्रारंभादारभ्य गताब्दाः तेषु करणपीणित शककालसंयोज्येष्टशककालो भवति. वर्तमाने वर्षे यावंतो राशयः स्फुटोर्को भवति तावंतो मासाः सूर्यभोगानीताः शुक्लपक्षं कृष्णपक्षं चातिथिनक्षत्रचंद्रार्काभ्यां साधितएव पाकस्वामिनीत्यादित्यस्य गृहस्यांतर्दशाप्रवेशः सपाकस्वामी याव

तस्यांतर्दशामेव स्चापाकेस्वाम्यंतर्दशाप्रवेशकाल्लग्नगोयदिभवति तदातस्य संबंधिन्यंतर्दशाप्रारब्धाशुभदाशोभनफलदाभवति अथवातात्कालं पाकस्वामिनो यस्तुतन्मित्रंतस्मिन्नपिदशाप्रवेशकालेलग्नगेशोभनादशावक्तव्या अथवास्य दशापतेः पूर्वव्याख्यातोयोवर्गः तस्मिन्नपिलग्नगेशोभना अथवायस्मिन्सौम्येशुभग्रहेतत्काललग्नगेदशाप्रारब्धाशोभनैव अथवापाकपेदशाधिपतौग्रहेतात्कालिकलग्नात्त्रिदशषड्लाभेषुतृतीयषट्दशमैकादशस्थानानामन्यतमस्थेशोभनैवदशावक्तव्या यद्यप्यत्रसामान्येनोक्तंप्रारब्धाशुभदादशातथापि शत्रुअधिशत्रुदशायांप्राप्तानिष्टफलप्रदाअधिमित्रोपिमित्रस्यदशांप्राप्नोतिशोभनः समः समदशामेत्ययथोक्तफलदोहिसः एतदपिचिंतनीयं अनेनप्रकारेण यदिशुभफलदांतर्दशाभवति तदाशुभमेव अन्यथाऽशुभमेव अथशुभफलायामंतर्दशायांकिमप्यनवरतमेव सर्वकालंशुभफलावाप्तिर्भवति किंवाकस्मिंश्चित्कस्मिंश्चिद्दिवसे एवमशुभायामंतर्दशायामशुभफलावाप्तिरित्युभयत्रसंदेहव्युदासार्थमाह मित्रोच्चोपचयेत्यादि पाकेश्वरस्यदशापतेः प्रतिराशौसंचरतः तत्कालेयोग्रहोमित्रंतत्क्षेत्रस्थितश्चंद्रमायदाभवति तदासत्फलबोधनानिकुरुते शुभफलानिप्रकटीकरोति अत्रयस्मिन्नहनियस्मिन्गृहेचारवशाच्चंद्रमाभवति तस्यग्रहस्ययोधिपतिर्भवति सचेत्तस्मिन्नहनिपाकपतेस्तात्कालिकमित्रंभवति तदाचंद्रमापाकपतेर्मित्रक्षेत्रस्थोज्ञेयः तथापाकपतेः स्वोच्चस्वराशिस्थः सत्फलबोधनानिकुरुते नकेवलंयावत्पाकपतेरुपचयस्थानगतोपित्रिषडेकादशदशमस्थानानामन्यतमस्थानस्थस्त्रिकोणगोपिनवपंचमस्थानगतोपितथा मदनस्थः सप्तमेवास्थितः एतेषुनिर्दिष्टस्थानेष्वन्यतमस्थानस्थश्चंद्रमाः शुभफलायांदशायांसत्फलबोधनानिकुरुते नत्रायततेतेषांफलानामित्यत्रोच्यते मित्रोच्चोपचयत्रिकोणमदनेयस्मिन्स्थानेपाकेश्वरश्चंद्रमाः स्थितः सराशिः जन्मनियोभावआसीत्तदुद्भूतंसत्फलंबोधयति विशेषेणतयादशापठितमितिअतोस्मादुक्तप्रकारादन्यथापाकपतेस्तत्कालंशत्रुग्रहेनीचराशौवादशापतिनासहैकराशौस्थितस्तथाद्वितीयचतुर्थाष्टमद्वादशस्थानानामन्यतमस्थानस्थोभव

तितद्दशुभफलायां दशायां पापानि फलानि प्रकटीकरोति स च राशियो भाव आसीत्तदुद्भूतं फलं बोधयति विशेषेण दशापतितमिति अनिष्टमप्यष्टकवर्गोद्भूतं च मित्रद
शायां मित्रोच्चोपचयादिसत्फलबोधनानि कुरुते शत्रुनीचादिषु अशुभफलानामिति तथा च भगवान् गार्गिः यद्राशिसंस्थशीतांशुः शुभकृत्परिकीर्तितः सरा
शिर्जन्मकाले तु यो भावस्तत्कृतं च तत् शरीरादिकृतसौख्यं वक्तव्यं बलयोगतः अनिष्टराशिसंस्थे तु तद्भावानामशोभनम् इति १० अथान्तर्दशाकाले चंद्रा
क्रांतराशिवशेन शुभज्ञानं शार्दूलविक्रीडितेनाह प्रारब्धा हिमगाविति यस्य तस्य ग्रहस्यांतर्दशाप्रवेशसमये हिमगौ चंद्रे स्वगृहगे आत्मीयक्षेत्रस्थे कर्कट
गे प्रारब्धा प्रविष्टा तदा सौख्यार्थमानावहा भवतीति सौख्यं सुखभावः अर्थो धनं मानं पूजामावहति करोति कौजे भौमक्षेत्रे मेषवृश्चिकयोरन्यतमे व्य

प्रारब्धा हिमगौ दशा स्वगृहगे मानार्थसौख्यावहा कौजे दूषयति स्त्रियं बुधगृहे विद्यासुहृद्वित्तदा
दुर्गारण्यपथालये कृषिकरी सिंहे सितर्क्षे तदा कुस्त्रीदा मृगकुंभयोर्गुरुगृहे मानार्थसौख्यावहा ११

वास्थिते चंद्रे प्रवृत्तांतर्दशा स्त्रियं दूषयति परपुरुषकृतं स्त्रीदोषमुत्पादयति बुधगृहे मिथुनकन्ययोरन्यतमस्थे चंद्रे प्रवृत्तांतर्दशा विद्यासुहृद्वित्तदा विद्याशा
स्त्रानुरतिः सुहृदो मित्राणि वित्तं धनं ददाति सिंहस्थे चंद्रे दुर्गेष्वरण्येषु पथि च मार्गे आलये च गृहसमीपे एतेषु स्थलेषु कृषिं करोति सितर्क्षे शुक्रराशौ वृषतुल
योरन्यतमस्थे चंद्रे तदापि स्त्रीभोज्यप्रदा भवति मृगकुंभयो मकरघटयोरन्यतमस्थे चंद्रे प्रवृत्तांतर्दशा कुस्त्रीदा कुत्सितां स्त्रियं ददाति गुरुगृहे जीवक्षेत्रे धन्विमीन
योरन्यतमस्थे चंद्रे प्रवृत्तांतर्दशा मानार्थसौख्यावहा मानं पूजा अर्थो धनं सौख्यं सुखभावः एतान्यावहति ददातीति एवं शुभदशा शुभकालप्रवृत्ता शुभतरा
भवति एवं शुभाशुभकालप्रवृत्ता मध्या अशुभा शुभकालप्रवृत्ता मध्या अशुभाशुभकालप्रवृत्ता अशुभतरा मध्याशुभकालप्रवृत्ता शोभना मध्या अशुभ

कालमयुक्ताअशोभना एवंशुभत्वकरणानियान्युक्तानितानिविरुध्यांतांर्दशानांशुभाशुभंव्यामिश्रफलत्वंपरिकल्पनीयमिति ११ अथार्कदशायांशुभाशुभफलप्रदर्शनंशार्दूलविक्रीडितेनाह सौर्यामिति सूर्यस्येयंदशासौरी तस्यांदशायामंतर्दशायांवानरवद्दंतचर्मकनककौर्याध्वभूपाहवैः कारणभूतैः स्वंधनंप्राप्नोति नखंकगंधिद्रव्यंप्राणिकरजं दंतोहस्तिदंतादिः चर्मव्याघ्रादीनांकनकंसुवर्णंकौर्यंक्रूरताअध्वामार्गः भूपोराजाआहवःसंग्रामः एतैः धनंप्राप्नोति तैक्ष्ण्यंउग्रस्वभावताधैर्यं शुभाशुभफलप्राप्तौहर्षविषादैः अनभिभवः अजस्रमनवरतंउद्यमरतिः उत्थानपरत्वंख्यातिः कीर्तिः प्रतापोन्नतिः प्रतापेनशौर्येणोन्नतिः शत्रूणामन्यशत्रुनिग्रहजनिता प्रीतिः एतान्यादित्यशुभदशायांपुरुषस्यभवंति अथाशुभदशायांभार्यापुत्रेति भार्याजायापुत्राः धनंवित्तं अरिः शत्रुः

सौर्यांस्विन्नरवद्दंतचर्मकनककौर्याध्वभूपाहवैस्तैक्ष्ण्यंधैर्यमजस्रमुद्यमरतिःख्यातिःप्रतापोन्नतिः
भार्यापुत्रधनारिशस्त्रहुतभुग्भूपोद्भवाव्यापदस्त्यागीपापरतिःस्वभृत्यकलहाहृत्क्रोडपीडा
मयाः १२

शस्त्रमायुधादिहुतभुगग्निः भूपोराजा एभ्यउद्भूताउत्पन्नाव्यापदोविशेषेणापदोभवंति त्यागीत्यागशीलताभवति शुभदशायांशुभस्थानेत्यागीअशुभदशाचाशुभत्वादशुभस्थानेत्यागीभवति पापरतिः पापसक्तश्चभवति स्वभृत्यकलहः आत्मीयैर्भृत्यैः सकलहोभवतिहृत्क्रोडपीडनेभवतः हृत्हृदयंक्रोडउदरंहृदयोदरपीडाआमयाःरोगाश्चास्यभवंतिमिश्रायामुभयमपि इतिसूर्यदशांतर्दशाफलं १२ अथचंद्रदशायांशुभाशुभफलंशार्दूलविक्रीडितेनाह इंदोरिति इंदोः चंद्रमसोदशांवयोवस्थांप्राप्यलब्ध्वा मंत्रद्विजात्युद्भवानिफलानिलभते मंत्रःशैववैष्णवादिस्त्राणवर्या वि- हितोवावैदिकोवा द्विजातयोब्राह्मणाः एभ्यउद्भूतानिउत्पन्नानि नकेवलंयावदिक्षुविकाराद्गुडादिकात्क्षीरविकाराद्दध्यादिकाद्वस्त्रेभ्योवरेभ्यःकुक्त

मेभ्यः पुष्पेभ्यः क्रीडायाः क्रीडाभ्यः तिलेभ्यः अन्नात् श्रमाच्छ्यायामात् एतैः शुभदशायां शुभानि फलानि प्राप्नोति ॥ अथाऽशुभायाम शुभदशायां निद्रालस्यमृदुद्विजामररतिरिति निद्रायामालस्यं च रतिरासक्तिर्भवति मृदुद्विजामररतिर्भवति मृदुः क्षमावान् द्विजानां ब्राह्मणानाममराणां देवानां चाराधने रतिरासक्तिर्भवति स्त्रीजन्म कन्याप्रसूतिः मेधाविता बुद्धिवृद्धिः कीर्तिः यशसः अर्थानां धनानामुपचयक्षयौ शुभदशायामुपचयः प्राप्तिरशुभायां क्षयः नाशः अशुभायां बलवृद्धिः वीर्यवृद्धिः स्वपक्षेणात्मीयबंधुवर्गेण च सह वैरं भवति मिश्रायामुभयमपि इति चंद्रदशांतर्दशाफलं १३ अथ भौमदशायां शुभाशुभफलं शार्दूलविक्रीडितेनाह भौमेति भौमस्य क्षितिजस्य दशायां कैः धनं भवति अरिविमर्दनेन शत्रुप्रमथनेन भूपो राजा सहजाः भ्रा-

इंदोः प्राप्यदशां फलानि लभते मंत्री द्विजात्युद्भवानीक्षुक्षीरविकारवस्त्रकुसुमक्रीडातिलान्नश्रमैः
निद्रालस्यमृदुद्विजामररतिः स्त्रीजन्ममेधाविताकीर्त्यर्थोपचयक्षयौ च बलिभिर्वैरस्वपक्षेण च १३
भौमस्यारिविमर्दभूपसहजक्षित्याविकाजैर्धनं प्रद्वेषः सुतमित्रदारसहजैर्विद्वद्गुरुद्वेष्टिता १४

तरः क्षितिः भूः आविकजैः ऊर्णाविकारसंभूतैः अजैः छागसंभूतैः एतैः अरिविमर्दादिभिः धनं प्राप्नोति एतच्छुभदशायां अथाशुभायां दशायां सुताः पुत्राः मित्राणि सुहृदः दाराः कलत्रं सहजाः भ्रातरः एतैः सह प्रद्वेषः वैरं विद्वद्भिः पंडितैः गुरुभिः गौरवसहितैश्च सह द्वेष्टिता अप्रीतिः तृष्णा तृड्भ्रमसृग्रुधिरः ज्वरः प्रसिद्धो रोगः पित्तं धातुप्रसिद्धं भंगः अवयवादेः स्फोटनं एतैः जनिता उत्पादिता रोगा भवंति परस्त्रीणामिष्टता वालभ्यं अन्ये रोगाः परस्त्रीकृता इति पठंति परस्त्रीकृता रोगाः अन्यस्त्रीप्रसंगेन प्रहारादिकाः अतिप्रसंगाद्धातुक्षयकृता वा अथवा तत्कृतमूलकर्मोद्भवा भवंति तथा

पापरतैः अधसक्तैः सहप्रीतिर्भवति अधर्मेनिरतिः आसक्तिर्भवति पारुष्यंवचनपरुषताकर्कशतातैक्ष्ण्यंउग्रस्वभावता मिश्रायामुभयमपि इतिभौमदशांतर्दशाफलम् १४ अथबुधदशायांशुभाशुभफलंशार्दूलविक्रीडितेनाह बौध्यामिति बुधस्येयंदशाबौधीतस्यांदोत्येनदूतत्वेनसुहृद्भ्यो मित्रेभ्यः गुरुभ्यः पूजार्हेभ्यः द्विजेभ्योब्राह्मणेभ्यः धनंप्राप्नोति विद्वद्भ्यः पंडितेभ्यः प्रशंसास्तुतिः यशश्चकीर्तिर्भवति युक्तिद्रव्यंरीतिकांस्यादि सुवर्णकनकंवेसरः अश्वविशेषः महीभृः सौभाग्यंसर्ववाल्लभ्यंसौख्यंशुभस्वभावः योगानुसेवनं एषामाप्तयोलाभाभवंति हास्यपरोपहासः उपासनासेवाअनयोः कौशलंतज्ज्ञाता मतिचयःबुद्धिवृद्धिः धर्मक्रियासिद्धयः धर्मयुक्तानांक्रियाणांसिद्धयोभवंति एतच्छुभदशायां अथाशुभदशायां पारुष्यं

तृष्णासृक्रुज्वरपित्तभंगजनितारोगाःपरस्त्रीकृताप्रीतिःपापरतैरधर्मनिरतिःपारुष्यतैक्ष्ण्यानिच १४
बौध्यांदौत्यसुहृद्गुरुद्विजधनंविद्वत्प्रशंसायशोयुक्तिद्रव्यसुवर्णवेसरमहीसौभाग्यसौख्याप्तयः हा
स्योपासनकौशलमतिचयोधर्मक्रियासिद्धयःपारुष्यश्रमबंधमानसशुचःपीडाचधातुत्रयात् १५

इत्यादि पारुष्यंपरुषवचनता श्रमः खेदः बंधः बंधनं मानसशुचः शोकश्चित्तदौस्थ्यंएतेभवंति धातुत्रयात्पीडा वातपित्तश्लेष्माणां त्रयाणां दोषाणांप्रकोपात्पीडाव्याधिश्चजायते मिश्रायामुभयमपि इतिबुधदशांतर्दशाफलम् १५ अथजीवदशायांशुभाशुभफलंशार्दूलविक्रीडितेनाहजैव्यामितिजीवस्येयंदशाजैवी तस्यांजैव्यांमानगुणोदयः मानः पूजागुणाविद्याशौर्यादयः एषामुदयःप्रादुर्भावःमतिचयःबुद्धिविवृद्धिःकांतिः कमनीयताप्रतापोन्नतिः प्रतापेनपुरुषार्थेनउन्नतिः प्रभावः शत्रूणांभीतिःमाहात्म्यंपरोपकारशीलताकेचिद्धर्ममाहुःउद्यमःउत्थानशीलता मंत्रैर्वै

दिकैरन्यैर्वा नीतिर्नृपतिस्वाध्यायमंत्रैर्धनंनीत्याचाणाक्योक्तयान्येननीतिशास्त्रेणवान्नृपतीराजातद्द्वाराधनेनस्वाध्यायेनपाठेनमंत्रेणमंत्रजाप्येनएतैः धनंवित्तंप्राप्नोति हेमस्वर्णं अश्वः तुरंगः आत्मजाः पुत्राः कुंजरः हस्ती अंबराणि वस्त्राणि एषांचयोबाहुल्यंसद्भूमिपैः गुणवद्भिः नृपैः सहप्रीतिः स्नेहं प्राप्नोति एतच्छुभदशायां अथाशुभायां सूक्ष्मोइत्यादि सूक्ष्मंवस्तुगहनात्मकंचोहयत स्तर्कयतः श्रमः खेदोभवति येसूक्ष्ममतिखेदसहंगहनंसूदं तदूहयतइत्यर्थः श्रवणरुक् कर्णरोगः वैरंविधर्माश्रितैः धर्मबाह्यैः पुरुषैः सहवैरंमिश्रायामुभयमपिइति गुरोर्दशांतर्दशाफलम् १६ अथशुक्रदशायांशुभाशुभफलंशार्दूलविक्रीडितेनाह शौक्र्यामिति शुक्रस्येयंदशाशौक्री तस्यां शौक्र्यांगीतरतेः गीतासक्तेः प्रमोदस्य हर्षस्य सुरभिद्रव्याणांअन्नस्य भोजनस्य पानस्यासवस्यांबराणांवस्त्राणां स्त्रीणांयोषितांरत्नानांमणीनांद्युतेः कांतेः मन्मथोपकरणानांकामोपभोग्यानांशय्यादीनांविज्ञानस्ययोगशास्त्रस्येष्टानांप्रियाणांमित्राणांसुहृदामागमालब्धयोभवंति कुशलःशिक्षितः कुशलस्यभावः कौशल्यं कुशलःश्रेयोवाकौशल्यमभीष्टक्रियासुश्रेष्ठत्वंक्रयविक्रयेक्रयोयदिच्छतिक्रेतुंतत्क्रयः विक्रयोयदिच्छतिविक्रेतुंतद्विक्रयः कृषिः कर्षणंनिधिःनिधानपरैर्यद्वित्तंभूमावधःस्थाप्यते सनिधिस्तल्लाभिर्लाभः एतेभवंति एतच्छुभदशायां अथाशुभदशायांवृंदोर्विशेति वृंदेनबहुभिः सहउर्वीशेन राज्ञानिषादाना मन्यजीविना

जैव्यांमानगुणोदयोमतिचयः कांतिःप्रतापोन्नतिर्माहात्म्योद्यममंत्रनीतिनृपतिस्वाध्यायमंत्रैर्धनम्
हेमाश्वात्मजकुंजरांबरचयःप्रीतिश्चसद्भूमिपैःसूक्ष्मोहागहनाश्रमःश्रवणरुग्वैरंविधर्माश्रितैः १६
शौक्र्यांगीतरतिप्रमोदसुरभिद्रव्यान्नपानांबरस्त्रीरत्नद्युतिमन्मथोपकरणज्ञानेष्टमित्रागमाः ॥

प्राणिघातिनांधर्मरहितैःपापसक्तैः एतैः सह वैरं प्राप्नोति शत्रुचः स्नेहतः स्नेहाद्भुचः शोकाभवंतियत्रस्नेहस्तद्भवान्शोकान्प्राप्नोति मिश्रायामुभयमपिइति शत्रुदशांतर्दशाफलमिति १७ अथशनैश्चरदशायाःशुभाशुभफलशार्दूलविक्रीडितेनाह सौरीमिति सौरीशनैश्चरदशांप्राप्यखराःगर्दभाःउष्ट्राःक्रुरभाःपक्षिणःश्येनादयःमहिषीप्रसिद्धा वृद्धांगनावृद्धस्त्रीएषामाप्तयः लाभोभवति बहुसमानजातीयानांसंघश्रेणीतस्यामधिकारेनियुज्यतेग्रामेषुरेवाश्रेणीग्रामपुराधिकारजनिता तदुत्पन्नांपूजांमाननांप्राप्नोति कुधान्यानांकोद्रवादीनामागमः लाभःएतच्छुभदशायां अथाशुभदशायांश्लेष्मेर्ष्येति श्लेष्मणाकफेनईर्ष्ययामत्सरत्वेनअनिलेनवायुनाकोपेनक्रोधेनमोहनचित्तभ्रमेणमलिनतयामलीमसत्वेनव्यापत्तिःविपत् तंद्रानिद्रालस्ययोरंतरे

कौशल्यंक्रयविक्रयेकृषिनिधिप्राप्तिर्धनस्यागमोवृद्धिदौर्बल्यशनिषादधर्मरहितैर्वैरंशत्रुचस्नेहतः १७
सौरींप्राप्यखरोष्ट्रपक्षिमहिषीवृद्धांगनावाप्तयः श्रेणीग्रामपुराधिकारजनितापूजाकुधान्यागमः

वर्तते तस्यालक्षणंहृदयेव्याकुलीभावोवाचश्चेंद्रियगौरवं मनोबुध्यप्रसादश्चतंद्रायालक्षणंविदुः श्रमःखेदः एतान्प्राप्नोतिभृत्येभ्यःकर्मकरेभ्यःअपत्येभ्यःपुत्रदुहितृभ्यः कलत्रेभ्योभार्याभ्यःभर्त्सनंतर्जनंप्राप्नोतिव्यंगतामंगच्छेदंव्याधिनातद्द्वारणंवामिश्रायामुभयमपि इतिशनिदशांतर्दशाफलम् १८
अथैकस्मिन्नुक्तेदशासुशुभान्यशुभानिचफलान्युक्तानितेषांविषयविभागंलग्नदशाफलंचोपजातिकयाह दशाइतिशुभाशुभंव्यामिश्रत्वंदशासुपूर्वमेवोक्तंतथाजन्मकालेउपचयराशिस्थानिर्मलमूर्तयः स्पष्टगतयश्चयेग्रहास्तेषामपिदशाः शुभाः येचोपचयस्थाहतारूक्षाःस्वल्पमूर्तयस्तेषामपिदशाअशुभाः तथाचयवनेश्वरः निशाकरादित्यविलग्नभानांतत्कालयोगादधिकंबलंयःबिभर्तितस्यादिदशोष्यतेसाशेषास्त्वतः शेषबलक्रमेण वयोधिकोयः

प्रथमोद्गतोवाग्रहः सपूर्वं पाठितोदशेशः बलाधिकश्चेद्यदि केंद्रसंस्थः पूर्वं सशेषास्तु यथाप्रदिष्टः श्रेष्ठादशास्वेवयासि ग्रहस्य स्वोच्चस्थिताकालबलान्वितस्य त् मूलत्रिकोणात्स्वगृहाच्च मध्यामिश्रास्थिताजन्मगृहाश्रितावा नीचारिभांशोपगताजिताद्यग्रहास्तारैर्ध्वस्तविवर्णरूक्षात् जन्मेशशत्रोर्निधनारिभेशाद्या बाद्यतेसाबहुदोषदास्यात् एवंशस्तास्तुशोभनास्तुदशास्तुग्रहाः शुभान्येवफलानिकुर्वंति दशाफलवृत्तेयानिशुभान्यशुभान्यभिहितानितान्येवभवति नेतराणि अनिष्टसंज्ञास्वशुभदशास्तु अशुभान्यनिष्टानि एवभवंति मिश्रास्तुदशास्तु मिश्राण्येव दशाफलानिभवंति एतच्चप्रतिसूत्रमस्माभिःश्च व्याख्यातं तथाचसत्यः जन्मन्युपचयभवनेषुसंस्थिताः सव्यगाः सुमूर्तिधराः श्रेष्ठंफलंविदधुर्ग्रहाः क्रमात्स्वांदशांप्राप्य अन्यैर्निहितारूक्षाल्प

श्लेषोर्थ्यानिलकोपमोहमलिनव्यापत्तितंद्राश्रमान्भृत्यापत्यकलत्रभर्त्सनमपिप्राप्नोतिचव्यंगतां १८ दशासुश
स्तासुशुभानिकुर्वंत्यनिष्टसंज्ञास्त्वशुभानिचैवम् मिश्रासुमिश्राणिदशाफलानि होराफलंलग्नपतेःसमानम् १९

मूर्तयोऽप्युपचयर्क्षसंस्थाश्च स्वदशाभिहितंनेष्टंग्रहाःप्रयच्छंति लोकेषुहोराफलंलग्नपतेः लग्नाधिपस्यसमानंतुल्यंवक्तव्यम् यथामेषलग्नजातस्यभौमदशाफलं वृषलग्नजातस्यशुक्रदशाफलं एवमन्येष्वपिवक्तव्यम् किंतुद्रेष्काणवशाच्छुभायांलग्नदशायांशुभफलमशुभायामशुभं मिश्रायामुभयमपि अथयेपूर्वंदशारिष्टाउक्तास्तेषामिमेभंगाः प्रोक्ताः तथाचसारावल्याम् प्रवेशेबलवान्खेटः शुभैर्वासंनिरीक्षितः सौम्यारिमित्रवर्गस्थोमृत्युकृन्नभवेत्तदा अंतर्दशाधिनाथस्यविबलस्यदशायदाविबलःस्यात्तदाभंगोनबाध्यातस्यचध्रुवम् युद्धेचविजयीतस्मिन्ग्रहयोगेशुभोयदि दशायांनभवेत्कष्टंस्वोच्चादिषुचसंस्थितेइति १९ अथान्येषामपिफलानांदशास्वातिदेशार्थंशालिन्याह संज्ञाध्येति यस्यग्रहस्यसंज्ञाध्यायेयद्द्रव्यंताम्रंस्थान्मणिहेम

त्यादिना ग्रंथेनोक्तं कथितं तस्य तद्द्रव्यस्य शुभदशायां प्राप्तिः योज्या अशुभदशायां हानिः तथा यश्च कर्माजीवो यस्य ग्रहोपदिष्टो जातकेभिहितः अर्थाप्तिः पितृमातृपत्नीरित्यादि तस्य ग्रहदत्तस्य कर्माजीवस्य तद्दंतर्दशायामेवाप्तिः भवति भावफलं वक्ष्यति शूरस्तब्धइत्यादि तथा प्रथितश्चतुरोरन् इत्यादि तथा मेषेरचास्तिमिरनयनइत्यादि आलोकनफलं चंद्रे भूपबुधौ इत्यादि योगोद्भवं नाभसयोगान्मुक्त्वा सर्वयोगेषु योगकर्तृभ्यो ग्रहेभ्यो मध्याद्यो बलीयान् स तस्य दशायामेव फलं ददाति नाभसयोगाः सकलदशास्वपि फलप्रदाः वक्ष्यति च इतीति निगदिता योगाः सार्द्धं फलमिह नाभसाः निपतफलदाश्चयात्यंतसमस्तदशास्वपीति एवमादि यद्यदुक्तं तत्सर्वामसवशेषं तस्य ग्रहस्य दशायां योज्यामिति २० अथ यस्य जातस्य जातकमध्ये गणितं त-

संज्ञाध्याये यस्य यद्द्रव्यमुक्तं कर्माजीवो यश्च यस्योपदिष्टः
भावस्थानालोकयोगोद्भवं च तत्तत्सर्वं तस्य योज्यं दशायां २०

स्यशरीरछायां दृष्ट्वा ग्रहदशाज्ञानमिंद्रवज्रयाह छायां महाभूतकृतामिति पूर्वमुक्तं शिखिभूखपयोमरुद्गणानां वशिनो भूमिसुतादयः क्रमेणेति तत्रादित्यचंद्रौ वह्न्यंबुप्रसिद्धावेव यः कश्चिद्ग्रहः स्वदशामात्मीयदशामवाप्य महाभूतकृतां छायां अभिव्यंजयति प्रकटीकरोति छायाशब्देन शरीरशोभाभिधीयते शरीरकांतिरित्यर्थः तथा च सच्छायो योऽयं विच्छायो यं वर्तत इत्यभिधीयते एवमात्मीयदशायां पृथिव्यादिमहाभूतकृतां शरीरच्छायां व्यंजयति प्रकटीकरोति साचाकं ध्वग्निवाय्वंबरजान् गुणान् कुः पृथिवी अंबु वरुणः अग्निः हुताशनः वायुः अनिलः अंबरं आकाशं एभ्यो जातो सन्नासा छाया तद्गुणान् करोति तांश्च यथासंख्यं नासास्यदृक्त्वक्श्रवणानुमेयान् पार्थिवगुणं गंधमभिव्यंजयति नासानुमेयं घ्राणेनोपलभ्यते अथाप्यंगुणं रसमभिव्यंजयति तच्चास्यानुमे

यम् आस्यशब्देनेह जिह्वा ज्ञेया तयारसस्योपलब्धेः आस्यग्रहणं चात्र वृत्तानुरोधीकृतं आग्नेयी आग्नेयं गुणं रूपमभिव्यंजयति दृष्ट्यानुमेयं वायवी वायव्यं स्पर्शगुणमभिव्यजयति त्वगनुमेयं स्पर्शेनोपलभ्यते नाभसी नाभसगुणं शब्दमभिव्यंजयति श्रवणानुमेयं कर्णोपलभ्यं एतदुक्तं भवति यदा शुभगंधः पुरुषो भवति तदास्य बुधकृता पार्थिवी छाया ज्ञेया यदा मिष्टरसभोजी भवति तदास्य चंद्रशुक्रकृता छाया ज्ञेया यदातीव रूपवान् सुकान्तः पुरुषो भवति तदा सूर्यभौमकृता आग्नेयी छाया ज्ञेया यदास्य स्पर्शेन मृदुर्भवति तदा शनैश्चरकृता वायवी छाया ज्ञेया यदास्य वचनं कर्णयोः सुखकरं भवति तदा जीवकृता नाभसी छाया ज्ञेया छायाविशेषलक्षणमाचार्येण संहितायामभिहितं तथा च छायाः शुभाशुभफलानि निवेदयंती लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः तेजोगुणान्बहि

छायामहाभूतकृतांचसर्वेभिव्यंजयंतिस्वदशामवाप्य क्ष्मांब्व
ग्निवाय्वंबरजागुणाश्चनासास्यदृक्त्वक्श्रवणानुमेयान् २१

रपि प्रविकाशयंती दीपप्रभा स्पटिकरत्नघटस्थितेव स्निग्धद्विजत्वग्नखरोमकेशाच्छाया सुगंधा च महीसमुत्था तुष्ट्यर्थलाभाभ्युदयान्करोति धर्मस्य चाह्न्यहनि प्रवृद्धिं स्निग्धा सिता च हरिता नयनाभिरामा सौभाग्यमार्दवसुखाभ्युदयान्करोति सर्वार्थसिद्धिजननी जननीव चाप्याच्छाया फलं तनुभृतां शुभमाददाति चंडाधृष्या पद्महेमाग्निवर्णा युक्ता तेजोविक्रमैः सप्रतापैः आग्नेयीति प्राणिनां स्याज्जयाय क्षिप्रं सिद्धिं वांछितार्थस्य धत्ते मलिनपरुषकृष्णा पापगंधानिलोत्था जनयति च वधबंधव्याध्यनर्थार्थनाशं स्फटिकसदृशरूपा भाग्ययुक्तात्युदारा निधिरिव गगनोत्था श्रेयसां स्वच्छवर्णा २१ अत्र च वायव्यां छायां वर्जयित्वा सर्वा एव च्छायास्तु शुभमशुभं फलमुक्तं न कथं शुभफलेयमशुभफलेयमिति तद्दशाज्ज्ञायते तत्तामंतरात्मनः स्वरूपं मालिन्याह शुभफलमिति शुभफलंदद्यात्स्यःसु

भफलदः शुभफलदस्य ग्रहस्य या दशा तस्यां अंतरात्मा स्वदेहस्थः परमात्मा चित्स्वरूपः तादृगेव शुभो भवति पुरुषस्य तस्य च छायादर्शितग्रहो दशाकाले बहुविधमनेकप्रकारं सौख्यं सुखं स्वभावं अर्थागमं धनलाभं च जनयत्युत्पादयति अर्थादेवाशुभदशायां पुरुषस्यांतरात्माप्यशुभो भवति तत्र छाया दर्शितग्रहजा वा तादृगेव फलदात्री चासौख्यमनर्थागमं च बहुप्रकारं जनयति मिश्रायां मिश्रा च या छायायां वक्ष्यति निमित्तानुचरं सूक्ष्मं देहेंद्रियमनुत्तरम् तेनोत्थं तत्शरीरस्थं त्रिकालफलविभूणाम् प्रीतये न मनोनार्थे नासिद्धा याभिनंदति तस्मात्सर्वात्मना यातुरनुमेयं यथा मनः शुभाशुभानि सर्वाणि निमित्तानि स्युरेकतः एकतश्च मनः शुद्धि स्ताद्विशद्धिर्जयावहा इति कथितफलविपाकैरिति ग्रहाणां दशास्वरूपाणि फलानि शुभान्यशुभानि चाकथितान्युक्तानि तानि यः पुरुषो भुंक्ते तस्य पुरुषस्य तद्ग्रहदशा वर्तते इ-

शुभफलददशायां तादृगेवांतरात्मा बहुजनयति पुंसां सौख्यमर्थागमं च
कथितफलविपाकैस्तर्कयेद्वर्तमानां परिणमतिफलोक्तिः स्वप्नचिंतास्ववीर्यैः २२

निर्ज्ञेयं एतदुक्तं भवति यादृशं फलं शुभमशुभं वा पुरुषस्योपलभ्यते तच्च यस्य ग्रहस्य दशायां पठितं सा तस्य दशा नरस्य वर्तत इति ज्ञेयं एवं वर्तमानां दशां तर्कयेदूहयेदित्यर्थः एवं छायावशेनांतरात्मावशेन फलपंक्तिवशेन वा गणितस्य जातकस्य वर्तमानां दशां वदेत् अथ सौरदशायामशुभायां व्यंगत्वमुक्तं न च शुभायां अशुभायामप्यनैकेषां व्यंगत्वं दृष्टं शुक्रदशायां शुभायां निधिप्राप्तिरुक्ता न च सापि दृष्टा तदर्थमाह परिणमतिफलोक्तिरिति अवीर्यैः बलहीनैर्ग्रहैः फलानि यानि शुभान्यशुभानि वा दत्तानि तत्फलोक्तिः फलप्राप्तिः स्वप्ने स्वप्नावस्थायां परिणमत्यनुभूयते चिंतायां मनोरथेन वेति केचिच्छुभफलदशायां तादृगेवांतराख्या इति पठंति पठित्वैवं व्याचक्षते यथा शुभायां दशायामंतराख्यांतर्दशा शुभा यदि भवति तदा बहु जनयति पुंसां सौख्यमर्थागममिति अर्थादेवाशुभायां दशायामशुभांतर्दशा असौख्यमन

र्थोगमंचबहुजनयति अनेनव्याख्यानेनशुभायामशुभायांचशुभाशुभानिभवंतिमिश्रफलंप्रयच्छंति नचैतदिष्यते यस्मादुक्तं एकर्क्षगोर्द्धमपहृत्यदद्यातिनुस्वमिति अत्रदशापतेःफलमपहृत्यांतर्दशापतिरेवस्वंफलंददातीतितेयं अन्यथापहृत्येतिनिरर्थकंस्यादिति तस्मात्पूर्वपाठःश्रेयान्द्वितीयःप्रमादपाठः प्रथमपाठेनविनाछायांशुभाशुभत्वमनुमातुंनशक्यतइति २२ अथैकग्रहदत्तयोःफलयोःसदृशयोर्नाशोभवति भिन्नदत्तानांबहूनामपिपंक्तिरेवभवतीत्येतद्वसंततिलकेनाह एकग्रहस्येति सर्वाण्येवफलानिनाशसवर्ज्यंस्वदशायांग्रहः प्रयच्छतीत्युक्तंतत्रैकेनग्रहेणयदासदृशंविरुद्धंफलद्वयंदत्तंभवतितस्मिन्नु सदृशेतुल्येद्वयोःफलविरोधेसतिनाशोभवति तस्यफलद्वयस्यवदेद्ब्रूयात् कीदृशंतद्विरुद्धमित्यत्रोच्यते यथाकश्चिद्ग्रहः कयापियुक्त्यादशाफलादिनासुवर्ण-

एकग्रहस्यसदृशेफलयोर्विरोधेनाशंवदेद्यदधिकंपरिपच्यतेतत् नान्यो
ग्रहः सदृशमन्यफलंहिनस्तिस्वांस्वांदशामुपगताः स्वफलप्रदाःस्युः २३

दोभवतिसएवान्ययायुक्त्याअष्टवर्गफलयोगफलदृष्टिफलभावफलानामन्यतमेनसुवर्णापहारीभवति तदाफलद्वयेपिसुवर्णसंबंधोस्तीतिसादृश्यंसुवर्णदानापहारिणाविति विरोधः एवमेकस्यग्रहस्यसदृशेफलयोः विरोधेनाशंवदेत् नसुवर्णलाभोनचापहानिरिति यदधिकंपरिपच्यते ततएकेनापिग्रहेणफलद्वयंदत्तमन्यरूपंतयोःमध्याद्यधिकंतत्परिपच्यतेभवति यथाकश्चिद्ग्रहोनिर्दिष्टप्रकारद्वयेनसुवर्णदः सएवप्रकारेणैकेनसुवर्णापहारीतदाद्वयोराधिकत्वाच्चदानस्य सुवर्णंददात्येवनापहरति अथवाप्रकारद्वयेनसुवर्णापहारी प्रकारेणैकेनसुवर्णदः तदापहरणस्याधिकत्वादपहरत्येव अथवासुवर्णापहारीरूप्यदस्य तथापिद्वे असदृशे असदृशत्वादधिकंपरिपच्यते सुवर्णापहारीरूप्यदश्चभवतीति केचित् नान्योग्रहइति अन्येनग्रहेणदत्तंसदृशंविरोध्यपिफलं

नान्योग्रहोपिहिनस्त्यपहरतियथाकश्चिद्ग्रहः सुवर्णदोभवत्यन्यश्चसुवर्णापहारी नदातत्रसुवर्णदःस्वदशायांसुवर्णंददाति स्वदशायांसुवर्णापहारीचापहरति अनेनैतदुक्तंभवति यथैकग्रहस्यसदृशफलयोर्विरोधेसमयन्नन्यान्तरेपिफलनाशंवदेत् अत्रविरुद्धयोरपिफलयोः नाशंवदेत् यतः सुवर्णदोग्रहःस्वामात्मीयांदशामुपगतः प्राप्तः सुवर्णलाभंकरोति सुवर्णापहारीस्वदशामुपगतःप्राप्तः सुवर्णमपहरतिएतदष्टकवर्गफलंविनाशयतस्तत्रैकस्यग्रहःस्यफलसदृशयोरपितुल्यसंख्ययोः फलयोर्नाशोभविष्यतितथात्वभविष्यति तथातत्रैवप्रतिपादयिष्यामइति २३ इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौदशान्तर्दशाऽध्यायोऽष्टमः ८ अथाष्टकवर्गाध्यायोव्याख्यायते तत्रान्तर्दशाफलमिति पूर्वमेवोक्तंतत्प्रदर्श्याधुनास्थिरस्या

इतिश्रीभट्टोत्पलविरचितायांबृहज्जातक
विवृत्तौदशान्तर्दशाऽध्यायोऽष्टमःसमाप्तः ८

ष्टकवर्गफलस्यावसरः लग्नाष्टमाः सर्वएवग्रहास्तेभ्यः सकाशादेकैकस्यग्रहस्यचारवशाद्राशौविचरतः शुभाशुभंफलमष्टकवर्गेनिरूप्यतेतत्रादावेवार्काष्टकवर्गंशार्दूलविक्रीडितेनाह स्वादर्कइति यत्रराशौजन्मसमयेपुरुषस्यादित्यः स्थितः सएवतस्यस्वस्थानमुच्यते एवमन्येषामपिग्रहाणांज्ञेयम् योयत्रव्यवस्थितः सएवतस्यस्वस्थानंतस्मात्स्वादर्कः प्रथमायबंधुनिधनद्व्याज्ञातपोद्यूनगः प्रथमैकादशचतुर्थाष्टमद्वितीयदशमनवमसप्तमेषु १।
११ ४ ८ २ १० ९ ७ एतेषांस्थानानांसंज्ञाः प्रागेवव्याख्याताः अतः पुनर्नोच्यन्ते एषामकन्यासएवव्याख्यानमितिसर्वत्रज्ञेयम् एतेषुस्थानेषुगतः स्वात्स्थानादर्कः सूर्यः शुभः इष्टफलदः अर्थादेवान्यस्थानेष्वशुभ अनिष्टफलदः यतोवक्ष्यति इतिनिगदितमिष्टनेष्टमन्यद्विलेवंसर्वत्रज्ञेयम् चक्रा-

स्वादिवक्रादंगारकात्स्वादात्मीयस्थानादिवशुभः येष्वेवस्थानात्तेष्वेवांगारकात् १।१।४।८।२।१०।९।७ एतेष्वर्कोभौमाच्छुभः तद्वदेवरविजात्सूर्यपुत्रात् तद्वदेवयेष्वेवस्थानेषुस्याच्छुभस्तेष्वेवसौरात् १।११।४।८।२।१०।९।७ एतेषुसौरादर्कः शुभइतिसर्वत्रानुवर्तते शुक्रात्स्मरांत्यारिषुस एवार्कः स्मरांत्यारिषुसप्तमद्वादशषष्ठेषुशुक्रात् शुभः ७।१२।६ जीवाद्धर्मसुतायशत्रुषु जीवाद्बृहस्पतिस्थानात् धर्मसुतायशत्रुषुनवमपंचमैकादशषष्ठेषुशुभः ९।५।११।६ दशत्र्यायारिगः शीतगोः शीतगोश्चंद्रात् दशत्र्यायारिगः दशतृतीयैकादशषष्ठगः शुभः १०।३।११।६ एतेष्वेवांत्यतपःसुतेषुचबुधात् शुभः एष्वेवप्रागुक्तेषुचंद्रस्थानेषु दशत्र्यायारिषुचशब्दात्तथांत्यतपःसुतेषु द्वादशनवपंचमेषुबुधाच्छुभः १०।३।११।६।१२।९।५ लग्नात्सबंध्व-

अथाष्टकवर्गाध्यायप्रारंभः स्वादर्कःप्रथमायबंधुनिधनद्व्याज्ञातपोद्यूनगो वक्रात्स्वादिवतद्वदेवरविजाच्छु
क्रात्स्मरांत्यारिषु जीवाद्धर्मसुतायशत्रुषुदशत्र्यायारिगःशीतगोरेष्वेवांत्यतपःसुतेषुचबुधाल्लग्नात्सबंध्वंत्यगः १

त्यगः सहशब्देनप्रागुक्तानिचंद्रस्थानान्यनुकृष्यंते तेनांत्यतपःसुतस्थानानीतिसर्वत्रपरिभाषा तेनैतेषुचंद्रस्थानेषु दशत्र्यायारिषुसबंध्वंत्येषुचतुर्थद्वादशसहितेषुगतोलग्नादुदयाच्छुभः १०।३।११।६।४।१२ तथाचसत्यः स्वात्स्थानाद्दिवसकरस्तृतीयषष्ठांत्यभांत्रिकोणानिहित्वेष्टः २।६।१२।५ एतानिवर्जयित्वातान्येववराहमिहिरदर्शितानिस्थानानिजातानि १।११।४।८।२।१०।९।७ सौरस्यतुसहजारिसुतांत्यसंज्ञानिहित्वेष्टइत्यनुवर्तते ३।६।५।१२ एतानिवर्जयित्वा तान्येववराहमिहिरदर्शितानिस्थानानिजातानि १।११।४।८।२।१०।९।७ चंद्राद्दशमैकादशतृतीयषष्ठोपगः शुभः सूर्यः १०।११।३।६ जीवात्त्रिकोणयोः षष्ठस्तथैकादशश्चेष्टः ९।५।६।११ प्रथमद्वितीयसप्तमचतुर्थनैधनगतान् विनाराशीन् सौम्यादिष्टः सूर्यः

१।२।७।४।८ एतानिवर्जयित्वातान्येववराहमिहिरप्रदर्शितानिस्थानानिजातानि १०।३।११।६।१२।९।५ कुजस्तुसदृशोर्कपुत्रेण १।११। ५।८।२।१०।२।९ दशमैकादशषष्ठतृतीयगोन्त्यम्बुतुर्यगोलग्नात् १०।११।६।३।१२।४ शुक्रस्थानाद्रविःषट्सप्तमद्वादशेषुभवतीष्टः ६।७।१२ तथाच सूक्ष्मजातके केंद्रायाष्टद्विनवस्वर्कः स्वाद्यार्केभौमयोश्चशुभः षट्सप्तान्त्येषुसितान्षडायुर्धीधर्मगोजीवात् उपचयगोर्कश्चंद्रादुपचयनवमांत्यधीयुतः सौम्यात्लग्नादुपचयबंधुव्ययवस्थितः शोभनःप्रोक्तः इतिश्र्यादित्याष्टकवर्गः १ अथचंद्राष्टकवर्गंशार्दूलविक्रीडितेनाह लग्नात्षडिति-लग्नात्षट्त्रिदशायगः शशीचंद्रः लग्नादुदयात्षडित्यादिगः षष्ठतृतीयदशमैकादशेषुस्थानेषुशुभः ६।३।१०।११ सधनधीधर्मेषुचाराच्छशीसह

लग्नात्षट्त्रिदशायगःसधनधीधर्मेषुचाराच्छशीस्वात्सास्तादिषुसाष्टसप्तसुरवेःषट्त्र्यायुधीस्थोय
मात् धीत्र्यायाष्टमकंटकेषुशशिजाज्जीवाद्व्ययायाष्टगःकेंद्रस्थश्चसितात्तुधर्मसुखधीत्र्यायास्पदा
भगगः २

शब्देनप्रागुक्तान्येवस्थानान्यनुक्षिप्यंते शशीचंद्रः आराद्भौमादेष्वेवषट्त्रिदशायेषु धनधीधर्मसहितेषु द्वितीयपंचमनवमयुक्तेषु शुभः ६।३।१०।११।२।५।९ स्वात्सास्तादिषुस्वात्मीयस्थानादेष्वेवषट्त्रिदशायेषुसास्तादिषुसप्तमप्रथमसहितेषुशुभः शशी ६।३।१०।११।७।१ साष्टसप्तसुरवरादित्यादेष्वेवस्थानेषुसाष्टसप्तसुअष्टमसप्तमसंयुक्तेषु ६।३।१०।११।८।७ शुभः षट्त्र्यायधीस्थोयमात् यमात्सौरात् षट्त्र्यायधीस्थः षष्ठस्तृतीयैकादशपंचमस्थानस्थः शुभः ६।३।११।५ धीत्र्यायाष्टमकंटकेषुशशिजात् शशिजाद्बुधाद्बुधस्थानाद्धीत्र्यायाष्टमकंटकेषु पंचमतृतीयैकादशाष्टमकेंद्रेषुशुभः शशी ५।३।११।८।१।४।७।१० जीवाद्व्ययायाष्टगः केंद्रस्थश्चजीवाद्गुरुस्थाना

द्व्यायायाष्टगः केंद्रस्थश्च द्वादशैकादशाष्टमकेंद्रस्थश्च शुभश्चंद्रः १२।११।८।१।४।७।१० सितात्तु धर्मस्मरवधीश्चायास्पदानंगगः सितात्शुक्राद्धर्मेसुखधीश्चायास्पदानंगगेषु नवमचतुर्थपंचमतृतीयैकादशदशमसप्तमेषु शुभः ९।४।५।३।११।१०।७ तथा च सत्यः षष्ठैकादशसप्तमतृतीयदशमादिसंस्थितश्चंद्रः स्यादिष्टः ६।११।७।३।१०।१ सौरस्य तु सहजारिसुतायसंस्थितश्च शुभः ३।६।५।११ रिपुनिधनसहजसप्तमदशमैकादशसंस्थितः सूर्यात् ६।८।३।७।१०।११ लग्नात्तृतीयदशमारिलाभसंस्थितः शुभश्चंद्रः ३।१०।६।११ ज्ञात्सुतकर्मधनलाभधर्मरिपुराशिगः कुजादिष्टः ३।५।१०।२।११।९।६ जीवात्तृतीयषष्ठद्विनवमसुतवर्जितेष्विष्टः ३।६।२।९।५ एतानि वर्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जा

वक्रस्तूपचयेष्विनात्सतनयेष्वाद्याद्यादिकेषूदयाच्चंद्राद्दिग्विफलेषु केंद्रनिधनप्राप्त्यूर्ध्वगः स्वाच्छुभः धर्मा
याष्टमकेंद्रगोऽर्कतनयाज्ज्ञात्षट्त्रिधीलाभगः शुक्रात्षड्व्ययलाभमृत्युषु गुरोः कर्मान्त्यलाभारिषु २

तानि १२।११।८।१।४।७।१० प्रथमद्वितीयषष्ठाष्टमांत्यवर्ज्येषु भार्गवादिष्टः १।२।६।८।१२ एतानि वर्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जातानि ३।४।५।७।९।१०।११ षष्ठधननवमपश्चिमवर्ज्येषु बुधात्प्रशस्तश्च ६।२।५।९।१२ एतानि वर्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जातानि १।३।४।७।८।१०।११ तथा च सूक्ष्मजातके शस्त्युपचयेषु लग्नात्साद्यमुनिः स्यात्कुजात्सनवधीस्थः सूर्यात्साष्टस्मरगस्त्रिषडायसुतेषु सूर्यसुतात् ज्ञात्केंद्रत्रिसुतायाष्टमगः गुरोर्व्ययभवाष्टकेंद्रेषु त्रिचतुःसुतनवदशसप्तमायगश्चंद्रमाः शुभः शुक्रात् इति चंद्राष्टकवर्गः २ अथ भौमाष्टकवर्गं शार्दूलविक्रीडितेनाह वक्रस्तूपचयेष्विनादिति वक्रोंऽगारकः इनादादित्यादुपचयेषु त्रिषडेकादशदशमेषु सतनयेषु

पंचमस्थानसहितेषु शुभः ३।६।१०।११।५ आद्याधिकेषूदयाद्दुकः शुभः उदयाल्लग्नादुपचयेष्वाद्याधिकेषु प्रथमस्थानयुक्तेषु शुभः ३।६।१०।११।१ चंद्राद्दिग्विफलेषु चंद्रस्थानादुपचयेषु दिग्विफलेषु दशमस्थानफलवर्जितेषु तेषु दशमस्थानेन शुभं नाप्यशुभं फलं करोतीत्यर्थः ३।६।११ एतेषु शुभः केंद्रनिधनप्राप्त्यर्थगः स्वाच्छुभः स्वादात्मीयस्थानात्केंद्रनिधनप्राप्त्यर्थगः केंद्राष्टमैकादशद्वितीयगः शुभः १।४।७।१०।८।११।२ धर्मायाष्टमकेंद्रगोर्कतनयात् सौरात् धर्मायाष्टमकेंद्रगः नवमैकादशाष्टमकेंद्रगतः शुभः ९।११।८।१।४।७।१० ज्ञात्षट्त्रिधीलाभगः ज्ञात् बुधात् षट्त्रिधीलाभगः षष्ठतृतीयपंचमैकादशगतः शुभः ६।३।५।११ शुक्रात् षट्व्ययलाभमृत्युषु शुक्रस्थानात् षष्ठद्वादशैकादशाष्टमषु शुभः ६।१२।११।८ गुरोः कर्मान्त्यलाभारिषु गुरोः जीवात् दशमद्वादशैकादशषष्ठेषु शुभः १०।१२।११।६ तथा च सत्यः द्वादशपंचमनवमतृतीयषष्ठान्विना कुजास्त्विष्टः स्वस्थानात् १२।५।९।३।६ एतानि वर्जयित्वा नान्येव वराहमिहिरपठितानि स्थानानि जातानि १।४।७।१०।८।११।२ सौरस्य तु नवमाभ्याधिकेषु अनर्थेषु एष्वेव द्वितीयस्थानं विना नवमाभ्याधिकेषु ११।८।९।१।४।७।१० भौमस्तृतीयपंचमदशमैकादशरिपुस्थितः सूर्याद्दिष्टः ३।५।१०।११।६ चंद्रान्मध्यमो दशमषष्ठसहजलाभेषु १०।३।६।११ दशमैकादशषष्ठान्त्यगः कुजः भूमिजः पूजितो गुरुस्थानात् १०।११।६।१२ षष्ठैकादशपंचमतृतीयगः शुभः सौम्यात् ६।११।५।३ अंत्यायाष्टमषष्ठगः कुजः पूजितः शुक्रात् १२।११।८।६ प्रथमैकादशदशारिपुसहजोपगतश्च होरायाः १।११।१०।६।३ तथा च स्वल्पजातके भौमः स्वाद्याय स्वाष्टकेंद्रगः व्यायषट्सुतेषु बुधात् जीवात् दशायशत्रुव्ययेष्विनादुपचयस्थितेषूदयादुपचय तनुषु त्रिषड्डायेष्विंदुतः समो दशमः चंद्रस्थानादुपचयेषु दशमवर्जितेषु शुभः दशमे शुभोपि न भवति ३।६।११ भृगुतोंत्यषड्डायेषु १२।६।११ असितात्केंद्रायनववसुषु १।४।७।१०।११।८।९ इति भौमाष्टकवर्गः अथ बुधस्याष्टकवर्गं शार्दूलविक्रीडितेनाह द्याद्याया

ष्टतपइति इंदुजो बुधः भृगुजाच्छुक्रात् द्व्याद्यायाष्टतपःस्मरखेषु द्वितीयप्रथमैकादशाष्टमनवमचतुर्थेषु सव्यात्मजेषु तृतीयपंचमयुक्तेषु शुभः २।१।११।८।९।४।३।५ साज्ञास्तेषु यमारयोः एष्वेव द्व्याद्यायाष्टतपःसुखेषु साज्ञास्तेषु दशमसप्तमसहितेषु यमारयोः शनैश्चरांगारकयोः यमात् २।१।११।८।९।४।१०।७ आराच्छुभः २।१।११।८।९।४।१०।७ व्ययरिपुप्राप्त्यष्टगो वाक्पतेः वाक्पतेः जीवात् द्वादशषष्ठैकादशाष्टमगतः शुभः १२।६।११।८ धर्मायारिसुतव्ययेषु सवितुः सूर्यान्नवमैकादशषष्ठपंचमद्वादशेषु शुभः ८।११। ६।५।१२ स्वात्साद्यकर्मत्रिगः स्वात् आत्मीयस्थानादेष्वेव धर्मादिषु स्थानेषु साद्यकर्मत्रिकेषु प्रथमदशमतृतीयसहितेषु गतः शुभः ८।११। ६।५।१२।१।१०।३ षट्स्वायाष्टस्मरवास्पदेषु हिमगोश्चंद्रात् षष्ठद्वितीयैकादशाष्टमचतुर्थदशमेषु शुभः ६।२।११।८।४।१०

द्व्याद्यायाष्टतपःस्मरखेषु भृगुजात्सव्यात्मजेष्विंदुजः साज्ञास्तेषु यमारयोर्व्ययरिपुप्राप्त्यष्टगो वाक्पतेः
धर्मायारिसुतव्ययेषु सवितुः स्वात्साद्यकर्मत्रिगः षट्स्वायाष्टसुखास्पदेषु हिमगोः साद्येषु लग्नाच्छुभः ४

साद्येषु लग्नाच्छुभः एष्वेव षष्ठादिषु स्थानेषु साद्येषु प्रथमस्थानसहितेषु लग्नाच्छुभः ६।२।११।८।४।१०।१ तथाच सत्यः स्वात्स्थानाच्छशितनयो द्वितीयसप्तमचतुर्थनिधनानि हित्वेष्टः २।७।४।८ एतानि वर्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जातानि १।३।५।६।९।१०।११।१२ सूर्यस्तु लाभारिसुतान्त्यनवमस्थः ११।६।५।१२।९ स्मृतसद्गजषष्ठपाश्चिमवर्जितेषु मंडलेषु बुधस्त्विष्टः सौराराभ्यां स्थानाद्विकल्प्याच्छास्त्रनियमेन ७।३।६।१२ एतानि वर्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जातानि १।११।४।२।८।९।१०।७ लग्नाच्छुक्रो येषु प्रशस्यते तेषु चंद्रजन्मस्य येषु स्थानेषु लग्नाच्छुक्रः शुभस्तेष्वेव स्थानेषु शुक्रस्थानाद्बुधः शुभो भवति शुक्राष्टक

वर्गः पठ्यते लग्नादिष्टशक्रोरिपुषष्टमदशमपञ्चिमान्हित्वा ६।७।१०।१२ एतानिस्थानानिवर्जयित्वातान्येववराहमिहिरपठितानिस्थानानिजा·
तानि १।२।३।४।५।८।९।११ एतेषुस्थानेषुशक्रस्थानाच्छुभोबुधः अंत्योयात्याष्टमशत्रुभेषुजीवाद्बुधः श्रेष्ठः १२।११।८।६ दशमस्वलाभषष्ठाष्टमेषुचंद्राद्बुधश्चतुर्थे
च १०।२।११।६।८।४ लग्नाच्चेष्टोद्यूनात्यनवमसुतसहजवर्ज्येषु ७।१२।९।५।३ एतानिवर्जयित्वातान्येववराहमिहिरपठितानिस्थानानिजातानि २।६।१०।
११।८।४।१ एतेषुलग्नाच्छुभः तथाचस्वल्पजातकेसौम्योंत्येषट्नवायात्मजेष्विना १२।६।९।११।५ स्वात्त्रितनु ३।१ दशायुतेषु १० चंद्राद्द्विरिपुदशाया
ष्टस्वरवगतः २।६।१०।११।८।४ सादिषुविलग्नात् प्रथमस्वरवायद्विनिधनधर्मेषु १।५।११।२।८।९ सितात्त्रिधीसमन्तेषु ३।५ साशास्मरेषु १०।
७ सौरारयोर्व्ययायरिपुवस्वषु १२।११।६।८ गुरोः इतिबुधस्याष्टकवर्गः ४ अथजीवस्याष्टकवर्गं शार्दूलविक्रीडितेनाह दिगिति दिक्स्वाद्या
ष्टमदायबंधुषु कुजाद्गिराइति अंगिराजीवः कुजादंगारकाद्दशमद्वितीयप्रथमाष्टमसप्तमैकादशचतुर्थेषु शुभः १०।२।१।८।७।११।४ स्वात्सत्रि·
केष्वंगिराः स्वादात्मीयस्थानादंगिराः गुरुः पूर्वोक्तेषु दिक्स्वाद्यादिषु सत्रिकेषु तृतीयस्थानसहितेषु शुभः १०।२।१।८।७।११।४।३ सूर्यात्सत्रिनवेषु गु
रुः शुभः सूर्यादादित्यादेष्वेवस्थानेषु प्रागुक्तेषु सतपस्तृतीयेषु तृतीयनवमस्थानाधिकेषु शुभः १०।२।१।८।७।११।४।३।९ धीस्वनवदिग्लाभारिगो
भार्गवात् भार्गवाच्छुक्रात्पंचमद्वितीयनवमदशमैकादशषष्ठेषु शुभः ५।२।९।१०।११।६ जायायार्थनवात्मजेषु हिमगोश्चंद्रात् सप्तमैकादशद्वितीय
नवमपंचमेषु शुभः ७।११।२।९।५ मंदात्त्रिषड्धीद्व्ययेमंदात्सौरात् तृतीयषष्ठपंचमद्वादशेषु शुभः ३।६।५।१२ दिक्धीषट्स्वसुखायपूर्वन
गोत्ताद्गुरुः ज्ञाद्बुधाद्दशमपंचमषष्ठद्वितीयचतुर्थैकादशप्रथमनवमेषु शुभः १०।५।६।२।४।११।१।९ सस्मरश्चोदयात् उदयाल्लग्नादेष्वेवस्थानेषु सस्मरेषु स
प्तमस्थानसहितेषु शुभः १०।५।६।२।४।११।१।९।७ तथाचसत्यः येषु बुधस्य सशांकस्तेषुगुरुः पुष्कलस्वकात्स्थानात् चंद्राष्टकवर्गः पठ्यते षष्ठध·

ननवमपश्चिमवर्ज्येषुबुधात्मशस्तस्थ ६।२।९।१२ एतानिस्थानानिवर्जयित्वाजातानि १।३।४।५।७।८।१०।११ अत्रपंचमद्वितीययोःस्थानयोः
वराहमिहिरेणसहभेदः अत्रचवराहमिहिरेणयवनेश्वरमतमंगीकृत्यद्वितीयस्थानस्यशुभत्वमंगीकृतंतथाचयवनेश्वरः स्वस्थानगःस्थानसुवर्णमान-
प्राप्तिंद्वितीयेचगुरुःकरोति एवंद्वितीयेचशुभः विवाददैन्याध्वगदास्त्रिकोणेतस्मात्पंचमेनशुभः एष्वेवार्कादिष्टोनवमाभ्यधिकेषुभवनेषु १।३।४।५।७।८।
९।१०।११ अत्रापिपंचमद्वितीययोःवराहमिहिरेणयवनेश्वरमतमंगीकृतंतथाचयवनेश्वरःस्थानेरवेर्बुद्धिसुतघ्नतांकरोतिजीवोधनदोद्वितीये एवंद्विती-
येशुभत्वाद्वराहमिहिरेणांगीकृतंरुजापीडाध्वदारिद्र्यसूरिःस्यात्पंचमेनशुभः आत्मसहजेषुसहजभवनं विनाकुजाच्चगुरुरिष्टः १।४।५।७।१०।११अ

दिक्स्वाद्याष्टमद्यायबंधुषु कुजात्स्वात्सत्रिकेष्वंगिराः सूर्यात्सत्रिनवेषुधीस्वनवदिग्लाभारिगोभार्गवात्
जायायार्थनवात्मजेषुहिमगोर्मंदात्त्रिषड्धीव्ययेदिग्धीषट्स्वस्वकरधायपूर्वनवगोज्ञात्सस्मरस्वोदयात् ५

त्रापिपंचमद्वितीययोः वराहमिहिरेणसहभेदः अत्रापियवनेश्वरःगुरुःकुजस्थानगतोऽरिहंताद्वितीयगस्तुद्युतिहर्षदाता तस्माद्वराहमिहिरेणद्विती-
यस्थानमंगीकृतंजामित्रगोव्याध्यरिशोककारीएवंसप्तमस्थानंनांगीकृत द्वादशरिपुपंचमतृतीयसंज्ञेशुभः सौरात् १२।६।५।३ दशमैकादशनवम-
द्वितीयषट्पंचमेषुभृगोःजीवइष्टः १०।११।९।२।६।५ चंद्राज्जामित्रनवमसुतलाभकोशर्क्षेषुगुरुःशुभः ७।९।५।११।२ प्रथमद्वितीयपंचमचतुर्थ-
धर्मारिलाभदशमस्थःसौम्याद्गुरुरिष्टः १।२।५।४।९।६।११।१० जीवोलग्नाद्देवपिष्टःसजामित्रः १।२।५।४।९।६।११।१०।७ तथाचस्वल्पजातके-
जीवोभौमाद्व्ययायाष्टकेंद्रगो२।११।८।१।४।७।१० र्कात्सधर्मसहजेषु २।११।८।१।४।७।१०।९।३ स्वात्सत्रिकेषु २।११।८।१।४।७।१०।३

शक्रान्नवदशलाभस्वधीरिपुषु १।१०।११।२।५।६ शशिनःस्मरत्रिकोणार्थलाभग ७।९।५।२।११ स्त्रिरिपुधीव्ययेषुयमात् ३।६।५।१२ नवादिकुसुखायधीस्वायशत्रुषुज्ञा १।१०।४।१।५।२।११।६ त्सकामगोलग्नात् १।१०।४।१।५।२।११।६।७ इतिजीवाष्टकवर्गः ५ अथशुक्रस्याष्टकवर्गंशार्दूलविक्रीडितेनाह लग्नादिति सितः शुक्रः लग्नादासुतलाभरंध्रनवगः शुभः लग्नात्प्रभृति सुतस्थानपंचमं यावत्तथालाभरंध्रनवगःसितःशुभस्तेषु प्रथमद्वितीयतृतीयचतुर्थपंचमैकादशाष्टनवमेषु लग्नाच्छुक्रःशुभः १।२।३।४।५।११।८।९ सांत्यः शशांकात्सितः शशांकाच्चंद्रादेष्वेवस्थानेषु सांत्येषु सव्ययेषु द्वादशस्थानाधिकेषु शुभः १।२।३।४।५।११।८।९।१२ स्वात्साज्ञेषुस्वादात्मीयस्थानादेष्वेवस्थानेषुसाज्ञेषु दशमस्थानाधिके-

लग्नादासुतलाभरंध्रनवगः सांत्यः शशांकात्सितः स्वात्साज्ञेषुसुखत्रिधीनवदशा छिद्राप्तिगः सूर्यजात्
रंध्रायव्ययगोरवेर्नवदशप्राप्त्यष्टधीस्थोगुरोर्ज्ञाद्धीत्र्यायनवारिगस्त्रिनवषट्पुत्रायसांत्यः कुजात् ६

षु शुभः १।२।३।४।५।११।८।९।१० सुखत्रिधीनवदशाच्छिद्राप्तिगः सूर्यजात् सौराच्चतुर्थतृतीयपंचमनवमदशमैकादशेषु शुभः ४।३।५।९।१०।८।११ रंध्रायव्ययगोरवेः रवेरादित्यादष्टमैकादशद्वादशेषु शुभः ८।११।१२ नवदशप्राप्त्यष्टधीस्थोगुरोः जीवान्नवमैकादशाष्टमपंचमेषु शुभः ९।१०।११।८।५ ज्ञाद्धीत्र्यायनवारिगः ज्ञात् बुधात् पंचमतृतीयैकादशनवमषष्ठेषु शुभः ५।३।११।९।६ त्रिनवषट्पुत्रायसांत्यः कुजात् कुजाद्भौमात्तृतीयनवमषष्ठपंचमैकादशेषु सांत्येषु अंत्येन द्वादशेन सहितेषु स्थानेषु शुक्रः शुभः ३।९।६।५।११।१२ तथाचसत्यः स्वस्थानाद्भृगुतनयः षट्सप्तमपश्चिमेतरेष्विष्टः ६।७।१२ एतानिवर्जयित्वातान्येव वराहमिहिरपठितानिस्थानानिजातानि १।२।३।४।५।८।९।१०।

११ रिपुपत्नीकर्मवर्ज्येषुसितश्चंद्रात्तुपुष्कलोन्नृणां ६।७।१० एतानिवर्जयित्वातान्येववराहमिहिरपठितानिजातानि १।२।३।४।५।९।८।११।१२ अंत्योपान्त्या
ष्टमगःसूर्यादिष्टस्तुभार्गवःकथितः १२।११।८ भौमादंत्योपान्त्यतृतीयनवमसुतरिपुशशिगश्चैवं १२।११।३।९।५।६ दशमैकादशनिधनत्रिकोणसंस्थो
भृगुर्जीवात् १०।११।८।५।९ सौम्यात्सुतधर्मलाभसहजारिसंज्ञेषु ५।९।११।३।६ लग्नादिष्टःशुक्रोरिपुसप्तमदशमपश्चिमान्हित्वा ६।७।१०।१२ ए
तानिवर्जयित्वातान्येववराहमिहिरपठितानिस्थानानिजातानि १।२।३।४।५।८।९।११ आद्याद्द्वितीयरिपुसप्तमांत्यवर्ज्येषु सौराच्च १।२।
६।७।१२ एतानिवर्जयित्वातान्येववराहमिहिरपठितानिस्थानानिजातानि ३।४।५।८।९।१०।११ तथाचस्वल्पजातके शुक्रोलग्नादासुत

मंदःस्वात्त्रितयायशत्रुषुशुभःसाज्ञांत्यगोभूमिजात्केंद्रायाष्टधनेष्विनादुपचयेष्वाद्येषुरवेश्चोदयात्
धर्मायारिदशांत्यमृत्युषुबुधाच्चंद्रात्त्रिषड्लाभगःषष्ठायांत्यगतःसितात्सुरगुरोःप्रास्यस्यधीशत्रुषु ७

नवाष्टलाभेषु १।२।३।४।५।९।८।११ सव्ययश्चंद्रात् स्वात्स्वात्केषुरविसुतात्त्रिधीस्वरवान्तिर्नवकर्मरंध्रेषुवस्वंत्यायेष्वर्कान्नवादिग्लाभाष्टधीस्थितो
जीवात्त्रात्त्रिसुतनवायारिष्वायसुतापोक्लीमेषुकुजादिनिशुक्राष्टकवर्गः ६ अथसौरस्याष्टकवर्गः शार्दूलविक्रीडितेनाह मंदः स्वात्त्रिसुतायशत्रुषुशुभ
इति मंदःसौरःस्वादात्मीयस्थानात्तृतीयपंचमैकादशषष्ठस्थानेषुशुभःसाज्ञांत्यगोभूमिजात् भूमिजाद्भौमादेष्वेवप्रागुक्तेषुसाज्ञांत्येषुगतः दशम
द्वादशसहितेषुशुभः ३।५।११।६।१०।१२ केंद्रायाष्टधनेष्विनात् इनात्सूर्यात्केंद्रैकादशाष्टमद्वितीयेषुशुभः १।४।७।१०।११।८।२ उपचयेष्वाद्येषुरवेश्चो
दयात् उदयाल्लग्नात्तृतीयषष्ठदशमैकादशप्रथमचतुर्थेषुशुभः ३।६।१०।११ धर्मायारिदशांत्यमृत्युषुबुधात् बुधाद्बुधस्थानान्नवमैकादशषष्ठ

दशमद्वादशाष्टमेषुशुभः ९।११।६।१०।१२।८ चंद्रात्त्रिषडायगः चंद्रस्थानात्तृतीयषष्ठैकादशेषुशुभः ३।६।११ षष्ठांत्यायगतःसितात् शुक्रस्था-
नात् षष्ठद्वादशैकादशेषुशुभः ६।१२।११ स्फुरद्गुरोः प्राप्त्यंत्यधीशत्रुषुस्फुरद्गुरोः जीवादेकादशद्वादशपंचमषष्ठेषु शुभः ११।१२।५।६ तथान्वसत्यः
एकादशपंचमषष्ठगोर्कजःस्वात्स्वशुभस्तृतीयेच ११।५।६।३ स्थानात्त्रिशाकरस्यतु पंचमचर्य्यस्वर्थेष्वेव १।३।६ येष्वात्मनोरविस्तेषुभास्करिस्ताद्दृशो
रविस्थानात् आदित्याष्टकवर्गेपठ्यते स्वात्स्थानाद्दिवसकरस्तृतीयषष्ठांत्यभत्रिकोणानिहित्वेष्टः ३।६।१२।५।९ एतानिहित्वाजातानि १।२।४।७।८।१०
११।८ अत्रवराहमिहिरादभ्यधिकंनवमस्थानंतच्चयवनेश्वरविरोधित्वाद्वराहमिहिरेणेत्युक्तंतथाचयवनेश्वरः पापप्रवृत्तिंनवमेविधत्तइतिजीवादिष्टः
षट्पंचमपार्श्वमैकादशस्थस्य ६।५।१२।११ भ्रातृसुतविजयलाभात्ययकर्मगः पुष्कलांनृणां भौमस्थानात्सौरिः ३।५।६।११।१२।१० षष्ठांत्योपा
स्यगः शुक्रात् ६।१२।११ दशमैकादशषष्ठाष्टमांत्यनवमोऽर्कजः सौम्यात् १०।११।६।८।१२।९ स्थानादिष्टोलग्नाच्छुभस्तु लग्नाद्यथासूर्यः
आदित्याष्टकवर्गेपठ्यते दशमैकादशषष्ठतृतीयगोलग्नगश्चतुर्थश्चलग्नात् १०।११।६।३।१।४ तथाचस्वल्पजातके स्वात्सौरास्त्रिसुतायारि-
गः ३।५।११।६ कुजादंत्यकर्मसहितेषु ३।५।११।६।१२।१० स्वायाष्टकेंद्रगोर्का २।११।८।१।४।७।१० शुक्रात्षष्ठात्यलाभेषु ६।१२।११ त्रिषडाय-
गः शशांका ३।६।११ दुदयात्सस्फुरवाद्यकर्मगो ३।६।११।४।१।१० थगुरोःसुतषट्व्ययायगो ५।६।१२।११ जाद्व्ययायारिपुदिङ्नवाष्टस्थः १२।११।६।
१०।९।८ इतिसौरस्याष्टकवर्गः ७ अथाष्टकवर्गफलनिरूपणार्थमादिन्याह इतीतिनिगदितमिति इत्यनेनोक्तेनप्रकारेण यन्निगदितमुक्तं तदिष्टं-
नेष्टमन्यत् यदन्यन्निगदितंतत्सर्वमनिष्टमशोभनम् एतदुक्तंभवति स्वादकः प्रथमायबंधुनिधनइत्यनेनपाठेनयान्युक्तानिस्थानानितेषांश्रेष्ठं-
फलं विशेषादधिकफलविपाकेएवमिष्टानिष्टयोः फलयोः विशेषासंशोधनादधिकमिष्यते तत्फलविपाकंभवति एतज्जन्मभात् जन्मकालेयत्रस्था

नेग्रहाः स्थिताः तस्मात्स्थानाच्छुभाशुभानि फलानि प्रयच्छंति न तथा कालाक्रांतराशितः एतदुक्तं भवति यानि शुभस्थानान्याचार्येण पठितानि तानि बिंदूपलक्षितानि कार्याणि यान्यशुभानि तानि रेखोपलक्षितानि ततइष्टानिष्टयोः विशेषमंतरे कृत्वा स्वशिष्टस्य फलस्य पक्तिरिति यत्र बिंद्वष्टकं जाततत्र शुभफलं संपूर्णं यत्र च षड्बिंदवस्तत्र पादोनफलम् यत्र चाबिंदुचतुष्टयं तत्रार्द्धफलं यत्र बिंदुद्वौ तत्र पादफलं अशुभफलस्यैवं रेखाभिः कल्पना कार्या तत्र चानिमिषपरमांशको विलग्ने इत्यत्र प्रयोगे जातस्यांगारकस्याष्टकवर्ग उदाहृयते तत्राचार्यपठितानि स्थानानि बिंदूपलक्षितानि कार्याणि अपठितानि अशुभानि स्थानानि रेखोपलक्षितानि कार्याणि तद्यथा ग्रहसंस्था मीनलग्नगतः शुक्रः मेषे द्वितीयस्थानेस्थोर्कः तृतीये वृषे चंद्रबु-

इतिनिगदितमिष्टंनेष्टमन्यद्विशेषादधिकफलविपाकंजन्मभात्तत्रदद्युः उपचयगृ
हमित्रस्वोच्चगैः पुष्टमिष्टंत्वपचयगृहनीचारातिगैर्नेष्टसंपत् ८ इत्यष्टकवर्गः ९

धौ पञ्चमस्थाने कर्कटस्थो जीवः अष्टमे तुलायां शनैश्चरः एकादशे मकरस्थो भौमः अनया ग्रहसंस्थया प्रदर्श्यते न्यासः वक्रस्तूपचयेष्विनात्सतनयेष्वाद्याधिकेषूदयाच्चंद्राद्दिग्विफलेषु केंद्रनिधनप्राप्त्यर्थगः स्वाच्छुभः धर्मायाष्टमकेंद्रगोर्कतनयाज्ज्ञात् षट्त्रिधीलाभगः शुक्रात्षड्व्ययलाभगः १२ मृत्युगुरोः कर्मांत्यलाभारिषु १ अष्टकुंडलिकान्यासः अथ शुभाशुभफलविशेषः क्रियते तत्र मेषे रेखापंचकं बिंदुत्रयं च जाते रेखात्रयं बिंदुत्रयं चापास्य द्वे रेखे जाते तस्मादेवंविधे योगे जातस्य सदैव चारवशान्मेषस्थोंगारकोष्टभागद्वयेनाशुभः वृषे रेखापंचकं बिंदुत्रयं जातम् रेखात्रयं बिंदुत्रयं चापास्य द्वे रेखे जाते तस्माद्गृहस्थो भौमोष्टभागद्वयेनाशुभो भवति मिथुने रेखापंचकं बिंदुत्रयं च जाते रेखात्रयं बिंदुत्रयं चोपास्य द्वे रे-

रवेजाते तस्मिन्मिथुनस्थो भौमोष्टभागद्वयेनाशुभः कर्कटे बिंदुचतुष्टयं रेखाचतुष्टयंचजातं तत्रनकिंचिदवशिष्यते तेनतत्स्थानं नशुभं नाप्यशुभं समत्वान्मध्यमः सिंहे बिंदुपंचकं रेखात्रयंचजातं रेखात्रयं बिंदुत्रयं चापास्य बिंदुद्वयंजातंच तस्मात्तस्यसदैव सिंहस्थो भौमोष्टभागद्वयेन शुभो भवति कन्यायां रेखाषट्कं बिंदुद्वयंचजातम् बिंदुद्वयं रेखाद्वयंचापास्य रेखाचतुष्टयंजातं तस्मात्कन्यास्थो भौमोष्टभागचतुष्टयेनाशुभः तुलायां रेखात्रयं बिंदुपंचकंचजातम् तत्ररेखात्रयं बिंदुत्रयंचापास्य बिंदुद्वयंजातम् तेनतुलास्थो भौमोष्टभागद्वयेनसदैवशुभः वृश्चिके रेखासप्तकमेको बिंदुः जातः तत्रबिंदु रेखाचापास्य रेखाषट्कंजातं तस्माद्वृश्चिकस्थो भौमोष्टभागषट्केनाशुभः धनुषि रेखाषट्कं बिंदुद्वयंचजातं तत्ररेखाद्वयं बिंदुद्वयंचापास्य रेखाचतुष्टयंचजातम् एवमष्टभागचतुष्टये धन्विस्थो भौमोसदैवाशुभः मकरे रेखात्रयबिंदुपंचकंचजातं तत्ररेखात्रयं बिंदुत्रयंचापास्य बिंदुद्वयंजातम् तेनमकरस्थो भौमोष्टभागद्वयेनशुभः कुंभे रेखाचतुष्टयं बिंदुत्रयंचजातम् अत्रचंद्रस्थानात् दशमस्थाने भौमस्य समत्वादष्टमो बिंदुर्नजातस्तस्माद्रेखात्रयं बिंदुत्रयंचापास्य एकारेखाजाता तस्मात्कुंभस्थोष्टमभागेनैकेनाशुभः मीने रेखापंचकं बिंदुत्रयंचजातं रेखात्रयं बिंदुत्रयं चापास्य रेखाद्वयंचजातं तस्मान्मीनस्थो भौमोष्टभागद्वयेनाशुभः अस्यतोशुभद्वयस्थापना एवं शुभाशुभान्येकीकृत्याष्टौ फलानि भवंति तेषांसंशोधनंकृत्वा यदवशिष्यते तदादेश्यं यत्ररेखाचतुष्टयं बिंदुचतुष्टयंच भवति तत्रसममध्यस्थो ग्रहो भवति यत्ररेखाष्टकं तत्रातीवाशुभः यत्रबिंदुष्टकं तत्रातीवशुभः एवंजन्मकालाक्रांतराशिवशेन सर्वग्रहाणामष्ट-



कवर्गः कार्यः तथाच बादरायणः एकेनयः शुभः स्यात्षड्भिः स्थानैः सपापदो भवति यस्तु चतुर्भिर्नेष्टः सर्वफलेकल्पनाप्येवंननुपूर्वमुक्तं एकग्रहस्यस
दृशेफलयोर्विरोधेनाशंवदेद्यदाधिकंपरिपच्यतेतत् इतिनिगदितमिष्टनेष्टमन्यद्विशेषादितिपुनरुक्तं उच्यते नैतत्पुनरुक्तं अष्टकवर्गंविनायदुक्तमेक
ग्रहस्यसदृशफलयोर्विरोध इति तत्रसदृशयोः फलयोर्विरोधेनाशोविज्ञेयः यथासएवग्रहः कयापियुक्त्यास्वर्णदोभवति सएवयुक्त्यंतरेणासु
वर्णापहारीतदानस्वर्णदोभवति नस्वर्णापहारीचेति यदाधिकंपरिपच्यते तत्रतत्रापियदिकारणद्वयेनस्वर्णापहारीभवति कारणेनैके
नस्वर्णदस्तथापिस्वर्णापहारीभवति नसुवर्णदः अथकारणद्वयेनसुवर्णदः कारणेनैकेनसुवर्णापहारीतथापिकारणद्वयस्याधिक्यात्सुवर्णदएवएवंतत्र-
सदृशोःफलयोर्विरोधेनाशंवदेन्नाशःसदृशयोः इहतुपुनःसदृशेपिफलयोर्विरोधेनाशएवेति तद्यथा बादरायणयवनेश्वरादिभिरष्टकवर्गोभिहितं अस्यग्रहस्यस्या-
नाद्यग्रहः स्वस्मिन्स्थानेतिष्ठमानइमानिशुभान्यशुभानिफलानिप्रयच्छतीति तत्रासदृशान्यपियदितानिफलानिभवंति तथापितेषांशुभाशुभविरो
धादेवनाशंवदेत् विशेषादधिकफलविपाकंजन्मभात्तन्मद्युरिति यथाकश्चिद्ग्रहः केनचित्कारणेनस्वर्णदोभवत्यपरेणरूप्यापहारीचतथाप्यसदृ
शयोरपिफलयोर्विरोधेदानहरणात्मकेनशुभोनाप्यशुभइतिकल्पनीयः एवंस्थानाष्टकाद्यत्रस्थानेबहुभिः शुभोभवत्यल्पैनाशुभः तत्रशुभाशुभफ-
लविशेषंकृत्वाशुभमेकंकल्पनीयं अनेनैवप्रकारेणस्थानसत्तामात्रेणस्थानशुभाशुभत्वमेवोक्तं पृथक्फलनिर्देशोयवनेश्वरादियावत् यद्यत्राष्टकवर्ग
प्रधानंतत्संहितायांगोचरफलंचंद्रस्थानात् किमितिपृथक्फलनिर्देशो वराहमिहिरेणकृतः जन्मन्यायासदोर्कइत्येवमादि अत्रोच्यते तस्मादष्टकवर्ग-
फलविशेषाद्यदतिरिच्यते तदेववक्तव्यमिति तदेवपूर्वमत्ययनायमतिप्रसिद्धत्वाद्गोचरस्यान्यमतमेवांगीकृत्योक्तम् तथाच यात्रायांतेनैवोक्तंयू
स्यगोचरफलप्रमाणतातस्यवेधफलमिष्यतेनचाप्रायशोबहुषुसंमतंलिदंस्थूलमार्गफलदोहिगोचरइति यवनेश्वरेणापिपृथक्पृथक्फलनिर्दे

शंकृत्वैतदेवाष्टकवर्गमंगीकृतं तथाच तद्वाक्यं फलाष्टकवर्गे शुभपापलक्षे समानकल्पावफलौप्रदिष्टौ ज्यायांस्तुयस्तस्यफलंविधार्यं यात्राविधानेप्यस-
मुद्भवेच पृथक्फलनिर्देशंकृत्वा बादरायणोप्यष्टकवर्गमेवाह कष्टश्रेष्ठेतुल्यसंख्येफलेचेत्स्यातांनाशः फलयोस्तत्रवाच्यः वाच्यापत्तिर्योतिरिक्तस्तयोः
स्यात्स्थानेस्थानेकल्पनेयंप्रदिष्टा उपचयगृहमित्रस्वोच्चगैः पुष्टमिष्टमिति लग्नाच्चंद्राद्वायान्युपचयस्थानानि तथामित्रक्षेत्राणिस्वोच्चंच एतानिशुभस्थाना-
निशुभस्थानोपलक्षणानि उपलक्षणत्वात्स्वक्षेत्रंमूलत्रिकोणंचगृह्यते तत्रलग्नाच्चंद्राद्वोपचयतोग्रहः स्वक्षेत्रस्थः स्वोच्चस्थोमित्रक्षेत्रस्थोमूलत्रिकोणस्थ-
श्चयदाशुभंफलंप्रयच्छति तदातीवपुष्टंफलंप्रयच्छति अत्रचश्रीदेवकीर्तिः लग्नादुपचयसंस्थश्चंद्राद्वास्वगृहमूलतुंगस्थः मित्रक्षेत्रगतोवाफलमि-
तिशयितः शुभंदद्यात् लग्नाच्चंद्राद्वान्यान्यपचयस्थानानि तथाशत्रुक्षेत्रनीचानिच तान्यशुभानि तेषुस्थितोग्रहोयदाशुभफलंप्रयच्छति तदप्यति-
निकृष्टमिति अर्थादेवशुभग्रहः शुभफलंप्रयच्छति अशुभग्रहस्थश्चाशुभमल्पं किमेवंविधेषुग्रहस्थजन्मकालेस्थितिरन्वेष्या किंवाचारवशात्फ-
लकल्पनेति उच्यते जन्मकालेकथमेतत् उच्यतेवचनांतर्दर्शनतः तथाचदेवकीर्तिः अपचयराशौजीवेशत्रुक्षेत्रेवजन्मकालेस्यात् यस्तुसदद्यात्पापफलमतिरा-
यितोयथाकालं यवनेश्वरश्च यस्तुस्वनीचारिगृहोपगोन्यैर्जितोरिदृष्टोस्यतनुर्विवर्णः सूतावभूज्जन्मपतौबलस्थेसजन्मगोवंध्यफलोनिरुक्तः ईषत्फ-
लहस्वोच्चप्रदिष्टदृष्टोमित्रर्क्षजन्मोपचयेवलीयान् योजातकेभूत्सतुजन्मसंस्थोदद्याच्छुभंनत्वशुभोप्यनिष्टं तथाचसत्यः जन्मन्युपचयभवनेएकोग्रहोत्यु-
पचयेषुपुष्टफलः अपचयभवनोपेताः पीडास्थानेष्वपचयाय फलकालेतुपुनश्चंद्रवर्ज्यमन्योग्रहोबलवानेवशुभमशुभंवापुष्टंफलंप्रयच्छतीति चंद्रः शु-
भोपिबलरहितः पापफलोभवति अत्रचश्रीदेवकीर्तिः पुष्टमपुष्टंस्वफलंदद्यात्सबलोबलेनहीनस्तुग्रहइवसर्वश्चंद्रः कष्टफलोबलविहीनश्च तथा-
चसत्यः स्नेहवपुरंशुबलैर्विवर्जितः शत्रुभैरिसंदृष्टः ग्रहइवफलमनुदद्याच्चंद्रस्तुयदीदृशः कष्टः वराहमिहिरोप्यबलानांग्रहाणांफलदाने असमर्थानांच

न्यायामाह नीचस्थाग्रहविजितारव्याभिभूताविरश्मयोरूक्षाः भुजगाइवमंत्रहताभवंतिकार्याक्षमालग्ने यात्रायांयवनेश्वरोपि स्ववर्गसंस्थाबलिनो विशेषाग्रहायथोद्दिष्टफलप्रदाःस्युः नीचेजितास्त्वारिगृहेस्वल्पवीर्याभवंत्यनिष्टफलप्रदाः तत्रशास्त्रेषुयानिचान्यान्युच्चादिसंस्थानांशुभाशुभफलप्रदत्ति प्रदर्शिकानि नीचारिस्थानामशुभफलप्रदर्शिकानि तानिजन्मसमयेज्ञेयानि यानिचशुभानामशुभानांवाफलानिग्रहवशेनेवपुष्टिप्रदर्शकानितानि चारवशात्फलदानकाले ग्रहस्यज्ञेयानीति ८ इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तावष्टकवर्गाध्यायोनवमःसमाप्तः ९ अथातःकर्मजीवाध्यायोव्याख्यायते अनेनपुरुषेणकथंधनमर्जयितव्यमित्यध्यायेस्मिन्निरूप्यते अत्रचप्रकारद्वयेनधनदाताग्रहोभवति लग्नाच्चंद्राद्वायोदशमस्थोग्रहः सधनदाताभवति अथलग्नचंद्रयोर्दशमस्थानेशून्येभवतस्तदालग्नचंद्रादित्यानांयेयेदशमराशयस्तेषां येऽधिपतयस्तेषुनवांशकेषुपुरुषस्यजन्मकालेस्थितास्तेषांनवांशकानांयेग्रहाअधिपतयस्तेग्रहाः धनदातारोभवंति किंतुलग्नाच्चंद्राच्चये दशमाग्रहाः ते अनेनप्रकारेणधनदातारोभवंति किंतुमेंहूकास्पदपतिगांशनाथा अनेनप्रकारेणेति तत्रादावेवलग्नाच्चंद्राच्चदशमस्थोग्रहो येनप्रकारेणधनंददाति तथामेंहूकास्पदपतिगांशनाथायेनप्रकारेणधनप्रदास्तत्प्रकारद्वयप्रदर्शिनप्रहर्षिण्याह अर्थाप्तिरिति होरेंद्वोः लग्नचंद्रयोः दिवाकराद्यैःसूर्याद्यैःग्रहैः दशमगतैः दशमस्थानस्थितैः पित्रादिभ्योर्थाप्तिर्भवतिधनप्राप्तिः विकल्पनीयाविचिंत्या तत्रपुरुषस्यजन्मसमये लग्नाच्चंद्राद्वायद्यादित्योदशमस्थोभवति तदापितृतोर्थाप्तिर्भवति एवंचंद्रेलग्नाद्दशमगतेपिपितृपत्नीतः मातुःसकाशात् भौमेलग्नचंद्रयोर्दशमेसतिशत्रुतः रिपुतः बुधेमित्रात् सुहृत्तः गुरौभ्रातृतः सहजात् शुक्रेस्त्रीतः योषितः सौरेभृतकजनात्कर्मकरात् सेवकादित्यर्थः अथ कश्चिल्लग्नाद्दशमेभवत्यपरश्चंद्रात्तदास्वस्यांस्वस्यामंतर्दशायांद्वावपिस्वाभिहितफलप्रदौभवतः नकेवलंयावच्चंद्राल्लग्नाच्चबहवोपियदि

दशमस्थाभवंति तदासर्वएवस्वस्यांस्वस्यामंतर्दशायांस्वस्वप्रकारेण धनप्रदाभवंति अथलग्नाच्चंद्राद्वानकश्चिद्दशमोभवति तदाको र्थप्रदोभवति अतउक्तम् भेंद्वर्कास्पदपतिगांशनाथवृत्त्या भंलग्नं इंदुश्चंद्रः अर्कः आदित्यः भंचंद्रश्चार्कश्चभेंद्वर्काः तेभ्यः प्रत्येकस्यास्पदाख्यो योराशिः दशमइत्यर्थः तस्ययोधिपतिः ग्रहः सः यस्मिन्नवांशकेगतः स्थितस्तस्ययोनाथः स्वामी तस्ययावक्ष्यमाणावृत्तिः तयावृत्त्यातस्यधनप्रदोभवति एवंलग्नाच्चंद्रादर्कादपिवक्तव्यं केचिदेवंव्याचक्षते यथालग्नाच्चंद्राच्चयदादशमस्थाग्रहाभवंति तदालग्नचंद्रयोः योबलवांस्तस्ययोदशमः सएवार्थप्रदोभवति भेंद्वर्काणांयोबलीतस्यास्पदपतिगांशनाथवृत्त्या एकएवार्थप्रदोभवतीति तदयुक्तं यस्मादत्रबलग्रहणंनास्तित-

अथकर्मजीवाध्यायोव्याख्यायते अर्थाप्तिः पितृपितृपत्निशत्रुमित्रभ्रातृस्त्रीभृतकजनाद्दिवाकराद्यैः होरेंद्वोर्दशमगतैर्विकल्पनीया भेंद्वर्कास्पदपतिगांशनाथवृत्त्या १

स्मादेवंज्ञायते सर्वेभ्यएवभवंति पुरुषस्यबहुप्रकारधनागमदर्शनादिति तथाचभगवान्गार्गिः उदयाच्छशिनोवापियेग्रहादशमास्थिताः तेसर्वेर्थप्रदाज्ञेयाः स्वदशासुयथोदिताः लग्नार्करात्रिनाथेभ्योदशमाधिपतिर्ग्रहः यस्मिन्नवांशेतत्कालेवर्ततेतस्ययःपतिः तद्वृत्त्याप्रवदेद्वित्तंजातस्यग्रहवीर्यदा भवंतिवित्तदास्तेपिस्वदशासुविनिश्चितमिति १ भेंद्वर्कास्पदपतिगांशनाथवृत्त्या इतियदुक्तमधुनातांवृत्तिंप्रहर्षिणीद्वयेनाह अर्कांशइति भेंद्वर्कास्पदपतिगांशनाथोर्कः यदाभवति तदातृणैः सुगंधैः कनकेन सुवर्णेनच ऊर्णया आविकलोम्ना भेषजेन औषधेन आदिशब्दात् भिष-

क्रिययारोगिणां परिचर्ययाचधनमाप्नोति अथचंद्रांशोभवति तदाकृष्याकर्षणेनजलजैः शंखमुक्ताप्रवालादिभिः अंगनाभिः स्त्रीभिः जलजानांक्रयविक्रयैः अंगनानांसमाश्रयणैरेतैः धनमाप्नोति अथकुजांशोभौमनवांशोयदाभवतितदा धातुभिःमृत्तिकादिभिः पक्वाभिः सुवर्णरूप्यताम्रादीनिभवति ताभिःप्राप्नोति अथवाधातुभिः मनःशिलाहरितालहिंगुलकांजनप्रभृतिभिः अग्निनाग्निक्रियाप्रहरणैःखड्गचक्रकुंतचापतोमराद्यैः साहसैःअसमीक्षितकार्यकरणैरथवास्वबलक्रियारंभैः धनमाप्नोति अथसौम्यांशोबुधनवांशकोयदाभवतितदालिपिगणितादिकाव्याशिल्पैः धनमाप्नोति लिप्यक्षरविन्यासेनगणितेन आदिग्रहणाद्व्याख्यानेनयंत्रादिप्रयोगैः काव्यक्रिययाशिल्पैःचित्रपुस्तकपत्रछेदबाणमाल्यरचनागंधयुक्तिप्र

अर्कांशेतृणकनकोर्णभेषजाद्यैश्चंद्रांशेकृषिजलजांगनाश्रयाच्च धात्व
ग्निप्रहरणसाहसैःकुजांशेसौम्यांशेलिपिगणितादिकाव्याशिल्पैः २

भृतिभिः धनमाप्नोति २ अथजीवांशेद्वितीयप्रहर्षिण्याहजीवांशेतिजीवांशेद्विजविबुधाकरादिधर्मैरिति अथजीवांशकोयदाभवतितदाद्विजेभ्योब्राह्मणेभ्यः विबुधेभ्योदेवेभ्यः पंडितेभ्योवा आकरेभ्यः स्वर्णादीनांलवणादीनांअंजनादीनांगजादीनांचसमुत्पत्तिस्थानेभ्यः आदिग्रहणात्क्रियावादेन धर्मैःयज्ञदानोपवासतीर्थगुरुसेवनादिभिः धनमाप्नोति अथशुक्रनवांशकोयदाभवति तदामणिभिः वज्रमरकतपद्मरागेंद्रनीलप्रभृतिभिः रजतेन रूप्येण आदिग्रहणात्सर्वैर्लोहैः गोभिः तथामाहिषकर्मणिमाहिषेभ्योवासाधुः माहिष्यः श्रेष्ठमाहिष्यैः धनमाप्नोति अथसौरांशकोयदाभवति तदाश्रमेणअध्वगमनादिकेनवधेनचवध्यघातितया अथवास्वशरीरताडनाद्येनभारवाहनेननीचाशिल्पैःस्वकुलानुचितैः कर्मभिः धनमा

भोगीति एवंजातककालवशात्पुरुषस्यधनागमंज्ञात्वाकालानुकालंकर्मेशचारवशात्कर्मसिद्धिमाह कर्मेशाध्युषितनवांशकर्मसिद्धिः कर्मणिईशः कर्मेशः लग्नाद्दशमराशिः तदधिपः कर्मेशः सचारवशाद्यस्मिन्नवांशके अध्युषितोभवति व्यवस्थितोभवति तस्ययः स्वामीतस्ययानिकर्माणि अर्कांशेत्तृणकनकोर्णभेषजाद्यैरित्यादीनि तत्समानानांसिद्धिर्भवति तानिप्रारब्धानि सिद्ध्यंतीति अत्रकेचित्कर्मेशाध्युषितसमानकर्मसिद्धिरिति पठंति अत्र· चनवांशग्रहणंनास्तिप्रकृतत्वात् प्रागनुवृत्तेः नवांशकोव्याख्यायते तथाचभगवान्गार्गिः लग्नकर्माधिपोयस्मिन्नवांशेवर्ततेग्रहः चारक्रमेणतत्तुल्यां कर्मणांसिद्धिमादिशेत् ज्ञातजातकस्येदंक्रियाश्रेयंकर्मकर्मेशाध्युषितनवांशकपतिकर्मणांयथादर्शितानां प्रारब्धानांकालानुकालंसिद्धिर्व्या-

जीवांशेद्विजविबुधाकरादिधर्मैः काव्यांशेमणिरजतादिगोमहिष्यैः
सौरांशेश्रमवधभारनीचशिल्पैः कर्मेशाध्युषितनवांशकर्मसिद्धिः ३

ख्यानान्येषामिति ३ अथधनागमज्ञानंप्रहर्षिण्याह मित्रारिस्वगृहगतैरितिचंद्रलग्नयोः येदशमगाग्रहास्तद्भावेचयेमेंद्रकर्मास्पदपतिगांशनाथाः तेचयदिजन्मकालेमित्रगृहास्थिताभवंति तदास्वांतर्दशाकालेमित्रगृहेस्थिताभवंति ततस्तस्मादेवमित्रात् मित्रतः धनप्रदाभवंति अथारिगृहस्थाः शत्रुगृहगाभवंति तदारितएव अथस्वगृहस्थास्तदास्वगृहादेवधनप्रदाभवंति तुंगस्थेबलिनीति यस्यपूर्वविधिनाभास्करः सूर्योधनप्रदोक्तः तस्मिंस्तुंगस्थेउच्चगेमेषप्राप्तेतद्वलिन्यन्यैर्बलैः कालबलाद्यैर्युक्तेस्तदासपुरुषः स्ववीर्याद्धनमर्जयतिस्वविक्रमार्जितधनोभवतीत्यर्थः आयस्थैरिति सौम्यैः शुभग्रहैः जन्मन्यायसंस्थैरेकादशस्थानगतैः उदयधनाश्रितैश्चलग्नगैः द्वितीयस्थानगतैर्वातैश्चबलसहितैः वीर्यवद्भिःजातः अ

नेकधाबहुभिः प्रकारैः स्वंधनंप्राप्नोतीति सञ्चिंत्यनिश्चयः कार्योयेनयेनप्रकारेणधनार्जनमाकांक्षतेतेनतेनप्रकारेणयत्नाद्वाप्नोतीत्यर्थः तथाच भगवान्गार्गिः धनदाजन्मसमयेमित्रारिस्वगृहोपगाः यस्यतस्यधनंदद्युर्मित्रारिस्वगृहोद्भवम् धनदोभास्करोयस्यतुंगेबलसमन्वितः भवेज्जन्मनि यस्यस्याद्वित्तमात्मोद्यमार्जितंलाभार्थंलग्नगैः सौम्यैर्येनयेनैवकर्मणा धनार्जनंप्रार्थयतेतेनयत्नात्समभ्युत इति ४ इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौकर्मजीवाध्यायोदशमः १० अथातोराजयोगाध्यायोव्याख्यायते तत्रादावेवयवनानांजीवशर्मणश्चमतंवैतालीयेनाह त्रिप्रभृतिभिरुच्चस्थैर्नृपवंशभवाभवंतिराजानः इतिसर्वजातकेषुप्रसिद्धं तत्रैतावद्यवनानांमतभेदः यस्यजन्मसमयेक्रूरैःपा

मित्रारिस्वगृहगतैस्ततोर्थांस्तुंगस्थेबलिनिचभास्करेस्ववीर्यात् आयस्थैरुदय
धनाश्रितैश्चसौम्यैःसञ्चिंत्यंबलसहितैरनेकधास्वम् ४ इतिकर्मजीवाध्यायः १०

पग्रहैः स्वतुंगगैः स्वोच्चस्थैर्जातोमहीपतीराजाभवति किंतुक्रूरमतिः पापबुद्धिरिति प्राहुः कथयंति अर्थादेवसौम्यैरुच्चगतैः महीपतिर्धर्मात्माचभवति मिश्रैरुच्चगतैर्मिश्रस्वभावोराजाइति एषएवार्थोमणित्थेनाभिहितः तथाचतद्वाक्यं पापैः पापमतिः स्वोच्चगतैर्धर्मवांस्तथासौम्यैः व्यामिश्रैर्मिश्रमतिः पृथ्वीशोजायतेमनुजः क्रूरैरिति जीवशर्मणः पक्षेतन्मतेक्रूरैस्तूच्चगतैः क्षित्यधिपोनराजाप्रजायते किंतुराज्ञातुल्योधनवान्भवति तथाचतद्वाक्यं पापैरुच्चगतैर्जातानभवंतिनृपानराः किंतुवित्तान्वितास्तेस्युः क्रोधिनः कलहप्रियाइति वराहमिहिरस्ययवनेश्वरमतमभिप्रेतं यतस्तेनसामान्येनैवस्वल्पजातकेभिहितं त्रिप्रभृतिभिरुच्चस्थैर्नृपवंशभवाभवंतिराजानः पंचादिभिरन्यकुलोद्भवाश्चतद्वत्त्रिकोण-

गत्नैरिति १ अथ द्वात्रिंशद्राजयोगान्वसंततिलकेनाह वक्रार्कजा इति वक्रोंगारकः अर्कजः सौरः अर्कः सूर्यः गुरुर्जीवः एतैः वक्रार्कजार्कगुरुभिः भौमशनिसूर्यजीवैः सकलैः सर्वैश्चतुर्भिरपि स्वोच्चेषु स्थितैः कथितैकलग्ने एषां कथितग्रहाणां चतुर्णां मध्यादेकैकस्मिँल्लग्नगते चत्वारो राजयोगा भवंति तथा त्रिभिश्च एषामेव मध्यात्त्रिभिः स्वोच्चगतैः कथितैकलग्ने द्वादश राजयोगा भवंति एवं षोडश द्व्येकाश्रितेष्विति एतेषां मध्याद्द्वाभ्यामुच्चगताभ्यामनयोर्मध्यादेकस्मिंल्लग्नगते शशिनि चंद्रे स्वक्षेत्रगे कर्कटस्थे तेषामेव वक्रार्कजार्कगुरूणां मध्याद्ग्रहद्वये स्वोच्चाश्रिते तदेकतमे विलग्नगे द्वादश राजयोगा भवंति एकाश्रितेषु च तेषामेव मध्यादेकस्मिन्नुच्चाश्रिते तस्मिन्नेव विलग्नगे चत्वारो राजयोगा भवंति एवं षोडशश्लोकैः पूर्वोक्तैः सह द्वात्रिंशत् तद्यथा मेषेर्कः कर्कटे जीवः तुले सौरः मकरे कुजः शेषा यथेष्टं ईदृश्यां ग्रहसंस्थायां मेषलग्नगते एको योगः १ कर्कटे द्वितीयः २ तुले तृतीयः मकरे चतुर्थः ४ एवं वक्रार्कजार्कगुरुभिः सकलैः स्वोच्चेषु तदेकतमे लग्ने चत्वारो राजयोगाः अथ त्रिभिः तद्यथा मेषेर्कः कर्कटे जीवः तुले सौरः शेषा यथेष्टं ईदृश्यामपि ग्रहसंस्थायां मेषलग्ने एको योगः कर्कटे द्वितीयः तुले तृतीयः पूर्वैः सह सप्त ७ अथ मेषेऽर्कः कर्कटे जीवः मकरे भौमः शेषा यथेष्टं ईदृश्यां च ग्रहसंस्थायां मेषलग्ने एको योगः कर्कटे द्वितीयः मकरे तृतीयः पूर्वैः सह दश १० अथ मेषेर्कः तुले सौरः मकरे भौमः शेषा यथेष्टम् ईदृश्यां च ग्रहसंस्थायां मेषलग्ने एकः तुले द्वितीयः मकरे तृतीयः ३ एवं त्रयोदश १३ अथ कर्कटे जीवः तुले सौ

अथ राजयोगाध्यायप्रारंभः प्राहुर्यवनाः स्वतुंगगैः क्रूरैः क्रूरमति
महीपतिः क्रूरैस्तु नजीवशर्मणः पक्षेक्षित्यधिपः प्रजायते १

रः मकरेभौमः शेषायथेष्टम् ईदृश्यांचग्रहसंस्थायां कर्कटेएकः तुलेद्वितीयः मकरेतृतीयः ३ एवंषोडशराजयोगाः १६ चतुर्भिः त्रिभिः स्वोच्चगतैः तदेकतमेविलग्ने इतिगतम् द्व्येकाश्रितेष्वित्यादियोगेषुयावत्कर्कटेचंद्रमानभवति तावद्योगाएवनभवंति तद्यथा द्व्याश्रितेषुग्रहेषुस्वक्षेत्रगतेचचंद्रेद्वादशराजयोगाव्याख्यायंते तद्यथा मेषेर्कः कर्कटेचंद्रजीवौ शेषायथेष्टं ईदृश्यांच ग्रहसंस्थायामेषलग्नेएकोयोगः कर्कटेद्वितीयः २ अथमेषेर्कः कर्कटेचंद्रः तुलेसौरः शेषायथेष्टम् तदामेषेतृतीयः ३ तुलेचतुर्थः ४ अथमेषेर्कः कर्कटेचंद्रः मकरेभौमः शेषायथेष्टम् तथामेषेपंचमः ५ मकरेषष्ठः ६ अथकर्कटेचंद्रजीवौ तुलेसौरः शेषायथेष्टम् तथाकर्कटेसप्तमः ७ तुलेऽष्टमः ८ अथकर्कटस्थौचंद्रजीवौ मकरेभौमः शेषाय

वक्रार्कजार्कगुरुभिः सकलैस्त्रिभिश्चस्वोच्चेषुषोडशनृपाः कथितैकलग्ने
द्व्येकाश्रितेषुचतदेकतमेविलग्नेस्वक्षेत्रगेशशिनिषोडशभूमिपाः स्युः २

थेष्टम् तदाकर्कटेनवमः ९ मकरेदशमः १० अथतुलेसौरः मकरेभौमः कर्कटेचंद्रः शेषायथेष्टम् तदातुलेएकादश ११ मकरेद्वादश १२ द्व्याश्रितेषु इतिगतं अथैकाश्रितेषु कर्कटस्थेचंद्रेमेषस्थेर्केमेषलग्ने एकः १ कर्कलग्नेतद्वत्तयोश्चंद्रजीवयोः द्वितीयः २ कर्कटस्थेचंद्रे तुलास्थेसौरे तस्मिन्नेवलग्नेतृतीयः ३ कर्कटस्थेचंद्रेमकरस्थेभौमे तस्मिन्नेवलग्नेचतुर्थः ४ एवंपूर्वैर्द्वादशभिः सहषोडशश्लोकपूर्वोक्तैः षोडशभिः सहद्वात्रिंशद्राजयोगाव्याख्याताः ३२।२ अथचतुश्चत्वारिंशद्राजयोगाननुष्टुभाह वर्गोत्तमलग्नइति लग्नेजन्मकालिकेलग्ने वर्गोत्तमगते स्वनवांशकस्थइत्यर्थः तस्मिंश्चंद्रवर्जितैरन्यग्रहैश्चतुराद्यैः दृष्टेचतुर्भिः पंचभिः षड्भिर्वावलोकिते द्वाविंशतिराजयोगाः स्मृताः उक्ताः अत्रलग्नेचंद्रदृष्टेनयो

वर्गोत्तमगतेलग्नेचंद्रेवाचंद्रवर्जितैः चतु
राद्यैर्ग्रहैर्दृष्टेनृपाद्वाविंशतिः स्मृताः ३

गम्यंगः किंतुपश्यतांमध्येनगण्यतेसतुपश्यतुमावापश्यतु अन्यैश्चतुरादिभिर्ग्रहैर्दृष्टेराजयोगोभवति एवंवर्गोत्तमगते लग्नेद्वाविंशतियोगाः २२ एवंचंद्रेवर्गोत्तमांशस्थेचतुराद्यैर्ग्रहैः दृष्टेद्वाविंशतियोगाभवंति एवंचतुश्चत्वारिंशत् ४४ अत्रलग्नेचंद्रेवाचतुर्भिर्दृश्यमानेपंचदश १५ विकल्पाभवंतिपंचभिः दृश्यमाने ५ षड्विकल्पाभवंति षड्भिरेकः १ एवंद्वाविंशतिः २२ तद्यथालग्नेचंद्रेवारविभौमबुधगुरुभिः दृश्यमानेएकोयोगः रविभौमबुधसितैःद्वितीयः २ रविभौमबुधसौरैःस्तृतीयः ३ रविभौमजीवसितैश्चतुर्थः ४ रविभौमजीवसौरैःपंचमः ५ रविभौमशुक्रसौरैःषष्ठः ६ रविबुधजीवशुक्रैः सप्तमः ७ रविबुधजीवसौरैरष्टमः ८ रविबुधशुक्रसौरैर्नवमः ९ रविजीवशुक्रसौरैर्दशमः १० भौमबुधजीवशुक्रैरेकादशः ११ भौमबुधजीवसौरैर्द्वादशः १२ भौमबुधशुक्रसौरैस्त्रयोदशः १३ भौमजीवशुक्रसौरैश्चतुर्दशः १४ बुधजीवशुक्रसौरैः पंचदशः १५ एवंचतुर्भिरपिविकल्पैः पंचदश अथपंचविकल्पाः रविभौमबुधजीवशुक्रैरेकः १ रविभौमबुधजीवसौरैर्द्वितीयः २ रविभौमबुधशुक्रसौरैस्तृतीयः ३ रविभौमजीवशुक्रसौरैश्चतुर्थः ४ रविबुधजीवशुक्रसौरैःपंचमः ५ भौमबुधजीवशुक्रसौरैःषष्ठः ६ एवंपंचविकल्पैःषट्पूर्वोक्तैःपंचदशभिःसहैकविंशतिः २१ रविभौमबुधजीवशुक्रसौरैःषड्भिरेकः १ एवंद्वाविंशतिः लग्नाच्चंद्राच्चैवमेवंचतुश्चत्वारिंशत् ४४ परमार्थेनैतद्योगद्वयमेव तद्यथा वर्गोत्तमगतेचंद्रेचतुराद्यैर्दृष्टेएकः लग्नेद्वितीयः संख्याप्रदर्शनंगणितप्रदर्शनार्थं अत्रैवचंद्रमसोयदिराशौवर्गोत्तमावस्थितिंनिरूप्यगणितंक्रियते·

तदेतेषामेवयोगानांचतुःषष्ट्यधिकंशतद्वयंसंभवति एवंप्रत्येकस्मिन्वर्गे वर्गोत्तमस्थेचतुःषष्ठ्यधिकमेवयोगशतद्वयंएवंचंद्रलग्नयोर्योगानामेकीकृतानांपंचशतान्यष्टाविंशत्यधिकानिभवंति तथाचमांडव्यः विलग्नभवनगते बलयुतेचवर्गोत्तमेचतुःप्रभृतिभिर्ग्रहैः शशिनिवासमालोकिते ससंभवति खलुकृपाणपाणीरणेकदाचिदपिवीक्ष्यतेरिपुजनोनयस्याननम् १।३ अथशिखरिण्यापंचयोगानाह यमेइति यमेसौरेकुंभस्थेअर्केसूर्येजमेषस्थेसति शशिनिचंद्रेगविवृषस्थितेतैरेवतनुगैः तेषांग्रहाणामेकतमेतनुगेलग्नस्थेनकेवलंसाचच्छशिजगुरुवक्रैः बुधजीवभौमैः नृयुक्सिंहालिस्थैः मिथुनहरिवृश्चिकस्थैः जातानृपतयोराजानोभवंति चकारोत्रलुप्तोद्रष्टव्यः तत्रैतज्जातं सौरः कुंभेरविर्मेषे चंद्रो वृषेबुधोमिथुनेजीवः सिंहेभौमो वृश्चिके ईदृश्यांग्रहसंस्थायांकुंभलग्ने एकोयोगः १ मेषेद्वितीयः २ वृषेतृतीयः ३

यमेकुंभेऽर्केजेगविशशिनितैरेवतनुगैर्नृयुक्सिंहालिस्थैःशशिजगुरुवक्रैर्नृपतयः
यमेंदूतुंगेगेसवितृशशिजोषष्ठभवनेतुलाजेंदुक्षेत्रैःससितकुजजीवैश्चनरपौ ४

मिथुनेजीवः सिंहेभौमो वृश्चिके ईदृश्यांग्रहसंस्थायांकुंभलग्ने एकोयोगः १ मेषेद्वितीयः २ वृषेतृतीयः ३ यमेंदूइतिसौरचंद्रौतुंगेउच्चे नकेचलंयावदंगेतनौलग्नेइत्यर्थः सवितृशशिजौसूर्यबुधौ षष्ठभवनेकन्यायांतुलाजेंदुक्षेत्रैः तुलाप्रसिद्धा अजोमेषः इंदुक्षेत्रंकर्कटकः एतैः यथासंख्यंससितकुजजीवैः शुक्रभौमगुरुयुक्तैः नरपौद्वौराजयोगाविति तत्रैतज्जातं तुलेसौरः वृषेचंद्रः कन्यायामर्कबुधौ तुलेशुक्रः मेषेभौमः कर्केजीवः ईदृश्यांग्रहसंस्थायांतुलालग्नेएकोयोगः १ वृषेद्वितीयः २ पूर्वैस्त्रिभिःसहपंच ५ अत्रषष्ठभवनेषष्ठराशौलग्नात्केचिदिच्छंति एतदुक्तं यस्मात्तुलास्थेशुक्रे मीनस्थस्यार्कस्यासंभवः तथाच बादरायणः तुलालग्नेसितसौरौमेषेभौमोगुरुः कुलीरगतः कन्यायांरविशशि-

जौजातोनृपतिर्वृषसचंद्रेवा ४ अथान्यद्राजयोगत्रयंशिखरिण्याह कुजेतुंगे ऽर्केंद्वोरितिकुजेभौमेतुंगस्थेउच्चस्थेमकरगतेइत्यर्थः अर्केंद्वोःसूर्यशशिनाः धनुषिचापेस्थितयोः यमलग्नेयत्रतत्रराशौ लग्नेशनैश्चरेलग्नगतेमकरस्थे इत्यर्थः एवंविधेयोगेजातः कुपतिः भूमीशः नृपतीराजाभवति यमलग्नेइतिमकरकुंभयोः अन्यतमेलग्नेइतिव्याख्यातं यमस्यलग्नेयमलग्नइति केचित् यत्रतत्रराशाववस्थितेसौरेलग्नगे इतिव्याख्यानम् तच्चायुक्तं यस्माद्बादरायणः लग्नेसौरस्तुंगेभौमश्चंद्रादित्यौचापप्राप्ताविति अस्माकंप्रथमाव्याख्यासाध्वीप्रतिभाति यस्मान्मांडव्यः आदित्यश्चनिशाकरश्चगतवतोवागीशराशौयदासार्द्धंभास्करिणास्वराशिसहितःप्राप्तोमृगेमंडलःप्राप्नोतिप्रभवंतदाससुकृतीक्ष्मापालचूडामणिस्तस्यांतिप्रतिपंथिनोरण

कुजेतुंगेर्केंद्वोर्धनुषियमलग्नेचकुपतिःपतिर्भूमेश्चान्यःक्षितिसुतविलग्नेसशशिनि सचंद्रेसौरेस्तेक्रूरपतिगुरौचाप
धरगेस्वतुंगस्थेभानावुदयमुपयातेक्षितिपतिः ५

गुरवेयस्मात्कृतांतादिवपतिर्भूमेश्चान्यइति अस्मिन्नेवयोगेक्षितिसुतविलग्नेभौमेशशिनिचंद्रयुक्तेलग्नगेक्षितिसुतोंगारकः तस्मिन्स्वोच्चस्थेशशिनिचंद्रमसायुक्तेर्केधनुर्धरस्थेराजयोगः तेनैवतज्जातं मकरलग्नेचंद्रांगारकयुतेधनुर्धरयुतेऽर्केऽन्योद्वितीयोभूमेः पतिर्भवतिराजाइत्यर्थः अत्रचबादरायणः भानुश्चापेसेंदुर्भौमस्तुंगप्राप्तोलग्नेवास्यात् सचंद्रेसौरेस्तेइतिसौरे शनैश्चरेसचंद्रेशशिनियुक्तेतथाभूतेस्तेसप्तमस्थानगतेतथाक्रूरपतिगुरौजीवेचापधरगेधनुर्धरस्थेभानौ आदित्येस्वतुंगस्थेस्वोच्चेमेषप्राप्तेउदयंलग्नमुपयातेप्राप्तेजातःक्षितिपतीराजाभवति तत्रैतज्जातंमेषेलग्नेतत्रैवार्कः धन्विनिजीवः तुलागतौशशिसौरौ एवंविधेयोगेजातोराजाभवत्येवराजयोगास्त्रयः ५ अथशिखरिण्याराजयोगद्वयमाह वृषेसेंदौलग्नइति वृषेगविसेंदौचंद्रयुक्तेलग्नेस्थितेसवितृगुरुतीक्ष्णां

शुक्रतनयैः सूर्यजीवसौरैः यथासंख्यं सुहृज्जायायास्वस्थैः चतुर्थसप्तमदशमस्थितैः नियमान्निश्चयात् मानवपतिः राजा भवति तत्रैतज्ज्ञातं वृषो लग्नस्तत्रैव चंद्रः सिंहेर्को वृश्चिके जीवः कुंभे सौरः एवंविधे योगे जातोऽवश्यं राजा भवति मृगे मंद इति मृगे मकरे लग्ने तत्रस्थे मंदे सौरे सहजरिपुधर्मव्ययगतः तृतीयषष्ठनवमद्वादशस्थैः शशांकाद्यैः चंद्रांगारकबुधजीवैः एवंविधे योगे जातः ख्यातः सर्वत्रविदितः पृथुगुणयशाः गुणाः शौर्यादयः विस्तीर्णगुणकीर्तिः पुंगलपतिः मनुष्यनाथो भवति ननु शशांकाद्यैरित्युक्ते शुक्रः क्वगच्छतु उच्यते यथासंख्यात्पंचमस्थानस्याविद्यमानत्वात् शुक्रस्यादित्यपंचमत्वादनवकाशः तत्रैतज्ज्ञातं मकरो लग्नस्तत्रैव सौरः मीने चंद्रः मिथुने भौमः कन्यायां बुधः धन्विनि जीवः शुक्रा-

वृषे सेंदौ लग्ने सवितृगुरुतीक्ष्णांशुतनयैः सुहृज्जायाखस्थैर्भवति नियमान्मानवपतिः
मृगे मंदे लग्ने सहजरिपुधर्मव्ययगतैः शशांकाद्यैः ख्यातः पृथुगुणयशाः पुंगलपतिः ६
हये सेंदौ जीवे मृगमुखगते भूमितनये स्वतुंगस्थौ लग्ने भृगुजशशिजावत्र नृपतिः

र्कौ यत्र तत्रस्थौ एवंविधे योगे जातो राजा भवति पृथुगुणयशाः एवमत्र राजयोगौ द्वौ तथा च मांडव्यः मृगलग्ने सौरस्तिमिधुगगतः शीतकिरणः कुजो युग्मे नार्यां शशभृतसुतश्चापधरगः गुरुर्दैत्येज्यार्कावभिमतगतौ चारयशसः प्रसूतौ यस्यासौ भवति नरपः शक्रसदृशः १।६ अथ शिखरिण्या राजयोगत्रयमाह हये-सेंदाविति हये धनुषि जीवे गुरौ सेंदौ सचंद्रे स्थिते भूमितनयेंगारके मृगमुखगते मकरस्थे मृगार्द्ध पूर्वो मकरो मृगार्द्ध इति वचनात् भृगुजशशिजौ शुक्रबुधौ स्वतुंगस्थौ स्वोच्चप्राप्तौ यदि लग्ने भवतस्तदात्रास्मिन् योगद्वये एतत् तत्रैतज्ज्ञातं बृहस्पतौ सचंद्रे धन्विगते मकरगते भौमे एवंविधायांत्र

हसंस्थायां मीनलग्नेसशक्रे एकोयोगः कन्यालग्नेद्वितीयोयोगः सुतस्थाविति वक्रार्कीभौमसौरौसुतस्थौपंचमस्थानगतौ तथागुरुशशिसिता जीवचंद्रशुक्राहिबुकेचतुर्थेस्थानेबुधेकन्यागतेलग्नेजातोऽन्योपरोपिनृपोराजागुणवान्भवति तत्रैतज्ज्ञानं कन्यालग्नंतत्रैवबुधः मकरस्थौशनिभौमौ धनुर्धरस्थाजीवचंद्रशुक्राः यदाभवंतितदाजातोराजागुणवांश्चभवति एवंराजयोगास्त्रयः ७ अथशिखरिण्याराजयोगत्रयमाह झषे सेंदाविति झषेमीनेसेंदौसचंद्रेलग्नेमीनलग्नेसचंद्रे घटमृगमृगेंद्रेषुसहितैर्यमारार्कैः घटः कुंभः मृगोमकरः मृगेंद्रःसिंहः तेषुयथासंख्यं

सुतस्थौवक्रार्कीगुरुशशिसिताश्चापिहिबुकेबुधेकन्यालग्नेभवतिहिनृपोन्योपिगुणवान् ७
झषेसेंदौलग्नेघटमृगमृगेंद्रेषुसहितैर्यमारार्कैर्योभूत्सखलुमनुजः शास्तिवसुधाम्
अजेसारेमूर्तौशशिगृहगतेचामरगुरौस्मरेज्येवालग्नेधरणिपतिरन्योपिगुणवान् ८

यमारार्कैः स्थितैः तत्रैतज्ज्ञानम् मीनोलग्नस्तत्रैवचंद्रः स्थितः कुंभेसौरः मकरेभौमः सिंहेऽर्कः एवंविधेयोगेजातः यःउत्पन्नः समनुजो मनुष्यो शास्तिवसुधांभूमिंपरिपालयति राजाभवतीत्यर्थः खलुशब्दोह्यवाक्यालंकारः अजेसारइति अजेमेषेसारेसभौमे मूर्तौलग्नस्थिते तथाचामरगुरौ जीवेशशिगृहगते कर्कटस्थेजातोनृपोराजागुणवान्भवति अथवास्मरेज्येबृहस्पतौकर्कटस्थेलग्नगतेभौमेमेषस्थेजातोऽन्योपरोराजागुणवांश्चभवति एवमत्रराजयोगास्त्रयः ८

५ ५ ६ ६

अथराजयोगंविद्युन्मालयाह कर्किणीति कर्किणि लग्ने कर्कटके लग्ने तत्स्थे तत्रैव व्यवस्थिते जीवे गुरौ चंद्रासितज्ञैः शशिशुक्रबुधैः आयप्राप्तैरेकादशस्थानस्थैः मेषगतेऽर्के आदित्ये मेषस्थे जातं संभूतं पृथ्वीनाथं भूमिपतिं विक्रमयुतं प्रतापसहितं विंद्याज्ज्ञानीयात् ९ अथ द्रुतविलंबितेन राजयोगमाह मृगमुखेति अर्कतनयः सौरः मृगमुखे मकरगतः सचतनुसंस्थो लग्नप्राप्तः तथा क्रियकुलीरहरयः मेषकर्किसिंहाः अधिपैः स्वनाथैः युक्ताः सहिताः तथा मेषे भौमः कर्कटे चंद्रः सिंहे सूर्य इत्यर्थः तथा बुधशुक्रौ ज्ञसितौ यथासंख्यं मिथुनतौलिसहितौ तथा मिथुने बुधः तुले शुक्रः एवंविधो यदि योगो भवति तदा जातः पृथुयशाः विस्तीर्णकीर्तिः पृथिवीशो राजा भवति तत्रैतज्जातं मकरो लग्नस्तत्रैव सौरः मेषे भौमः कर्कटे चंद्रः सिंहेऽर्कः मिथुने बुधः तुले शुक्रः एवंविधायां ग्रहसंस्थायां यत्र तत्रस्थे जीवे यदि जातो भवति तदा पृथिवीशः पृथुयशा भवति १०

कर्किणि लग्ने तत्स्थे जीवे चंद्रासितज्ञैरायप्राप्तैः मेषगतेऽर्के जातं विद्याद्विक्रमयुक्तं पृथ्वीनाथं ९
मृगमुखेऽर्कतनयस्तनुसंस्थः क्रियकुलीरहरयोऽधिपयुक्ताः मिथुनतौलिसहितौ बुधशुक्रौ यदि
तदा पृथुयशाः पृथिवीशः १० स्वोच्चसंस्थे बुधे लग्ने भृगौ मेषूरणाश्रिते सजीवेऽस्ते निशानाथे राजा
मंदारयोः सुते ११

अथ राजयोगमनुष्टुभाह स्वोच्चेति बुधस्वोच्चसंस्थे कन्यागते लग्नगे भृगौ शुक्रे मेषूरणाश्रिते दशमस्थानस्थिते निशानाथे चंद्रे सजीवे बृहस्पतिसंयुक्ते ऽस्ते सप्तमस्थानगते मंदारयोः शशिभौमयोः सुते पंचमे स्थितयोः जातो राजा भवति तत्रैतज्जातं कन्यालग्ने सबुधे मिथुनगते शुक्रे गुरौ सचंद्रे मीनस्थे मकरस्थयोः शनिभौमयोः जातो राजा भवति एते राजयोगाः प्रोक्ताः ११

५ ६ ५

एतेष्वराज्यवंशजोपिजातोराजाभवति वक्ष्यमाणेषुतुराजवंशज एवराजाभवति नचमालिन्यमाह अपीति अपिशब्दः संभावनायां प्रोक्तभूपालयोगैः कथितराजयोगैः खलकुलजानानीचवंशोद्भवाः अपिमानवाः पुरुषाः राज्यभाजः नृपाः भवंति किमुतकिंपुनः नृपकुलोत्थाः राजवंशेसंभूताः तेऽवश्यराजानोभवंति वक्ष्यमाणैः पुनःयोगैः नृपतिकुलसमुत्थाः राजवंशजाः पार्थिवाः राजानोभवंति तेषुवक्ष्यमाणेषु अभूपालवंशजः अराजपुत्रः नृपतितुल्योभवति राजसमइत्यर्थः नराजाकिमुतसंभावनायां १२ अथराजयोगमौपच्छंदसिकेनाह उच्चस्वत्रिकोणगैरिति त्र्याद्यैः त्र्यादिभिर्ग्रहैः स्वोच्चगतैः स्वत्रिकोणगतैःबलस्थैः कालादिबलोपेतैः जाताभूपतिवंशजा नृपकुलजातानरेंद्राराजानोभवंति आदिग्रहणाच्चतुर्भिरपि पंचादिभिरन्यवंशजाताइति पंचादिभिः ग्रहैः स्वोच्चस्थैः

अपिखलकुलजातामानवाराज्यभाजःकिमुतनृपकुलोत्थाःप्रोक्तभूपालयोगैः नृपतिकुलसमुत्थाः पार्थिवावक्ष्यमाणैर्नभवतिनृपतुल्यस्तेष्वभूपालपुत्रः १२
उच्चस्वत्रिकोणगैर्बलस्थैस्त्र्याद्यैर्भूपतिवंशजानरेंद्राः पंचादिभिरन्यवंशजाताहीनैर्वित्तयुतानभूमिपालाः १३

मूलत्रिकोणगैर्वा अन्यवंशजाताहीनकुलजा अपिराजानोभवंति आदिग्रहणात्षड्भिः सप्तभिरपिहीनैर्वित्तयुताइति त्रिभिरुच्चस्थैः मूलत्रिकोणस्थैर्वाहीनबलैः कालादिबलरहितैः राजकुलजा अपिराजानोभवंतिकिंतुराजतुल्याभवंति एतैःयथोक्तैः हीनैः वित्तयुताः सधनाभवंति नभूमिपालाः राजानः एतदुक्तंभवति एकेनग्रहेण द्वाभ्यांस्वोच्चगाभ्यांमूलत्रिकोणस्थाभ्यांवाराजकुलजोपिराजानभवति किंतुधनवान् एवंत्रिभिश्चतुर्भिर्वान्यवंशजातावित्तयुताभवंति नराजानः अथयदिग्रहाः यथाभिहितसंख्याउच्चस्थाः नभवंति स्वोच्चगामूलत्रिकोणस्थैः सहसंख्यांसंपादयंति तथापियथोक्तफलदाभवंति अथोच्चगताः केंद्रबलाः स्वत्रिकोणगतावातथापि १३ ६७

अथान्यद्राजयोगं विद्युन्मालिन्याह लेखास्थे इति लेखायां तिष्ठतीति लेखास्थः तस्मिन् लेखाशब्देनोदय उच्यते अर्के सूर्ये तत्स्थे लेखास्थे मूर्त्तादधोदितेन केवलं यावदजे मेषस्थे तत्रैव मेषलग्ने इंदौ चंद्रे स्थिते भौमे कुजे स्वोच्चे मकरस्थे मंदे सौरे कुंभस्थे जीवे गुरौ चापप्राप्ते धनुर्धरगते एवंविधे योगे जातो राज्ञः पुत्रो नृपस्ततो यदि भवति तदा तं भूमेर्नाथं धियाज्जानीयात् अन्यकुलजो धनवान् अत्र केचिद्वृषस्थे केंऽजेंदौ लग्ने इति पठंति आदित्ये लेखस्थे सति सिंहस्थे सूर्ये चंद्रे मेषस्थे लग्ने तदपि न कश्चिद्विरोधो राजयोग एव भवति १४ अन्यद्राजयोगं विद्युन्मालिन्याह स्वर्क्षे इति स्वर्क्षे सिते आत्मीयराशौ स्थिते वृषतुलयोरन्यतमस्थे न केवलं यावत्पातालस्थे लग्नाच्चतुर्थे चंद्रे धर्मस्थानप्राप्ते नवमगते शेषैरन्यग्रहैः रविभौमबुधगुरुसौरैः दुश्चि-

लेखास्थेऽर्केऽजेंदौ लग्ने भौमे स्वोच्चे कुंभे मंदे चापप्राप्ते जीवे राज्ञः पुत्रं विद्यात्पृथ्वीनाथं १४
स्वर्क्षे शुक्रे पातालस्थे धर्मस्थानं प्राप्ते चंद्रे दुश्चिक्यायप्राप्तिप्राप्तैः शेषैर्जातः स्वामी भूमेः १५

क्यायप्राप्तिप्राप्तैः तृतीयलग्न एकादशस्थानस्थैः जातो भूमेः पृथिव्याः स्वाम्यधिपतिर्भवति तत्रैवं ज्ञातं कुंभे लग्ने वृषे शुक्रः तुले चंद्रः शेषा ग्रहा यथासंभवं मेषकुंभधन्विस्थाः एवंविधे योगे जातो राजपुत्रो राजा भवति अन्यकुलजो धनवान् अथवा कर्कटो लग्नः तुले शुक्रः मीने चंद्रः शेषा ग्रहा यथासंभवं कन्याकर्कटवृषस्थाः एवंविधे योगे जातो राजपुत्रो राजा भवत्यन्यकुलजोऽपि धनवान् १५ अथान्यद्राजयोगं नवमालिकयाह सौम्ये बुधे वीर्ययुक्ते कालादिबलयुक्ते तथाभूते तनुयुक्ते लग्नस्थे शुभे शुभयाते शुभे शुभग्रहे गुरुसितयोरन्यतमे यथासंभवं वीर्याढ्येन सबले शुभयाते धर्मस्थानगते नवमगत इत्यर्थः शुभे शुभभवान इति पठंति चतुर्थस्थानस्थ इत्यर्थः अपरोषैः परिशिष्टग्रहैः यथासंभवं धर्मायोपचयपुनचमद्वितीयत्रिषडेकादशदशमानां अन्यतमस्थानस्थितैः एवं

विधेयोगेजातो नृपजोराजपुत्रोराजाभवति धर्मात्माच अन्यकुलोधनवान् १६ अथान्यद्राजयोगद्वयंवंशस्थेनाह वृषोदयइति वृषोदयेवृषलग्नेतथाशशांकजीवार्कसुतापरैः चंद्रगुरुसौरैरपरैस्त्वरविकुजबुधसितैः यथासंख्यंमूर्तिधनारिलाभगैः लग्नद्वितीयषष्ठैकादशस्थैःजातोनृपोराजाभवति तत्रैतज्जातं वृषलग्नेसचंद्रे मिथुनस्थेजीवे तुलास्थेसौरे मीनस्थैः रविकुजबुधसितैःजातोराजपुत्रोराजाभवति अन्यकुलजोपिधनवान् सुखेगुराविति गुरोजीवेसुखेचतुर्थस्थानस्थे रवेदशमेशशितीक्ष्णदीधिती चंद्रार्कौयमोदये शनैश्चरेलग्नगते अपरैरन्यैभौमबुधशुक्रैः लाभगतैरेकादशस्थैः जातोनृपोराजाभवति तत्रैतज्जातम् शनैश्चरोलग्नेचतुर्थेजीवः दशमेसूर्यचंद्रौ भौमबुधशुक्राएकादशे एवंविधेयोगेजातोराजपुत्रोराजाभवति अन्यकुलजोपिधनवान्भवति १७ अथान्यद्राजयोगद्वयंवसंततिलकेनाह मेषूरणायतनुगाइति शशिमंदजीवाः चंद्रसौरगुरवः यथासंख्यंमेषूरणायतनुगाः दशमैकादशलग्नस्थाः ज्ञारौबुधभौमौ धनेद्वितीयस्थाने सितरवीशुक्रार्कौ हिबुके ४ चतुर्थेएवंविधेयोगेजातोनरेंद्रोनृपोभवति तत्रैतज्जातं दशमेचंद्रः एकादशेसौरः लग्नेजीवः द्वितीयेबुधभौमौचतुर्थेशुक्रार्कौ एवंविधेयोगेजातोराजपुत्रोराजाभवत्यन्यकुलजोधनवान् वक्रासिताविति वक्रासितौभौमसौरौ शशिसुरेज्यसितार्कसौम्याः चंद्रगुरुशुक्रसूर्यबुधाः यथासंख्यंहोरासुखास्तशुभखाप्तिगताः लग्नचतुर्थसप्तमनवमैकादशस्थाः भवंतितदाजातः प्रजेशोराजाभवति तत्रैतज्जातं भौमसौरौ

सौम्येवीर्यसुतेतनुयुक्ते वीर्याढ्येचशुभेशुभयाते धर्मार्थोपचयेष्ववशेषैर्धर्मात्मान्नृपजःपृथिवीशः १६ वृषो
दयेमूर्तिधनारिलाभगैः शशांकजीवार्कसुतापरैर्नृपः सुखेगुरौखेशशितीक्ष्णदीधितीयमोदये लाभगतैर्नृ
पोपरैः १७

लग्नगतौचतुर्थेचंद्रः सप्तमेजीवः नवमेशुक्रः दशमेसूर्यः एकादशेबुधः एवंविधेयोगेजातोराजपुत्रोराजा भवत्यन्यकुलजोधनवान् १८ अथराजयोगजातस्यकस्मिन्कालेराज्यावाप्तिर्भविष्यतीतितज्ज्ञानस्वागतयाह कर्मलग्नगतपाकदशायामिति राजयोगकर्तृणांग्रहाणांमध्याद्योग्रहः कर्मणि लग्नाद्दशमेस्थितः यश्चराजयोगकर्तृणांग्रहाणांमध्याद्योग्रहः लग्नयुतोजन्मलग्नस्थः तत्पाकदशायांलग्नसंबंधिनीयापाकदशांतर्दशाभवति तस्यतत्रराज्यलब्धिर्भवति अथलग्नदशमयोः द्वयोरपिग्रहौभवतः तदातयोर्योबलवान् तस्यदशायामंतर्दशाकालेराज्यलब्धिः अथतत्रबहवोग्रहा भवंति तदाप्रबलस्यसर्वोत्तमबलस्यांतर्दशाकाले अथवाप्रबलस्येति अथलग्नदशमौयदाशून्यौभवतस्तदाजन्मनियः प्रबलः सर्वोत्तमबलस्तस्यांत-

मेषूरणायतनुगाः शशिमंदजीवाज्ञारौधनेसितरवीहिबुकेनरेंद्रं वक्रासितौशशिसुरेज्यसितार्कसौम्याहोरास्फुरवास्तुशफ
भरवाप्तिगताः प्रजेशम् १८ कर्मलग्नयुतपाकदशायांराज्यलब्धिरथवाप्रबलस्य शत्रुनीचगृहयातदशायांछिद्र
संश्रयदशापरिकल्प्या १९

दशाकालएवराज्यदः स्यात् बहुष्वंतर्दशासुयस्मिन्नंतर्दशाकालेचारदशाचतीबलवत्त्वंसंभवति तस्यामेवांतर्दशायांराज्यप्रदोभवति शत्रुनीचगृहेति लब्धराज्यस्यापिजन्मकालेशत्रुक्षेत्रस्थेनचग्रहेणयांतर्दशावर्ततेतस्यांतस्मिन्बलघातिराज्यहरणवाच्यं यतःसाछिद्रदशाविबलेपितस्मिन्नापद्भवति साचसंश्रयदशापरिकल्प्या तस्यामंतर्दशायांसंश्रयकार्यं दैवयुक्तनृपसंश्रयगुणात्तन्मोक्षोपि वक्ष्यतिचयात्रायां अरिकोपहतदशायांतन्मोक्षनाथशत्रुपाकेच स्वदशेशकारकदशाः संश्रयणीयानरेंद्रइति अत्रचभगवान्गार्गिः लग्नगः कर्मगोवास्यादथवाप्रबलोपियः सः स्यात्स्वांतर्दशाकालेराज्यदः प्रबलोयदा १ नीचारिगृहसंस्थस्यदशायांप्रबलस्यच च्युतिर्बलविहीनस्यतन्मोक्षः परसंश्रयादिति १९

अथभोगिनांशबरदस्युःस्वामिनांचजन्मज्ञानंमालिन्याह गुरुसितबुधलग्नेइति गुरुसितबुधाः जीवशुक्रसौम्याः एषामन्यतमेलग्नगते अर्कपुत्रेसौरे सप्तमस्थेदिवसनाथेसूर्ये वियतिदशमस्थानगते एवंविधेयोगे भोगिनांभोगवतांजन्मविंद्याज्जानीयात् एवंविधेयोगेजातोसदैवभोगवान्भवति तस्यार्थविहीनस्यापियतः कुतश्चिद्भोगावाप्तिर्भवति रविबुधसितलग्नेइत्यत्रकेचित् रविबुधसितानांसंबंधिलग्नइति व्याख्यातम् सिंहवृषतुलामिथुनकन्यालग्नेष्विति यतोदशमस्थेर्केलग्नेबुधसितयोरधस्थानंनसंभवति आचार्येणवराहमिहिरेणपूर्वशास्त्रानुसारेणायंयोगःकृतः जीवज्ञभार्गवैर्लग्नेसप्तमस्थेर्कनंदने दशमस्थेरवौजातोभोगवान्पुरुषोभवेत् शुभबलयुतकेंद्रैरिति शुभग्रहसंबंधिनोराशयः तेचसबलायस्यकेंद्रगताभ-

गुरुसितबुधलग्नेसप्तमस्थेर्कपुत्रेवियतिदिवसनाथेभोगिनांजन्मविंद्यात् शुभबलयुतकेंद्रैः क्रूर
भस्थैश्चपापैर्व्रजतिशबरदस्युस्वामितामर्थभाक्च २० इतिश्रीभ० राजयोगाध्यायोएकादशः ११

वंतितैस्तथाभूतैः तथापापैः क्रूरग्रहैः क्रूरभस्थैः पापराश्याश्रितैः यस्यजन्मभवति शबराणांपुलिंदानांदस्यूनांचोराणांस्वामित्वंव्रजतिगच्छति अर्थभाग्भाग्यवान् धनवांश्चभवति शुभबलयुतकेंद्रैरिति अत्रशुभग्रहैः बलयुतैः केंद्रगतैरितिकेचिद्व्याख्यातं तच्चायुक्तं यस्माद्भगवान्गार्गिः पापक्षेत्रगतैःपापैः केंद्रस्थैः सौम्यराशिभिः सबलैर्यस्यजन्मस्यात्स्या पुलिंदस्युनायकइति २० इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौ राजयोगाध्यायः एकादशः समाप्तः ११

अथनाभसयोगाध्यायप्रारंभः नवदिग्वसवस्त्रिकाग्निवेदैर्गुणिताद्वित्रिच
तुर्विकल्पजाःस्युः यवनैस्त्रिगुणाहिषट्शतीयाकथिताविस्तरतोत्रतत्समाःस्युः १

अथातोनाभसयोगाध्यायोव्याख्यायते नाभसयोगानांचत्वारोविकल्पाः तत्राकृतियोगाएकोविकल्पः आकृतियोगाःसंख्यायोगाश्चविकल्पद्वयम् आकृतियोगाःसंख्यायोगाआश्रययोगाश्चविकल्पत्रयम् आकृतियोगाःसंख्यायोगाआश्रययोगादलयोगौचेतिविकल्पचतुष्टयं तत्रविंशतिराकृतियोगाः सप्तसंख्यायोगाः त्रयआश्रययोगाः द्वौदलयोगौतत्रद्वित्रिचतुर्विकल्पजानांयोगानांसंख्याज्ञानमौपच्छंदसिकेनाह १ नवदिग्भि नवप्रसिद्धादिक्शब्देनदशउच्यन्ते वसवोऽष्टौ एतेयथासंख्यंत्रिकाग्निवेदैः गुणिताः त्रिकशब्देनत्रयएवउच्यंते अग्निशब्देनत्रयः वेदाश्चत्वारः ४ एतैःगुणिताःतद्यथानवदिग्वसवः ९।१०।८ एतेयथासंख्यंत्रिकाग्निवेदैः ३।३।४ एतैर्गुणिताःजाताः २७।३०।३२ एतेयथासंख्यंद्वित्रिचतुर्विकल्पजा भवति एतदुक्तंभवति आकृतियोगाविंशतिः संख्यायोगाः सप्त एवमाकृतिसंख्याविकल्पद्वयेनसप्तविंशतियोगाः भवंति आश्रययोगास्त्रयः आकृतिसंख्या आश्रयकृतेनविकल्पत्रयेणत्रिंशत् २० दलयोगौद्वौ आकृतिसंख्याआश्रयदलयोगकृतेनविकल्पचतुष्टयेनद्वात्रिंशत् ३२ एवंद्वित्रिचतुर्विकल्पजायोगाःस्युः भवेयुरिति यवनैस्त्रिगुणाहीनि पुराणयवनैः त्रिगुणाहिषट्शतीकथिता षण्णांशतानांसमाहारः षट्शतीसाचत्रिगुणा अष्टादशयोगशतान्यभिहितानीत्यर्थः १८०० ननुस्फुजिध्वजेनकिमुक्तं उच्यते नाभसयोगानामानंत्यं तथाचतद्वाक्यम् संस्थानसादृश्यमनंतकस्माद्रूव्याणिनानाप्रकृतीनिदृष्ट्वेति कथंपुराणयवनैरष्टादशशतान्यभिहितानिउच्यंते आकृतियोगास्त्रयोविंशतिस्तैरभिहिताः संख्यायोगानांस-

सविंशत्यधिकं शतं भवति एवं सार्द्धं शतं भवति तच्चैकैकं राशिं लग्नगतमधिकृत्योक्तम् तस्माल्लग्नद्वादशकेनाष्टादशयोगशतानि भवन्ति य
स्मात्सार्द्धं शतं द्वादशहतम् अष्टादशशतानि भवन्ति एतेषामुत्पत्तिरध्यायान्ते प्रदर्शयिष्यामः विदिताध्यायार्थस्य सुखावबोधत्वात् एवचनैस्त्रि
गुणा षट्शती विस्तरतः कथितोक्ता अत्रास्मिन्शास्त्रे तत्समासः तत्संक्षेपः क्रियते विस्तरस्य समासोऽभिधीयते इति पूर्वप्रदर्शिता द्वात्रिंशदेवाभिधी
यन्ते तत्फलेष्वन्यफलानां समानत्वात् द्वात्रिंशत्स्वेव योगेष्वष्टादशयोगशतान्यन्तर्भवन्तीति १ आथाश्रययोगत्रयं दलयोगद्वयं चोपच्छन्दसिकेनाह रज्जु
र्मुशलमिति चराद्यैः चरस्थिरद्विस्वभावराशिग्रहसंयुक्तैः यथासंख्यं रज्जुर्मुशलं नलश्चेति योगत्रयं भवति तद्यथैकस्मिन्चरराशौ चरराशिद्वये चरराशि
त्रये चरराशिचतुष्के वा यदा सर्वे ग्रहाः भवन्ति स्थिरराशयो द्विस्वभावराशयश्च सर्वे शून्या भवन्ति तदा रज्जुर्नाम योगो भवति एवमेकस्मिन्स्थिरराशौ
राशिद्वये राशित्रये राशिचतुष्के वा यदा सर्वे ग्रहाः भवन्ति चरराशयो द्विस्वभावराशयश्च शून्या भवन्ति तदा मुशलं नाम योगो भवति एवमेकस्मिन्द्विस्वभा
वराशौ राशिद्वये राशित्रये राशिचतुष्के वा सर्वे ग्रहाः भवन्ति चरराशयः स्थिरराशयश्च शून्या भवन्ति तदा नलाख्यो योगो भवति एतानाश्रयजांस्त्रीन्योगा
न्सत्याचार्यो जगाद उक्तवान् केचित्सत्यस्त्वाश्रयजानिहाहृइति योगानिति पठन्ति इहास्मिन्प्रकरणे आहोक्तवानिति तथा च सत्यः सर्वैश्चरेषु राशिषु य
दा स्थिता योगमाह तं रज्जुं अनयप्रियस्य सततं विदेशवासार्थयुक्तस्य सर्वैः स्थिरेषु राशिषु यदा स्थिता मुशलमाह तं योगं जन्मनि कर्मकराणां युक्ताना
मर्थमानाढ्यां द्विशरीरेषु नल इति योगो हीनातिरिक्तदेहानां निपुणानां पुरुषाणां धनसंचयभोगिनां भवन्ति अत्र केश्चिद्व्याख्यातं चरराशिचतु
ष्के यदा सर्वे ग्रहाः भवन्ति तदा रज्जुः स्थिरराशिचतुष्के मुशलं द्विःस्वभावराशिचतुष्के नल इति तच्चायुक्तं यस्माद्भगवान्गार्गिः एको द्वौ वा त्रयः
सर्वे सर्वैर्युक्ता यदा ग्रहैः चरयोगस्तदा रज्जुः शीर्ष्णाणां जन्मदो भवेत् स्थिरश्चेन्मुशलं नाम मानिनां जन्मकृन्नृणां द्विस्वभावो नलाख्यस्तु धनिनां

परिकीर्तितः एवमाश्रययोगत्रयंव्याख्यातंसत्यमतेन तथाचसत्यः चरराशिगैर्ग्रहेंद्रैरज्जुः स्थिरराशिगैस्तथामुशलंद्विशरीरगतैर्योगोनलसंज्ञोमुनिभिरुद्दिष्टः अथदलयोगद्वयमुच्यते केंद्रैः सदसद्युतैरिति केंद्रैःयथासंख्यंसदसद्युतैः सद्ग्रहैः सौम्यैर्युतः दलाख्यो दलोयोगः स्त्रग्मालानाम भवतियथाकेंद्रैरसद्ग्रहैः पापग्रहयुक्तैः दलयोगः सर्पोनामयोगोभवति एतदुक्तंभवति येषुतेषुत्रिषुकेंद्रेषु सौम्यग्रहः बुधगुरुशुक्राः यदाभवंति नकस्मिन्कश्चित्केंद्रेपापोभवति तदास्त्रग्नामयोगोभवति अथयेषुतेषुत्रिषुकेंद्रेषु पापाः सूर्यभौमसौराः भवंतिनकस्मिंश्चित्केंद्रेभवति सौम्यग्रहः तदासर्पोनामयोगोभवति नन्वत्रयोगद्वयेकेंद्रैः सदसद्युतैर्दलाख्यावित्युक्तास्त्रिषुकिमितिव्याख्यातम् यस्माच्छुक्लपक्षकृष्णपक्षयोश्चंद्रस्य·

रज्जुर्मुशलंनलश्चराद्यैः सत्यश्चाश्रयजान्जगादयोगान्
केंद्रैःसदसद्युतैर्दलाख्यैः स्त्रक्सर्पौ कथितौपराशरेण २

सौम्यत्वंपापत्वंचसंभवति एवंकृतेयदासौम्याक्रांतेषुत्रिषुकेंद्रेषुक्षीणश्चंद्रमायदाचतुर्थोभवति अथवापापाक्रांतेषुत्रिषुकेंद्रेषुक्षीणश्चंद्रमायदाचतुर्थोभवति तदापिस्त्रक्सर्पौयोगौभवतः नच्चतुर्षुकेंद्रेषुकिमितिनव्याख्यातं उच्यतेनैवं यस्मादनेनैवस्वल्पजातकेउक्तम् केंद्रत्रयगैःपापखैर्दलाख्यावहिस्त्रग्मालाचअत्रसौम्यास्त्रयः पापास्त्रयइति कथंज्ञापयंते यथानयोर्द्वयोर्मध्येचंद्रमास्तृतीययोर्नभवति उच्यते भगवतागार्गिणोक्तम् त्रिकेंद्रगैर्यमारार्कैः सर्पोदुःखितजन्मदः भोगिजन्मप्रदामाला तद्वज्जीवसितेंदुजैः स्त्रग्योग्यः पापवर्जितकेंद्रेषु सर्पः सौम्यवर्जितोप्येतिकथंज्ञायते उच्यतेबादरायणोक्तं केंद्रेषुपापेषुसितज्ञजीवैः केंद्रत्रिसंस्थैः कथयंतिमाला सर्पस्त्वसौम्यैश्चयमारसूर्यैर्योगाविमौद्वौ कथितौदला-

रव्यौ एतौ दलयोगौ द्वौ स्रक्सर्पौ कथितौ पराशरेणोक्तौ नत्वन्यैरप्युक्तौ उच्यते अन्यैरुक्तौ अन्यैर्नोक्तौ पराशरेणोक्ताविति स्वशास्त्रे वराहमिहिरेणोक्तौ तथा च भणित्थः केंद्रत्रयगैः पापैः सौम्यैर्वा दलसंज्ञितौ द्वौ योगौ सर्पमालाख्यौ विनष्टेष्टफलप्रदौ एवमाश्रययोगत्रयमपि योगद्वयमाह अन्यैरुक्तमन्यैर्नोक्तं अन्यैरुक्तत्वाद्वराहमिहिरेण शास्त्रसंगृहीतं एवं दलयोगद्वयं व्याख्यातम् २ अथान्यैराचार्यैर्येन कारणेनाश्रययोगत्रयं दलयोगद्वयं च नाख्यातं तत्कारणमुपजातिकयाह योगा व्रजंतीति आश्रयजा योगा रज्जुमुशलनलाख्या आकृतियोगैः यवाब्जवज्राण्डकगोलकाद्यैः यवपद्मवज्रविहगगोलकैः आदिग्रहणाद्गदाशकटाभ्यां च तथा संख्यायोगैः गोलकाद्यैः गोलकयुगशूलकेदारैः संयोगैः आश्रजा योगाः तुल्यता समत्वं

योगा व्रजंत्याश्रयजाः समत्वं यवाब्जवज्राण्डजगोलकाद्यैः
केंद्रोपगैः प्रोक्तफलौ दलाख्यावित्याहुरन्ये न पृथक्फलौ तौ ३

व्रजंतीत्यतोऽन्यैर्नोक्ताः तद्व्यतिरेकेणाप्याश्रययोगानामवकाशो नास्तीति वराहमिहिरेणोक्ताः यैश्च योगैः समतां यास्यंति यत्र चैतेषामनवकाशस्तदध्यायां ते व्याख्यास्यामः केंद्रोपगैः प्रोक्तफलाविति दलाख्यौ दलयोगौ द्वौ केंद्रोपगैः प्रोक्तफलौ कथितफलौ केंद्रोपगतैः ग्रहैः प्रोक्तफले ययोः केंद्रत्रयगैः केंद्रस्थानां शुभग्रहाणां शुभफलमुक्तम् अशुभानामशुभमिति अतएवेमौ प्रोक्तफलौ कथितफलौ उक्तं च वराहमिहिरेण केंद्रत्रिकोणेषु शुभाः प्रशस्तास्तेष्वेव पापा न शुभप्रदाः स्युः केंद्रत्रिकोणगैः शुभैः शुभफलं भवतीति मालानोक्ता एवं केंद्रत्रयगैः पापैः पापफलं भवतीति सर्पेणोक्तः एवमन्ये अपरे आहुः कथयंति तथा तौ न पृथक्फलौ उक्तार्थत्वात् यद्येवं तर्हि किमर्थं वराहमिहिरेणोक्तावित्यत्रोच्यते नामस

योगांतर्भूतत्वात्समस्तदशास्वपि फलदौ भवतः यदा केंद्रोपगानां योगं विना फलमंगीक्रियते तदा स्वदशास्वेव फलं प्रयच्छंति एतच्च पराशरादीनां मतं तेषां मतं यथा नाभसयोगा वेतौ समस्तदशास्वपि फलप्रदौ तेन वराहमिहिरेणोक्तौ ३ अथाकृतियोगान् पंच गदाशकटविहंगशृंगाटकहलाख्यान्य सतातिलकेनाह आसन्नेति आसन्ने निकटवर्तिनि केंद्रभवनद्वये कंटकराशियुग्मे यदा सर्वे ग्रहाः भवंति तदा गदाख्यो योगो भवति स च चतुःप्रकारः लग्नचतुर्थस्थैः सर्वग्रहैरेकः चतुर्थसप्तमस्थैर्द्वितीयः सप्तमदशमस्थैस्तृतीयः दशमलग्नस्थैश्चतुर्थः तन्वस्तगेष्विति तन्वस्तगेषु लग्नसप्तमगेषु सर्वग्रहेषु शकटं भवति खबंध्वोः दशमचतुर्थयोः स्थितेषु सर्वग्रहेषु विहगाख्यो योगः नवमपंचमलग्नस्थैः सर्वग्रहैः शृंगाटकाख्यो योगो भवति लग्नान्यगै

आसन्नकेंद्रभवनद्वयगैर्गदाख्यस्तन्वस्तगेषु शकटं विहगः खबंध्वोः
शृंगाटकनवमपचमलग्नसंस्थैर्लग्नान्यगैर्हलमिति प्रवदंति तज्ज्ञाः ४

हलमिति लग्नं वर्जयित्वा यथासंभवमन्ये सर्वे ग्रहाः परस्परत्रिकोणगता भवंति तदा हलमिति योगः तज्ज्ञाः होराशास्त्रपंडिताः प्रवदंति कथयंति स च त्रिप्रकारः द्वितीयषट्दशमस्थैः सर्वग्रहैरेकः तृतीयसप्तमैकादशस्थैर्द्वितीयः प्रकारः चतुर्थाष्टमद्वादशस्थैस्तृतीयः प्रकार इति ५ अथ वज्रयवकमलवापीसंज्ञं योगचतुष्टयं वैतालीयेनाह शकटांडमिति शकटवच्छुभैः व्यवस्थितैरंडजवदशुभैश्च वज्रं भवति एतदुक्तं भवति लग्नसप्तमयोः सौम्याश्चतुर्थदशमयोश्च पापा भवंति नान्यत्र केचित्तदा वज्राख्यो योगो भवति तद्विपरीतगैर्यवः त एव ग्रहा यदि विपरीतगता भवंति तदा यवाख्यो योगो भवति शकटवदशुभाः अंडजवच्छुभाः एतदुक्तं भवति लग्नसप्तमयोः पापाः स्थिताः चतुर्थदशमयोश्च शुभाः स्थितास्तदा यवाख्यो योगो भव

ति कमलंत्विति एतैरेव सौम्यपापैः विमिश्रसंस्थितैश्चतुर्ष्वपिकेंद्रेषु समवस्थितैः कमलाख्योयोगोभवति तदेवकमलंयदिकेंद्राद्बाह्यतोभवति तदावापीसंज्ञोयोगः एतदुक्तंभवति सर्वैरेवकेंद्रबाह्यतः स्थितैः केंद्राणिवर्जयित्वान्यत्रपणफरापोक्लीमेषुस्थितैस्तदेव कमलंवापीसंज्ञोभवतियोगः पणफरेषुचतुर्ष्वापोक्लीमेषुचतुर्ष्वेति ५ अथवज्रयवयोः संभवोनभवति तौचमयापूर्वशास्त्रानुसारेण कृतावित्येतदनुष्टुभाह पूर्वशास्त्रानुसारेणेति पूर्वशास्त्रानुसारेणपूर्वाचार्यैः मययवनादिभिः वज्राख्योयोगः कृतः यवाख्यश्च तस्मान्मयापिकृतः वज्रादयइति बहुवचननिर्देशोऽन्येषामेवंप्रकाराणांप्रदर्शनार्थः वज्रादयोयोगायद्यपिनसंभवति तथापिपूर्वशास्त्रानुसारेणमयाकृताः तान्यनुसृत्यद्रष्टव्येत्यर्थः यतः सूर्यादादित्याच्चतु-

शकटांडवृज्ञशकभाशृंभैर्वर्ज्यंतद्विपरीतगैर्यवैः कमलंतुविमिश्र
संस्थितेवापीतद्यदिकेंद्रबाह्यतः ५ पूर्वशास्त्रानुसारेणमयावज्रा
दयः कृताः चतुर्थेभवनेसूर्याज्ज्ञासितौभवतः कथम् ६

र्थेभवने चतुर्थराशौ पूर्वेण पश्चिमेनवाज्ज्ञसितौ बुधशुक्रौ कथंभवतः नकदाचिदर्कोदयेस्तसमयेवामध्यान्हार्द्धरात्रयोः बुधशुक्रौभवतः आदित्येमध्यान्हस्थेऽर्धरात्रस्थे वातयोरुदयस्तमये वानभवत्येव ६ अथयूपेषुशक्तिदंडाख्ययोगचतुष्टयमनुष्टुभाह कंटकादीतिहोरालग्नंतदाद्यैः केंद्रैः क्रमात्पारिपाट्या लग्नकेंद्रमादितः कृत्वाचतुर्षुग्रहेषुयथासंभवसर्वग्रहाणामवस्थानंभवति तदायूपेषुशक्तिदंडाख्याश्चत्वारोयोगाभवंति तद्यथा लग्नाद्द्वितीयतृतीयचतुर्थेषुचतुर्ष्वपियदासर्वेग्रहाःभवंति तदायूपाख्योयोगोभवति अथचतुर्थपंचमषष्ठसप्तमेषुचतुर्षुसर्वे·

एवंग्रहाभवंति तदेषुः शराख्योयोगः अथसप्तमाष्टमनवमदशमेषु चतुर्षु सर्वेएवंग्रहाभवंति तदाशक्तियोगः अथदशमैकादशद्वादशलग्नेषु चतुर्षु सर्वेएवंग्रहाभवंति तदादंडयोगइति ७ अथनौकूटछत्रचापार्द्धचंद्राख्ययोगपंचकमनुष्टुभाह नौकूटछत्रेति तद्वत्तेनैव प्रागुक्तेन प्रकारेण लग्नकेंद्रादारभ्यैकैकस्मात्केंद्रात्सप्तभिर्ग्रहैः सप्तर्क्षसंस्थितैः नौकूटछत्रचापसंज्ञं योगचतुष्टयं भवति तद्यथा लग्नद्वितीयतृतीयचतुर्थपंचमषष्ठसप्तमेषु यदासर्वेग्रहाः भवंति तदानौर्नामयोगोभवति एवंचतुर्थपंचमषष्ठसप्तमाष्टमनवमदशमेषु यदासर्वेग्रहाः भवंति तदाकूटाख्योयोगोभवति अथसप्तमाष्टमनवमदशमैकादशद्वादशलग्नेषु सर्वेग्रहाः भवंति तदाछत्राख्ययोगं अथदशमैकादशद्वादशलग्नद्वितीयतृतीयचतुर्थेषु यदा-

कूटकादिप्रवृत्तैस्तु चतुर्गृहगतैर्ग्रहैः यूपेषुशक्तिदंडाख्या होराद्यैः कंटकैः क्रमात् ७
नौकूटच्छत्रचापानि तद्वत्सप्तर्क्षसंस्थितैः अर्द्धचंद्रस्तु नावाद्यैः प्रोक्तस्त्वन्यर्क्षसंस्थितैः ८

सर्वेग्रहाभवंति तदाचापंचापाख्यंयोगं अर्द्धचंद्रइति नावाद्यैरेवयोगैरन्यर्क्षसंस्थितैः अपरराशिव्यवस्थितैरर्धचंद्राख्योयोगोभवति नावाद्याः कंटकेषूक्ताः तैश्चान्यर्क्षसंस्थितैः अपरराशिगतैः तेनपणफरेभ्यः आरभ्यनिरंतरं सप्तसुग्रहेषु यदासर्वे ग्रहाभवंत्यापोक्लीमेभ्योवा तदर्द्धचंद्राख्यः स चाष्टप्रकारः तद्यथा द्वितीयतृतीयचतुर्थपंचमषष्ठसप्तमाष्टमेषु सप्तसुसर्वेग्रहा यदाभवंति तदैकः एवंतृतीयादिनवमांतेषु द्वितीयः पंचमादिष्वेकादशांतेषु तृतीयः षष्ठादिषु द्वादशांतेषु चतुर्थः अष्टमादिषु द्वितीयांतेषु पंचमः नवमादिषु तृतीयांतेषु षष्ठः एकादशादिषु पंचमांतेषु सप्तमः द्वादशादिषु षष्ठांतेषु यदासर्वेग्रहाभवंति तदाष्टमइति ८ ६ ६ ६ ६ ६

अथसमुद्रचक्राख्यौ द्वौयोगावनुष्टुभाह · अर्थाद्द्वितीयस्थानादारभ्यैकांतरगतैर्ग्रहैः षड्ग्रहाश्रितैःषड्राशिषुव्यवस्थितैःसप्तभिर्ग्रहैः समुद्राख्योयोगोभवति तद्यथा द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशेषु षट्सुयदासप्तग्रहाभवंति तदासमुद्राख्योयोगः विलग्नादिस्थितैरिति अनेनैवप्रकारेणविलग्नाल्लग्नात्प्रभृत्यैकांतरस्थैः षट्सुगृहेषु सप्तभिर्ग्रहैः स्थितैः चक्राख्योयोगोभवति तद्यथा लग्नतृतीयपंचमसप्तमनवमैकादशेषुषट्सुगृहेषुयदासर्वेग्रहाःभवंति तदाचक्राख्योयोगोभवति इत्येवंप्रकारेण आकृतिजानामाकारवशादुत्पन्नानांसंग्रहोव्याख्यातः ९ अथसंख्यायोगसप्तकंशालिन्याह संख्यायोगाइति सप्तभिर्ग्रहैः सप्तर्क्षसंस्थैः सप्तसुराशिषुगतैरेकापायादेकापगमात्क्रमात्सप्तसंख्यायोगाः स्युः भवेयुः तेचवल्लक्या

एकांतरगतैरर्थात्समुद्रः षड्ग्रहाश्रितैः विलग्नादिस्थितैश्चक्रमित्याकृति
जसंग्रहः ९ संख्यायोगाः स्युः सप्तसप्तर्क्षसंस्थैरेकापायाद्वल्लकीदामिनीच

द्योगोलांताः तद्यथा येषुतेषुसप्तसुगृहेषुयदासर्वेग्रहाभवंति तदावल्लकीनामयोगोभवतियदाषट्सुगृहेषुसप्तग्रहाभवंति तदादामिनीनामयोगोभवति एवंपंचसुसप्तग्रहाः पाशः पाशोयोगः चतुर्षुकेदारः केदारोयोगः त्रिषुशूलः शूलोयोगः द्वयोर्युगंयुगनामयोगःएकस्मिन्राशौसप्तग्रहायदाभवंति तदागोलःगोलनामयोगः अन्यान्पूर्वमुक्तान्विहाय पूर्वोक्तान्यस्मान्योगान्विहायवर्जयित्वाएतेयोगाःभवंति एतदुक्तंभवति यथोक्तानांयोगानांमध्याद्यदिसंख्यायोगस्यसादृश्यंभवति तदासंख्यायोगोनांगीकार्यः सएवयोगोग्राह्यइति १० अथाश्रययोगत्रयजातानांदलयोगद्वयजातानांचफलंवसंततिलकेनाह ईर्ष्युरिति ईर्ष्युः समत्सरः परर्द्धिमत्सरीविदेशनिरतः परदेशाध्यासनशीलः अध्वरुचिः सततमटनः तनुविदे-

शनिरंतरमेवाध्वरुचिः तत्किमत्रद्वयोर्ग्रहणंउच्यते विदेशेप्यनेकप्रदेशाध्यासनशीलोभवतिसततमटनोनभवति एवंविधोरज्वांरज्वाख्येयोगेजातो भवति मानीगर्वितः धनीवित्तवान् बहुषु कृत्येषुकार्येष्वासक्तः बहुकर्मारंभशीलः एवंविधोमुसलाख्येयोगेजातोभवति व्यंगोंगहीनः विगतमंगंयस्य स्थिरोदृढनिश्चयः आढ्योधनवान् निपुणः कार्येषु सूक्ष्मदृष्टिः एवंविधोनलजोनलाख्येयोगेजातोभवति एवमाश्रययोगत्रयजातानांफलंव्याख्यातं स्रगुत्थोभोगान्वितइतिस्रगुत्थः स्रग्योगेजातोभोगान्वितोभवति भुजगजोभुजगाख्येसर्पयोगेजातोबहुदुःखभाक्स्यात् नानाप्रकाराणांदुःखानांभागी भवति केचिदत्रबहुवचनंपठंति व्यगाःस्थिराढ्यानिपुणानलजाः स्रगुत्थाः भोगान्विताभुजगजा बहुदुःखभाग इतिनकश्चिद्दोषः एवंदलयोग-

पाशः केदारः शूलयोगोयुगंचगोलश्चान्यान् पूर्वमुक्तान्विहाय १० ईर्ष्युर्विदेश
निरतोध्वरुचिश्चरज्वांमानीधनीचमुसलेबहुकृत्यसक्तः व्यगः स्थिराढ्यनिपुणो
नलजस्रगुत्थोभोगान्वितोभुजगजाबहुदुःखभाक्स्यात् ११ ६७

द्वयजातानांफलंव्याख्यातम् ११ अथान्योयोगाश्रययोगश्चयदासमकालंयत्रदृश्यते तत्राश्रययोगस्यनिराकरणार्थमनुष्टुभाह· आश्रयोक्तास्त्विति यत्रान्योयोगआश्रययोगश्चभवति तत्राश्रययोगोन्येनयवादिनामिश्रोभवति मिश्रितत्वान्नाफलोभवति स्वंफलंनप्रयच्छंति एवमन्यैरपरैः विमिश्रितानिः फलाभवंतियैश्चामिश्राः सादृश्यंगतास्तेतत्रफलंदद्युः केचिन्मिश्रायैस्तेफलंतेषामितिपठंति अमिश्राश्चान्यैः यदाभवंतितदास्वफलप्रदा आत्मीयफलंदधति तत्रचरराशौलग्नगतेस्थिरद्विस्वभावस्थैरमिश्राः स्थिरलग्नेचरद्विभावगतैरमिश्राः द्विस्वभावेलग्नेचरस्थिरगतैरमिश्राइति १२

अथगदाशकटविहंगशृंगाटकहलाख्येषुयोगेषुजातानांस्वरूपंवसंततिलकेनाह यज्वार्थभागिति यज्वायजनशीलः अर्थभाग् धनानांभाजनंसततं सर्वकालमर्थरुचिः अर्थार्जनोद्यमशीलः एवंविधोगदाख्येयोगेजातोभवति तद्वृत्तिभुगिति तदितिशकटपरामर्शः तद्वृत्तिभुक् शकटवृत्तिंभुंक्तेशकटाजीवीभवतीत्यर्थः सरुजोव्याध्यर्दितः कुदारः कुत्सितभार्यः एवंविधोशकटजः शकटयोगेजातोभवति दूतोटनइति दूतः परसंदेशप्रापणार्थेपरत्रकाशगामी अटतः परिभ्रमणशीलः ननुदूतेनाप्यवश्यमटनेनभवितव्यं उच्यतेपरेच्छयागमनशीलोदूतः अयंपुनःस्वेच्छयाटनः तदुभयभाग्भवति कलहकृत्कलहशीलः एवंविधोविहगाख्येयोगेजातोभवति प्रदिष्टःउक्तः चिरेणस्करवीचिरस्करवीवयोंतेस्करवीत्यर्थः एवंविधोशृंगाटकाख्येयोगेजातोभव-

आश्रयोक्तास्तुविफलाभवंत्यन्यैर्विमिश्रिताः मिश्रायैस्तेफलंदद्युरमिश्राःस्वफलप्रदाः १२
यज्वार्थभाक्सततमर्थरुचिर्गदायांतद्वृत्तिभुक्शकटजःसरुजःकुदारः दूतोटनःकलह
कृद्विहगेप्रदिष्टः शृंगाटकेचिरस्करवीकृषिकृद्धलाख्ये १३ ६७ ६७

ति अन्यैश्चिरंस्करवीचिरस्करवीशृंगाटकेव्याख्यातः तच्चायुक्तं यस्माद्भगवान्गार्गिः लग्नपंचमधर्मस्थैर्योगः शृंगाटकोमतः वयोंतेस्करविनांजन्मतत्रस्यात्स्यादुभाषिणां कृषिकृद्धलाख्येयोगेजातः कृषिकृद्भवति कृषिंकरोतीत्यर्थः १३ अथवज्रयवपद्मवापीजातानांस्वरूपंवसंततिलकेनाह वज्रेंत्यपूर्वस्करविनइति अंत्येवयोत्येस्करविनः पूर्वस्करविनश्चबाल्येस्करवीयौवनेदुःखितोवृद्धत्वेपुनरेवस्करवी भवतीत्यर्थः सुभगः सर्वजनवल्लभः अतिशूरोतीवसंग्रामधीरः एवंविधोवज्राख्येयोगेजातोभवति शौर्यान्वितः पराक्रमयुक्तः अथशब्दः पादपूरणेवयोंतः

वयोमध्येसुखी अंतः शब्दोत्रमध्यपर्यायः एवंविधोयवाख्येयोगेजातोभवति विख्यातकीर्तिः सर्वजनप्रसिद्धकीर्तिः सानतुकिमत्रविख्यातकीर्तिरस्ति उच्यते अस्तिकश्चिद्व्यवसाययाकीर्तिप्रापककर्मभिः शतैरपिपरंप्रख्यातकीर्तिंनप्राप्नोति अमितसौख्यगुणः अपरिमितसौख्यो ऽपरिमितगुणश्चगुणाः विद्याशौर्यादयः एवंविधः पद्माख्येयोगेजातोभवति ननुस्थिरसुखंतनुस्वल्पंस्थिरंचिरकालस्थायिसुखंयस्यस्वल्पसुखंबहुकालंभवतीत्यर्थः निधिकृत् भूमावर्थस्थापनशीलः नदाताकदर्यः एवंविधोवापीसंज्ञेयोगेजातोभवति १४ अथयूपशरशक्तिदंडाख्ययोगचतुष्टयेजातानांस्वरूपंवसंततिलकेनाह त्यागात्मवानिति त्यागीदाताआत्मवानप्रमादी क्रतुवरैर्यज्ञश्रेष्ठैर्यज्ञैः यजतेएवंविधे यूपाख्येयोगेजातोभवतिहिंस्रेति

वज्रेत्यपूर्वसुखिनःसुभगोतिशूरोवीर्यान्वितोप्यथयवेसुखितोवयोंतः विख्यातकीर्त्यमितसौ-
ख्यगुणश्चपद्मेवाप्यांतनुस्थिरसुखोनिधिकृन्नदाता १४ त्यागात्मवान्क्रतुवरैर्यजतेचयूपेहिंस्रोथगु-
प्त्यधिकृतःशरकृच्छराख्ये नीचोलसःसुखधनैर्वियुतश्चशक्तौदंडेप्रियैर्विरहितःपुरुषोंत्यवृत्तिः १५

हिंस्रोवधरुचिः गुप्त्यधिकृतः बंधनपालः शरकृत्शरकारः एवंविधश्चशराख्येयोगेजातोभवतिनीचः अधमानामकुलोचितानांकर्मणांकर्ताअलसः क्रियास्वपटुः सुखधनैर्विहितोभोगवित्तविवर्जितः निःसुखोनिर्धनश्चएवंविधः शक्तौयोगेजातोभवति प्रियैः पुत्रादिभिः विरहितः वर्जितः अंत्यवृत्तिः दासवृत्तिः शूद्रवृत्तिरित्यर्थः एवंविधोदंडाख्येयोगेजातः पुरुषोभवति १५ अथनौकूटछत्रकार्मुकजातानांस्वरूपंवसंततिलकेनाह कीर्त्यायुतश्चलसुखइति कीर्त्यायुतः ख्यातयशाः चलसुखः कदाचित्सुखीकदाचिद्दुःखीकृपणः अदाताचशब्दोत्रसमुच्चयार्थे एवंविधोनौजः नावाख्ये

योगेजातः प्राणीभवति कूटेनृतइति अनृतेप्लवनामतिर्यस्यासावनृतप्लवनः असत्याभिधायीअसत्याभिभाषीचबंधनपः बंधनंपातीतिबंधनपः केचित्कूटेनृतप्लवबंधनपश्चजातइतिपठंति एवंविधः कूटाख्येयोगेजातोभवतिइतिकूटयोगः छत्रोद्भवइति स्वजनसौख्यकरः स्वजनेषुसुखंकरोतीतिस्वजनसौख्यकरः अंत्यसौख्योवृद्धत्वेसुखितः एवंविधः छत्राख्येयोगेजातोभवति इतिछत्रयोगः कार्मुकः शूरश्चसंग्रामप्रियः प्रथमात्यसौख्यः प्रथमेबाल्येसुखी अंत्येवृद्धत्वेसुखीच एवंविधः कार्मुकभवः चापाख्येयोगेजातोभवति इतिचापयोगः १६ अथार्द्धचंद्रसमुद्रचक्रवल्लकीजातानांस्वरूपंवसंततिलकेनाह अर्धेंदुजइति सुभगः सर्वजनप्रियः कांतवपुः प्रदर्शनीयः प्रधानः सर्वजनपूज्यः एवंवि

कीर्त्यापुतश्चलसुखः कृपणश्चनौजः कूटेनृतप्लवनबंधनपश्चजातः छ
त्रोद्भवः स्वजनसौख्यकरोत्यसौख्यश्शूरश्चकामुकभवः प्रथमात्यसौख्यः १६

धोर्धेंदुजोर्द्धचंद्राख्येयोगेजातोभवति समुद्रयोगः नरपतिप्रतिमः राजातुल्यः भोगीभोगवान् एवंविधस्तोयालयेसमुद्राख्येयोगेजातोभवति चक्रेति नरेंद्राराजानः तेषांमुकुटाः किरीटाः चूडामणिरत्नानितेषांद्युतिः कांतिः तयारंजितौछुरितौवंघ्रीपादौयस्यराजानः तस्यपादयोः पतंति महाराजाधिराजोभवतीत्यर्थः तपोज्ञानादियोगाद्राज्ञांपूजनीयोवा एवंविधश्चक्राख्येयोगेजातोभवति आकृतियोगविंशतिजातानांफलंव्याख्यातं अत्रैवभूपालसंख्यायोगानांफलंव्याख्यायते वीणोद्भवश्चेति निपुणः सूक्ष्मदृष्टिः प्रियगीतनृत्यः गीतप्रियोनित्यप्रियश्च एवंविधोवीणोद्भवोवीणाख्येयोगेजातोभवति १७ अथदामिनीपाशकेदारशूलजातानांस्वरूपंवसंततिलकेनाह दातान्यकार्येति दाताउदा

अन्यकार्यनिरतः परोपकारासक्तः पशुपः पशुरक्षिता बहुपशुश्चभवति अथवापशुपपाठेपशूनांपालयितारक्षयिता ग्रामाधिपतिरित्यर्थः एवंविधोदाम्नियोगेजातोभवति पाशइति धनार्जनेविशीलः धनार्जनविशीलश्चासौसभृत्यबंधुश्च धनार्जनविशीलसभृत्यबंधुः स्वयमेवधनार्जनविशीलः सन्मार्गेणधनार्जनंकरोति तथाभूतास्यभृत्याः कर्मकराबांधवाश्चभवंति एवंविधः पाशाख्येयोगेजातोभवति केदारजइति कृषिकरः कृषिंकरोति सबहुपयोज्यः सुष्ठुशोभनंकृत्वा बहूनामुपयुज्यते उपकरोति एवंविधःकेदारजः केदाराख्येयोगेजातोभवति शूरः समरधीरः क्षतप्रहारितः धनरुचिः अर्थप्रियः केचिद्बहुधरुचिरितिपठंति निधनश्चदरिद्रः एवंविधः शूलाख्येयोगेजातोभवति

अर्धेंदुजःसुभगकांतवपुःप्रधानस्तोयालयेनरपतिप्रतिमस्तुभोगी चक्रेनरेंद्रमुकुटद्युतिराजितांघ्रिर्वी
णोद्भवश्चनिपुणःप्रियगीतनृत्यः १७ दातान्यकार्यनिरतःपशुपश्चदाम्नीपाशेधनार्जनविशीलसभृत्य
बंधुः केदारजः कृषिकरःसबहूपयोज्यःशूरः क्षतोधनरुचिर्विधनश्चशूले १८ ७

१८ अथयुगगोलयोर्जातस्यस्वरूपंसर्वेषांचनाभसयोगानांसमस्तदशास्वपिफलंदर्शनंहरिण्याह धनविरहितइति धनविरहितः अर्थहीनःपाखंडीत्रयीमार्गव्यपेतः एवंविधोयुगाख्येयोगेजातोभवति केचिद्धनविरहितः पाखंडीचेतिपठंति वाशब्दोनचार्थे अर्थहीनः पाखंडीत्वअथशब्दश्चानंतर्येविधनोर्थहीनः मलिनोमलोपेतशरीरः मलिनवासावाअज्ञानोपेतःमूर्खः कुशिल्पोलोकेनिंद्यशिल्पकर्ता अलसः क्रियास्वसमर्थः अटनोभ्रमणशीलः नचवालसोटनश्चेतिविरुद्धमुच्यते यद्यपिस्वरूपेणालसः तथाप्यतिदारिद्र्याद्भोजनक्रियामटनंविनासंपाद-

यितुमशक्यत्वादटनः एवंविधोगोलाख्येयोगोजातोभवति एवंसप्तकसंख्यायोगेषु शुभफलं व्याख्यातं इतिनिगदितायोगाइति इत्येवंप्रकासन्ना
भसयोगाः फलैः सार्द्धंसहनिगदिताउक्ताइहास्मिन्नध्यायेएतेसमस्तदशास्वपिनियतफलदुःसर्वकालफलप्रदाः इतिविज्ञातव्याः ननुवज्रादिष्वाद्य
न्तसुखिताप्रदर्शिता तत्कथंसमस्तदशास्वित्युक्तं उच्यते तेषांवचनाद्यथादर्शितकालः सुखदुःखयोर्भविष्यति येषांकालविभागोनोक्तस्तेषांसम
स्तदशास्वपियथादर्शितसुखदुःखप्रदाभविष्यंति ननुकस्यचित्समस्तंजन्मसुखेनदुःखेनचैकरूपेणगच्छति पुनर्भोगिनः तेपिमानसैर्दुःखैरभि
तप्ताभवंति येपिभिक्षाशिनस्तेपिकदाचिद्द्रुमाश्रितनाभचरनिशीतलासुद्रुमच्छायासु सुखितमित्यात्मानंमन्यंतेतस्मादेवमादिसुखंदुःखंसर्वे
णसर्वसंसारजालेनाधिपर्यणानुभूयतेतत्कथंसमस्तदशास्वपियोगाः फलप्रदाभवंतिउच्यते नैतेयोगादशाष्टकवर्गफलहंतारः शुभमशुभंवाफ
लंदशाप्राप्तेर्ददत्यष्टकवर्गाश्रितमपिफलंच अतोयथाकालंयोगाअपिसमयजन्मानिफलंददत्येवंमिश्रफलानुभवोभोगिनांदरिद्राणांचसंभव-
त्येवएवंतावन्नाभसयोगाध्यायोव्याख्यातः अस्मिन्नध्यायेयद्वक्तव्यंपूर्वंप्रतिज्ञातंतदुच्यतेदलयोगाकृतियोगयोःसमकालमुपस्थानंनास्ति
तथादलयोगैःसहाश्रययोगानांतुल्यकालमुपस्थानंनास्तिएव अथदलयोगैःसहसंख्यायोगायुज्यंतेतदादलयोगफलमेवभवति अथाकृतियोगाआ
श्रययोगैर्युज्यंते तदाआकृतियोगफलंभवति अथाकृतियोगाः संख्यायोगैर्युज्यंते तथाप्याकृतियोगफलंभवति यस्मात्संख्यायोगानामपवादः अ-
न्यान्पूर्वमुक्तान्विहाय आश्रययोगानामप्यपवादः आश्रययोगास्तुविफलाभवंत्यन्यैर्योगैर्मिश्रिताइति तस्मात्संख्यायोगा आश्रययोगाश्च आकृतियोगै
श्चाभिभूयते अथाश्रययोगेनसहसंख्यायोगस्योपस्थानंभवति तदासंख्यायोगस्यावकाशएवनभवति अथाश्रययोगेनसंख्यायोगस्यापवादशम
नेकृतेनान्योवकाशः संख्यायोगस्यकिंतेकस्मिन्नाशौयदासर्वेग्रहाः भवंति तदाआश्रययोगएवभवति नन्वाश्रययोगसंख्यायोगानांतुल्येअपवा

दे आश्रययोगेनसंख्यायोगः कथमभिभूयते उच्यते यदिसंख्यायोगेनाश्रययोगापशमनं भवति तदा आश्रययोगो न भवति संख्यायोगो भवति यत्र यदा आश्रययोगेन संख्यायोगोऽभिभूयते तदा गोलस्यावकाश एव न स्यात् परिभाषा चेयं निरवकाशा हि विधयः सावकाशान् विधीन् बाधंते इति अथैकैकराशिलग्नगतमधिकृत्य पुराणयवनमतेन यत्सार्द्धं योगशतमुक्तं तदधुनाप्रदर्श्यते तेषां तावत् त्रयोविंशतिराकृतियोगाः विंशतिरेव वराहमिहिरेणाभिहिताः किंतु तेषामध्याद्गदायोगेन चत्वारो योगा अभिहिताः लग्नचतुर्थयोः यदा सर्वे ग्रहा भवंति तदा गदायोगः चतुर्थसप्तमयोः शंखः सप्तमदशमयोः वज्रकः दशमलग्नयोः ध्वजः तत्र पूर्वोक्ता विंशतिः शंखवज्रध्वजैः सह त्रयोविंशतिः भवंति संख्यायोगानां सप्तविंशत्यधिकं शत

धनाविरहितः पाखंडी वायुगे त्वथ गोलके विधनमलिनोऽज्ञानोपेतः कुशल्पलसोऽटनः इति निगदितायो-
गाः सार्द्धं फलैरिह नाभसा नियतफलदाश्चैत्याद्येते समस्तदशास्वपि १९ इति नाभसयोगाध्यायः १२

एवं सार्द्धशतं १५० राशिद्वादशकेनाष्टादशशतानि भवंति १८०० तत्र सप्तविंशत्यधिकस्य संख्यायोगशतस्योत्पत्तिः प्रदर्श्यते तद्यथैषां विकल्पाः सप्त द्विविकल्पा एकविंशतिः त्रिविकल्पाः पंचत्रिंशत् ३५ चतुर्विकल्पाः पंचाग्नि ३५ पंचविकल्पा एकविंशतिः २१ षड्विकल्पाः सप्त सप्तविकल्पा एकः एतदेकीकृतं सप्तविंशत्यधिकं शतं भवति १२७ एतदेव वराहमिहिरेण विवाहपटलेऽक्तं द्व्यादियोगान्परित्यज्य कस्मान्नोक्तं शतं सत्रिधनविलग्न इति अथ विकल्पगणितं प्रदर्श्यते तत्राचार्येण विकल्पगणितं संहितायामुक्तं पूर्वेणपूर्वेणागतेन युक्तं स्थानं विनान्त्यं प्रवदंति संख्या इच्छाविकल्पैः क्रमशोऽभिनीय नीते निवृत्तिः पुनरन्यनीतिरिति अथ यावत्संख्यानां विकल्पाः कियंतस्ते तदंतानेकाद्यानुपर्युपरिस्थापयेत् तद्यथा सप्तग्रहैः एकाद्यानां सप्ताना-

नान्यासः ७।६।५।४।३।२।१ अत्र पूर्वेणागतेन युक्तं स्थानं विनान्त्यमिति पूर्वश्चासौ गतश्च पूर्वगतः तेन पूर्वेणगतेन युक्तमेतस्य मुपरि संस्थानं विनान्तद्वर्जयित्वेत्यर्थः प्रथममेकमधःस्थितं तयो द्वयोरुपरिस्थयोः क्षिपेत् एवं तत्र त्रीणि रूपाणि जातानि तानि च स्वोपरि त्रिषु क्षिपेत् एवं तत्र षड् जातानि तानि स्वोपरि चतुर्षु क्षिपेत् एवं तत्र दश रूपाणि जातानि तानि स्वोपरि पंचसु क्षिपेत् तत्र पंचदश जातानि तानि स्वोपरि षट्सु क्षिपेत् तत्रैकविंशतिर्जातानि अतः पंचकर्मणोऽभावात्तदुपरि समैवास्थिताः यदुक्तं स्थानं विनान्त्यं पुनरप्यधः प्रभृत्येवं कृत्वा पंचमे स्थाने पंचत्रिंशज्जाताः पुनरपि चतुर्थे पंचत्रिंशत् पुनस्तृतीये एकविंशतिः पुनः द्वितीये सप्त प्रथमे एकैव १।२१।३५।३५।२१।७।१ अथवान्येन प्रकारेण संख्यानयनं प्रतिलोममविनिक्षिप्य चानुलोममधः क्षिपेत् अनुलोमसमाह्वन्यादधस्थेन विभाजयेत् न्यासः अथ समानामधोरूपं छेदः अनेन भागमपहृत्य लब्धं सप्त ७ एतैः द्वितीयस्थाने षट् संगुण्याधःस्थिताभ्यां द्वाभ्यां भागमपहरेत् लब्धमेकविंशतिः २१ एतैस्तृतीयस्थाः पंच संगुण्य त्रिभिः भजेल्लब्धं पंचत्रिंशत् ३५ एतैश्चतुर्थस्थानस्थांश्चत्वारि संगुण्य चतुर्भिः भजेल्लब्धं पंचत्रिंशत् ३५ एभिः त्रीणि संगुण्य पंचभिः विभज्याप्तमेकविंशतिः २१ एभिः द्वे संगुण्य षड्भिः विभज्याप्तं सप्त एभिरेकं संगुण्य सप्तभिः विभज्याप्तमेक एव एवमेकद्वित्रिचतुःपंचषट्सप्तविकल्पाः एषां विकल्पगणितं कृत्वा यथेष्टसंख्यानां व्याख्येयम् अथैतेषां विकल्पानां लोष्टकप्रकारेणोद्धारः कर्तव्यः इच्छाविकल्पैः क्रमशोभिनीयुनीतेनिर्वृत्तिः पुनरन्यतीनि रिति यथेष्टसंख्यानां विकल्पानामाद्याक्षराणि लिखेत् तत्रैकविकल्पेष्वेकैकलोष्टचिन्हं कृत्वा विकल्पानुत्पादयेत् द्विविकल्पेष्वाद्यांस्थिरं लोष्टचिन्हं कृत्वा द्वितीयेन लोष्टचिन्हितेन सह विकल्पानुत्पादयेत् एवं त्र्यादिषु विकल्पेष्वाद्यस्थिरे लोकचिन्हितं कृत्वान्यैः चरलोष्टचिन्हितैः सहान्यस्तांविक

७	६	५	४	३	२	१	०
१	२	३	४	५	६	७	०

स्थानुत्पादयेत् एवं कृत्वा प्रथमस्योपासनं कार्यं नीतेनिवृत्तिरिति वचनात् ततोन्यास्थिरचिन्हं कृत्वान्यसेत् पुनरन्यनीतिरिति वचनात् उक्तं च भट्टश्रीशंकरेण वर्णसंख्यांककोष्ठाख्याक्षेपकोज्ञेयसंख्यकः ज्ञेयोक्तान्यत्र तत्पूर्वहानपूर्वश्चाप्यनुक्रमात् नयेद्यामाद्यमंत्यक्षाद्यपूर्वेताभिरंतरज्ञेयोत्स्यः पुनराद्याश्चकोष्ठानिष्ठाविधिर्विधिरिति तद्यथैकविकल्पाः रविः चंद्रः भौमः बुधः गुरुः शुक्रः शनिः एवमेव विकल्पाः सप्त ७ अथ द्विविकल्पना रविचंद्रौ रविभौमौ रविबुधौ रविजीवौ रविशुक्रौ रविसौरौ एवमादित्येन सह षट् अथ तृतीयविकल्पाः शशिभौमौ शशिबुधौ शशिजीवौ शशिशुक्रौ शशिसौरौ एवं चंद्रेण सह पंच भौमबुधौ भौमजीवौ भौमशुक्रौ भौमसौरौ एवं भौमेन सह चत्वारः बुधजीवौ बुधशुक्रौ बुधसौरौ एवं बुधेन सह त्रयः जीवशुक्रौ जीवसौरौ एवं जीवेन सह द्वौ शुक्रसौरौ एवं शुक्रेण सह एकः एवं द्विकल्पः एकविंशतिः अथ त्रिविकल्पाः रविचंद्रभौमाः रविचंद्रबुधाः रविचंद्रजीवाः रविचंद्रशुक्राः रविचंद्रसौराः एवमादित्यचंद्रयोः पंच रविभौमबुधाः रविभौमजीवाः रविभौमशुक्राः रविभौमशुक्राः रविभौमसौराः एवमादित्यांगारकयोश्चत्वारः रविबुधजीवाः रविबुधशुक्राः रविबुधसौराः एवमादित्यबुधयोस्त्रयः रविजीवशुक्राः रविजीवसौराः एवं द्वौ रविशुक्रसौराः एवमेकः एवमादित्येन सह त्रिविकल्पाः पंचदश चंद्रभौमबुधाः चंद्रभौमजीवाः चंद्रभौमशुक्राः चंद्रभौमसौराः एवं चंद्रभौमयोश्चत्वारः चंद्रबुधजीवाः चंद्रबुधशुक्राः चंद्रबुधसौराः एवं त्रयः चंद्रजीवशुक्राः चंद्रजीवसौराः एवं द्वौ चंद्रशुक्रसौराः एकः एवं चंद्रेण सह दश १० भौमबुधजीवाः भौमबुधशुक्राः भौमबुधसौराः एवं त्रयः भौमजीवशुक्राः भौमजीवसौराः एवं द्वौ भौमशुक्रसौराः एवं भौमेन सह षट् बुधजीवशुक्राः बुधजीवसौराः एवं द्वौ जीवशुक्रसौराः एकः एवं त्रिविकल्पाः पंचत्रिंशत् ३५ अथ चतुर्विकल्पाः रविचंद्रभौमबुधाः रविचंद्रभौमजीवाः रविचंद्रभौमशुक्राः रविचंद्रभौमसौराः एवं चत्वारः रविचंद्रबुधजीवाः रविचंद्रबुधशुक्राः

रविचंद्रबुधसौराः एवंत्रयः रविचंद्रजीवशक्राः रविचंद्रजीवसौराः एवमेकः रविभौमबुधजीवाः रविभौमबुधशक्राः रविभौमबुधसौराः एवंत्रयः रविभौमजीवशक्राः रविभौमजीवसौराः एवं द्वौ रविभौमशक्रसौराः एवमेकः रविबुधजीवशक्राः रविबुधजीवसौराः द्वौ रविबुधशक्रसौराः रविजीवशक्रसौराः एवमादित्येन सह विंशतिः चंद्रभौमबुधजीवाः चंद्रभौमबुधशक्राः चंद्रभौमबुधसौराः एवंत्रयः चंद्रभौमजीवशक्राः चंद्रभौमजीवसौराः एवं द्वौ चंद्रभौमशक्रसौराः चंद्रबुधजीवशक्राः चंद्रबुधजीवसौराः चंद्रबुधशक्रसौराः चंद्रजीवशक्रसौराः एवंचंद्रेण सह दश भौमबुधजीवशक्राः भौमबुधजीवसौराः भौमबुधशक्रसौराः भौमजीवशक्रसौराः एवं भौमेन सह चत्वारः बुधजीवशक्रसौराः बुधेन सह एकः एवं चतुर्विकल्पाः पंचत्रिंशत् ३५ अथ पंचविकल्पाः रविचंद्रभौमबुधजीवाः रविचंद्रभौमबुधशक्राः रविचंद्रभौमबुधसौराः रविचंद्रभौमजीवशक्राः रविचंद्रभौमजीवसौराः रविचंद्रभौमशक्रसौराः रविचंद्रबुधजीवशुक्राः रविचंद्रबुधजीवसौराः रविचंद्रबुधशक्रसौराः रविचंद्रजीवशक्रसौराः रविभौमबुधजीवशक्राः रविभौमबुधजीवसौराः रविभौमबुधशक्रसौराः रविभौमजीवशक्रसौराः रविबुधजीवशक्रसौराः एवमादित्येन सह पंचदश १५ चंद्रभौमबुधजीवशक्राः चंद्रभौमबुधजीवसौराः चंद्रभौमबुधशक्रसौराः चंद्रभौमजीवशक्रसौराः चंद्रबुधजीवशक्रसौराः एवंचंद्रमसा सह षट् ६ भौमबुधजीवशक्रसौराः एवं पंचविकल्पाः एकविंशतिः २१ अथ षड्विकल्पाः आदित्यचंद्रभौमबुधजीवशक्राः रविचंद्रभौमबुधजीवसौराः रविभौमबुधजीवशक्रसौराः रविभौमबुधजीवशक्रसौराः एवं षड्विकल्पाः अथ सप्तविकल्पाः रविचंद्रभौमबुधजीवशक्रसौराः सप्तविकल्प एक एव एवं सप्तविंशत्यधिकं विकल्पशतं व्याख्यातम् १२७ इति बृहज्जातकविवृत्तौ नाभसयोगाध्यायः १२ अथातश्चंद्रयोगाध्यायो व्याख्यायते तत्रा

द्वावेवार्कात्केंद्र पणफरापोक्लीमस्थेचंद्रेजातस्यस्वरूपत्वान्मालिन्याह अधमसमवरिष्ठानीति विनयोनीतिः सुशीलता वित्तंधनंज्ञानंविज्ञानशास्त्रावबोधः धीः बुद्धिः नैपुण्यंकार्येषुसूक्ष्मदर्शित्व अर्कादादित्यात्केंद्रादिसंस्थेकेंद्रपणफरापोक्लीमसंस्थेशशिनिचंद्रेजातस्यविनयवित्तज्ञानधीनैपुण्यान्यधमसमवरिष्ठानिनिकृष्टमध्यमोत्तमानिभवंति एतदुक्तंभवति यस्यादित्याज्जन्मनिकेंद्रस्थश्चंद्रमाभवति तस्यैतानिविनयादीन्यधमानिभवंति अधमत्वमेतेषामभावः यस्माद्यवनेश्वरः मूर्खान्दरिद्रांश्चपलान्विशीलांश्चंद्रः प्रसूतेर्कचतुष्टयस्थः यस्यजन्मसमयेपणफरस्थश्चंद्रः सूर्याद्भवतितस्यैतानिमध्यमानिभवंति नचातिभवंतीत्यर्थः यस्यजन्मनिचापोक्लीमस्थःचंद्रोभवति तस्यविनयादीनिवरिष्ठानिभवंति

अथचंद्रयोगाध्यायप्रारंभः अधमसमवरिष्ठान्यर्ककेंद्रादिसंस्थेशशिनिविनयवित्तज्ञानधी
नैपुणानि अहनिनिशिचचंद्रेस्वाधिमित्रांशकेवासुरगुरुसितदृष्टेवित्तवान्स्यात्सुखीच १

तथाचयवनेश्वरः कुर्याद्वितीयेधनिनांप्रसूतिमापोक्लीमस्थेकुलजाग्रजानामिति अहनीत्यादि चंद्रेशशिनिस्वाधिमित्रांशकस्थे अहनिनिशिच यथासंख्यंसुरगुरुसितदृष्टेजीवशुक्राभ्यामवलोकितेजातोवित्तवान् धनीसुखीचभोगवांश्चस्याद्भवेत् एतदुक्तंभवतियस्याहनिदिवाजन्मभवति चंद्रश्चयस्मिन्तस्मिन्राशौस्वनवांशकस्थोभवतिस्वस्याधिमित्रांशकेस्थितोवासुरगुरुणाजीवेनदृष्टः तदासपुरुषोवित्तवान्सुखीचभवति अथयस्यनिशिरात्रौजन्मभवति चंद्रमास्वनवांशकस्थोऽधिमित्रनवांशकस्थोवाभवति शुक्रेणदृश्यतेतदाजातोवित्तवान्सुखीचभवति अत्राहनिनिशिच चंद्रेस्वाधिमित्रांशकेवास्थितेयथासंख्यंसुरगुरुसितदृष्टे केचिद्व्याचक्षते अयुक्तमेतत् यस्माद्भगवान्गार्गिः स्वांशेऽधिमित्रस्यांशेवासंस्थितोऽदि

बृ·टी·
१०५

यसेशशी गुरुणा दृश्यते तत्रजातोवृत्तकरवान्वितः निश्येवंभृगुणादृष्टः शशीजन्मनिशस्यतेविपर्यस्थेशीतांशौजायंतेल्पधनानराइति तथाचयवनेश्वरः स्वांशेशशीभार्गवदृष्टमूर्तिर्निशीश्वरोत्पत्तिकरः प्रदिष्टः तदुत्तमोद्भूतिकरः सतुस्याद्दृष्टोदिवादेवपुरोहितेन १ अथाधियोगाख्यंयोगंसफलंवसंततिलकेनाह सौम्यैरिति इंदोश्चंद्रात्सौम्यैः बुधगुरुसितैः स्मरारिनिधनेषु सप्तमषष्ठाष्टमेषुत्रिषुस्थानेषु द्वयोर्वास्थानयोरेकस्मिन्वास्थानेसर्वएवभवति तदाधियोगाख्योयोगोव्याख्यातोभवति अत्रकैश्चित्षष्ठसप्तमाष्टमानांस्थानानांसौम्यग्रहत्रयस्यावस्थानादन्युन्नतायामभियोगोव्याख्यातः तच्चायुक्तं यस्माच्छ्रुतकीर्तिः निधनद्यूनषष्ठचंद्रस्थानाद्यथाशुभैर्युक्तं अधियोगः संप्रोक्तोव्यासकृतोसप्तधापूर्वैः ·

चं·यो·
१३

सौम्यैःस्मरारिनिधनेष्वधियोगइंदोस्तस्मिंश्चमूपसचिवक्षितिपालजन्म
संपन्नसौख्यविभवाहतशत्रवश्चदीर्घायुषोविगतरोगभयाश्चजाताः २

व्यासकृतोपूर्वैराचार्यैश्चिरंतनैः सप्तसप्तधासप्तप्रकारः प्रोक्तः कथितः तद्यथाषष्ठेराशौयदासर्वेसौम्यग्रहाः भवंतितदैकः सप्तमेद्वितीयः अष्टमेतृतीयः षष्ठसप्तमयोश्चतुर्थः षष्ठाष्टमयोः पंचमः सप्तमाष्टमयोः षष्ठः षष्ठसप्तमाष्टमेषुसप्तमइति एवमेवंस्थितेषुसौम्येष्वधियोगः अथादेवंसमस्थितेषुपापैः पापःमिश्रैर्मिश्रः तथाचश्रुतकीर्तिःषट्सप्तमाष्टमसंस्थैः चंद्रात्सौम्यैः शुभोधियोगःस्यात्पापः पापैरेवंमिश्रैर्मिश्रस्तथैवोक्तः अधियोगजातानांफलमाह तस्मिंश्चमूपतिसचिवक्षितिपालजन्मेति तस्मिन्नधियोगेजातश्चमूपः सेनापतिर्भवतिसचिवोमंत्रीभवति क्षितिपालोराजावाभवति तेषायुगपदसंभवात्पृथक्कृत्वव्याख्यानम् तथाचबादरायणः शशिनःसौम्याःषष्ठद्यूनेवानिधनसंस्थितावास्युः जातोनृप-

१०५

तिर्ज्ञेयो मंत्री वा सैन्यनायकोपि तेनैतदुक्तं भवति बुधगुरुसितरुत्कृष्टवीर्यैः नृपो मध्यमवीर्यैः सचिवः हीनवीर्यैः सेनापतिः एषामन्यतमाश्चापि संपन्नसौख्यविभवाः अतिसौख्यैश्वर्यसंपन्नाः हतशत्रवः नष्टरिपवः दीर्घायुषः चिरजीविनः विगतरोगभयाः स्वस्थदेहा निर्भरयाश्च एवंविधे योगे जाता भवंति केषांचिन्मते राजयोग एव तथा च सारावल्याम् मूर्तषष्ठमस्थाष्टमांशिशिरगाः प्राप्ताः समस्ताः शुभाः क्रूराणां यदि गोचरेण पतिताः सूर्यादला दूरतः भूपालः प्रभवेत्स यस्य जलधेर्वेलावनांतोद्भवैः सेनामत्तकरींद्रदानसलिलं भृंगैर्मुहुः पीयते १ तथा च मांडव्यः अमित्रयामित्रनिधनमथवा शीतरुचितोगताः सर्वे सौम्यास्तमिह जनयेयुर्नरपतिः धृतेनैवासेकं गनततिविषादेतु पयसा प्रतापाग्निर्यस्य ज्वलति हृदये शत्रुषु भृशम् २।२ अथ सुनफानफादुरुधराकेमद्रुमाख्य

हित्वार्कं सुनफानफादुरुधराः स्वांत्योभयस्थैर्ग्रहैः शीतांशोः कथितोन्यथा तु बहुभिः केमद्रुमोन्यै
स्त्वसौ केंद्रे शीतकरेथवा ग्रहयुते केमद्रुमो नेष्यते केचित्केंद्रनवांशकेषु च वदन्त्युक्तिमसिद्धा नन ३

योगचतुष्टयं शार्दूलविक्रीडितेनाह हित्वार्कमिति अथार्कमादित्यं हित्वा त्यक्त्वा यदान्यः कश्चिद्ग्रहो भौमादिकः शीतांशोश्चंद्रात्स्वांत्योभयस्थो भवति द्वितीयस्थो द्वादशस्थो वा द्वितीयद्वादशस्थौ वा द्वौ भवतस्तदा सुनफानफादुरुधराख्ययोगत्रयं भवति एतदुक्तं भवति अर्कं हित्वा यदान्यो ग्रहः कश्चिद्वा द्वितीयस्थाने भवति तदा सुनफानामयोगो भवति अथार्कं वर्जयित्वा चंद्रात् द्वादशे कश्चिद्ग्रहो भवति तदा अनफानामयोगो भवति एवं चंद्रात् द्वितीयद्वादशगौ ग्रहौ भवतस्तदा दुरुधुरा नाम योगो भवति अत्र योगत्रयेप्यादित्यो द्वितीये द्वादशे वा स्थाने भवति तदानुफायोगभंगकृद्भवति किंतु योगकर्तृणां मध्ये न गण्यते एतदुक्तं भवति आदित्यो द्वितीये द्वादशे वा स्थाने भवतु मा भवतु वा भौमादिस्तत्रस्थो यथा दर्शितं योगकर्त्ता भवति एते योगा बहुभिरा-

चार्यैः पठिताः अन्यथाकेमद्रुमउक्तः अस्माद्योगत्रयाद्यद्येकोपियोगोनभवति तदाकेमद्रुमाख्योयोगोभवति भौमादीनांकेंद्रे शीतकरेथवाग्रहयुक्ते·
केमद्रुमोनेष्यते अन्येषांगर्गादीनांमेवमतं केंद्रेजन्मलग्नकेंद्रेशीतकरेचंद्रेवाभौमादिग्रहयुतेभौमादिग्रहविरहितयोरपिचंद्राद्द्वितीयद्वादशस्थानयोः
केमद्रुमोनभवति केंद्रेग्रहयुतइत्यत्रकैश्चिच्चंद्रकेंद्रमेवलंव्याख्यातं तच्चायुक्तं चंद्रकेंद्रेग्रहयुतेचंद्रमसोपियोगोंतर्भवति शीतकरेग्रहयुतेइत्ये·
तदपार्थकस्यात् अत्रचभगवान्गार्गिः यथार्थकेंद्रगश्चंद्राद्द्वितीनाभानुनचेद्ग्रहः कश्चित्स्याद्यविनाचंद्रलग्नात्केंद्रगतोथवा योगः केमद्रुमोनामतदा·
स्यात्सुत्रगर्हितः भवंतिनिंदिताचाराद्दारिद्र्यापत्तिसंयुताः तथाचसारावल्याम् सुनफानफादुरुधराः क्रमेणयोगाभवंति रविरहितैः वित्तांत्यभयस्थ
स्थैः कैरवनबांधवाद्विहगैः एतेनयदायोगाःकेंद्रग्रहवर्जिताः शशांकश्चकेमद्रुमोतिकष्टः शशिनिचसर्वग्रहादृष्टेएवकेंद्रेशीतकरेऽथवाग्रहयुतेकेम·
द्रुमोनेष्यते अन्येत्वाचार्यानेच्छंति वराहमिहिरस्तुपुनरिच्छत्येव यस्मिन्नर्थेतस्यैवतद्वाक्यंचान्यथाकेमद्रुमइत्येवमुक्तापरमतमुक्तं अन्यैरसोएवंकेंद्रे·
शीतकरेथवाग्रहयुतेकेमद्रुमोनेष्यतेस्वल्पजातकेपितेनसुनफानफादुरुधराभावेकेमद्रुमउक्तः तथाचरविवर्ज्यंद्वादशगैरनफाचंद्राद्द्वितीयगैः सुनफाउ
भयस्थितैदुरुधराकेमद्रुमसंज्ञकोतोन्यः सत्यस्यापिसुनफानफाभावेदुरुधराभावेकेमद्रुमः तथाचसुनफात्वनफायोगोदौरुधुरश्चंद्रसंस्थितः सेत्रा
तु प्राक्पृष्टतोग्रहैर्द्वैरुभयगतैस्तुरविंवर्ज्यं केमद्रुमोत्रयोगोन्यथाभवेद्यत्रगर्हितंजन्मकेचित्केंद्रनवांशकेष्विति केचिदाचार्याः केंद्रेषुकश्चिच्चन·
वांशकेष्वेतद्योगत्रयवदनियथाचंद्राद्द्वितीयद्वादशोभयस्थैर्ग्रहैः सुनफाद्यायोगाव्याख्याताः तथाकैश्चित्श्रुतकीर्तिजीवशर्मप्रभृतिभिः केंद्र·
शान्नवांशकवशाच्चव्याख्याताः एतदुक्तंभवति ताराग्रहैश्चंद्राच्चतुर्थस्थानस्थैः सुनफादशमस्थानस्थैरनफाचतुर्थदशमस्थितैः दुरुधुराश्चतो
न्यथाकेमद्रुमः तथाचश्रुतकीर्तिः चंद्राच्चतुर्थैः सुनफादशमस्थितैः कीर्तितानफाविहगैः उभयस्थितैर्दुरुधुरा केमद्रुमसंज्ञितोन्यथायोगः के

स्थितेंद्रनवांशके धुनु वदंति यत्रतत्रराशौयद्राशिसंबंधिनवांशके चंद्रमाभवति तस्माद्राशेर्यो द्वितीयोराशिः तत्रयदि ताराग्रहोभवति तदासुनफा अथचंद्रनवांशकराशेः द्वादशेताराग्रहोभवति तदानफा अथचंद्रनवांशकराशेः द्वितीयेद्वादशेचयदाग्रहोभवतस्तदादुरुधरा अतोन्यथाकेमद्रुमः तथा चचंद्रनवांशकराशितो द्विद्वादशराशीयदाग्रहरहितौभवतः तदाकेमद्रुमः तथाचजीवशर्मा यद्राशिसंज्ञोशीतांशुर्नवांशेजन्मनिस्थितः तद्वितीयस्थितैः योगः सुनफाख्यः प्रकीर्तितः द्वादशैरनफाह्वोयोगद्वैर्द्विद्वादशस्थितैः प्रोक्तोदुरुधरायोगोन्यथाकेमद्रुमः स्मृतः उक्तिः प्रसिद्धानतेयेषामेवाविधंमतंतेषामुक्तिर्लोकेनप्रसिद्धा तन्मतंवृद्धज्योतिषिकैर्नांगीकृतमित्यर्थः ३ अथसुनफानफादुरुधराख्यप्रकारस्तानभिद्रवजयाह त्रिंशत्सरू-

त्रिंशत्सरूपाः सुनफानफाख्याः षष्टित्रयंदौरुधुरेप्रभेदाः इच्छाविकल्पैः क्रमशोभिनीयनीतेनिवृत्तिः पुनरन्यनीतिः ४ ५

पाइति सरूपाः त्रिंशदेकत्रिंशत् एकत्रिंशत्सुनफाख्यायोगाः तावंतएवसुनफाख्याः षष्टित्रयमशीत्याधिकंशतंदुरुधुराप्रभेदानां एषांपूर्ववद्धिकस्यगणितंइच्छाविकल्पैरित्यादि एतत्श्लोकेलोष्टप्रस्तारपूर्वमेवनाभसयोगाध्यायेव्याख्यातं इच्छाविकल्पैः क्रमशः परिपाद्यान्यभलोष्टकमभिनिपनीतेनिवृत्तिः कार्यापुनः भूयोन्यनीतिरित्यत्रस्थानांतरेचालनम् अथसुनफादयोभौमबुधगुरुसितासितैः पंचभिर्निष्पाद्यंते तस्मादिच्छाविकल्पाः पंचा तेषांन्यासः अत्रप्राग्वत्पूर्वेणपूर्वेणगणितेनयुक्तस्थानांविनान्त्यंप्रवदन्तिसंख्यामिति कृत्वाजातं ५।४।३।२।१ अथवाप्राग्वत्संख्यैःस्वस्वसंख्याजाता
५।४।३।२।१ एकमेवविकल्पाः पंचद्विविकल्पादश चतुर्विकल्पाः पंचपंचविकल्पाएकः एवमेवत्रिंशत् ५।१०।१०।५।१ तद्यथा द्विती-
१।२।३।४।५

येचंद्राद्भौमः बुधः बृहस्पतिः शक्रः सौरः एवमेकविकल्पाः पंच अथद्विविकल्पाः भौमबुधौ भौमजीवौ भौमशक्रौ भौमसौरौ बुधजीवौ॰ बुधशक्रौ बुधसौरौ जीवशक्रौजीवसौरौ शक्रसौरौ एवंद्विविकल्पाः दश अथत्रिविकल्पाः भौमबुधजीवाः भौमबुधशक्राः भौमबुधसौराः भौमजीवशक्राः भौमजीवसौराः भौमशक्रसौराः बुधजीवशक्राः बुधजीवसौराः बुधशुक्रसौराः जीवशुक्रसौराः एवंत्रिविकल्पादश १० अथचतुर्विकल्पाः भौमबुधजीवशक्राः भौमबुधजीवसौराः भौमजीवशक्रसौराः भौमबुधशक्रसौराः बुधजीवशक्रसौराः एवंचतुर्विकल्पाः पंच ५ अथपंचविकल्पाः भौमबुधजीवशुक्रसौराः एवंपंचविकल्पएकः १ एवमेकात्रिंशत् ३१ सुनफायोगाः उत्पादिताः अनेनैवप्रकारेणद्वादशस्थैः अनफाभेदाः एकत्रिंशत् अथदुरुधराविकल्पाः एषांलोष्टुकप्रस्ताराभावात्स्वबुद्ध्येच्छाविकल्पैः क्रमशोभिनीयेतिन्यायेनव्युत्पत्तिः एकोद्वितीये द्वितीयोद्वादशे एकोद्वादशेद्वितीयोद्वितीयेतद्यथा भौमबुधौ १ बुधभौमौ २ भौमजीवौ ३ जीवभौमौ ४ भौमशक्रौ ५ शक्रभौमौ ६ भौमसौरौ ७ सौरभौमौ ८ बुधजीवौ ९ जीवबुधौ १० बुधशक्रौ ११ शक्रबुधौ १२ बुधसौरौ १३ सौरबुधौ १४ जीवशक्रौ १५ शक्रजीवौ १६ जीवसौरौ १७ सौरजीवौ १८ शक्रसौरौ १९ सौरशक्रौ २० अथैकोद्वितीयेद्वादशेद्वौ द्वितीयेद्वौ द्वादशेचैकः तद्यथा भौमः बुधजीवौ १ बुधः जीवभौमौ २ जीवः शक्रबुधौ ३ बुधः शक्रभौमौ ४ भौमः बुधसौरौ ५ बुधः सौरभौमौ ६ भौमः जीवशक्रौः ७ जीवः शक्रभौमौ ८ भौमः जीवसौरौ ९ जीवः सौरभौमौ १० भौमः शक्रसौरौ ११ शुक्रः सौरभौमौ १२ बुधः भौमजीवौ १३ जीवः भौमबुधौ १४ बुधः भौमशक्रौ १५ भौमः शक्रबुधौ १६ बुधः भौमसौरौ १७ भौमः सौरबुधौ १८ बुधः जीवशक्रौ १९ जीवः शक्रबुधौ २० बुधः जीवसौरौ २१ जीवः सौरबुधौ २२ बुधः शुक्रसौरौ २३ शक्रः सौरबुधौ २४ जीवः भौमबुधौ २५ भौमबुधजीवौ २६ जीवः भौमशुक्रौ २७ भौमः शुक्रजीवौ २८ जीवः भौमसौरौ २९ भौमः सौरजीवौ॰

३० जीवः बुधशक्रौ ३१ बुधः शक्रजीवौ ३२ जीवः बुधसौरौ ३३ बुधः सौरजीवौ ३४ जीवः शक्रसौरौ ३५ शक्रः सौरजीवौ ३६ शक्रः भौमबुधौ ३७ भौमः बुधशक्रौ ३८ शक्रः भौमजीवौ ३९ भौमः जीवशक्रौ ४० शक्रः भौमसौरौ ४१ भौमः सौरशुक्रौ ४२ शक्रः बुधजीवौ ४३ बुधः जीवशक्रौ ४४ शक्रः बुधसौरौ ४५ बुधः सौरशक्रौ ४६ शक्रः जीवसौरौ ४७ जीवः सौरशक्रौ ४८ सौरः भौमबुधौ ४९ भौमः बुधसौरौ ५० सौरः भौमजीवौ ५१ भौमः जीवसौरौ ५२ सौरः भौमशक्रौ ५३ भौमः शक्रसौरौ ५४ सौरः बुधजीवौ ५५ बुधः जीवसौरौ ५६ सौरः बुधशक्रौ ५७ बुधः शक्रसौरौ ५८ सौरः जीवशक्रौ ५९ जीवः शक्रसौरौ ६० एवमेकत्र जाताः ८० अथैको द्वितीये द्वादशे त्रयः तद्यथा भौमः बुधजीवशक्राः १ बुधजीवशुक्रा भौमाः २ भौमबुधजीवसौरौ ३ बुधजीवसौराः भौमाः ४ भौमबुधशक्रसौराः ५ बुधशक्रसौराः भौमाः ६ भौमः जीवशक्रसौराः ७ जीवशक्रसौराः भौमाः ८ बुधः भौमजीवशक्राः ९ भौमजीवशक्रबुधः १० बुधः भौमजीवसौराः ११ भौमजीवसौराः बुधः १२ बुधः भौमशक्रसौराः १३ भौमशक्रसौराः बुधः १४ बुधः जीवशक्रसौराः १५ जीवशक्रसौराः बुधः १६ जीवभौमबुधशक्राः १७ भौमबुधशक्राः जीवः १८ जीवः भौमबुधसौराः १९ भौमबुधसौराः जीवः २० एवमेकत्र १०० जीवः भौमशक्रसौराः १ भौमशक्रसौराः जीवः २ जीवः बुधशक्रसौराः ३ बुधशक्रसौराः जीवः ४ शक्रः भौमबुधजीवाः ५ भौमबुधजीवाः शक्रः ६ शक्रः भौमबुधसौराः ७ भौमः बुधसौराः शक्रः ८ शक्रः भौमजीवसौराः ९ भौमजीवसौराः शक्रः १० शक्रः बुधजीवसौराः ११ बुधजीवसौराः शक्रः १२ सौराः भौमबुधजीवाः १३ भौमबुधजीवाः सौराः १४ सौरः भौमबुधशक्राः १५ भौमबुधशक्राः सौरः १६ सौरः भौमजीवशक्राः १७ भौमजीवशक्राः सौरः १८ सौरः बुधजीवशक्राः १९ बुधजीवशक्राः सौरः २० एवमेकत्र १२० अथ द्वितीये एको द्वादशे चत्वारः चत्वारो द्वितीये द्वादशे चैकाः तद्यथा भौमः बुधजीवशक्रसौराः १ बुधजीवशक्र

क्रसौराः भौमः २ बुधः भौमजीवशुक्रसौराः ३ भौमजीवशक्रसौराः बुधः ४ जीवः भौमबुधशक्रसौराः ५ भौमबुधशक्रसौराः जीवः ६ शुक्रभौमबुधजीवसौराः ७ भौमबुधजीवसौराः शक्रः ८ सौरः भौमबुधजीवशक्राः ९ भौमबुधजीवशुक्राः सौरः १० एवमेकत्र १३० अथद्वौ द्वादशे द्वावेवाद्वितीये तद्यथा भौमबुधजीवशक्रौ १ जीवशक्रौ भौमबुधौ २ भौमबुधौ जीवसौरौ ३ जीवसौरौ भौमबुधौ ४ भौमबुधौ शक्रसौरौ ५ शक्रसौरौ भौमबुधौ ६ भौमजीवौ शुक्रबुधौ ७ शक्रबुधौ भौमजीवौ ८ भौमजीवौ बुधसौरौ ९ बुधसौरौ भौमजीवौ १० भौमजीवौ शक्रसौरौ ११ शुक्रसौरौ भौमजीवौ १२ भौमशुक्रौ बुधजीवौ १३ बुधजीवौ भौमशुक्रौ १४ भौमशक्रौ बुधसौरौ १५ बुधसौरौ भौमशक्रौ १६ भौमशक्रौ जीवसौरौ १७ जीवसौरौ भौमशक्रौ १८ बुधजीवौ भौमसौरौ १९ भौमसौरौ बुधजीवौ २० एवमेकत्र १५० भौमसौरौ बुधशक्रौ १ बुधशक्रौ भौमसौरौ २ भौमसौरौ जीवशक्रौ ३ जीवशक्रौ भौमसौरौ ४ बुधजीवौ शक्रसौरौ ५ शक्रसौरौ बुधजीवौ ६ बुधशक्रौ जीवसौरौ ७ जीवसौरौ बुधशक्रौ ८ जीवशक्रौ बुधसौरौ ९ बुधसौरौ जीवशक्रौ १० एवमेकत्र १६० द्वौ द्वितीये त्रयो द्वादशे द्वादशे द्वौ त्रयो द्वितीये च तद्यथा भौमबुधौ जीवशुक्रसौराः १ जीवशक्रसौराः भौमबुधौ २ भौमजीवौ बुधशक्रसौराः ३ बुधशक्रसौराः भौमजीवौ ४ भौमशक्रौ बुधजीवसौराः ५ बुधजीवसौराः भौमशक्रौ ६ भौमसौरौ बुधजीवशक्राः ७ बुधजीवशक्राः भौमसौरौ ८ बुधजीवौ भौमशक्रसौरौ ९ भौमशक्रसौराः बुधजीवौ १० एवमेकत्र १७० बुधशक्रौ भौमजीवसौराः १ भौमजीवसौराः बुधशक्रौ २ बुधसौरौ भौमजीवशक्राः ३ भौमजीवशक्राः बुधसौरौ ४ जीवशक्रौ भौमबुधसौराः ५ भौमबुधसौराः जीवशक्रौ ६ जीवसौरौ भौमबुधशक्राः ७ भौमबुधशक्राः जीवसौरौ ८ शुक्रसौरौ भौमबुधजीवाः ९ भौमबुधजीवाः शक्रसौरौ १० एवमेकत्र १८० एवं दुरुधरायोगभेदाः शतमशीत्वाधिकं प्रदर्शितम् ४ ६ ६ ६

अथसुनफानफयोर्योगजातस्यस्वरूपविज्ञानंमालिन्याह स्वयमिति स्वयमात्मनाधिगतमार्जितंवित्तंयेनस्वयार्जितधनः पार्थिवोराजाभवति तत्समोवायदिराजानभवतितदाराजतुल्यः धीधनख्यातिमान् बुद्धिवित्तकीर्तिभिः युक्तः एवंविधः सुनफायांयोगेजातोभवति प्रभुरितिप्रभुरप्रतिहताज्ञः अगदशरीरोनिरुजदेहः अविद्यमानागदारोगायस्यशीलवान्दमविनयादिभिर्गुणैः युक्तः ख्यातकीर्त्तिः प्रथितयशाः जनविदितसद्गुणः विषयसुखः शब्दस्पर्शरसरूपगंधाः विषयाः तत्सुखैर्युक्तः ननुकिंविषयव्यतिरिक्तसुखमस्तिउच्यतेअस्ति यद्योगिनांमनः सुखसुवेषः अनुलेपनालंकारमाल्यसद्वस्त्रधारणशीलः निर्वृतः मनोदुःखविनिर्मुक्तः एवंविधोनफायांयोगेजातोभवति ५ अथदुरुधराकेमद्रुमयोगजातयोःस्वरूपंवसंतति

स्वयमधिगतवित्तः पार्थिवस्तत्समोवा भवतिहिसुनफायांधीधनख्यातिमांश्च प्रभुरगदशरीरः शील
वान्ख्यातकीर्तिर्विषयसुखसुवेषोनिर्वृतश्चानफायां ५ उत्पन्नभोगसुखभुग्धनवाहनाढ्यस्त्यागान्वितोदुरु
धराप्रभवःसुभृत्यः केमद्रुमेमलिनदुःखितनीचनिःस्वाः प्रेष्याःखलाश्चनृपतेरपिवंशजाताः ६

लकेनाह उत्पन्नभोगसुखभुगिति यत्नतस्ययथातथोत्पन्नैर्भोगैः सुखानिभुंक्तेधनेनवित्तेनवाहनैरश्वादिभिराढ्यो त्यागान्वितो दातासुभृत्यः शोभनभृत्यः एवंविधोदुरुधराप्रभवोदुरुधरायोगेजातोभवति केमद्रुमइतिमलिनः मलवासाः स्नानालसश्चदुःखितः शारीराद्यैः मानसाद्यैः दुःखैरन्वितः नीचः स्वकुलानुचिताधमकर्मकरः निःस्वः दरिद्रः प्रेष्यः दासकर्मकरः खलः दुर्जनस्वभावः एषामुक्तार्थानामन्यतमेनयुक्तो यदि नृपतेः राज्ञापिवंशेकुलेजातः तथाप्येवंविधः केमद्रुमजातोभवति केचिदत्रबहुवचनंपठंति केमद्रुमेमलिनदुःखितनीचनिःस्वाः प्रेष्याःखलाश्च

नृपतेरपिवंशजाताः तथापिनकश्चिद्दोषः ६ एवंतावत्सुनफानफादिषुसामान्येनफलमभिधायेदानींग्रहवशाद्विशेषफलंवसंततिलकेनाह उत्साहवान्बलिर्नीत्योद्यमशीलः शौर्यवान्रणप्रियः धनवान्वित्तान्वितः साहसवानसमीक्षितकार्यकुरः यद्यत्कार्यंयदाकालेत्वविचार्यकरोतियः ससाहसिकः एवंविधोमहीजोंगारकोयदियोगकर्ताभवति तदाजातोभवति पटुः दक्षः सुवचनः शोभनवाक्कलासुनिपुणः गीतवाद्यनृत्यचित्रपुस्तककर्मादिषुसूक्ष्मदृष्टिः यदिसौम्योबुधोयोगकरः तदेवंविधोजातोभवति अर्थभाक् धनानांभाजनः धर्मभाक्धर्मक्रियास्वनुरतः सुखभाक्नृत्यसुखान्वितः नृपपूजितः राज्ञामान्यः यदिजीवोबृहस्पतिः योगकरः तदेवंविधोजातोभवति कामीकामुकः स्त्रीलोलः बुधधनः प्रभूतार्थः विष-

उत्साहशौर्यधनसाहसवान्महीजः सौम्यः पटुः सुवचनोनिपुणः कलासु जीवोर्थधर्मसुखभा
ग्नृपपूजितश्चकामीभृगुर्बहुधनोविषयोपभोक्ता ७ परविभवपरिच्छदोपभोक्तारवितनयो
बहुकार्यकृद्गणेशः अशुभकृदुडुपोन्हिदृश्यमूर्तिर्गलिततनुश्चशुभोन्यथान्यदूह्यम् ८

याणामिंद्रियार्थानामुपभोक्ताउपभोगशीलः तत्सुखान्वितः यदिभृगुः शुक्रोयोगकरस्तदेवंविधोजातोभवति ७ अथशनैश्चरेयोगकर्तरि पुरुषस्यस्वरूपंचंद्रमसिचदृश्यादृश्येजातस्यस्वरूपज्ञानंपुष्पिताग्रयाह पराजितानांविभवानामैश्वर्याणांपरिच्छदानांग्रहवस्त्रवाहनपरिवाराणां उपभोक्ताभवति बहुकार्यकृन्नानाविधानांकार्याणांकर्तागणेशः बहुगणस्वामीगणाःसंघाःतेषांप्रभुः एवंविधोरवितनयः शनैश्चरोयोगकरो यदि भवति तदाजातोभवतिअत्रयोगत्रयेसुनफानफादुरुधराख्येएकैकस्यग्रहस्यफलमुक्तं द्व्यादिसंभवेफलद्वयादिकंवाच्यम् अशुभकृदितिउ-

डुपश्चंद्रोह्निदिनेदृश्यमूर्तिः दृश्यमानशरीरः अशुभकृदनिष्टफलकर्ता एतदुक्तंभवति दिवाजन्मनिचंद्रमादृश्येचक्रार्द्धेस्थितः अशुभंफलंकरोतिस पुरुषोदारिद्र्यादियुक्तोभवतीत्यर्थः गलिततनुरदृश्यमूर्तिः शुभः एतदुक्तंभवत्यदृश्येचक्रार्द्धेस्थितः शुभकृज्जातऐश्वर्यादियुक्तोभवति अन्यथान्यदूह्यम् उक्तप्रकारादन्यथास्थेचंद्रमसिफलमन्यदूह्यम् स्वबुद्ध्याविकल्पनीयं एतदुक्तंभवति रात्रौजन्मन्यदृश्येचक्रार्द्धेयस्यचंद्रोभवतितस्याशुभंजन्म यस्यदृश्येचक्रार्द्धेचंद्रोभवतितस्यशुभंजन्म यस्यदृश्येभवतितस्यशुभजन्मभवतीत्यर्थः ८ अथलग्नाच्चंद्राद्वायस्योपचयेसौम्यग्रहाभवंतितस्यफलंवसंततिलकेनाह लग्नादिति यस्यजन्मनिलग्नात्सौम्यग्रहाः बुधजीवसिताउपचयगताभवंति सर्वएवसपुरुषोतीववसुमानत्यर्थंधनवान्भ

लग्नादतीववसुमान्वसुमांच्छशांकात्सौम्यग्रहैरुपचयोपगतैःसमस्तैः द्वाभ्यां
समोल्पवसुमांश्चतदूनतायामन्येष्वसत्स्वपिफलेष्विदमुत्कटेन ९ इतिचंद्रयोगाध्यायः

वतियस्यशशांकाच्चंद्रादप्युपचयेसर्वएवसौम्यग्रहाः भवंति सोपिधनवान्भवति एवंसमस्तैः त्रिभिरेतत्फलं द्वाभ्यांसमः यस्यलग्नाच्चंद्राद्वाद्वौग्रहौसौम्याउपचयगतौभवतः समोमध्यधनोभवति नातिबहुधनोभवतीत्यर्थः तदूनतायामिति तदूनतायांलग्नाच्चंद्राद्वायस्यैकः सौम्यग्रहःउपचयगतोभवति सोल्पवसुमान्किंचिद्धनान्वितोभवति अर्थादेवलग्नाच्चंद्राद्वायस्योपचयेनकश्चित्सौम्यग्रहोभवति सदरिद्रोभवति यस्यलग्नचंद्रयोर्द्वयोरपिसौम्यग्रहाउपचयस्थाः कयापियुक्त्याभवंति सोप्यतीववसुमान्भवति अन्येष्वसत्स्वपिफलेष्विति अन्येष्वपरेष्वसत्स्वशोभनेष्वपिफलेषुसत्स्विदंफलमुत्कटेनबाहुल्येनभवति एतदुक्तंभवति यस्यलग्नाच्चंद्राद्वाउपचयस्थाः सौम्यग्रहाभवंति तस्यान्ययोगमशुभमपिकेमद्रुमादिफलमभिभूयेदंशुभमेव

फलमुक्तदत्वेनप्राबल्येनभवतीति ९ इतिभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौचंद्रयोगाऽध्यायस्त्रयोदशः समाप्तः १३ अथद्विग्रहयोगाध्यायोव्याख्यायते तत्रादित्येचंद्रादियुक्तेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह तिग्मांशुरिति तिग्मांशुरादित्यः उडुपेशेनचंद्रमसासहितोयुक्तः उडुपात्रिः उडुपाईशः उडुपेशःरात्रिनाथः नरंमनुष्यंयंत्राश्मकारंजनयति यंत्राणिसहस्रघातिप्रभृतीन्यश्मानःपाषाणाः तत्क्रियासु तत्कर्मसु निरतंसक्तंतंकरोति एवंभौमेनसहैकराशिगतोऽर्कोधरतंपापासक्तंजनयति बुधेनक्रियासुनिपुणंसूक्ष्मदृष्टिंधीकीर्तिसौख्यान्वितं धीर्बुद्धिः कीर्तिः यशः सौख्यंसुखंसुखभावः एतैरन्वितंसंयुक्तं वाक्पतिनागुरुणाक्रूरंविषमस्वभावमन्यकार्यनिरतं परकर्मतत्परंजनयति शुक्रेणरंगायुधैः रं-

अथद्विग्रहयोगाध्यायप्रारंभः तिग्मांशुर्जनयत्युषेशसहितोयंत्राश्मकारंनरंभौमेनाधरतंबुधेननिपुणंधीकीर्ति
सौख्यान्वितम् क्रूरंवाक्पतिनान्यकार्यनिरतंशुक्रेणरंगायुधैर्लब्धस्वंरविजेनधातुकुशलंभांडप्रकारेषुवा २

गावतरणक्रियया मल्लादिक्रियायुधैः खड्गादिभिश्च लब्धस्वंप्राप्तार्थंजनयति रविजेनशनैश्चरेणधातुषुताम्राद्युत्पत्तिमृत्तिकासगैरिकाद्यासुवाधातुषुकुशलंनिपुणंभांडप्रकारेषुसामुद्गादयस्तेषुकुशलंवा १ अथभौमादियुक्तेचंद्रेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह क्रूरमिति कूटंपण्यद्रव्याणांप्रतिरूपक्रियासक्तंस्त्रीपण्यनारीविक्रयंकन्यासवपण्यंपानविक्रयकं अशिवंअश्रेयस्करंमातुःजनन्याः एवंविधः शशीचंद्रमासवक्रोवक्रेणारकेण युक्तोनरंजनयति सज्ञइति प्रसूतवाक्यंप्रियंवदं अर्थंनिपुणमर्थेषुसूक्ष्मदृष्टिंसौभाग्येनसर्वजनवल्लभेनकीर्त्यायशसान्वितंसंयुक्तंसज्ञोबुधसहितः शशीनरंजनयति विक्रांतंशत्रुजेतारं कुलमुख्यंबंधुप्रधानं अस्थिरमतिंचपलंवित्तेश्वरंधनस्वामिनं सांगिराः अंगिरसागुरुणा

संयुक्तः शशीनरंजनयति वस्त्राणांक्रियादिकुशलं तंतुवायः आदिग्रहणात्सीवनिरंजनक्रियाविक्रयेष्वपिकुशलं सासितः शक्रेण संयुक्तः शशीनरं जनयति द्विः संस्कृतापुनर्भूः तस्याः सुतंपुत्रं सार्किः आर्किणाशनैश्चरेणयुक्तः शशीनरंजनयति पुनर्भूलक्षणं परिणीतापतिंहित्वा सवर्णंकामतः श्रयेत् अक्षताचक्षताचैव पुनर्भूःसंस्कृतापुनः २ अथांगारकेबुधादियुक्तेजातस्यस्वरूपंस्रग्धरयाह मूलादिति ससौम्येभूमिजेबुधयुक्तेआरके जातोवणिग्भवति सचवणिग्मूलादिभिः व्यवहरतिमूलादीनि मूलपुष्पवल्कलसारफलानि स्नेहास्तैलादयः एतैर्व्यवहरति कूटैश्चद्रव्यप्रतिरूपैः

कूटस्थासवकुंभपण्यमशिवंमातुःसवक्रःशशीसज्ञः प्रस्तुतवाक्यमर्थनिपुणंसौभाग्यकीर्त्यान्वितं विक्रांतंकु
लमुख्यमस्थिरमतिंवित्तेश्वरं सागिरा वस्त्राणांसासितःक्रियादिकुशलंसार्किः पुनर्भूसुतं २ मूलादिस्नेहकूटैर्व्यवहर-
तिवणिक्बाहुयोद्धाससौम्येपुर्यध्यक्षः सजीवेभवतिनरपतिः प्राप्तवित्तोद्विजोवा गोपोमल्लोथदक्षः परयुवतिर
तोद्यूतकृत्सासुरेज्येदुःखार्तोसत्यसंधः ससवित्रूतनयेभूमिजेनिंदितश्च ३

कृत्रिमैर्व्यवहरति बाहुयोद्धाभि युद्धकुशलश्चभवति एवंविधः ससौम्येसौम्येनबुधेनयुक्तेभूमिजेजातोभवति पुर्यध्यक्षः नगराधिकृतः पुरीअध्यक्षः पुर्यध्यक्षः स्वामी अथवानरपतिः राजाभवति अथवाद्विजोब्राह्मणः प्राप्तवित्तोलब्धधनः केचित्प्राप्तविद्यइतिपठंति सजीवेगुरुसंयुक्तेभौमेजातोभवति गोपः गोपालकः मल्लः बाहुयोद्धा अथशब्दः पादपूरणेदक्षः चतुरः परयुवतिरतः परस्त्रीसक्तः द्यूतकृत्कितवः सासुरेज्येअत्रसुरेरीज्यः असुरेज्यः तेनअसुरेज्येनशुक्रेणयुक्तेभूमिजेजातएवंविधोभवति दुःखार्तः दुःखपीडितः असत्यसंधः असत्येनसंधाप्रतिज्ञायस्य अनृतभाषीनिंदितः

कुत्सितोसूपयायुतः ससवित्तृतनयेनसौरेणयुक्तेभूमिजेजातोभवति अथबुधेजीवादियुक्तेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह सौम्येरंगचरइति रंगचरोमहाद्धादिकः गीतप्रियः गीतवल्लभः नृत्यविन्नृत्यज्ञः एवंविधः सौम्येबुधेबृहस्पतिनायुक्तेजातो भवति प्रशस्ता वाग्यस्यसवाग्मी वचनक्रिययापरप्रत्यायनसमर्थः भूगणपः भुवश्चगणानांसघानामधिपतिः एवंविधोबुधेसितेनशुक्रेणसहितेजातोभवति मायापटुः परवंचनदक्षः लंघकः गुरुवचनातिक्रामी एवंविधोमृदुनाशनैश्चरेणसहितेबुधेजातोभवति सद्विप्रइति सद्विप्रः शोभनविप्रः धनदारवान् वित्तकलत्रसंयुक्तः बहुगुणः प्रभूतगुणैः शौर्यादिभिर्युक्तः एवंविधोगुरौजीवेशुक्रेणयुक्तेजातोभवति श्मश्रुकरोनापितः अथवाघटकृत्कुंभकारः अथवाऽन्नकरोसूपकारः एवंविधोसितेनसौरेणयुक्तेगुरौजातोज्ञेयोविज्ञातव्यः ४

सौम्येरंगचरोबृहस्पतियुतेगीतप्रियोनृत्यविद्वाग्मीभूगणपःसितेनमृदुनामायापटुर्लंघकः सद्विप्रो
धनदारवान्बहुगुणः शुक्रेणयुक्तेगुरौज्ञेयःश्मश्रुकरोऽसितेनघटकृज्जातोऽन्नकारोपिवा ४

अथशुक्रेशनैश्चरयुक्तेजातस्यस्वरूपंद्विग्रहयोगफलंचपुष्पिताग्रयाह असितइति अल्पचक्षुरल्पदृष्टिः युवतिसमाश्रयेणस्त्रीसंश्रयेण सम्यक्प्रवृद्धवित्तं धनंयस्य सयुवतिसमाश्रयसंप्रवृद्धवित्तः लिपिरक्षरविन्यासः पुस्तकलेखककर्मचित्रमालेख्यं एषांवेत्तातज्ज्ञः एवंविधः असितासितसमागमेशनैश्चरस्यशुक्रेणसंयोगेजातः पुरुषएवंविधोभवति यदिराशिद्वयेद्वौग्रहयोगौभवतः तत्रद्विग्रहयोगद्वयस्यापिफलंवक्तव्यं अथराशित्रयेद्विग्रहयोगत्रयंभवति तदाद्विग्रहयोगत्रयस्यापिफलंवाच्यं कथितफलैरिति द्वाभ्यामपरतोऽपरेऽन्येत्रयोग्रहाः यदैकगताभवति तदाकथितफलैरुक्तफलैर्नविकल्पनीयाः तद्वाद्विग्रहयोगत्रयस्यफलंवाच्यम् यद्यर्कचंद्रभौमाएक

राशिस्था भवंति तदार्कचंद्रयोगे यत्फलमुक्तं यच्चादित्यांगारकयोगे फलं यच्च चंद्रांगारकयोगे फलं तत्फलत्रयमपि वाच्यं एवं यथासंभवमन्यत्रापि ग्रहत्रयस्यैकराशिगतस्य फलं वक्तव्यम् यद्येकराशौ द्विग्रहयोगोऽन्यत्र त्रिग्रहयोगो वा भवतस्तदा सर्वाणि फलानि वाच्यानीति ५ इति श्रीभट्टोत्पलविरचितायांबृहज्जात० द्विग्रहयोगाऽध्यायश्चतुर्दशः समाप्तः १४ अथातो प्रव्रज्यायोगाध्यायो व्याख्यायते तत्रादावेव चतुरादिभिरेकस्थैः ग्रहैः जातस्य प्रव्रज्यायोगं शार्दूलविक्रीडितेनाह एकस्थैरिति एकस्मिन्यत्र तत्र राशौ चतुरादयो ग्रहा भवंति चत्वारः पंच षट् सप्त वा भवंति तैरेकस्थैश्चतुरादिभिः ब-

असितसितसमागमेस्यचक्रयुवतिसमाश्रयसंप्रवृद्धवित्तः भवतिचलिपिपुस्तकचित्रवेत्ता कथितफलैः परतोविकल्पनीयाः ५ इति द्विग्रहयोगाध्यायः समाप्तः १४ अथ प्रव्रज्यायोगाध्यायप्रारंभः एकस्थैश्चतुरादिभिर्बलयुतैर्जाताः पृथग्वीर्यगैः शाक्याजीविकभिक्षुवृद्धचरकानिर्ग्रंथवन्याशनाः माहेयज्ञगुरुक्षपाकरसितप्राभाकरीनैः क्रमात्प्रव्रज्या बलिभिः समाः परजितैस्तत्स्वामिभिः प्रच्युतिः १

लयुतैः वीर्यवद्भिः मोहृयादिभिः जाताः संभूताः शाक्यादिकाः प्रव्राजकाः भवंति किंतु चतुरादिभिः बलयुतैरेका प्रव्रज्या भवति तदर्थमाह पृथग्वीर्यगैः तैश्च बलिभिः वीर्यगैः सबलैः पृथक्पृथक् प्रव्रज्या भवति एतदुक्तं भवति चतुरादीनामेकस्थानां मध्याद्यद्येको बलवान् भवति तदा जातस्यैकैव प्रव्रज्या भवति अथ चतुरादीनामेकस्थानां मध्यान्न कश्चिद्बली भवति तदा जातस्य प्रव्रज्या न भवति अथ द्वौ बलिनौ भवतस्तदा जातस्य प्रव्रज्याद्वयमेव भवति यदा बहवो बलिनस्तदा बह्व्यः प्रव्रज्या भवंति एवमेकस्थैश्चतुरादिभिर्बलयुतैः जाताः प्रव्रज्याभावो भवति यस्मादुक्तं प्रव्रज्या बलिभिः समाः

ताभ्यपृथग्वीर्यगैः माहेयादिभिः भौमाद्यैः शाक्याद्याः भवंति तद्यथा चतुरादीनामेकस्थानांमध्याद्यदामाहेयोभौमोबलवान्भवति तदाजानः शाक्यो
रक्तपटोभवति एवंज्ञेबुधेबलवतिभिक्षुः यतिर्भवति गुरौबलवति आजीविकः क्षपाकरश्चंद्रोयदा वृद्धः वृद्धश्रावकः कापालिकः वृद्धभगभयाच्छ्रावकश्रा-
द्धोत्रलुतोद्रष्टव्याः सितेशुक्रेबलवतिचरकः चक्रधरःप्रभाकरिः सौरेः तस्मिन्बलवतिनिर्ग्रंथः नग्नः क्षपणकः प्रावरणरहितइत्यर्थः इनेआदित्येबलवतिवन्या
शनः मूलफलाशनस्तपस्वीभवति एवंक्रमात्क्रमशः परिपाट्याएते प्रव्रज्यापर्यायाः एवएतेकालकमताद्भूयाख्याताः तथाचच कालकाचार्यः तावसिओ
दिणणाहेचंदेकावालिॐ तहाभणिॐ रत्तवडोभूमिसुवेसोम्मसुवेएअदंडिआ १ देवगुरुशुक्रकोणाकवेणजईचरअखवणाई अस्यार्थः तावसिओत
पसिकः दिणणाहे दिननाथेसूर्येचंद्रेवाकावालिओकापालिकः तहाभणिओतथाभणितः रत्तवडोरक्तपटः भूमिसुवेभूमिसुते सोमसुवेसोमसुतेबु
धे एअदंडीआएकदंडीदेवगुरुर्बृहस्पतिः शुक्रशुक्रः कोणःशनैश्चरः कवेणक्रमेणजईयतिःचरअचरकः खवणाइक्षपणकः अत्रवृद्धश्रावकग्रहणमाहे
श्वराश्रितानां प्रव्रज्यानामुपलक्षणार्थं आजीविकग्रहणंचनारायणाश्रितानां तथान्यत्रंकलकेसंहितांतरेपठ्यते जलणहरसुगअकेसवसुइ बह्मण-
णग्गमुग्गेसु दिक्खाणणाअव्वासूराइग्गहाकवेणणाहगआ जलणज्वलनः साग्निकइत्यर्थः हरईश्वरभक्तः भट्टारकः सुगअसुगतः बौद्धइत्यर्थः
केसवकेशवभक्तः भागवतइत्यर्थः सुईश्रुतिमार्गगतः मीमांसकः बह्मणब्रह्मभक्तः वानप्रस्थः णग्गोनग्नः क्षपणकः मग्गेसुमार्गेषु दिक्खाणदीक्षा
णां णाअव्वाज्ञातव्याः सूराइग्गहा सूर्यादिग्रहाः कवेणक्रमेण णाहगअनाथगताः एवंचतुरादीनामेकस्थानामध्याद्यावतोबलिनः तावंतएवप्रव्र-
ज्याभवंति तत्रापिवीर्याधिकस्यप्रथमासंबंधिनीप्रव्रज्याभवति यस्मात्स्वल्पजातकेउक्तं चतुरादिभिरेकस्थैः प्रव्रज्यास्वागृहैः करोतिबली बहुवीर्यै-
स्तावन्त्यः प्रथमावीर्याधिकस्यैव तापसः वृद्धश्रावकरक्तपटाजीविभिक्षुचरकाणांनिर्ग्रंथानांचेति वीर्यापचयक्रमेणान्यासांक्रमः एवंबलिभिःसमाः

प्रव्रज्या बलिनो ग्रहस्य यादृश्येव तद्बलानुसारेण प्राप्नोति परिपालयति ऊनबलस्य मनाङ्नाप्नोति पालयति पराजितैस्तत्स्वामिभिः प्रच्युतिरिति शाक्यादिप्रव्रज्यास्वामिभिर्ग्रहैः पराजितैरन्यैर्ग्रहैः युद्धे विजितैः प्रच्युतिः प्रव्रज्यात्यागः तत्प्रव्रज्यां गृहीत्वा पुनस्त्यजति एतदुक्तं भवति चतुरादीनां मध्याद्यद्येको बलवान्भवति स च ग्रहयुद्धे जातककालेन पराजितस्तदा प्रव्रज्यां गृहीत्वा पुनस्त्यजति त्यक्त्वा च प्रव्रज्यामनाश्रित्यैव तिष्ठति अथ चतुरादीनां मध्याद्द्वौ बहवो वा बलिनो भवंति ते च पराजितास्तदा अन्यश्च सवाभ्यः प्रव्रज्याभ्यः च्युतिः भवति यस्माद्बलवद्ग्रहसंख्यास्तेन प्रव्रज्याः कर्तव्याः अंत्यप्रव्रज्याधिपतिर्यद्यन्येन ग्रहेण जितो न भवति तदा तामेव प्रव्रज्यामाश्रितो म्रियते अथ प्रव्रज्यादायको ग्रह एक एव जितो न भवति यदा यावज्जीवं तामेव प्रव्रज्यामाश्रयति अथ द्वौ ग्रहौ प्रव्रज्यादायकौ तौ च पराजितौ तदा प्रथमप्रव्रज्यादायकात् दशायां प्रथमां प्रव्रज्यां गृहीत्वा तामेवाश्रित्य तावत्तिष्ठति यावद्द्वितीयप्रव्रज्यादायकग्रहान्तर्दशाप्रवेशः तत्र प्रथमां त्यक्त्वा द्वितीयामाश्रयति एवं बहुषु प्रव्रज्यासु संभवेष्वोह्यं अत्र च सत्याचार्यः तेष्वधिकबली जीवस्त्रिदंडिनं भार्गवश्चरकमुख्यं नग्नं श्रमणं सौरो बुधस्तदाजीविकाचार्यं वृद्धश्रावकमिंदुर्दिवाकरस्तापसं तपोयुक्तं वक्रः शाक्यः श्रवणं क्षेत्राश्रयजगुणांश्चैतान् वीर्योपेतैस्तत्तनावदीक्षितान्भक्तिवादिनस्तेषां अन्यैः पराजितश्चेत्प्रव्रज्याप्रच्युतिं कुर्यात् यावंतो वीर्ययुताः प्रव्रज्या भवंति तावंत्यः एकर्क्षगेषु नियमात्तेषां मध्याद्बलोपेतात् १ अथास्तमितान्वर्जितान्यदृष्टानां ग्रहाणामपवादं वैतालीयेनाह रविलुप्तकरैरिति चतुरादीनामेकस्थानां मध्याद्यावंतो ग्रहा बलिनस्तावंतः स्वप्रव्रज्यादायकास्तत्रापि बलिनां मध्ये यावंतो रविलुप्तकराः सूर्यमंडलगा अस्तमिता भवंति तैरदीक्षिता जाता भवंति तावंतः स्वकीयाः प्रव्रज्यां न प्रयच्छंतीत्यर्थः किंतु जाता नराः तद्भक्तयः तद्भक्तानां तत्प्रव्रज्याप्रविष्टानां मध्ये भक्ता भवंति अत्र रविलुप्तकरत्वमुदयास्तमयं गणयित्वाऽन्वेष्यम् शक्रगुरुज्ञार्किकुजाः कलांशैः स्युत्तरोत्तरैः नवभिर्दृश्यादृश्याद्यकर्मणा रवेः द्वादशभिरिंदुरित्येवमा

दिकर्माणि कृतेकदाचिदादित्येन सहैकराशिगतेरविणास्तमितोभवति कदाचिद्द्वितीयराशिस्थोप्यस्तमितोभवति एवमुदयास्तमयमन्वेष्यास्तमितफलंवाच्यम् अभियाचितमात्रदीक्षिताइति बलिभिरित्यनुवर्तते बलिभिर्निहतैः ग्रहयुद्धेऽन्यग्रहाविजितैरन्यैश्चग्रहैर्निरीक्षितैर्दृष्टैः अभियाचितमात्रदीक्षिताः दीक्षाप्रार्थनपराभवंति नचतांप्राप्नुवंति पूर्वमुक्तपराजितैस्तत्त्यागिभिः प्रच्युतिरित्यस्यायमपवादः तेनैतदुक्तंभवति बलीग्रहोग्रहयुद्धेऽन्येनविजितोभवति नकेनचिद्दृश्यतेतदातत्प्रव्रज्यांगृहीत्वापुनस्त्यजति अथबलिग्रहः समागमनेनग्रहेणाधिजितोभवत्यन्येनचदृश्यते तदाप्रव्रज्यांप्रार्थ्यमानोपिनप्राप्नोति यस्यचप्रव्रज्याप्रच्युतिः जातातस्यतदवसानेबहुधातद्दशासंचारवशाद्यस्मिन्नंतर्दशाकालेबलवा-

रविलुप्तकरैरदीक्षिताबलिभिस्तद्गतभक्तयोनराः अ
भियाचितमात्रदीक्षितानिहतैरन्यैर्निरीक्षितैरपि २

न्भविष्यति तस्मिन्कालेप्रव्रज्यांदास्यति तथाचोक्तं दीक्षादानसमर्थोयोभवति तदाबलेनसंयुक्तः तस्यैवदशाकालेदीक्षांलभतेनरोवश्यं यस्यचदीक्षाप्यवनंतस्यैवदशावसानेस्यात् एवंजातककालेसंचिंत्यबलाबलंवाच्यं २ अथचतुरादिभिरेकस्थैर्विनाप्रव्रज्यायोगमालिन्याह जन्मेशइति जन्मनियस्मिन्राशौचंद्रः स्थितस्तस्ययोधिपतिर्ग्रहः सजन्मेशः सचयद्यन्यैर्ग्रहैरदृष्टोनावलोकितः नकेनचिद्ग्रहेणदृश्यते तथाभूतोसावर्कपुत्रंशनैश्चरंपश्यति तदाजातस्यप्रव्रज्याभवति साचशनैश्चरकृताशनैश्चरजन्मेशयोः योबलवांस्तदीयांतर्दशाकाले उक्तंच यस्येक्षतेर्कपुत्रंजन्मभनाथोग्रहैर्नसंदृष्टः तस्यहिदीक्षालाभोतद्बलयोगाद्दशाकाले प्रथयत्यार्किरिति अथवार्किःसौरःसबलोजन्मराश्य-

धिपंबलोनंवीर्यरहितंपश्यति तथापिशनैश्चरोक्तां प्रव्रज्यांवदति उक्तंच शनिदृष्टेबलहीनेजन्मनिनाथेवदेचनिर्ग्रंथं दीक्षांप्राप्नोतीति पूर्वत्रराशौ·
चंद्रेशनि न्यार्किद्रेष्काणसंस्थेसौरद्रेष्काणव्यवस्थितेन केवलंयावद्भौमार्क्यंशेकुजसौरयोरन्यतमनवांशकस्थेतस्मिंश्चसर्वग्रहादृष्टेशनैश्चरेणेक्षमाणे
दीक्षांप्राप्नोति शनैश्चरोक्तप्रव्रज्यांव्रजति तथाच सौरद्रेष्काणसंस्थोयदिभवति शशीतद्दशसंस्थश्चवक्रांशेवादृष्टः सौरेणतुसर्वदर्शनविमुक्तः भिन्नेय
संज्ञोयोर्कपुत्रवीर्यानुसारेणजन्माधिपतिः पापैरपिनिरीक्षितस्त्वेकईक्षितेसौरः यस्यपुरुषस्यमूर्तौनियतादीक्षिताभवति तस्यजन्माधिपतिंविबु-
लनिरीक्षतेयस्यसूर्यजोबलः सोपिखलुभाग्यहीनः प्रव्रज्याप्राप्नुयाज्जातः मादकौजेवांशेशशीस्थितः कृष्णजेद्रेष्काणेवाअशाधिपानुरूपेकाले

जन्मेशोन्यैर्यद्यदृष्टोर्कपुत्रंपश्यत्यार्किर्जन्मपंवाबलोनम् दी
क्षांप्राप्नोत्यार्किदृक्काणसंस्थेभौमांशेवाशसौरदृष्टेचचंद्रे ३

दीक्षामद्रोभवति अत्रयोगत्रयेपिपूर्वपदादनुवर्तनीयः ३ अथयेनयोगेनजातः शास्त्रकरोभवति येनचराजापिदीक्षितोभवति तद्योगद्वयंमालि
न्याह क्रूरगुरुरिति क्रूरगुरुः जीवः शशीचंद्रः होरालग्नं एतासुक्रूरगुरुशशिहोरासु आर्किणाशनैश्चरेणदृष्टासु अवलोकितासु धर्मेनवमस्थानेगु
रुः जीवोयदिभवति अथशब्दः पादपूरणेनृपतीनांयोगजः कश्चिद्राजयोगोजातस्यभवति तदासत्पुरुषः तीर्थकृच्छास्त्रकृत्स्याद्भवेत् कोणाद्युक्तपा
त्राशिखवराहमिहिरब्रह्मगुप्तप्रतिमइति क्रूरगुरुशशिहोरास्विति धन्विमीनकर्कटलग्नेकेश्चिद्व्याख्यात तच्चायुक्तं यस्मान्नाडभ्यः गतमदालोकगु

रुशशिविलग्नेनवमगेगुरौनिष्पद्यंतेनइहनृपयोगेनृपतयः विज्ञं मंतेयेषांलुटहरत्वनारम्भक्रमगाजगत्यांयेविहहूणकुथनपाषाणसदृशा तथाचोक्तगुरुशशिलग्नाद्दृष्टाकोणानन्तुनवमगोयदिगुरुः नरनाथजन्मजातः शास्त्रकरोभवतिनचनृपः अथद्वितीयोराजयोगस्तत्रोपस्थानकरोति तदाराजाभवति तीर्थकरश्चजिनकक्राशिराजशकचिश्वजप्रतिमइति उक्तंच अस्मिन्योगेचान्योनृपयोगोभवति तत्रयोजातः सभवतिजिनेंद्रतुल्योनरनाथः शास्त्रकर्ता च नवमभवनंसंस्थेमंदंगच्छतीतिमंदगः सौरः तस्मिन्मंदगेलग्नान्नवमभवनसंस्थेधर्मस्थानाश्रितेन्यैः सर्वैग्रहैरदृष्टेनावलोकिते तथानरपयोगेराजयोगनांमध्यादन्यतमेराजयोगेसतिजातोदीक्षितः प्रव्रजितः पार्थिवेंद्रस्यराजाधिराजोभवति पश्चात्तत्कालंसर्ववलीतद्दीक्षायांदीक्षितस्यभवति राजयोगं

सुरगुरुशशिहोरास्वार्किदृष्टासुधर्मेगुरुरथनृपतीनांयोगजस्तीर्थकृत्स्यात् नवमभवनसंस्थे
मंदगेन्यैरदृष्टेभवतिनरपयोगेदीक्षितःपार्थिवेंद्रः ४ इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौप्रव्र॰योगाध्यायः समाप्तः १५

विनायमपिप्रव्रज्यायोगः योगेस्मिन् राजयोगश्चेज्जातोराजादीक्षितश्चभवति अन्यथादीक्षितएवउक्तंच नवमस्थानेसौरोयदिस्थितः सर्वदर्शनविमुक्तः नरनाथयोगजातो नृपोपिदीक्षान्वितोभवति नृपयोगस्याभावेयोगेस्मिन्दीक्षितोनरोजातः निःसंदिग्धप्रवदेद्योगस्यास्यप्रभावेनेति ४ इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौप्रव्रज्यायोगाऽध्यायःपंचदशःसमाप्तः १५ अथऋक्षशीलाध्यायोव्याख्यायते ऋक्षंनक्षत्रंराशिश्च तत्रादावेवचंद्रभुज्यमाननक्षत्रशीलंभवति तत्राश्विनीभरण्योः जातयोः शीलविज्ञानमार्यायाह प्रियभूषणइतिप्रियभूषणः अलंकरणवल्लभः स्वरूपः शोभनरूपः वपुष्मान्सुभगः सर्वजनप्रियः दक्षः सर्वकार्य

करणपटुः मतिमान्बुद्धियुक्तः एवंविधोऽश्विनीषुजातोभवति तारकापेक्षयात्रसर्वत्रबहुवचननिर्देशः कृतः कृतनिश्चयइति कृतनिश्चयः प्रारब्धानांकर्मणामंतगः सत्यः सत्यवाक् अरुक् निरुजः दक्षः चतुरः सुरक्षितः दुःखनिर्मुक्तः एवंविधोभरणीषुजातोभवति १ अथकृत्तिकारोहिण्योर्जातस्यस्वरूपमार्ययाह बहुभुक् प्रभूताहारः परदाररतः परस्त्रीष्वासक्तः तेजस्वीअसहिष्णुः विख्यातः सर्वत्रप्रसिद्धकीर्तिः एवंविधः कृत्तिकासुजातोभवति सत्यः अवितथभाषी शुचिः परस्वाद्यलुब्धः शास्त्रोक्तशौचानुष्ठाता प्रियंवदः मधुरवाक् स्थिरमतिः एकमतिः सु

अथऋक्षशीलाध्यायः प्रियभूषणः सुरूपः सुभगोदक्षोऽश्विनीषु मतिमांश्च कृतनिश्चयः सत्यारुग्
दक्षः सुखितश्चभरणीषु १ बहुभुक्परदाररतस्तेजस्वीकृत्तिकासुविख्यातः रोहिण्यांसत्यशुचिः
प्रियंवदः स्थिरमतिः सुरूपश्च २

रूपश्चवपुष्मान् एवंविधः रोहिण्यांजातोभवतीति २ अथमृगशीर्षार्द्रयोःजातस्य स्वरूपमार्ययाह चपलइति चपलः क्रियास्वनवस्थितः चतुरः दक्षः भीरुः भयानकः पटुः प्रवक्ता उत्साही सोद्यमः धनीवित्तवान् भोगीच संभोगशीलः एवंविधोमृगेमृगशिरसिजातोभवति शठः परकार्यविमुखः उक्तंचग्रंथांतरे शठलक्षणम् मनसावचसायस्यदृश्यतेन्यत्कार्यंतत्परः कर्मणाविपरीतश्चसशठः सद्भिरीयते गर्वितः मानी कृतघ्नः खलः कृतमुपकृतंहंतियःसकृतघ्नः हिंस्रः वधकः पापः पापकर्मकर्ता एवंविधोरौद्रर्क्षेश्वार्द्रायांजातोभवतीति ३ अथपुनर्वसौजातस्यस्वरूपमार्ययाह दांतः शमपरः तपः क्लेशसहः सुखीसुखितः सुशी-

लः शोभनशीलः विनयवान् दुर्मेधाजडप्रायः रोगभाक्पीडितदेहः पिपासुः तृषार्तः अल्पेन स्तोकेनैवार्थेन संतुष्टः एवंविधो मनुजो मनुष्यः पुनर्वसौ जायते उत्पद्यते ४ अथ पुष्याश्लेषयोः जातस्य स्वरूपमार्ययाह शांतात्मा इति शांतात्मा शमदमपराजितेंद्रियः सुभगः सर्वजनप्रियः पंडितः शास्त्रार्थवित् धनी वित्तवान् धर्मसंश्रितः धर्मनिरतः एवंविधः पुष्यजो भवति शठः परकार्यविमुखः सर्वभक्षः सर्वचयनशीलः पापः पापकर्मरतः कृतघ्नः कृतमुपकृतं हंति स कृतघ्नः धूर्तः परवंचनदक्षः एवंविधो भौजंगे आश्लेषायां जातो भवति ५ अथ मघापूर्वाफाल्गुन्योः जातस्य

चपलश्चतुरो भीरुः पटुरुत्साही धनी मृगे भोगी शठगर्वितः कृतघ्नो हिंस्रः पापश्च रौद्रर्क्षे ३ दांतः
सुखी सुशीलो दुर्मेधा रोगभाक्पिपासुश्च अल्पेन च संतुष्टः पुनर्वसौ जायते मनुजः ४ शांतात्मा
सुभगः पंडितो धनी धर्मसंश्रितः पुष्ये शठः सर्वभक्षः पापः कृतघ्नधूर्तश्च भौजंगे ५ बहुभृत्य
धनो भोगी सुरपितृभक्तो महोद्यमः पित्र्ये प्रियवाग्दाता द्युतिमानटनो नृपसेवको भाग्ये ६

स्वरूपमार्ययाह बहुभृत्य इति बहुभृत्यधनः प्रभूतपरिवारवित्तान्वितः भोगी भोगान्वितः सुरपितृभक्तः देवानां पितॄणां च भक्तः महोद्यमः महोत्साही एवंविधः पित्र्ये मघायां जातो भवति प्रियवाक् अभिमतवक्ता दाता दानशीलः द्युतिमान् सुकांतिः अटनः परिभ्रमणशीलः नृपसेवकः राजसेवानुरतः एवंविधो भाग्ये पूर्वाफाल्गुन्यां जातो भवति ६ ५ ५ ५

अथोत्तराफाल्गुनीहस्तयोर्जातस्यस्वरूपमार्ययाह सुभगइतिसुभगः सर्वजनप्रियः विद्याप्तधनः विद्ययाआप्तंधनंयेन भोगीभोगान्वितः सुखभाक् दुःखरहितः एवंविधोद्वितीयफाल्गुन्यांउत्तराफाल्गुन्यांजातोभवति उत्साहीसोद्यमः धृष्टः प्रतिभायुक्तः निर्लज्जोवापानपः पानप्रियः आसवानुरक्तः अघृणीनिर्दयः तस्करःचोरः एवंविधोहस्तेजातोभवति ७ अथचित्रास्वात्योर्जातस्यस्वरूपमार्ययाह चित्रांबरमाल्यधरः चित्राणिनानाप्रकाराणि अंबराणिवस्त्राणिमाल्यानिचधारयति सुलोचनांगः शोभनानेत्रावयवायस्यएवंविधःचित्रायांजातोभवति दांतोविनयान्वितः

सुभगोविद्याप्तधनोभोगीसुखभाक्द्वितीयफाल्गुन्यां उत्साहीधृष्टःपानपोघृणीतस्करोहस्ते ७
चित्रांबरमाल्यधरःसुलोचनांगश्चभवतिचित्रायाम् दांतोवणिक्कृपालुप्रियवाग्धर्मान्वितःस्वातो ८
ईर्षुर्लुब्धोद्युतिमान्वचनपटुःकलहकृद्विशाखासु आढ्योविदेशवासीक्षुधालुरटनोऽनुराधासु ९

जितेंद्रियः वणिक्क्रयविक्रयज्ञः कृपालुः दयालुः केचित्तृषालुरिति पठंति तृषालुः तृषांनसहते प्रियवाक् अभिमतवक्ता धर्मान्वितः धर्मरतः एवंविधःस्वातोजातोभवति ८ अथविशाखानुराधयोर्जातस्यस्वरूपमार्ययाह ईर्ष्युरिति ईर्ष्युः परद्विमत्सरी लुब्धः लोभाभिभूतः द्युतिमान् सुकांतिः वचनपटुः संभाषणदक्षः केचिदर्थपटुरिति पठंति अर्थार्जनेपटुः प्रवीणः कलहकृद्विरोधशीलः एवंविधोविशाखासुजातोभवति-आढ्यः ईश्वरः विदेशवासी परदेशनिवसनशीलः क्षुधालुः क्षुधांनसहते अटनः परिभ्रमणशीलः एवंविधोऽनुराधासुजातोभवति ९

अथज्येष्ठामूलयोर्जातस्यस्वरूपमार्ययाह नबहुमित्रः स्वल्पसुहृत् संतुष्टः संतोषशीलः धर्मकृद्धर्मानुरतः प्रचुरकोपः अतिक्रोधी एवंविधोज्येष्ठासुजातोभवति मानी गर्वितः धनवान्प्रभूतवित्तः सुखी सुखितः नाहिंस्रः सौम्यप्रकृतिः परविघातंनकरोति स्थिरःएकमतिः भोगीभोगान्वितः एवंविधोमूलेजातोभवति १० अथपूर्वोत्तराषाढयोर्जातस्यस्वरूपमार्ययाह इष्टानंदकलत्रः इष्टमभिमतं कलत्रं आनंदकरं तुष्टिकरंकलत्रंभार्यायस्य मानीगर्वितः दृढसौहृदः स्थिरसुहृत् एवंविधोजलदैवेपूर्वाषाढायांजातोभवति विनीतः विनयसंयुक्तः धार्मिकः धर्मज्ञः बहुमित्रः प्रभूतसुहृत्

ज्येष्ठासुनबहुमित्रःसंतुष्टोधर्मकृत्प्रचुरकोपः मूलेमानीधनवान्सुखीनाहिंस्रः स्थिरोभोगी १०
इष्टानंदकलत्रोमानीदृढसौहृदश्चजलदैवे वैश्येविनीतधार्मिकबहुमित्रःकृतज्ञसुभगश्च ११
श्रीमान्श्रवणेश्रुतवानुदारदारोधनान्वितःख्यातः दाताआढ्यःशूरोगीतप्रियोधनिष्ठासुधनलुब्धः १२

कृतज्ञः प्रत्युपकारशीलः सुभगश्चसर्वजनप्रियः एवंविधोवैश्वदेवे उत्तराषाढायांजातोभवति ११ अथश्रवणधनिष्ठयोर्जातस्यस्वरूपमार्ययाह श्रीमान् श्रियायुक्तः श्रुतवान्पंडितः उदारदारः शोभनस्त्रीकः धनान्वितः वित्तवान्ख्यातः जनविदितकीर्तिः एवंविधः श्रवणेजातोभवति दातादानशीलः आढ्यःईश्वरः शूरःरणप्रियः गीतप्रियःगीतवल्लभः धनलुब्धः अर्थरुचिः एवंविधोधनिष्ठासुजातोभवति १२ ६७

स्फुटवाग्व्यसनीरिपुहासाहसिकःशतभिषग्दुर्ग्राह्यः भाद्रपदासूद्विग्नःस्त्रीजितधनीपटुरदाता
च १३ वक्तासुखीप्रजावान्जितशत्रुर्धार्मिकोद्वितीयासु संपूर्णांगःसुभगः शूरःशुचिरर्थवान्
पौष्णे १४ इतिश्रीभट्टोत्पलविरचितायांबृह० ऋक्षशीलाऽध्यायःषोडशःसमाप्तः १६

अथशतभिषपूर्वाभाद्रपदपदयोर्जातस्यस्वरूपमार्ययाह स्फुटवाक्निष्ठुरभाषी सत्यवादी व्यसनीस्त्र्यादिव्यसनोपहतः रिपुहाशत्रुघातकः साहसिकः असमीक्षितकार्यकृत् दुर्ग्राह्यः दुराराध्यः एवंविधः शतभिषजिजातोभवति उद्विग्नः दुःखितमनाः स्त्रीजितः स्त्रीभिरभिभूतः धनीधनवान् अथवास्त्रियाजितंधनंयस्यपटुःप्रवक्ता अथवाधनपटुः धनार्जनेचतुरः अदाताकदर्यः एवंविधःपूर्वाभाद्रपदासुजातोभवति १३ अथोत्तराभाद्रपदारेवत्योर्जातस्य स्वरूपमार्ययाह वक्तावचनपटुः संभाषणेदक्षः सुखीविद्यमानसुखः प्रजावान्बहुपुत्रपौत्रः जितशत्रुः जितारिः धार्मिकः धर्मशीलः एवंविधो द्वितीयासूत्तराभाद्रपदासुजातोभवति संपूर्णांगः परिपूर्णावयवः सुभगः सर्वजनप्रियः शूरः संग्रामधीरः शुचिः परधनादिष्वलुब्धः अर्थवान्धनान्वितः एवंविधः पौष्णेरेवत्यांजातोभवति एतेयथोक्तानक्षत्रस्वाभावाचंद्रस्यसबलत्वात्परिपूर्णाभवंति १४ इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौऋक्षशीलाऽध्यायः १६ अथातोराशिशीलाध्यायोव्याख्यायते अथमेषस्थेचंद्रमसिजातस्यस्वरूपं शार्दूलविक्रीडितेनाह वृत्तेति वृत्तेपरिवर्तुले अताम्रेलोहितवर्णेदृशौचक्षुषीयस्यसवृत्तताम्रदृक् परिवर्तुललोहितनेत्रः उष्णंशाकंलघुचस्वल्पंभुंक्तेस उष्णशाकलघुभुक् उष्णभोजीशाकभोजीलघुभोजीक्षिप्रप्रसादः आश्वेवप्रसीदति अटनः परिभ्रमणशीलः कामीसुरतिप्रियः दुर्बल-

जानुः निर्मांसलजंघासंधिः अस्थिरधनः अचिरवित्तः शूरः रणप्रियः अंगनावल्लभः स्त्रीप्रियः अंगनानांवल्लभो अंगनावल्लभायस्यसेवाज्ञः पराधनकुशलः कुनखीकुत्सितनखः व्रणांकितशिराः सच्छिद्रमूर्द्धामानीगर्वितः सहोत्थाग्रजः सहोत्थानांसहजातानामग्रणीःगणप्रधानः पाणितलेहस्ततलेशक्त्याचिन्हविशेषेणांकितः चिन्हितः अतिचपलः क्रियास्ववचास्थितः तोयेजजलेभीरुः सभयः एवंविधः क्रियेमेषस्थितेचंद्रमसि जातोभवति १ अथवृषस्थेचंद्रमसिजातस्यस्वरूपंशार्दूलविक्रीडितेनाह कांतइति कांतः दर्शनीयः खेलगतिः सविलासगामी पृथूरुवदनः

अथराशिशीलाध्यायप्रारंभः वृत्तातामहद्गुप्याशाकलघुभुक् क्षिप्रप्रसादोटनः कामीदुर्बलजानुरस्थिरधनः शूरोंगनावल्लभः सेवाज्ञःकुनखीव्रणांकितशिरामानीसहोत्थाग्रजः शक्त्यापाणितलांकितोऽतिचपलस्तोयेचभीरुःक्रिये १ कांतःखेलगतिःपृथूरुवदनःपृष्ठास्यपार्श्वांकितस्त्यागीक्लेशसहःप्रभुःककुद्वान्कन्याप्रजःश्लेष्मलः पूर्वैर्बंधुधनात्मजैर्विरहितःसौभाग्ययुक्तःक्षमादीप्ताग्निःप्रमदाप्रियःस्थिरसुहृन्मध्यात्यसौख्योगवि २ ७ ७

पृथुविस्तीर्णावूरूः वदनंमुखंयस्यपृष्ठंपश्चिमभागः अस्यांवक्रंपार्श्वेप्रसिद्धे एषामन्यतमस्थानेंकितश्चिन्हितः त्यागी दाताक्लेशसहः कदर्थनासमर्थः प्रभुरप्रतिहताज्ञः ककुद्वान् ककुदसंयुक्तः कन्याप्रजायस्यस्त्रीजनकः श्लेष्मलः कफाधिकः पूर्वैः प्रथमैः बंधुभिः कुटुंबैः धनैर्वित्तैः आत्मजैः पुत्रैश्चविरहितः वियुक्तः सौभाग्ययुक्तः सर्वजनवल्लभः क्षमी क्षमावान् सहिष्णुरित्यर्थः दीप्ताग्निः बह्वाशीप्रमदाप्रियः स्त्रीवल्लभः स्थिरसुहृत् दृढमित्रः मध्यानसौख्यः मध्येयौवनेत्येवृद्धत्वेचसुखितः अर्थादेवबाल्येदुःखितः एवंविधोगोवृषस्थेचंद्रेजातोभवति २

अथमिथुनस्थेचंद्रमसिजातस्यस्वरूपंशार्दूलविक्रीडितेनाह स्त्रीलोलइति स्त्रीलोलः स्त्रीष्वभिलाषकरः सुरतोपचारकुशलः स्मरतोपचारे स्मरतकर्मणिकामशास्त्रेषुकुशलः शिक्षितः ताम्रेक्षणः लोहितनेत्रः शास्त्रविच्छास्त्रज्ञः पंडितः दूतः परेच्छयागमनागमनशीलः कुंचितमूर्द्धजः कुटिलशिरोरुहः पटुमतिश्चतुरधीः अतीवप्राज्ञः हास्यमुपहासं इंगितं परचित्तज्ञानं द्यूतएतानिवेत्तिजानाति चार्वंगः शोभनावयवः प्रियवाक्प्रियतवक्ता प्रभक्षणरुचिः बहुस्तुकृगीतप्रियः गीतरतिः नृत्यविन्नृत्यज्ञः क्लीबैः षंढैः सहरतिंयातिगच्छति समुन्नतनसउच्चनसः एवंविधश्चंद्रे

स्त्रीलोलःस्मरतोपचारकुशलस्ताम्रेक्षणःशास्त्रविद्दूतःकुंचितमूर्धजःपटुमतिर्हास्येंगितद्यूतवित् चार्वंगःप्रिय
वाक्प्रभक्षणरुचिर्गीतप्रियोनृत्यवित्क्लीबैर्यातिरतिंसमुन्नतनसश्चंद्रेतृतीयर्क्षगे ३ आवक्रद्रुतगःसमुन्नतकटिः
स्त्रीनिर्जितःसत्सुहृद्दैवज्ञःप्रचुरालयःक्षयधनैःसंयुज्यतेचंद्रवत् ह्रस्वःपीनगलःसमेतिचवशंसाम्नासुहृद्वत्सलस्तो
योद्यानरतःस्ववेश्मसहितेजातःशशांकेनरः ४

तीयर्क्षगते तृतीयराशौस्थितेमिथुनगेजातोभवतीत्यर्थः ३ अथकर्कटस्थेचंद्रमसिजातस्यस्वरूपंशार्दूलविक्रीडितेनाह आवक्रेति आवक्रं कुटिलद्रुतं सत्वरंगच्छतीति आवक्रद्रुगतः कुटिलसत्वरगामी समुन्नतकटिः उच्चजघनः स्त्रीनिर्जितः प्रमदाजितः सत्सुहृच्छोभनमित्रः दैवज्ञः ज्योतिःशास्त्रार्थवेत्ता प्रचुरालयः प्रभूतगृहकर्ता क्षयधनैरपचयोपचयैश्चंद्रवच्छशीवत्संयुज्यते कदाचिद्धिधनइत्यर्थः चंद्रक्षयवृद्धिवत् ह्रस्वः अदीर्घः पीनगलः मांसलकंठः साम्नाप्रीत्यावशं वश्यतां समेति याति सत्सुहृत्सलः मित्रवत्सलः तोयोद्यानरतः जलोपवनसक्तः तोयेनजलेनउपवनेनचरतः एवंविधः स्ववेश्मसहिते कर्कटस्थे शशांकेचंद्रे नरः पुरुषः जातो

भवति ४ अथसिंहस्थेचंद्रमसिजातस्यस्वरूपंशार्दूलविक्रीडितेनाह तीक्ष्णइति तीक्ष्णः अमर्षशीलः स्थूलहनुः दृढहनुः बृहत्कपोलः विशालवदनोविस्तीर्णवक्त्रः पिंगेक्षणः कपिलनेत्रः अल्पात्मजः स्वल्पापत्यः स्त्रीद्वेषी प्रमदाद्विट् स्त्रीद्वेष्टेति केचित्पठंति प्रियमांसकाननगः मांसमामिषं काननमरण्यम् नगःपर्वतः एतेप्रियायस्य आमिषवनपर्वतानुरतः अकार्येअकरणीयेर्थे कुप्यतिक्रुध्यति चिरंबहुकालं केचिदकांडइतिपठंति अकांडेअकालेक्षुत्प्रसिद्धा तृष्णापिपासाउदरंजठरं दंतादशनाः मनश्चित्तंएभ्योजातारुजःपीडास्ताभिः संपीडितउपतप्तः त्यागवान्दाता विक्रांतःपराक्रमशीलः स्थिरधीरेकमतिः गर्वितमनाः अभिमानसंयुक्तः मातुर्विधेयोजननीवश्यः भक्तइत्यर्थः विधेयो·

तीक्ष्णःस्थूलहनुर्विशालवदनःपिंगेक्षणोल्पात्मजः स्त्रीद्वेषीप्रियमांसकाननगःकुप्यत्यकार्येचिरम्
क्षुत्तृष्णादरदंतमानसरुजासंपीडितस्त्यागवान् विक्रांतःस्थिरधीःसुगर्वितमनामातुर्विधेयोर्कभे ५

वचनग्राहीइत्यर्थः एवंविधोऽर्कभेसूर्यराशौसिंहस्थेचंद्रेजातोभवति ५ अथकन्यागतेचंद्रमसिजातस्यस्वरूपंशार्दूलविक्रीडितेनाह व्रीडामंथरचारुवीक्षणगतिरिति व्रीडालज्जातयायन्मंथरत्वं अलसत्वंतेनचारुशोभनंवीक्षणं दृष्टिपातोगतिः गमनंचयस्यसः स्रस्तावधः पतितौशिथिलावंसौस्कंधौ बाहूभुजौयस्यसःसुखीसुखान्वितः श्लक्ष्णःमृदुवाक्तनुकायोवा सत्यरतः सत्यभाषी धार्मिकश्चपरमार्थवादी कलासुनिपुणः कलासुनृत्यगीतवाद्यपुस्तकचित्रकर्मसुनिपुणः सूज्ञः शास्त्रार्थवित्पंडितः धार्मिकःधर्मानुरतः मेधावीबुद्धिमान् सुरतप्रियः कामलोलुपः परगृहैः परवेश्मभिः वित्तैर्धनैश्चसंयुज्यते सम्यग्युक्तोभवति परदेशगतः अन्यदेशनिवासशीलः प्रियवचाःप्रियभाषी कन्याप्रजाः कन्याप्रजायस्यस्त्रीजनकः

अल्पात्मजः स्वल्पपुत्रः एवंविधः कन्यायांस्थितेचंद्रेजातोभवति ६ अथतुलास्थेचंद्रमसिजातस्यस्वरूपं शार्दूलविक्रीडितेनाह देवेति देवब्राह्मणसाधुपूजनरतः देवानांसुराणां ब्राह्मणानांद्विजानां साधूनांसज्जनानांचपूजनेरतः सक्तः प्राज्ञः मेधावी अत्रमेधाबुद्धिः प्रज्ञालक्षणअतीतानुस्मृतिर्मेधाबुद्धिस्तत्कालग्राहिणी शास्त्राशास्त्रविचारज्ञाप्रज्ञाधीरैरुदाहृतः शुचिः परधनाद्यलुब्धः श्रोत्रियोवास्त्रीजितः योषितांवशगः प्राशुरत्युच्चः उन्नतनासिकः अत्युन्नतनासः कृशश्चपलगात्रः दुर्बलशिथिलावयवः कृशंदुर्बलंचपलंबलहीनंगात्रंशरीरंयस्य अटनः परिभ्रमण

व्रीडामंथरचारुवीक्षणगतिःस्रस्तांसबाहुःसुखीश्लक्ष्णःसत्यरतःकलासुनिपुणःशास्त्रार्थविद्धार्मिकः
मेधावीसुरतप्रियःपरगृहेर्वित्तैश्चसंयुज्यते कन्यायांपरदेशगःप्रियवचाःकन्याप्रजाल्पात्मजः ६ देवब्राह्म-
णसाधुपूजनरतःप्राज्ञःशुचिःस्त्रीजितःप्राशुश्चोन्नतनासिकःकृशचलद्गात्रोटनोर्थान्वितः हीनांगःक्र-
यविक्रयेषुकुशलोदेवाद्विनामासरुक्बंधूनामुपकारकृद्विरुषितस्त्यक्तस्तुलेसप्तमे ७ ७ ७

शीलः अर्थान्वितः सधनः हीनांगः अपरिपूर्णावयवः क्रयेषुविक्रयेषुचकुशलः शक्तः देवाद्विनामा अन्यपर्यायद्वितीयाभिधानः द्वितीयनामदेवाख्यंचास्यभवति सरुक् पीडितदेहः बंधूनांस्वकुटुंबानांउपकारकृद्धितकारी तैश्चबंधुभिः विरुषितः भर्त्सितः पराभूतः त्यक्तः त्याजितश्चएवंविधःसप्तमेतुलास्थेचंद्रमसिजातोभवति ७ अथवृश्चिकस्थेचंद्रमसिजातस्यस्वरूपंमालिन्याह पृथुलेति पृथुलनयनवक्षाःपृथुले विस्तीर्णेनयनेनेत्रेवक्षउरोयस्य वृत्तेपरिवर्तुलेजंघेऊरूजानुनीचयस्यजनकैः मातृपितृभिः गुरुभिश्चोपदेशकारिभिः गौरवयुक्तैश्चवियुक्तोरहितः

शैशवेबाल्येव्याधितः पीडितः नरपतिकुलेराज्ञांवंशेपूज्यः आराध्यः पिंगलः क्रूरचेष्टः विषमः स्वभावः झषकुलिशखगांकः झषोमीनः कुलिशंवज्रं खगः पक्षी एतैर्मत्स्यवज्रपक्षिसमानैरंकैश्चिन्हैरंकितः श्चिन्हितः छन्नपापः गुप्ताशुभकृत् एवंविधोलिनि वृश्चिकस्थेचंद्रेजातोभवति ८ अथधनुर्धरस्थेचंद्रेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह व्यादीर्घास्येति व्यादीर्घास्यशिरोधरः व्यादीर्घमतिदीर्घमास्यंमुखंशिरोधराग्रीवाचयस्य पितृधनः जनकवित्तान्वितः त्यागीदाता कविः काव्यज्ञः वीर्यवान्बली वक्तासंभाषणेदक्षः स्थूलरदश्रवाधरनसः स्थूलामहत्प्रमाणारदादंताः श्रवणौकर्णौ अधरः ओष्ठः नसः नासिकाघ्राणः एतेसर्वएवस्थूलायस्य कर्मोद्यतः सर्वकार्योपायेषूद्यमशीलः शिल्पवित् शिल्पज्ञः लिपि

पृथुलनयनवक्षावृत्तजंघोरुजानुर्जनकगुरुवियुक्तःशैशवेव्याधितश्च नरपतिकुलपूज्यःपिंगलःक्रूरचेष्टो
झषकुलिशखगांकश्छन्नपापोलिजातः ८ व्यादीर्घास्यशिरोधरःपितृधनस्त्यागीकविर्वीर्यवान्वक्तास्थूलर
दश्रवाधनरतःकर्मोद्यतःशिल्पवित् कुब्जांसःकुनखीसमांसलभुजःप्रागल्भवान्धर्मविद्बंधुद्विट्नबला
त्समेतिचवशंसाम्नैकसाध्योश्वजः ९

पुलकश्चित्रज्ञः कुब्जांसः अस्पष्टस्कंधः कुनखीकुत्सितनखः समांसलभुजः पीनबाहुः प्रागल्भवान् अतिप्रतिभायुक्तः धर्मवित् धर्मज्ञः बंधुद्विट् बंधुनामप्रीतिभाक् हठेनाबलवान् हठादाकर्षणादसंविधेयतावशंवश्यतांनसमेति नायाति साम्नाप्रीत्याएकेनैवगुणेनसाध्यः स्वीक्रियते एवंविधोश्वजोधनुषिस्थितेचंद्रेजातोभवति ९ अथमकरस्थेचंद्रेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह नित्यंलालयतीति नित्यंलालयतिस्वदारतनयान्स्वकलत्रंतनयांश्चपुत्रान्लालयति आराधयतिप्रीत्याभाजनेधर्मध्वजः दांभि-

कः मिथ्याधार्मिकः अधः कृशः अधोभागादतिदुर्बलः स्वदृक्ः शोभननेत्रः क्षामकटिः कृशजघनः गृहीतवचनः उक्तग्राहकः यदुच्यते तत्सकृदेव गृह्णाति सौभाग्ययुक्तः सर्वजनप्रियः अलसः क्रियास्वपटुः शीतालुः सीतंनसहते अटनः परिभ्रमणशीलः सत्वाधिकः उदारचेष्टः बलाधिकोवा काव्यकृत् विद्वान् लुब्धः लोभाभिभूतः अगम्यास्वगमनीयासु निकृष्टजातिषु जरदंगनासु वृद्धस्त्रीषु निरतः संसक्तः सत्यक्तलज्जः विमुक्तव्रीडः अघृणो निर्दयः एवंविधो मनुजो मनुष्यो मकरस्थे चंद्रमसि जातो भवति १० अथ कुंभस्थे चंद्रे जातस्य स्वरूपं चोटकेनाह करभगल इति करभगलः उष्ट्रसम

नित्यंलालयतिस्वदारतनयाधर्मध्वजोधःकृशःस्वदृक्ःक्षामकटिर्गृहीतवचनःसौभाग्ययुक्तोलसः शीतालु
मनुजोऽटनश्चमकरेसत्वाधिकःकाव्यकृल्लुब्धोगम्यजरांगनासुनिरतःसंत्यक्तलज्जोघृणः १० करभगलःशिरालुः
खरलोमशदीर्घतनुःपृथुचरणोरुपृष्ठजघनास्यकटिर्जठरः परवनितार्थपापनिरतःक्षयवृद्धियुतःप्रिय
कुसुमानुलेपनसुहृद्धनोध्वसहः ११

ग्रीवः शिरालुः शिरासंततः खराकर्कशालोमान्यस्याः सालोमशादीर्घा सूक्ष्मातनुः शरीरंयस्य पृथूविस्तीर्णौ चरणौपादौतथा ऊरूजानू परिभागौ पृष्ठंदेहपश्चिमभागोजघनम् नितंबस्थानमास्यंमुखंकटिश्चबस्तिः यस्यसः पृथुचरणोरुपृष्ठजघनास्यकटिः तथाजठरःमूर्खः परवनितासु परस्त्रीषु परार्थेषु पापेच निरतः सक्तः क्षयवृद्धियुतः उपचयापचयैर्युक्तः प्रियकुसुमानुलेपनसुहृत् कुसुमानि पुष्पाणि अनुलेपनं समालभनम् सुहृदोमित्राणिप्रियाणियस्य अध्वसहः पथिक्षमः एवंविधोघटजः कुंभस्थेचंद्रमसिजातोभवति ११

अथमीनस्थे चंद्रमसिजातस्यस्वरूपंमालिन्याह जलपरधनभोक्तेति जलपरधनंभोक्ता जलधनानामुदकोत्पन्नवित्तानांमुक्ताफलानांक्रयविक्रयजातानांपरधनानांचभोक्तास्वामी दारवासीनुरक्तः दारेषुकलत्रेषुविषयेषु वाससावस्त्राणांचानुरक्तः समरुचिरशरीरः समतुल्यंसर्वावयवपरिपूर्णं रुचिरंदीप्तिमच्छरीरंयस्य तुंगनासाअत्युच्चनासिकः वृहत्कः विस्तीर्णमूर्द्धा अभिभवति सपत्नान् सपत्नान् शत्रून् अभिभवतिपराजयति स्त्रीजितः प्रमदावशगः चारुदृष्टिः शोभनाक्षः द्युतिनिधिधनभोगी द्युतिः कांतिः निधिः भूमावधः स्थापितमर्थंनिधिशब्देनोच्यते धनंवित्तं एषांभोगीभोक्ता पंडितश्चशास्त्रार्थवित् एवंविधोत्त्यराशौ मीनस्थेचंद्रमसि जातोभवति १२ अथोक्तराशिस्वरूपमपवादंचभ्रमरविलसितेनाह

जलपरधनभोक्तादारवासोनुरक्तःसमरुचिरशरीरस्तुंगनासोबृहत्कः अभि
भवतिसपत्नान्स्त्रीजितश्चारुदृष्टिर्द्युतिनिधिधनभोगीपंडितश्चांत्यराशौ १२

बलवतिराशावीति पुरुषस्यजन्मसमयेयस्मिन्राशौचंद्रमाव्यवस्थितस्तस्मिन्बलवतिसबले तथातस्यचराशेर्योधिपतिस्तस्मिंस्तदधिपतौचबलवति तथातुहिनांशश्चंद्रमासंचयदिसबले नात्मीयेनवीर्येणपूर्वोक्तेनसंयुतोन्वितःस्याद्भवेत् एवमेतेषुत्रिषुयदिसबालत्वंविद्यतेतदा यथोक्तराशिस्वरूपंजातः पुरुषोभवति यतउक्तं कथितफलानामविकलदातेति अनयासामर्थ्यात्सचंद्रः कथितफलानां उक्तस्वरूपाणामविकलानांपरिपूर्णानांदाताभवति एषामप्याद्ययोर्बलवतोर्मध्येयुक्तस्वरूपंप्राप्नोति एकस्मिन् बलवति हीनंकिंचित् न कस्मिंश्चिद्बलवतितदुक्तंस्वरूपंनकिंचिद्भवति शशिवदतइति अतोस्माच्चंद्रादन्ये परिशिष्टायेग्रहाः रविभौमज्ञगुरुसितसौराः शशिवच्चंद्रव

परिकल्प्याः यत्रराशौस्थिताभवंति तदाश्रयेणवक्ष्यमाणंस्वरूपंदास्यंति तदपिचंद्रवत् एतदुक्तंभवति बलवतिराशौतदाधिपतौच बलवति यस्यग्रहस्यराशिस्वरूपंपठ्यति तस्मिन्नपिबलवति तदाधिपतौचसंपूर्णंतत्पठितंराशिस्वरूपंभवति यद्येकयोश्चबलवतोर्मध्यमोनामितिन कस्मिंश्चिद्बलवति नैतत्किंचिदिति चंद्रराशिस्वभावइति १३ इतिबृहज्जातक० राशिशीलंचंद्रस्यसमदशोऽध्यायः १७ अथमेषवृषगतेर्केजातस्यस्वरूपमौपच्छंदसिकेनाह प्रथितः प्रख्यातः चतुरः दक्षः अटनः परिभ्रमणशीलः अल्पवित्तः स्तोकार्थः आयुधभृत् शस्त्रधारणजीविः एवंविधः क्रियगेमेषस्थेभानावादित्येजातोभवति एतच्चफलंवितुंगभागेयदितत्रैवमेषस्थः आदित्यः परमोच्चस्थोभवति तुंग

बलवतिराशौतदधिपतौचस्वबलयुतःस्याद्यदितुहिनांशुः कथितफलानामविकलदाता
शशिवदतोन्येप्यनुपरिचिंत्याः १३ इतिबृ० राशिशीलाऽध्यायः १७ प्रथितश्चतुरोटनोल्पवि
त्तःक्रियगेत्वायुधभृद्वितुंगभागे गविवस्त्रस्रग्गंधपण्यजीवीवनिताद्विट्कुशलश्चगेयवाद्ये १

भागंपरमोच्चंवर्जयित्वाअन्यत्रस्थितेर्केनैतत्फलंदोषभाग्जातोभवति तद्यथा अल्पवित्तोबहुवित्तोभवति अटनोनभवति आयुधभृन्नभवति तस्यान्येआयुधभृतोनुयायिनोभवंति अन्येतुपुनः पूर्वोक्तागुणाः प्रथितश्चतुरोभवति गवीत्यादि वस्त्रैरंबरैः स्रग्गंधद्रव्यैः पण्यैस्तज्जीविनः वनिताद्विट् स्त्रीषुद्वेष्टा गेयेगीतेवाद्येच वादनविधौकुशलः शिक्षितः एवंविधोगविवृषस्थेसूर्येजातोभवति १ अथमिथुनकर्कसिंहकन्यास्थेसूर्येजातस्यस्वरूपंशार्दूलविक्रीडितेनाह विद्याज्योतिषवित्तवान् विद्यावान्व्याकरणज्ञः ज्योतिषवान्ज्योतिषशास्त्रज्ञः वि

त्तवान् धनी एवंविधोमिथुनस्थेभानौजातोभवति तीक्ष्णःउग्रः अस्वःदरिद्रः परकार्यकृदन्येषांकार्यकर्त्ता श्रमपथः श्रमेणखेदेनपथाध्वनाक्लेशैः दुःखैश्चसर्वकालसंयुज्यते एवंविधः कुलीरस्थेकर्कटगतेभानौजातोभवति सिंहस्थइति वनमरण्यं शैलः पर्वतः गोकुलः गोवाटः एतेषुस्थानेषुरतिः निवासशीलः तदासक्तइत्यर्थः वीर्यान्वितः बलीअज्ञः मूर्खः एवंविधः पुमान्पुरुषः सिंहस्थेकेजातोभवति लिपिरक्षरविन्यासः लेख्यं चित्रकर्म काव्यंकवेःकर्म गणितं ग्रहगणितादिज्ञानंविज्ञानम् एतैरन्वितोयुक्तः स्त्रीवपुः स्त्रीतुल्यशरीरः एवंविधः कन्यास्थेर्के जातोभवति २ अथतुलावृश्चिकधन्विमकरस्थेर्केजातस्यस्वरूपंशार्दूलविक्रीडितेनाह जातइति शौडिकोमद्यविक्रयीभवति मद्यकरोवेतिकेचित् अध्वनिरतः पथिप्रसक्तः हैरण्यकः स्वर्णकारः नीचकृदनुचितकर्मकर्ता एवंविधः तौलिनितुलास्थेर्केजातोभवति क्रूरःउग्रस्वभावः साहसिकः असमीक्षितकार्यकृत् तथाच असमीक्षितकार्याणांकर्तासाहसिकः स्मृतः विषार्जितधनः विषप्रयोगैरर्जितंधनंसंचितंवित्तंयेन प्रत्यंतरेवृथार्जितधनः यद्धनमर्जति तदस्यवृथानिष्फलंभवति चौरादयोपहरंति शस्त्रांतगः शस्त्रनैपुण्यकः शस्त्रस्यायुधस्यातगः एवंविधोलिस्थितेवृश्चिकगतेर्केजातोभवति सत्पूज्यः सतामर्चनीयः धनवान्वित्तयुक्तः तीक्ष्णः निरपेक्षः भिषक् वैद्यः प्रयोगज्ञः कारुकः शिल्पिकर्मज्ञः एवंविधोधनुर्धरस्थेर्केजातोभवति नीचः कुलानिचिंताधर्मकर्मकृत् अज्ञः मूर्खः कुवणिक् कुत्सितवणिक् अ॰

विद्यांज्योतिषवित्तवान्मिथुनगेभानौकुलीरस्थितेतीक्ष्णोस्वःपरकार्यकृच्छ्रमपथःक्लेशैश्चसंयुज्यते
सिंहस्थेवनशैलगोकुलरतिर्वीर्यान्वितोज्ञःपुमान्कन्यास्थेलिपिलेख्यकाव्यगणितज्ञानान्वितःस्त्रीवपुः २

ल्पधनवान् स्तोकार्थलुब्धः लोभाभिभूतः अन्यभारवैरतः परकीयैर्भाग्यैः वित्तादिभिः रतः परार्थोपकारभोक्ता एवंविधो मृगे मकरस्थेर्के जातो भवति ३ अथ कुंभमीनगतेर्के जातस्य स्वरूपं चंद्रार्कयोरेकराशिगतयोस्तु लक्ष्मज्ञानं यत्संततिलके नाह नीचकृदिति नीचः कुलानुचिताधमकर्मकृत् तनयैः पुत्रैः भार्यैश्च परिच्युतः त्यक्तः पुत्रैः जनवाल्लभ्येन च विरहितः अस्वः निर्धनः एवंविधो घटे कुंभस्थेर्के जातो भवति तोयोत्थं जलोत्पन्नं मुक्ताफलादि तेनापण्येन तद्विक्रयेण विभवमैश्वर्यं यस्य वनिताहृतः स्त्रीपूज्यः एवंविधोंत्ये मीनस्थेर्के जातो भवति नक्षत्रमानवतनुरित्यादि

जातस्तौलिनि शौण्डिको ध्वनिरतो हैरण्यको नीचकृत् क्रूरः साहसिको विषार्जितधनः शास्त्रांत
गोलिस्थिते सत्पूज्यो धनवान् धनुर्धरगते तीक्ष्णो भिषक्कारुको नीचोन्त्यः कृपणिकृन्मृगेल्पधन
वाल्लुब्धोन्यभाग्यैरतः ३ नीचो घटे तनयभाग्यपरिच्युतोस्वस्तोयोत्थपण्यविभवो वनिताहृ
तोन्त्यम् नक्षत्रमानवतनुः प्रतिमविभागे लक्ष्म्यादिशेत्तुहिनरश्मिदिनेशयुक्ते ४

नक्षत्रमानवको राशिपुरुषः कालांगानीत्यादिना प्रदर्शितः तुहिनरश्मिश्चंद्रः दिनेश आदित्यः एतौ समेतौ यस्मिन् राशौ स्थितौ स राशिनक्षत्रपुरुषस्य यस्मिन्नंगे स्थितस्तत्र पुरुषस्य जातस्य लक्ष्मचिन्हमशकादि समादिशेत् वदेत् यथा मेषस्थयोः शिरसि वृषस्थयोः मुख इत्येवमूह्यम् आदित्यराशिस्वभावः ४ अथ मेषवृश्चिकवृषतुलस्थे कुजे जातस्य स्वरूपं चोटकेनाह नरपतिसत्कृतः राजपूजितः अटनः परिभ्रमणशीलः चमूपः सेनापतिः वणिक् क्रयविक्रयज्ञः सधनः वित्तान्वितः क्षततनुः निक्षतदेहः व्रणितशरीरः चौरतस्करः भूरिविषयः विप्रकीर्णेंद्रियः एवं

विधान् स्वगृहे मेषवृश्चिकस्थः कुजः भौमः जनयेत् युवतिजितः स्त्रीविधेयः सुहृत्सु मित्रेषु विषमः दुर्विधेयः सक्रूरस्वभावः परदाररतः परयोषिति प्रसक्तः कुहकज्ञः ऐंद्रजालिकः सुवेषः शोभनालंकारः भीरुः सभयः परुषः कर्कशः निःस्नेहः एवंविधान् पुरुषान् सितभे शुक्रक्षेत्रे वृषतुलेवास्थितो भौमो जनयेदुत्पादयेत् ५ अथ मिथुनकन्याकर्कटस्थे भौमे जातस्य स्वरूपं वसंततिलकेनाह अथ मिथुनकन्यागते भौमे जातस्य स्वरूपमाह बौधेति असहः तेजस्वी तनयवान् पुत्रयुक्तः विसुहृत् मित्ररहितः कृतज्ञः परोपकारशीलः गांधर्वयुद्धकुशलः गांधर्वे गीते युद्धे च संग्रामे

नरपतिसत्कृतोऽटनश्चमूपवणिक्सधनाः क्षततनुश्चोरभूरिविषयांश्च कुजः स्वगृहे युवतिजितान्सुहृत्सुविषमान्परदाररतान् कुहकसुवेषभीरुपरुषान् सितभे जनयेत् ५
बौधेऽसहस्तनयवान्विसुहृत्कृतज्ञो गांधर्वयुद्धकुशलः कृपणोऽभयोऽर्थी चांद्रेऽर्थवान्सलिलयानसमर्जितस्वः प्राज्ञश्च भूमितनये विषयः खलश्च ६

प्रवेशनिर्गमव्यूहरचनादिषु च कुशलः तज्ज्ञः कृपणः अदाता अभयः निर्भयः अर्थी यांचापरः एवंविधो बौधे मिथुनकन्यास्थे कुजे भौमे जातो भवति अथ कर्कटस्थे भौमे जातस्य स्वरूपमाह चांद्रेति अर्थवान् सधनः सलिलयानसमर्जितस्वः सलिलयानेन प्लवादिना सम्यक्कृतं वित्तं स्वं धनं येन अथवा सलिलेन जलेन यानेन गमनेनाध्वनात् समर्जितं स्वं धनं येन प्राज्ञः मेधावी विकलः अंगहीनः खलः दुर्जनः एवंविधश्चांद्रे कर्कटगते भौमे जातो भवति ६ ७ ७

अथसिंहधन्विमीनकुंभमकरस्थेभौमेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह निःस्वइति निःस्वः निर्धनः क्लेशासहः आपद्धीरः कदर्थनाक्षमः वनांतरचरः अरण्यमध्यचारी केचित्तभयोवनचरइतिपठंति अभयोभयरहितः वनांतरचरोरण्यचारी अल्पदारात्मजोल्पकलत्रः अल्पापत्यः एवंविधः सिंहस्थेभौमेजातोभवति अनेकरिपुः बह्वारिः नरेंद्रसचिवः मंत्रीख्यातः विदितकीर्तिः अभयः निर्भयः अल्पात्मजः स्वल्पापत्यः एवंविधोधन्विमीनस्थेभौमेजातोभवति दुःखार्तः नित्यदुःखसंतप्तः विधनः दरिद्रः अटनः परिभ्रमणशीलः अनृतरतः असत्यभाषी तीक्ष्णः निरपेक्षः क्रूरः एवंविधः कुंभस्थेभौमेजातोभवति भूरिधनात्मजः प्रभूतधनः प्रभूतपुत्रः भूपः राजा अथवातत्समः राजतुल्यः एवंविधोमृगगतेम

निःस्वःक्लेशसहोवनांतरचरःसिंहेल्पदारात्मजोजैवेनेकरिपुर्नरेंद्रसचिवःख्यातोभयोल्पात्मजः दुःखार्तोविधनोऽटनोनृ
तरतस्तीक्ष्णश्चकुंभास्थितेभौमेभूरिधनात्मजोमृगगतेभूपोथवातत्समः ७ द्यूतर्णपानरतनास्तिकचौरनिःस्वाःकु
स्त्रीककूटकृदसत्यरताःकुजर्क्षे आचार्यभूरिसुतदारधनार्जनेष्टाः शौक्रेवदान्यगुरुभक्तिरताश्चसौम्ये ८

करस्थेभौमेजातोभवति ७ अथमेषवृश्चिकतुलवृषगतेबुधेजातस्यस्वरूपंवसंततिलकेनाह द्यूतेति द्यूतेक्षज्ञानेऋणेपरस्वहरणे पानेचनिरतः सक्तः नास्तिकः शास्त्रार्थदूपतः तार्किकः नास्तिपरलोकमतिर्यस्यसनास्तिकः चौरस्तस्करः निःस्वोदरिद्रः कुस्त्रीकः कुत्सितभार्यः कूटकृत् कूटकर्ता दांभिकः असत्यनिरतः अनृतभाषी एवंविधाजाताः सौम्येबुधेभौमर्क्षेमेषवृश्चिकस्थेभवंति आचार्येत्यादि आचार्यः उपदेशकर्ता भूरिसुतः प्रभूतापत्यः भूरिदारोबहुकलत्रः धनार्जनेष्टः धनार्जनमिष्टंयस्य अर्थार्जनेनित्यमुद्यतः वदान्यः दातागुरुभक्ति

रताः मातृपितृगुरूणांभक्ताः एवंविधाः पुरुषाः शौक्रेवृषतुलस्थेबुधेजाताभवंति ८ अथमिथुनस्थेबुधेजातस्यस्वरूपमुपेंद्रवज्रयाह विकत्थनइति विकत्थनः वाचालः असत्यवादी शास्त्रकलाविदग्धः शास्त्रे कलासुच गीतवाद्यनृत्यलेपचित्रकर्मसुविदग्धः शिक्षितः प्रियवदोभीमतवक्ता सौख्यरतः सुखासक्तः एवंविधः शशांकजेबुधे तृतीये मिथुनस्थेजातोभवति जलार्जितइति जलार्जितस्वः जलेनोदकेनार्जितंस्वंधनंयेनसः केचिद्बलार्जितस्वइति बलेनवीर्येणार्जितंस्वंधनंयेन स्वजनस्यात्मीयजनस्यचबधुजनस्यशत्रुःरिपुःएवंविधःशशा-

विकत्थनःशास्त्रकलाविदग्धःप्रियंवदःसौख्यरतस्तृतीये जलार्जितस्वःस्वजनस्यशत्रुःशशांकजेशी
तकरर्क्षयुक्ते ९ स्त्रीद्वेष्योविधनसुखात्मजोऽटनोज्ञःस्त्रीलोलस्वपरिभवोऽर्कराशिगेज्ञेत्यागीज्ञः प्रचु
रगुणःसुखीक्षमावान्युक्तिज्ञोविगतभयश्चषष्ठराशौ १०

कजेबुधेशीतकरर्क्षेचंद्रराशौकर्कटयुक्तेजातोभवति ९ अथसिंहकन्यागतेबुधेजातस्यस्वरूपंप्रहर्षिण्याह स्त्रीद्वेष्यइति स्त्रीणांद्वेष्यः स्त्रीद्वेष्यः विधनसुखात्मजः विधनोधनरहितः विसुखः विगतसुखः विगतात्मजः पुत्ररहितः अटनः परिभ्रमणशीलः अज्ञः मूर्खः स्त्रीलोलः वनिताभिलाषी स्वपरिभवः स्वेषामात्मीयानांसकाशात्परिभवोयस्य एवंबुधोज्ञबुधेऽर्कराशिगेसिंहस्थेजातोभवति त्यागीदाताज्ञः पंडितः प्रचुरगुणः प्रभूतगुणैर्युतः गुणाःविद्याशौर्याद्यः सुखीसुखितःक्षमावान्सहिष्णुः युक्तिज्ञः प्रयोगवेत्ताविगतभयः निर्भयः एवंविधः षष्ठराशौकन्यास्थेबुधेजातोभवति १० ६५

अथमकरधन्विमीनगते बुधेजातस्यस्वरूपमोपच्छंदसिकेनाह परकर्मकृदिति परकर्मकृदितिपरकर्मकृत् परप्रेष्यकरः अस्वः दरिद्रः शिल्पबुद्धिः शिल्पकर्मस्वनुरितमतिः ऋणवान् परस्वग्रहणशीलः विष्टिकरः आज्ञाकरः एवंविधोर्कजर्क्षेमकरकुंभस्थे बुधेजातोभवति नृपसत्कृतः राजपूजितः नृपसमतोवाराजवल्लभः पंडितः विद्वान् आप्तवाक्यः व्यवहारार्थवेत्ता आप्तमनुकूलंवाक्यंयस्य एवंविधोनवमे धन्विस्थिते बुधेजातोभवति जितसेवकः जितासेवकायेन पराराधनदक्षः पराभिप्रायज्ञः अल्पशिल्पः एवंविधोत्स्यमीनस्थे बुधेजातोभवति इतिबुधराशिस्वभावः ११ अथमेषवृश्चिकवृषतुलमिथुनकन्यागतेजीवेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह सेनानीति सेनानीसेनानायकः बहुवित्तः प्रभूतधनः बहु

परकर्मकृदस्वः शिल्पबुद्धिर्ऋणवान्विष्टिकरोबुधेर्कजर्क्षे नृपसत्कृतपंडिताप्तवाक्योनवमेत्स्येजितसेवकों
ल्पशिल्पः ११ सेनानीर्बहुवित्तदारतनयोदातासुभृत्यःक्षमीतेजोदारगुणान्वितःसुरगुरोख्यातःपुमान्कौज
भे कल्यांगःसधनार्थमित्रतनयस्त्यागीप्रियःशौकभेबौधेभूरिपरिच्छदात्मजसुहृत्साचिव्ययुक्तःसुखी १२

दारः प्रभूतकलत्रः बहुतनयः प्रभूतापत्यः दातादानशीलः सुभृत्यः शोभनभृत्यः क्षमी क्षमावान् तेजसाकांत्या दारगुणैः कलत्रसौख्यैरन्वितोयुक्तः ख्यातः प्रख्यातकीर्तिः एवंविधः सुरगुरोजीवेकौजेकुजगेभौमक्षेत्रे मेषवृश्चिकस्थेजातोभवति कल्यांगः स्वस्थदेहः सधनार्थः सधनः समित्रः सकलत्रः सतनयः पुत्रान्वितः सुखधनमित्रपुत्रयुक्तः त्यागीदाताप्रियः सर्वजनवल्लभः एवंविधः शौक्रभेशुक्रक्षेत्रस्थे वृषतुलस्थेजीवेजातोभवति बौधेत्यादि भूरिपरिच्छदः बहुवस्त्रगृहपरिचारः भूयात्मजः बहुपुत्रः भूरिसुहृत् प्रभूतमित्रः साचिव्येमंत्रित्वेनि

युक्तः सचिवस्यभावः साचिव्यं स्फुरद्धीस्फारवित्तः एवंविधोबौधेबुधक्षेत्रेमिथुनकन्यास्थेजीवेजातोभवति १२ अथकर्कटसिंहधन्विमीनकुंभ
मकरस्थेजीवेजातस्यस्वरूपं शार्दूलविक्रीडितेनाह चांद्रइति रत्नानि मणयः सुताः पुत्राः स्वधनदाराः कलत्रंविभवंऐश्वर्यं प्रज्ञामेधा स्फुरत्सुखभावः एतैरन्वितः संयुक्तः एवंविधः चांद्रेचंद्रक्षेत्रेकर्कटस्थेसुरगुरौजीवेजातोभवति बलनायकः सेनाप्रधानः अन्यच्चयच्चंद्रभे कर्कटस्थेउक्तंरत्नसुतस्वदारविभवः प्रज्ञासुखैरन्वितः एवंविधः सिंहस्थेजीवेस्यात्तद्वत् मांडलिकः मंडलाधिपतिः सेनानाथोवा अथवा धनीवित्तवान् एवंविधः
स्वक्षेस्वराशौधन्विमीनस्थेजीवेजातोभवति कुंभेकर्कटवदिति यानिकर्कटस्थेजीवेफलान्यभिहितानि रत्नसुतस्वदारविभवः प्रज्ञासुखैरन्वितः

चांद्रेरत्नसुतस्वदारविभवःप्रज्ञासुखैरन्वितःसिंहेस्याद्बलनायकःसुरगुरौप्रोक्तंचयच्चंद्रभे स्वर्क्षे
मांडलिकोनरेंद्रसचिवःसेनापतिर्वाधनीकुंभेकर्कटवत्फलानिमकरेनीचोल्पवित्तोसुखी १३

इत्येतानिकुंभस्थेगुरौभवंति अत्रान्येनसहमतभेदः तेनानिष्टंफलमभिहितं तथाचनीचः कुंभेजनपतिकर्मणितोयाश्रयेसक्तं नीचः कुलानुवि
ताधर्मकर्मकृत् अल्पवित्तःस्तोकार्थः असुखीदुःखितः एवंविधोमकरस्थेजीवेजातोभवति इतिबृहस्पतेराशिस्वभावः १३ अथशुक्रराशिः
अथमेषवृश्चिकवृषतुलागतेशुक्रेजातस्यस्वरूपं पुष्पिताग्रयाह परयुवतिरतः परस्त्रीषुसक्तः तदर्थवादैस्तासांपरस्त्रीणामर्थवादैरपराधानुवचनैः हृतविभवोपहृतार्थः कुलपांसनः कुलकलंकभूतः एवंविधःसितेशुक्रेकुजस्यभौमस्यक्षेत्रेमेषवृश्चिकस्थेजातोभवति स्वबलेत्यादि स्वबलेनात्मीयवीर्येण स्वमत्याश्चात्मीयबुद्ध्याचधनंयस्यासौस्वबलमतिधनः नरेंद्रपूज्यः राजवल्लभः स्वजनविभुः बंधुप्रधानः प्रथितःविख्यातः

अभयः निर्भयः एवंविधः स्वेस्वक्षेत्रे वृषतुलास्थे सितेशुक्रेजातोभवति १४ अथमिनकन्यामकरकुंभस्थेशुक्रेजातस्यस्वरूपमौपच्छंदसिकेना
ह नृपकृत्यकरः राजकर्मकर्ता अर्थवान् धनी कलावित् कलाज्ञः गीतवाद्यादिकवेत्ता एवंविधोमरारिपूज्योदैत्यगुरौशुक्रेमिथुनस्थेजातोभवति
षष्ठगतेकन्यास्थेशुक्रेतिनीचकर्माकष्टकार्यकरोजातोभवति सुभगः सर्वजनप्रियः स्त्रीविजितः प्रमदावशगः कुनार्याकुत्सितास्त्रियारक्तः सक्तः ए
वंविधः शुक्रेरविजर्क्षगते मकरकुंभस्थेजातोभवति १५ अथकर्कटसिंहधन्विमीनस्थेशुक्रेजातस्यस्वरूपंशिखरिण्याह द्विभार्यः द्विस्त्रीकः अर्थी-

परयुवतिरतः स्यादर्थवादैर्हृतविभवः कुलपांसनः कुजर्क्षे स्वबलमतिधनोनरेंद्रपूज्यः स्वजनविभुः प्रथितोभ
यः सितेस्वे १४ नृपकृत्यकरोर्थवान्कलावित्मिथुनेषष्ठगतेतिनीचकर्मा रविजर्क्षगतेमरारिपूज्ये सुभगः स्त्री
विजितोरतः कुनार्याम् १५ द्विभार्योर्थीभीरुः प्रबलमदशोकश्चशशिभे हरौयोषाप्तार्थः प्रवरयुवतिर्मंदतन
यः गुणैः पूज्यः सस्वस्तुरगसहितेदानवगुरौ झषेविद्वानाढ्योनृपजनितपूजोतिसुभगः १६ ६९

यान्न्यापरः भीरुः सभयः प्रवरमदोतिहृष्टः प्रवरशोकोतिदुःखितः एवंविधोदानवगुरौदैत्यपूज्येशुक्रेशशिभेकर्कटस्थेजातोभवति योषाप्ता-
र्थः स्त्रीप्राप्तधनः प्रवरयुवतिः प्रधानस्त्रीकः मंदतनयः अल्पापत्यः एवंविधोहरौसिंहस्थेशुक्रेजातोभवति गुणैः पूज्यः मान्यः सस्वः सधनः एवंवि
धस्तुरगसहितेधन्विस्थेदानवगुरौशुक्रेजातोभवति विद्वान्पंडितः आढ्यः ईश्वरः नृपजनितपूज्यः नृपेणराज्ञाजनितोत्पादितापूजार्हणायस्यअ
तिसुभगः सर्वजनानामतिवल्लभः एवंविधोझषेमीनस्थेशुक्रेजातोभवति इतिशुक्रराशिस्वभावः १६ अथशनिः अथमेषवृश्चिकमिथुन

कन्यागतेसौरेजातस्यस्वरूपंवसंततिलकेनाह मूर्खोऽज्ञानोपेतः अटनः परिभ्रमणशीलः कपटवान् दांभिकः विसुहृत् मित्ररहितः एवंविधो यमेसौरेऽब्जोमेषस्थेजातोभवति बंधवधभाक् बंधोबंधनंवधस्ताडनंबंधवधौभजनेचपलः क्रियास्वनवस्थितः अघृणः निर्दयः एवंविधः कीटेवृश्चिकस्थेजातोभवति निर्ह्रीसुखार्थतनयः निर्गताह्रीर्लज्जायस्यसनिर्लज्जः निःसुखोदुःखितः निरर्थोदरिद्रः निस्तनयः पुत्ररहितः लेख्येआलेख्यकर्मणिस्खलितः अज्ञः रक्षापतिर्भवत्यारक्षिकः मुख्यपतिः प्रधाननाथः एवंविधोबोधेबुधक्षेत्रेमिथुनकन्यास्थेसौरेजातोभवति १७ अथवृषतुलाकर्कटसिंहस्थेसौरेजातस्यस्वरूपंमंदाक्रांतयाह वर्ज्यास्त्वगम्यागुर्व्यादिस्त्रीषुयोषित्सुइष्टः वल्लभः नबहुविभवः नप्रभूतैश्व

मूर्खोऽटनः कपटवान्विसुहृद्यमेजे कीटेतुबंधवधभाक्चपलोऽघृणश्च । निर्ह्रीसुखार्थतनयःस्खलितश्चलेख्येरक्षा
पतिर्भवतिमुख्यपतिश्चबोधे १७ वर्ज्यस्त्रीष्टोनबहुविभवोभूरिभार्योवृषस्थेख्यातःस्वोच्चेगणपुरबलग्रामपूज्यो
र्थवांश्च कर्किण्यस्वोविकलदशनोमातृहीनोऽसुतोऽज्ञः सिंहेनार्योविसुखतनयोविष्टिकृत्सूर्यपुत्रे १८

र्ययुक्तः अल्पैश्वर्ययुक्तः भूरिभार्यः प्रभूतदारः एवंविधोवृषस्थेसूर्यपुत्रेशनिश्चरेजातोभवति ख्यातःविदितकीर्तिः गणानांसमूहानां पुराणांनगराणाम् बलानांसैन्यानां ग्रामाणांचपूज्योमान्यः अर्थवान्सधनः एवंविधःस्वोच्चेआत्मीयस्वोच्चराशौ तुलास्थेसौरेजातोभवति अस्वः दरिद्रः विकलदशनः अल्पदंतः मातृहीनः जननीवियुक्तः असुतःपुत्ररहितः अज्ञःमूर्खः एवंविधःकर्कटस्थेसौरेजातोभवति सिंहेनार्यइतिअनार्यः मूर्खः विसुखोदुःखितः वितनयःपुत्ररहितः विष्टिकृद्भारवाहकः एवंविधःसिंहस्थेसूर्यपुत्रेशनैश्चरेजातोभवति
१८

अथधन्विमीनमकरकुंभगतेसौरेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह स्वंतः शोभनोंतः पर्यंतोयस्यसस्वंतः शुभेनकर्मणातस्यमृत्युर्भवति अथवांतेशोभनंस्फुरवाह्निकंयस्य नरेंद्रभवनेराजगृहेप्रत्यायितःसंजातप्रत्ययः सत्पुत्रः शोभनापत्यः सज्जयः शोभनभार्यः सद्धनः सद्वित्तः परबलग्रामाग्रनेता पुराणांनगराणांबलस्यसेनायाः ग्रामाणांचअग्रनेताप्रधानोनायकः एवंविधोर्कजेसौरेजीवक्षेत्रेधन्विमीनस्थेजातोभवति अन्यस्त्रीधनसंवृतः परयोषिद्भिःपरधनैश्चसंवृतः संयुक्तः पुरबलग्रामाग्रणीः पुराणांबलानांग्रामाणांचअग्रणीः प्रधाननायकः मंददृगल्पचक्षुः मलिनःमलोपेतः स्नानालसः स्थिरार्थः स्थिरवित्तः स्थिरविभवः स्थिरैश्वर्यः भोक्ताअसंचयशीलः एवंविधः पुमान् पुमान्पुरुषः स्वक्षेत्रेमकरकुंभस्थेसौरेजातो

स्वंत्यः प्रत्यायितोनरेंद्रभवनेसत्पुत्रजायाधनोर्जीवक्षेत्रगतेर्कजेपुरबलग्रामाग्रनेताथवा अन्य
स्त्रीधनसंवृतःपुरबलग्रामाग्रणीर्मंददृक्स्वक्षेत्रेमलिनःस्थिरार्थविभवोभोक्ताचजातःपुमान् १९

भवति इतिशनैश्चरराशिस्वभावः एतेषु सर्वेषुग्रहराशिस्वभावेषुबलवतिराशौतदधिपतौचतस्मिंश्च ग्रहेबलवति जातस्ययथोक्तंराशिस्वरूपंभवति द्वयेकयोश्चबलवतोर्मध्येसमानमिति नकस्मिंश्चिद्बलवतिनकिंचिदिति १९ अथमेषादिषुलग्नेषुचंद्राक्रांतराश्युक्तस्वरूपातिदेशंपुष्पिताग्रयाह शिशिरकरश्चंद्रमास्तस्यराशिभिः सहसमागमेयत्स्वरूपमुक्तंवृत्तताम्रदृगित्यादिकंतन्मेषलग्नजातस्यापिवक्तव्यम् एवमन्येष्वपिराशिषुवृषादिषुस्थितेचंद्रमसियदुक्तंतल्लग्नजातस्यापिवक्तव्यं यतोमुनयः सदृशंफलंवदंति कथयंतिस्वरूपभेदाभावात् तथाचसूत्यःमेषविलग्ने कुनरवीसुरोषणोभेदरूक्षस्खलितवाक्यःपितानिलभूयिष्ठः कृपणोतिबहुव्ययश्चैवराहितावास्येगुरुभिर्मंदसुतःस्वजनसहजाहितेकता धर्मस्थितोविदेशाप

गश्च कर्मारंभस्य फलं नीचां वापि शक्रनां वा धिकं लांलभतेन्यपूर्वीकां भार्यां सहजसमान्यपि मित्राणि चास्य बंधुत्वमुपयांति शस्त्रेण वा विषैर्वा मरणं पित्तो
द्भवैर्विकारैर्वा स्वात्पक्षाज्ज्वलनाद्वा वर्षा दुर्गात्प्रपतनाद्वा वृषभाविलग्ने स्थूलोष्ठगंडनासो महाललाटश्च स्लेष्मानिलप्रकृतिष्टस्त्यागि बहुशो व्ययपरतश्च कु
न्याप्रजोल्पपुत्रः पितुर्जनन्याश्च दोषकृद्बहुशः कर्माणि सततं सक्रोविधर्मयुक्तोर्थभाक्कृत्वैव नित्यं कलत्रकांक्षी शस्त्राघाती सदा स्वजनहर्ता मृत्युः शस्त्रै
पाशैर्मृगैश्च लभतेन्यदेशेषु देहः श्रमैर्जलैर्वा शूलैर्वाप्यटननिरसनैश्चैव पुरुषश्चतुष्पदैर्वा बलान्विता मृत्युमुपयाति पूर्वाविलग्ने मिथुने हीनांगः सूर्यतोधि
कांगो वा प्रियवाग्विशिष्टकर्मा मिश्रप्रकृतिर्हिजननीकः अल्पमतिरल्पकायः सतांच महितो गुरुणांच अल्पसहजोल्पचेष्टः परावमर्दी गुणयुतश्च कर्म
सु बहिष्वपि रतो धर्मं साधयति न चाथ धर्मेण प्राप्तान्लाभान्विविधान्दोषैस्तैस्तैश्च नाशयति बह्निःपालिलभते रोगांश्च दारुणान्जयति व्यालाद्विषान्मृ·
गाद्वाप्युदकाद्वा मृत्युमुपयाति कर्किणि पूर्वविलग्ने नैकाम्नोगुत्यरोगवान् भीरुः उरसि कृताभिज्ञानः कफानिलात्मा हृद्ग्राही पापानहितान्भजते
परस्वमपि निक्षिपद्व्ययेन सकृत् स्वजनाद्वृतः स्वजनैर्विभार्त्सितोस्यास्थिरप्रसवः तीक्ष्णंकर्मविदेशीनित्यंत्वद्दृष्टोदितः परस्वामी असहृशदारो रिपुनिर्जितश्च पूज्यः स
मूहानां कंठपीडाद्वा कफोद्याद्वास्थिभंजनाद्वेदात् देहच्छेदादथवा जलोदरान्मृत्युमाप्नोति सिंहविलग्ने कठिनः प्रियामिषः पैतृकोवित्तनाशः बह्वारंभकुटुंबः कृ
पणस्त्वथ संमतः ख्यातः सहजविषादी स्वजनस्य यातको धिकपैस्तकैर्युक्तः अविषादी कर्मकरो विविधोपायैः स्वधर्मिष्टः भार्या बह्वी लभते विद्याद्विधाः कु
लैरूपेतश्च कव्यारुजश्च बहुशो जान्वोर्दर्शनेषु चाप्नोति मृत्युः शस्त्रैः पापैर्विषाश्च काष्ठैरथामयैश्चापि अंबुचरैर्वासत्वैर्बुभुक्षया न्हासमुपयाति ष
ष्ठविलग्ने प्रियवाक्कृतनुच्छविर्दीर्घकरचरणः मिश्रप्रकृतिश्चार्यांकृतीग्रणीचार्यवान्कृपणः स्वजनस्येष्टः कन्या बहुप्रजो भ्रातृभिर्विरुद्धश्च
धर्मप्रियोल्पलाभः कर्माणि निपुणः समाचरति विविधाश्चतुष्पदगणान्स्थस्नात् पितोद्भवाद्रोगात् शोकात्संतापाद्वा मृत्युंचाप्नोति पाशाद्वास

समराशौलग्नेविषमांगः सूयत्नेविषमशीलः कफवातिकः सुचपलोह्रस्वग्रीवः कृतज्ञश्च अर्थान्विपुलाँल्लभते व्ययेनसंपूज्यते यशः प्रायः गुरुसेवायांनिरतः पितान्यजनसहजपूज्यः अध्वरुचिर्धर्मिष्ठोविनाशमायातिपीडनैः स्वैःस्वैः मृतभार्यः कलहरुचिर्बहुशः शोकादिभिः क्लिष्टः मृत्युःस्व्यातात् पुरुषात्स्वजनात्सौम्याच्चतुष्पदाद्वापि खेदाच्चविप्रयोगादुपवासान्मार्गयोगाद्वा अष्टमराशौलग्नेविशालनज्वाननादरः क्रूरःपित्तप्रकृतिःपिंगेक्षणोमृदुद्रुतगतिः परस्वामीस्फीतकटुंबस्वजनोनकश्चबहुव्ययोबहुप्रसवः स्मरपराहितोभ्रातृव्योपषसेवीधर्महीनश्च भार्यानिमित्तविमुखीशत्रोरप्यानन्ददातिबहुशश्च स्वकुलोद्भूतांश्चमृहुंभतेरोगाश्चनैकविधान् गात्रच्छेदैः शत्रोर्वशंगतोबंधनैः प्रहारैश्चरोगैर्वापापकृतैर्ज्वलनाद्वा मृत्युमुपयाति

शिशिरकरसमागमेक्षणानांसदृशफलंप्रवदंतिलग्नजातम् फलमधिकमिदंयदत्रभावाद्भव
नभनाथगुणैर्विचिंतनीयाः २०

इतिबृहज्जातकविवृत्तौराशिशीलाऽध्यायोष्टादशःसमाप्तः १८

स्थूलोष्ठदशाननासानवमेलग्नेकफानिलप्रकृतिः मांसलगुल्फोरुभुजः कुनरवीकर्मोद्यतः शूरः क्षुद्रान्नीचान्भजते चौर्यादनलान्नृपाच्चनष्टधनः विज्ञानानांप्रसवोबहुपूज्योभ्रातृघातरुचिः कर्मविदेशोपिष्टः कुरुतेवित्तानिचाहंतिनृपेभ्यः धर्मेतुमध्यममतिर्दारैश्चाविरोधमुपयाति रोगान्वदनेलभतेचतुष्पदाच्चात्मनः समाप्नोतिमृत्युंबिलेशयाद्वानृपाच्चबंधाज्जनाद्वापि दशमविलग्नेतनुनासिकापुटोदीर्घवक्त्रकरचरणःवाच्यात्मकोमृगास्योभीरुश्चपरुषोस्यबंधनभाक् क्षुद्रकुटुंबोल्पधनःकृपणःकन्याप्रजोमृतस्वजनःसहजसमृद्धः शौर्यान्नृपादरण्याच्चलब्धधनःउपघा-

सधनशीलोनीचाभिष्टामवाप्नुयाद्भार्यां बहुविग्रहोऽल्पकेशोदुर्बलजानुर्ज्वररोगार्तः बालादनिलाच्छस्त्रान्नृपाद्विषात्प्रपतनाद्रुजाद्यापि पित्तोदयादजीर्णान्म्रियतेवामार्गभ्रष्टः एकादशोविलग्नेलब्धः क्रूरः कुलाधमः पुरुषः पित्तानिलप्रायेष्टात्तिलपुष्पसमानमासस्य ग्रासान्नाशयतेयान्यकृत्यः साध्यतेव्ययेऽस्यापि क्षीणः स्वगोत्रगुरुजनपरपक्षसक्तः स्वजनशत्रुः कर्मणिपापसक्तस्तनूभ्यकांतानवाप्नुयाल्लाभात् धर्मध्वजप्रवृत्तोदैवतपूजस्य करयनिभार्यांविग्रहशीलांलभतेविविधान्रोगान्कफोद्भवानुरसि म्रियतेचजठररोगाद्वमनात्स्त्रीणांप्रयोगाद्वा द्वादशगेप्राग्लग्ने स्थूलोष्ठोमीनदृङ्महानासः कफवातिकोमहात्मालग्नदोषीनैकमतिचेष्टः शिष्टायव्ययकृत्स्वैः स्वजनस्त्रीपूजितः सहजनाथः कर्मणिधर्मयुक्तः पित्रोपचयः सुदारश्च नीचाचाराभार्यांलभतेचारिपून्सकदारुणान्क्रूरान् रोगात्सशोणितोदाप्नुयाद्भूयव्यालसिंहेभ्यः मृत्युपुरुषैर्गणवृंदपूजितेगुह्यजैर्विकारैर्वाविद्योषधप्रयोगादुपवासान्मार्गदोषाद्वा एवंशिशिरकरसमागमसंदृशेलग्नजातफलं तथाचशिशिरकराश्रितरीक्षणदृष्टिफलंवक्ष्यमाणंतथानदवलग्नजातस्यापिवक्तव्यम् चंद्रेभूपबुधावित्यादि किंतुलग्नेफलमपिकिमिद यदत्रभावइति चंद्रराशेनइदमत्रलग्नादिषुभावेष्वाधिकफलंयद्भावास्तन्वाद्यः भवनगुणैः राशिगुणैर्भवननाथगुणैस्तत्स्वामिगुणैर्विचिंतनीयाः विचार्याः भवनभनाथयोर्गुणः सबलत्वं एतदुक्तंभवति लग्नेबलवतिलग्नपतौचबलवतिजातस्यशरीरपुष्टिर्वक्तव्या लग्नाद्द्वितीयराशौबलवतितदधिपतौचबलवतिजातस्यधनसमृद्धिर्वक्तव्या एवंशेषराशिबलेतदधिपबलेचजातस्यभ्रात्रादीनांवृद्धिर्वक्तव्या तथापिकिंचिद्विशेषः कथयन्तिविपरीतारिफषष्ठाष्टपेषु इत्यादि एवंतन्वादिस्थेषुराशिष्वबलवत्सुतदधिपेस्वबलवत्सुचभावहानिर्वक्तव्या भवनभनाथयोः यद्येकोबलवान्भवतितदामध्यस्याभावस्यवृद्धिर्वास्योनि तथाचयवनेश्वरः भावेशभावबलशिभस्त्वभावप्रधानमध्याधमदर्शनाद्यैः नद्भावसंपत्तिविपत्सुपायैर्नैर्याणिकपाकमुपैतिपुंसां २० इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौराशिशीलाऽध्यायोऽष्टादशः १८ ७

अथातोदृष्टिफलाऽध्यायोव्याख्यायते तत्रमेषवृषमिथुनकर्कटस्थेचंद्रेभौमाद्यैर्ग्रहैः दृश्यमानेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह चंद्रेभूपबुधावितिकुजाद्याभौमादयः भौमबुधबृहस्पतिशनैश्चरार्काः तत्राजगेमेषस्थेचंद्रमसिभौमदृष्टेजातोभूपोराजाभवति बुधदृष्टेबुधः पंडितः जीवदृष्टेनृपोपमः राजतुल्यः शुक्रदृष्टेगुणीगुणवान्भवति केचिद्गुणीगितिपठंति शनैश्चरदृष्टेस्तेनचोरः सूर्यदृष्टेधनः दरिद्रइति एवमपिमेषलग्नेभौमादिदृष्टेफलंवाच्यम् गविस्थेति गवि वृषस्थेचंद्रमसिभौमदृष्टेजातोनिःस्वःदरिद्रभवति बुधदृष्टेस्तेनः चोरः जीवदृष्टेनृमान्यः नृणांमान्यः पूज्यः केचि

अथदृष्टिफलाध्यायः चंद्रेभूपबुधौनृपोपमगुणीस्तेनोधनेश्वाजगेनिःस्वस्ते
ननृमान्यनृपधनीनृःप्रेष्यःकुजाद्यैर्गवि नृस्थयोव्यवहारिपार्थिवबुधाभीस्ते
तुवायाधनीस्वर्क्षेयोद्धकविज्ञभूमिपतयोऽयोजीविदृग्रोगिणः १ ६९

न्नृपाढ्यइतिपठंति नृपाढ्यः नृपोराजासचाढ्यः ईश्वरः शुक्रदृष्टे भूपः राजासौरदृष्टेधुर्नी धनवान्सूर्यदृष्टेप्रेष्यः दासः एवंवृषलग्नेपिनृस्थेमिथुनस्थेचंद्रमसिभौमदृष्टेऽयोव्यवहारी शास्त्रविक्रयकः बुधदृष्टेपार्थिवः राजाजीवदृष्टेबुधः पंडितः शुक्रदृष्टेऽभीःनिर्भयः धीरः भयरहितः सौरदृष्टेतंतुवायः रविदृष्टेऽधनः दरिद्रः एवंमिथुनलग्नेपिस्वर्क्षेकर्कटस्थेचंद्रमसिभौमदृष्टेयोद्धाभवति युद्धकुशलः बुधदृष्टेकविः काव्यकर्ताजीवदृष्टेज्ञः पंडितः शुक्रदृष्टेभूमिपतीराजा सौरदृष्टेऽयोजीवीआयुधजीवी शास्त्रोपजीवी सूर्यदृष्टेदृग्रोगी चक्षुर्व्याध्यर्दितः एवंकर्कटलग्नेपि १ ६९

अथसिंहकन्यातुलावृश्चिकस्थेचंद्रेबुधादिदृष्टेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह ज्योतिरिति बुधगुरुशुक्रशनिसूर्यभौमाः हरिः सिंहस्तस्मिन्हरौ सिंहस्थेचंद्रेबुधदृष्टेज्योतिर्ज्ञः ज्योतिःशास्त्रार्थवेत्ता जीवदृष्टेआढ्यः ईश्वरः शुक्रदृष्टे नरेंद्रः राजा सौरदृष्टे नापितः रविदृष्टेनृपः राजा भौमदृष्टेक्ष्मेशः भूपतिः एवंसिंहलग्नेपि तद्वदित्यादि तद्वद्बुधादिभिर्दृष्टे इत्यनुवर्तते सर्वत्र षष्ठेकन्यागतेचंद्रेबुधदृष्टेभूपः राजा जीवदृष्टेच भूपतिः सेनापतिः शुक्रदृष्टे नैपुण्ययुतः सर्वकार्येषुसूक्ष्मदृष्टिः अशुभैः सौररविभौमदृष्टेस्त्र्याश्रयाभवंति स्त्रियमाश्रित्यजीवंतीत्यर्थः एवंकन्यालग्नेपि जूके तुलास्थेचंद्रमसिबुधदृष्टे भूपोराजा भवति जीवदृष्टेसुवर्णकारः शुक्रदृष्टेवणिजः क्रयविक्रयज्ञः शेषाः सौरसूर्यभौमाः एतैः दृष्टे नैकृतीनिकृतः प्राणिघातकः एवंतुललग्नेपि कीटेवृश्चिकस्थेचंद्रमसिबुधदृष्टे युग्मपिता युग्मस्यजनकः द्वयोः पिताजातोभवति जातएवयुग्मपिता द्विपितृक इतिकेचित्पठंति जीवदृष्टेनतः नम्रः शुक्रदृष्टेरजकः वस्त्ररागकृत् सौरदृष्टेव्यंगोंगहीनः सूर्यदृष्टेऽधनः दरिद्रः भौमदृष्टेभूपतिः राजा एवमेतैरेवदृष्टेवृश्चिकेपि २ अथधन्विमकरकुंभमीनस्थेचंद्रमसिबुधादिदृष्टेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह ज्ञात्युर्वीशेति तुरंगोधन्वितत्रस्थेचंद्रेबुधदृष्टेज्ञातीशः स्वजनभर्ता जीवदृष्टेउर्वीशोराजा शुक्रदृष्टेजनाश्रयः जनानामाश्रयस्थानं पापैः शनिरविभौमैः दृष्टेसदंभः दांभिकः मिथ्याधर्मध्वजी शठः परकार्यविमुखश्चभवति एवंधन्विलग्नेपि मृगोमकरस्तत्रस्थेचंद्रेबुधदृष्टेऽत्युर्वीशोराजाधिराजोभवति जीवदृष्टेनरेंद्रोराजा शुक्रदृष्टेप

ज्योतिर्ज्ञाढ्यनरेंद्रनापितनृपक्ष्मेशाबुधाद्यैर्हरौ तद्वद्भूपचमूपनैपुण्ययुताः षष्ठेशुभैस्त्र्याश्रयः जूके
भूपसुवर्णकारवणिजः शेषेक्षिते नैकृतिः कीटेयुग्मपिता नतश्चरजको व्यंगोधनो भूपतिः २ ७

डितः शनिदृष्टे धनी वित्तवान् सूर्यदृष्टे द्रव्योनः दरिद्रः भौमदृष्टे भूपो राजा एवं मकरलग्नेपि कुंभस्थे चंद्रमसि बुधदृष्टे भूपः राजा भवति जीवदृष्टे भूपसमः राजतुल्यः शुक्रदृष्टेऽन्यदारनिरतः परस्त्रीसक्तः चशब्दाच्छेषैः शनिसूर्यभौमैस्त्रिभिरप्यन्यदारनिरत एव एवं कुंभलग्नेपि झषगे मीनस्थे चंद्रमसि बुधदृष्टे हास्यज्ञः उपहासं कर्तुं जानाति जीवदृष्टे नृपतिः राजा शुक्रदृष्टे बुधः पंडितः पापाः शनिसूर्यभौमाः एतैर्दृष्टे च पाप एव भवति एवं मीनलग्नेऽपि लग्नदृष्टिफलं चंद्रदृष्टिफलातिदेशेनोक्तं शिशिरकरसमागमेक्षणानां सदृशफलं प्रवदंति लग्नजातमिति तत्र चंद्रमसादृष्टे लग्ने फलं नोक्तं तस्मात्तत्रोच्यते उक्तमेव यस्मादुक्तं होरास्वामीगुरुज्ञवीक्षितयुतानान्यैश्च वीर्योत्कटाः तत्र कर्कटवर्ज्यमन्यो लग्नः चंद्र

ज्ञायुर्वीशजनाश्रयश्चतुरगे पापैः सदंभः शठः स्यात्युर्वीशनरेंद्रपंडितधनी द्रव्योनभूपो मृगे भूपो
भूपसमोन्यदारनिरतः शेषैश्च कुंभस्थिते हास्यज्ञो नृपतिर्बुधश्च झषगे पापश्च पापेक्षिते ३ ५

दृष्टो हीनबलो भवति हीनबलत्वादशोभनफलः उक्तं च मुक्त्वा तु चंद्रभवनं लग्नगतं शिशिरकिरणसंदृष्टं अशुभफलं निर्दिष्टं पृच्छायां जन्मसमये वा ३ अथ होराद्रेष्काणव्यवस्थितस्य चंद्रस्य ग्रहदृष्टिफलं शार्दूलविक्रीडितेनाह होरेशेति होराशब्देन राशयर्द्धमुच्यते होरेति लग्नं भवनस्य चार्धमिति वचनात् होराया ईशो होरेशः तस्यर्क्षदलं होरेशर्क्षदलं तत्राश्रिता होरेशर्क्षदलाश्रिताः तैर्ग्रहैः होरेशर्क्षदलाश्रितैः शशी चंद्रः तद्गतस्तद्धोरास्थो दृष्टः शुभकरो भवति एतदुक्तं भवति यस्य तस्य राशौ यस्यां होरायां चंद्रमाः स्थितः तद्धोरास्थैः सर्वग्रहैः यदि दृश्यते तदा जन्मनि शुभकरो भवति तेनार्कहोरास्थश्चंद्रो यत्र तत्र राश्याश्रितैरर्कहोराश्रितैर्ग्रहैः दृष्टश्च शुभकरो भवति अर्थादेव चंद्रहोरास्थैर्दृष्टो शुभकरः एवय

त्रतत्रराशौस्वहोरास्थचंद्रहोरास्थैर्ग्रहैर्यत्रतत्रावस्थैर्दृष्टः शुभकरोभवति अर्थाद्देवार्कहोरास्थैर्दृष्टोऽशुभकरः एवंलग्नेपिहोरेशनफलंयोज्यंत्र्यंशतत्पतिभिरिति यत्रतत्रराशौयस्मिन्द्रेष्काणेस्थिरश्चंद्रस्तस्ययः पतितेनद्रेष्काणपतिनादृष्टश्चंद्रः शस्यतेस्तूयते शुभकर इत्यर्थः पतिभिरिति बहुवचननिर्देशात्नवांशद्वादशांशत्रिंशांशकाधिपतयोगृह्यंते तैरपिदृष्टःचंद्रः शुभकरोभवति एवंलग्नेपि यद्यपिसामान्येनोक्तं तथापि शुभग्रहद्रेष्काणपतिभिर्दृष्टः शस्यते पापग्रहैर्मध्यमः यस्माद्नेनैवस्वल्पजातकेऽउक्तं क्षेत्राधिपसंदृष्टे शशिनिनृपस्तत्सुहृद्भिरपि धनवान्द्रेष्काणांशकपैर्वाप्रायः सौम्यः शुभनान्यैरिति सुहृद्भवनगैः मित्रक्षेत्रस्थैः ग्रहैः वीक्षितः दृष्टःचंद्रः शस्यतेस्तूयते शुभकरएव अर्थादिवस्तभ-

होरेशर्क्षदलाश्रितैः शुभकरोदृष्टःशशीतद्वतस्त्र्यंशेतत्पतिभिःसुहृद्भवनगैर्वावीक्षितःशस्यते
यत्प्रोक्तप्रतिराशिवीक्षणफलतद्वादशांशेस्मृतसूर्याद्यैरवलोकितेपिशशिनिज्ञेयनवांशेष्वतः ४

वनगतैर्दृष्टः शस्यते अर्थाद्देवारिभवनगतैः दृष्टः नशस्यते अशुभफलोभवति एवंलग्नेपियोज्यम् यत्प्रोक्तंप्रतिराशिवीक्षणफलं तद्द्वादशांशेस्मृतमिति प्रतिराशिराशौ राशौमेषादिस्थेचंद्रमसियद्वीक्षणफलंप्रोक्तम् कथिततदेवमेषादिद्वादशांशकस्थेचंद्रमसिस्मृतमुक्तं तदेववाच्यमिति चंद्रेभूपबुधावित्यादियदुक्तं एवंलग्नेपि तत्रापिकर्कटद्वादशांशंविनाचंद्रदृष्टिरशोभनात्सूर्याद्यैरित्यादि अतोऽस्मात्परशशिनिचंद्रेसूर्याद्यैरर्कादिभिरवलोकितदृष्टेनवांशेषुफलंज्ञेयम्ज्ञातव्यमिति ५ ५ ५ ५ ५

अथमेषवृश्चिकवृषतुलांशकस्थेचंद्रमसिसूर्यादिदृष्टेफलंवसंततिलकेनाह आरक्षिकइति क्षितिजोभौमः तन्नवांशकस्थे मेषनवांशकस्थे वृश्चिकनवांशकस्थे चंद्रमसिसूर्यादृष्टे आरक्षिको भवति आरक्षिकः नगररक्षाधिकृतः भौमदृष्टेवधरुचिः प्राणिघातकः बुधदृष्टेनियुद्धे कुशलः नियुद्धेबाहुयुद्धेकुशलः शिक्षितः प्रवीणःजीवदृष्टे भूपः राजा शुक्रदृष्टेर्थवानीश्वरः सौरदृष्टेकलहकृदिति मूर्खइत्यादि सितांशेशुक्रनवांशके वृषनवांशकेतुलनवांशकेवास्थितेचंद्रमसि रविदृष्टे मूर्खोभवति भौमदृष्टेन्यदारनिरतः परदारसक्तः बुधदृष्टेकाव्यकृत् काव्यज्ञः केचिदाद्यवदिति पठंति जीवदृष्टेसत्काव्यकृत् शोभनकाव्यकर्ता शुक्रदृष्टेसुखपरः सुखासक्तः सौरदृष्टेपरदारगः परकलत्राभिगामी ५ अथमिथुनकन्याकर्कटनवा·

आरक्षिकोवधरुचिः कुशलोनियुद्धे भूपोर्थवान्कलहकृत्क्षितिजांशसंस्थे मूर्खोन्यदारनिरतः सुकविः सि
तांशेसत्काव्यकृत्सुखपरोन्यकलत्रगश्च ५ बोधेहिरंगचरचोरकवींद्रमंत्रीगेयज्ञशिल्पनिपुणाः शशिनि·
स्थितेंशे स्वांशेल्पगात्रधनलुब्धतपस्विमुख्यः स्त्रीपोष्यकृत्यनिरतश्चनिरीक्ष्यमाणे ६ ७

शकस्थेचंद्रेकार्दिदृष्टे फलंवसंततिलकेनाह बोधेहीति शशिनिचंद्रे बोधेबुधनवांशकस्थेमिथुननवांशकस्थेकन्यानवांशकस्थेवाकर्णानिरीक्ष्यमाणेदृष्टेरंगचरः मल्लादिको भवति भौमदृष्टेचोरः तस्करः बुधदृष्टे कवींद्रः कविराजः जीवदृष्टेमंत्रीसचिवः शुक्रदृष्टेगेयज्ञः सौरदृष्टेशिल्पनिपुणः स्वांशेति स्वांशेआत्मीयनवांशकस्थे कर्कटनवांशस्थेशशिनिचंद्रेसूर्यदृष्टेऽल्पगात्रः कृशदेहोभवति भौमदृष्टेधनलुब्धः कृपणः अल्पधनोवा बुधदृष्टेतपस्वी जीवदृष्टेमुख्यः प्रधानः सितदृष्टेस्त्रीपोष्यः स्त्रीभिरभिवर्धनीयः सौरदृष्टेकृत्यनिरतः कार्यासक्तः ६ ७

अथसिंहधान्विमीननवांशकस्थेचंद्रेसूर्यादिदृष्टेफलंप्रहर्षिण्याह सक्रोधइति सिंहांशकस्थेचंद्रमस्यर्कदृष्टेसक्रोधः क्रोधयुक्तोभवति भौमदृष्टेनरपतिसंमतः राजवल्लभः बुधदृष्टेनधीशः निधिनाप्राप्तार्थः गुरुदृष्टेप्रभुरप्रतिहताज्ञः शुक्रदृष्टेऽसुतः पुत्ररहितः सौरदृष्टेतिहिंस्रकर्माक्रूरकर्मणिरतः जीवांशइत्यादि जीवांशेबार्हस्पत्येनवांशकधन्व्यंशकेमीनांशकगतेवास्थितेचंद्रमसिसूर्यदृष्टेप्रथितबलः प्रख्यातवीर्योभवति भौमदृष्टेरणोपदेष्टा संग्रामदेशकालव्यूहरचनाभिज्ञः बुधदृष्टेहास्यज्ञः उपहासवेत्ता जीवदृष्टेसचिवः मंत्री शुक्रदृष्टेविकामः कामहीनः पुंस्त्वहीनः सौरदृष्टे वृद्धशीलः धर्ममतिरिति ७ अथमकरनवांशकस्थेकुंभनवांशकस्थेवाचंद्रेसूर्यादिदृष्टेजातस्यफलंशालिन्याह अल्पापत्यइति आर्किः अर्कस्यापत्यमार्किः

सक्रोधोनरपतिसंमतोनिधीशः सिंहांशेप्रभुरसुतोतिहिंस्रकर्मा जीवां
शेप्रथितबलोरणोपदेष्टाहास्यज्ञःसचिवविकामवृद्धशीलः ७ ७

तस्यभागेशनैश्चरनवांशकेमकरनवांशकस्थेकुंभनवांशकस्थेवाचंद्रेसूर्यदृष्टेऽल्पापत्यो ऽल्पप्रसवोभवति भौमदृष्टेसत्यपिस्वेदुःखितः सत्यपिविद्यमानेपिस्वधनेदुःखितोभवति बुधदृष्टेमानासक्तः गर्वितः जीवदृष्टेस्वेआत्मीयेकर्मण्यनुरक्तः कुलानुरूपकर्मकृत् शुक्रदृष्टेदुष्टस्त्रीष्विष्टःवल्लभः सौरदृष्टेकृपणः अदाता एवंतत्कालनवांशकवशात् ग्रहदृष्ट्यालग्नेपिवक्तव्यम् किंतुतत्रापि कर्कटनवांशकंविनाचंद्रदृष्टिरफलेति भानौतद्वदिंद्वादिदृष्टे भानावादित्येंद्वादिदृष्टेचंद्राद्यैर्ग्रहैरवलोकितेतद्वत्तेनैवप्रकारेणदृष्टिफलंयत्रतत्रराशौ यत्रतत्रनवांशकस्थेचंद्रमस्यर्कादिदृष्टेयत्फलमुक्तंतद्वत् यत्रतत्रराशौ यत्रतत्रनवांशकेव्यवस्थितेर्केचंद्रदृष्टे तदेवफलंवाच्यम् एतदुक्तंभवति

नवांशकव्यवस्थितस्यादित्यस्य चंद्रस्य च ताराग्रहदृष्टिफलं तुल्यं किंतु यदादित्यदृष्ट्या चंद्रस्योक्तं तच्चंद्रदृष्ट्या सूर्यस्य वक्तव्यं तद्यथा मेषवृश्चिकनवांशकस्थे चंद्रे दृष्टे आरक्षिको भवति वृषतुलानवांशकस्थे मूर्खः मिथुनकन्यानवांशकस्थे रंगचरः सिंहनवांशकस्थे सक्रोधः धन्विमीननवांशकस्थे प्रथितबलः मकरकुंभनवांशकस्थे अल्पापत्यः कर्कटनवांशकस्थे स्वगात्रः एवमादित्यनवांशकावस्थितस्य ग्रहदृष्ट्या चंद्रेण फलं समानमिति ८ अथास्यैव नवांशकदृष्टिफलस्य विशेषं वसंततिलकेनाह वर्गोत्तमेति नवांशकव्यवस्थिते चंद्रे नवांशकदृष्टिफलं द्विःप्रकारमुक्तं शुभमशुभं च यथा आरक्षिक इति शुभं वधरुचिरित्यशुभं च तत्र वर्गोत्तमांशकगते चंद्रे यत् ग्रहदृष्टिजफलं शुभमुक्तम् तत्पुष्टमतीव शुभम्

अल्पापत्यो दुःखितः सत्यपि स्वे मानासक्तः कर्मणि स्वोनुरक्तः दुष्टस्त्रीष्टः कृपणश्चार्किभागे चंद्रे भानौ
तद्वद्दिष्टाद्विदृष्टे ८ वर्गोत्तमस्वपरगेषु शुभं यदुक्तं तत्पुष्टमध्यलघुताशुभमुत्क्रमेण वीर्यान्वितांशकपतिर्नि-
रुणद्धि पूर्वं राशीक्षणस्य फलमंशफलं ददाति ९ इति बृहज्जातकविवृत्तौ दृष्टिफलाध्यायः १९ ॥

वति स्वांशकस्थे तु यच्छुभमुक्तं तन्मध्यमं परनवांशकव्यवस्थिते यच्छुभं तल्लघु स्तोकं विज्ञेयं एवं शुभफलस्य पुष्टता मध्यता लघुता च अशुभमुत्क्रमेण अशुभमनिष्टं यत्फलं तदुत्क्रमेण विपरीतं ज्ञेयम् परनवांशकस्थस्य चंद्रस्य यदशुभं दर्शनफलमुक्तं तदतीवाशुभं भवति स्वनवांशकस्थस्य मध्यमं वर्गोत्तमांशकस्थस्य लघुता एवं लग्नादित्ययोरपि दृष्टिफलं योज्यं जातके सर्वाण्येव फलानि भवंतीति प्राप्तं यस्माद्यवनेश्वरः अन्योन्यराश्यंशकसंप्रयोगैरन्योन्यसंदर्शनसंगमैश्च अन्योन्यसंयोगविकल्पनाभिरिदं समुद्राम्बुवदप्रमेयमिति अतः सदैव राशिदृष्टिनवांशकदृष्टिफलयो

रपिसदैवपंक्तिंप्राप्नोति तत्रनवांशकपतौबलवतिराशिदर्शनफलबाधनार्थमाह वीर्यान्वितइति यस्मिन्नवांशकेव्यवस्थितश्चंद्रो लग्नंवाभवति
तस्यनवांशकस्ययोधिपतिः सचेद्वीर्यान्वितो बलवान्भवति तदानिरुणद्धि पूर्वंप्रथमंनिवारयति किंसर्वमेव नहिराशीक्षणस्यफलंनहोराद्रेष्का
णद्वादशभागेक्षणस्यतत्हित्वांशेक्षणफलमेवददाति अथांशकेपतिर्बलवान्नभवति तदाराशीक्षणांशकेक्षणफलेउभे अपिवाच्ये एवंचंद्रलग्नयो
रुभयोरपि आदित्यस्यतुनवांशकेक्षणफलमेववक्तव्यम् यस्मात्तस्यराशीक्षणफलमिहनोक्तमिति ९ इतिदृष्टिफलाध्यायएकोनविंशतिः
१९ अथातोभावाध्यायोव्याख्यायते तत्रादित्यस्यलग्नगतस्याद्वितीयस्थस्यचफलमंदाक्रांतयाह शूरइतिशूरः संग्रामप्रियः स्तब्धःचिरका

अथभावाध्यायप्रारंभः शूरस्तब्धोविकलनयनोनिर्घृणोर्केतनुस्थे मेषेसस्वस्तिमिरनयनःसिंहसं-
स्थेनिशांधः नीचेंऽधोऽस्वःशशिगृहगतेबुद्बुदाक्षःपतंगेभूरिद्रव्योनृपहृतधनोवक्त्ररोगीद्वितीये १

र्यकृत् विकलनयनः हीनदृष्टिः निर्घृणः निर्दयः एवंविधोऽर्केरवौतनुस्थे लग्नस्थेजातोभवति एतत्तावत्सर्वलग्नेषुसामान्यफलंभवति अथ
मेषसिंहतुलाकर्कटानामन्यतमेलग्नगतेर्केतदापूर्वोक्तंफलंनभवति वक्ष्यमाणंचोक्तराशीनांप्रतिराशिफलंभवति मेषसस्वइति मेषलग्नेत-
त्रस्थेचार्केसस्वःसार्थःतिमिरनयनःचक्षूरोगीभवति तिमिरश्चक्षूरोगीतिप्रसिद्धः सिंहलग्नेतत्रस्थेचार्केनिशांधःरात्र्यंधोभवति आदित्यस्य-
नीचःतुलातस्मिंल्लग्नगतेतत्रस्थेचार्केसूर्येंधः नेत्रहीनोऽस्वःदरिद्रश्चभवति शशिगृहेकर्कटलग्नेतत्रस्थेपतंगेचार्केबुद्बुदेक्षणःपुष्पिताक्षोभवति
भूरिद्रव्यइति लग्नाद्वितीयेर्केभूरिद्रव्यःप्रभूतार्थः नृपहृतधनः राजाहृतस्वोवक्त्ररोगीमुखपीडार्तश्चभवति १ ७ ७

अथलग्नात् द्वितीयतृतीयचतुर्थपंचषष्ठस्थानस्थार्कफलमौपच्छंदसिकेनाह मतीति मतिः बुद्धिः विक्रमः पराक्रमः एतौ विद्येते यस्य तथाविधस्तृतीयगेऽर्के स्वो भवति विसुखो दुःखितः पीडितमानसः नित्योद्विग्नचित्तः एवंविधश्चतुर्थगेऽर्के जातो भवति असुतः विपुत्रः धनवर्जितो दरिद्रः एवंविधः त्रिकोणे पंचमस्थे रवौ जातो भवति बलवान् बलयुतः शत्रुजितश्च शत्रुभिररिभिः जितः एवंविधः शत्रुयाते षष्ठस्थानस्थेऽर्के जातो भवति केचिद्बलवान् नष्टरिपुश्च शत्रुयात इति पठंति तथाचसत्यः षष्ठेरिपुरोगशोकघ्नः आचार्येणात्रयवनेश्वरमतमंगीकृतं यतः षष्ठस्थानस्थितानां पापानां यवनेश्वराणां निष्फलमभिहितं तथाचशक्तिध्वजः षष्ठास्थितोऽर्कोविषशस्त्रदाहक्षुद्रोगशत्रुव्यसनोपततं काष्ठाश्मपातोचविशीर्णदे

मतिविक्रमवांस्तृतीयगेऽर्केविसुखः पीडितमानसश्चतुर्थे । असुतोधनवर्जितस्त्रिकोणे
बलवांछत्रुजितश्चशत्रुयाते २ स्त्रीभिर्गतः परिभवंमदगेपतंगेस्वल्पात्मजोनिधनगेविकले
क्षणश्च धर्मेसुतार्थसुखभाक्सुतशौर्यभाक्खेलाभेप्रभूतधनवान्पतितस्तुरिःफे ३

तान्यूनेटवीदंष्ट्रीयनखीक्षतश्च कुजोगतस्तत्रपरिक्षतांगंह्यव्याधितंधिकृतिकर्शिकंचसौरः शिरोऽश्माशनिपातवातद्विमुष्टिघातोपहतंचकुर्यात् अनेनैव निर्देशं पापानामाचार्यः करिष्यत्यर्कवत् २ अथलग्नात्सप्तमाष्टनवमदशमैकादशद्वादशस्थेऽर्केजातस्यस्वरूपंवसंततिलकेनाह स्त्रीभिर्गत इति पतंगेआदित्येमदनेसप्तमस्थानस्थेजातः स्त्रीभिः योषिद्भिः परिभवगतः प्राप्तोभवति केचिन्महतेपतंगइतिपठंति निधनगेऽष्टमस्थेपतंगेसूर्येस्वल्पात्मजः अल्पापत्यः विकलेक्षणश्चविकले अक्षीणि यस्य अदृढचक्षुर्भवति हीनदृष्टिर्भवतीत्यर्थः धर्मेनवमस्थेसुतार्थसुखभाक्सु

ताः पुत्राः अर्थोधनंसुखंसुखभावः एषांभागीभवति केचिद्धर्मेसुतार्थरहित इतिपठंति तथाचसत्त्वःसाध्वाचाराविरोधीरुजःमदोदैत्यकृत्अवम
मस्थःस्वदेशमेसुखसौर्यभाक्सुखितोबलीचभवति लाभएकादशेप्रभूतधनवान् बहुवित्तोभवति रिफेद्वादशेपतितः स्वकर्मपरिभ्रष्टोभवति इत्यादिस्त्वा
रः ३ अथचंद्रेलग्नाद्द्वितीयतृतीयचतुर्थपंचमषष्ठस्थेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह मूकइतिमूकोवाग्घीनःउन्मत्तः धातुवैषम्याद्दयष्टकारीजडः
अप्रतिपन्नः अंधः नेत्रहीनःहीनःअशुचितकर्मकृत् बधिरःश्रोत्रेंद्रियहीनः प्रेष्योदासः एषामन्यतमोजातः शशांकोदयेशशांकेचंद्रेउदयगेलग्नस्थे-
जातोभवति एतन्मेषवृषकर्कटवर्ज्यंतेषांविशेषमाह स्वर्क्षाजोच्चगइति स्वर्क्षः कर्कटकः तस्मिंल्लग्नेतस्थेचंद्रमसिधनीवित्तवान् भवति अजोमेष

मूकोन्मत्तजडांधहीनबधिरप्रेष्याःशशांकोदयेस्वर्क्षाजोच्चगतेधनीबहुसुतःसस्वःकुटुंबीधने हिं
स्रोभ्रातृगतेसुखेसतनयेतत्प्रोक्तभावान्वितानैकारिर्मृदुकायवन्हिमदनस्तीक्ष्णोलसःषष्ठारिगे ४

लग्नेतस्थेचंद्रमसिबहुसुतः प्रभूतपुत्रोभवति चंद्रस्योच्चोवृषः तस्मिंल्लग्नेचंद्रेसस्वः अर्थवान्भवति धनेलग्नात्द्वितीयेचंद्रेकुटुंबीबहुकुटुंबो
भवति भ्रातृगतेतृतीयस्थानेस्थेहिंस्रः क्रूरोभवति प्राणिवधकोवासुखेचतुर्थेसतनयेतनयेनपंचमस्थानेनयुक्तेतत्प्रोक्तभावान्वितस्तेनप्रोक्तेनक
थितेनभावेनान्वितोयुक्तोभवति तेनसुखेसुखितस्तनयेपुत्रान्वित इतिनैकारिरित्यनेकारिःबहुतरशत्रुःमृदुकायःसुकुमारशरीरःमृदुवन्हिःनातिप्रदी
प्ताग्निःमृदुमदनः मैथुनशीघ्रगःतीक्ष्णउग्रस्वभावःअलसःक्रियास्वपटुः एवंविधोरिगेलग्नात् षष्ठस्थेचंद्रेजातोभवति ४ ७ ६

अथ लग्नात्सप्तमाष्टमनवमदशमैकादशस्थे चंद्रे जातस्य स्वरूपं शार्दूलविक्रीडितेनाह ईर्ष्युरिति ईर्ष्युः परद्विण्मत्सरी तीव्रमदः अतिमदनः एवंविधो मदे सप्तमस्थे चंद्रे जातो भवति बहुमतिः बहुप्रज्ञः चपलबुद्धिरित्यर्थः व्याध्यर्दितः रोगपीडितः एवंविधोऽष्टमस्थे चंद्रे जातो भवति सौभाग्यं सर्वजनवाल्लभ्यं आत्मजाः पुत्राः मित्राणि सुहृदः बांधवाः स्वजनाः धनं वित्तं एषां भागी भवति शीतगौ चंद्रे धर्मस्थे नवमस्थानाश्रिते जातो भवति निष्पत्तिः निष्पादनं सर्वकर्म समुपैति गच्छति धर्मधनधीशौर्यैर्युक्तः धर्मेण धनेन वित्तेन धिया बुद्ध्या शौर्येण बलेन युतः एवंविधः कर्मगे दशमस्थानस्थे चंद्रे जातो भवति ख्यात इति ख्यातः सर्वत्र प्रसिद्धः भावगुणान्वितः भावो एकादशो लाभस्थानं तेनान्वितः सलाभ इत्यर्थः एवंविधो भवगते एकादशस्थे चंद्रे जातो

ईर्ष्युस्तीव्रमदो मदे बहुमतिर्व्याध्यर्दितस्त्वाष्टमे सौभाग्यात्मजमित्रबंधुधनभाग्धर्मस्थिते शीतगौ नि
ष्पत्तिं समुपैति धर्मधनधीशौर्यैर्युतः कर्मगे ख्यातो भावगुणान्वितो भवगते क्षुद्रोंगहीनो व्यये ५

भवति क्षुद्रो हिंस्रः स्वाभावः अंगहीनः अवयवरहितः एवंविधो व्यये द्वादशस्थे चंद्रे जातो भवति इति चंद्रचारः ५ अथ लग्नादिस्थयोर्भौमबुधयोर्जातस्य स्वरूपं वसंततिलकेनाह लग्न इति लग्नस्थे कुजे प्रहारादिना क्षततनुः विक्षिप्तशरीरः धनगो द्वितीयस्थे कदन्नः कुत्सितान्नाशी भवति धर्मे नवमे धवान् पापरतो भवति अन्यसंस्थो दिनकरप्रतिमः अन्येषु परिशिष्टस्थानेषु स्थितो दिनकरप्रतिमोऽर्कतुल्यफलः तृतीयचतुर्थपंचमषष्ठसप्तमाष्टमदशमैकादशद्वादशेषु यान्येवादित्यस्य फलान्यभिहितानि तान्येव भौमस्यापि वाच्यानि तद्यथा तृतीये मतिविक्रमवान् चतुर्थे विकलः पीडितमानसः पंचमे सुतधनवर्जितः षष्ठे बलवान् शत्रुजितः सप्तमे स्त्रीभिः परिभवं गतः अष्टमे स्वल्पात्मजः नवमे विकलेक्षणः दशमे सुखशौर्यवान् एकादशे प्रभूतधनवान् द्वादशे प

तिनः इति भौमचारः अथबुधचारः विद्वान्धनीत्यादि ज्ञेबुधेलग्नगते विद्वान्पंडितोभवति द्वितीयेधनवान् तृतीयेप्रखलः प्रकर्षेणखलोदुर्जनः चतुर्थेपंडितः पंचमेमंत्री षष्ठेशत्रुः विगतरिपुः सप्तमेधर्मज्ञः अष्टमेविश्रुतगुणः प्रख्यातगुणः परतोनंतरान्यस्थाने ऽर्कवत् सूर्यवत् नवमदशमैकादशद्वादशेषुयान्यर्कस्यफलान्यभिहितानितान्येवबुधस्यवाच्यानि तद्यथानवमेस्कृतार्थस्सुखभाक् दशमेसुखशौर्यभाक् एकादशेप्रभूतधनवान् द्वादशेपतीतइति इतिबुधचारः ६ अथलग्नादिस्थस्यजीवस्यफलमिंद्रवज्रयाह विद्वानिति जीवेगुरौविलग्नात्प्रभृतिस्थितेषु द्वादशेषुस्थानेषुक्रमशः परिपाट्यैतानिफलानि तद्यथा लग्नस्थेगुरौविद्वान्पंडितोभवति द्वितीयेसुवाक्यः शोभनवचः तृतीयेकृपणः अदाता चतुर्थेसुखी पंचमेधीमान् बुद्धिमान् षष्ठेऽशत्रुः विगतरिपुः सप्तमेपितृतोधिकः पितुःसकाशाद्गुणाधिकः अष्टमेनीचःस्वकुलानुचितकर्मकृत् नवमेतपस्वी विद्यमानतपः दशमेसधनः सवित्तः एकादशेसलाभः लाभयुक्तः द्वादशेखलः क्रूरचेष्टः इतिबृहस्पतिविचारः ७ अथलग्नादिस्थस्यशुक्रस्यफलंचित्रतयाह स्मरनिपुणइति स्मरनिपुणः कामकुशलः सुखितः संजातसुखः एवंविधोविलग्नस्थेभृगुपुत्रेशुक्रेजातोभवति प्रियकलहः कलहवल्लभः सुरतेप्सुः सुरताभिलाषी एवंविधोद्युगते सप्तमस्थेशुक्रेजातोभवति तनयगतेपंचमस्थेशुक्रेसुखितोभवति गुरुवदनो-

लग्नेकुजेक्षततनुर्धनगेकदन्नोधर्मेघवान्दिनकरप्रतिमोन्यसंस्थः विद्वान्धनीप्रखलपंडितमंत्र्यश
त्रुर्धर्मज्ञविश्रुतगुणः परतोर्कवज्ज्ञे ६ विद्वान्सुवाक्यः कृपणः सुखीचधीमानशत्रुः पितृतोधि
कश्च नीचस्तपस्वीसधनः सलाभः खलश्चजीवेक्रमशोविलग्नात् ७ ५ ६

न्यग्रहे यतोस्मात्स्थानत्रयादन्यस्मिन्गृहे स्थाने गुरुवत् जीववत्फलानि वक्तव्यानि द्वितीयतृतीयचतुर्थषष्ठाष्टमनवमदशमैकादशद्वादशेषु यान्येव गुरोः बृहस्पतेः फलान्यभिहितानि तान्येव शुक्रस्य वक्तव्यानि तद्यथा द्वितीयेषु वाक्यो भवति तृतीये कृपणः चतुर्थे सुखी· षष्ठे शत्रुः अष्टमे नीचः नवमे तपस्वी· दशमे सधनः एकादशे सलाभः द्वादशे खलः सधनोंत्ये मीने यत्र तत्र भावस्थे सधनः वित्तवान् भवति स्थानोक्तं तत्फलं न भवति केचिद्गुरुवदन्यस्त्तु झषे द्रविणी स्यादिति पठंति अतोनंतरं परिशेषस्थानेषु गुरुवत् झषे मीने द्रविणे स्यात् भवेदिति इति शुक्रचारः ८ अथ लग्नादिस्थस्य सौरस्य फलं शिखरिण्याह अदृष्टार्थो रोगीति अदृष्टार्थः नित्यंदरिद्रः रोगी व्याधितः मदनवशगः कामाधीनः अत्यंतमलिनः

स्मरनिपुणः सुखितश्च विलग्ने प्रियकलहोऽस्तगते सुरतेच्छुः
तनयगतः सुखितो भृगुपुत्रे गुरुवदतोऽन्यझषे द्रविणी स्यात् ८

अतीवमलोपेतः शिशुत्वे बाल्ये पीडार्तो व्याध्यर्दितः अलसवाक् अव्यक्तभाषी एवंविधः सवितृसुते सौरे लग्नस्थिते जातो भवति यदि तुलधन्विमकरकुंभमीनानामन्यतमो राशिः लग्नगतो न भवति तदा तदेतदुक्तं फलं भवति एषामन्यतमे लग्नगे तस्य सौरस्य फलमाह गुरुस्वक्षेत्रोच्चस्य इति गुरुक्षेत्रे धन्विमीनौ शनैश्चरस्य स्वर्क्षे स्वक्षेत्रे मकरकुंभौ तस्यैवोच्चं तुला एषामन्यतमो राशिः यदि लग्नगतो भवति तत्रस्थिते च सौरे नृपतिसदृशः राजतुल्यो भवति ग्रामपुरपः ग्रामाणां पुराणां चाधिपतिः सुविद्वान् पंडितः चार्वंगः शोभनावयवश्च भवति केचित्स्वत्र स्वर्क्षोच्च इति पठंति तदयुक्तं यस्मात्सारावल्यामुक्तम् स्वोच्चे स्वजीवभवने क्षितिपालतुल्यो लग्नेऽर्कजे भवति देशनराधिनाथः

शेषेषुदुःखगदपीडितएवबाल्येदारिद्र्यकामवशगोमलिनोलसश्च १ दिनकरसमोन्यत्रकथितइति अन्यत्रद्वितीयादिषुस्थानेषुदिनकर समोर्कतुल्यः कथितउक्तः यान्यादित्यस्यफलान्यभिहितानितान्येवसौरस्यचाप्याभि तद्यथा द्वितीयेभूरिद्रव्योनृपहृतधनोवक्ररोगीचभवतितृ तीयेमतिविक्रमवान् चतुर्थेविसुखः पीडितमानसः पंचमेअसुतोधनवर्जितः षष्ठेबलवान् शत्रुनिर्जितः सप्तमेस्त्रीभिः परिभवंगतः अष्टमे स्वल्पात्मजोविकलेक्षणश्च नवमेसुखशौर्यभाक् दशमेसुखशौर्यभाक् एकादशेभूतधनवान् द्वादशेपतितइति इतिशनैश्चरचारः ९ अथ लग्नादारभ्ययेतन्वादयोभावास्तेषुभावेषुव्ययेस्थितानांसर्वेषामेवग्रहाणांफलविशेषमालिन्याह सुहृदिति यदेतत्स्मातिग्रहं लग्नात्प्रभृतिद्वाद

अदृष्टार्थोरोगीमदनवशगोत्यंतमलिनः शिशुत्वेपीडार्त्तःसवितृसुतलग्नेत्यलसवाक् गुरु
स्वक्षोच्चस्थेनृपतिसदृशोग्रामपुरपःसुविद्वांश्चार्वंगोदिनकरसमोन्यत्रकथितः ९ ५

शसुस्थानेषुफलमनुपरिचिंत्यं भावाः तनुकुटुंबसहोत्थादयः लग्नदेहादिभावैरिति लग्नंदेहः शरीरपरिकल्प्यं लग्नादारभ्यतनुकुटुंबसहोत्था दयोभावाः परिकल्प्याः अत्रकाप्रमितिः तत्रोच्यते अस्त्येवयस्माद्यवनेश्वरः मूर्तिंचहोरांराशिंभंचविद्यादिति अत्रराशिभावान्परिकल्प्यालग्नात्प रिकल्प्याः तेषुशरीरादिभावेषुयोग्रहोव्यवस्थितः सतस्यभावस्यपुष्टिंकृशतांवाकरोति कथमित्याह सुहृदरिपरकीयःस्वर्क्षतुंगस्थितानांफलमनुप रिचिंत्यमिति सुहृत्क्षेत्रंमित्रर्क्षं अरिक्षेत्रंशत्रुभं परकीयमुदासीनभं स्वक्षमात्मीयक्षेत्रं तुंगमुच्चभं एतेषुस्थानेषुस्थितानांफलमनुपरिचिंत्यम् भाव स्योग्रहोयादृशेक्षेत्रेभवतितादृशंफलंप्रयच्छति तत्रसुहृदादिक्षेत्राणांपरिगणनाकृता तत्रशुभाशुभफलविभागउक्तः उच्यते अथादि

वैतद्गम्यते तथामित्रक्षेत्रस्थोभाववृद्धिंकरोति शत्रुक्षेत्रादिस्थस्तद्धानिं तत्रचयेशुभाशुभक्षेत्रेणोक्तेत्रिकोणनीचभेतेपिग्राह्ये मित्रादिक्षेत्रान्यक्षेत्रोपलक्षणानिज्ञेयानि कःपुनरपिअरिपरकीयोर्विशेषउच्यते उदासीनोत्रपरोभिप्रेतः अरिः शत्रुः परउदासीनः तत्रैतदुक्तंभवति पापः सौम्योवानीचस्थः शत्रुक्षेत्रस्थोवा यस्मिन्भावेव्यवस्थितः तस्यभावस्यहानिंकरोति उदासीनक्षेत्रस्थोनहानिंनचवृद्धिं मित्रक्षेत्रेस्वक्षेत्रेमूलत्रिकोणेस्वोच्चेव्यवस्थितोभावस्यवृद्धिमिति एतन्केषांचिन्मतं तथाचभगवान्गार्गिः नीचर्क्षारिपुगेहस्थो ग्रहोभावविनाशकृत् उदासीनगृहेमध्योमित्रर्क्षस्वत्रिकोणगः स्वोच्चगश्चग्रहोवस्यभाववृद्धिकरस्मृतइति सत्याचार्यस्तु पुनः समुचयविपत्तीसौम्यपापेषुकथयति यस्मिन्भा-

सुहृदरिपरकीयस्वर्क्षतुंगस्थितानांफलमनुपरिचिंत्यंलग्नदेहादिभावैः
समुपचयविपत्तीसौम्यपापेषुसत्यः कथयतिविपरीतारिःफषष्ठाष्टमेषु १०

वेसौम्याः स्थितास्तस्यभावस्यसमुपचयंवृद्धिंकुर्वंति यस्मिन्भावेपापाः स्थितास्तस्यभावस्यविपत्तिंहानिंनकुर्वंति किंतु रिःफः षष्ठाष्टमेष्वेतद्विपरीतंकथयति रिःफेद्वादशेस्थानेसौम्याः भावहानिंकुर्वंति पापाः वृद्धिं तेनरिःफेसौम्याव्ययहानिंकुर्वंति पापाः व्ययवृद्धिंषष्ठे सौम्याः शत्रुहानिंकुर्वंति पापाःशत्रुवृद्धिं अष्टमेसौम्याःमृत्युहानिंकुर्वंति पापाःमृत्युवृद्धिमिति तथाचसत्यः सौम्याः पुष्टिंपापास्तद्धानिंसंस्थिताग्रहाः कुर्युःमृत्य्वादिषुनिधनेस्वेषष्ठेविपर्ययात्फलदाः ननुपूर्वंसौम्यानांपापानांचोपचयस्थानावस्थितानांशुभफलंव्याख्यातं तत्कथंषष्ठस्थाः पापाः शत्रुवृद्धिंकुर्वंति अत्रोच्यते पूर्वंसामान्येनोक्तं यत्रवाचनिकीबाधाभवति तत्रसामान्यभावफलंत्यक्त्वायथोक्तफलंवक्तव्यम् यद्येवंकथं

स्वल्पजातकेउक्तं पुष्णंतिशुभाभावान्मूर्त्यादीन्घ्नंतिसंस्थिताः पापाः सौम्याःषष्ठेरिघ्नाः सर्वेनेष्टाव्ययाष्टमगाइतिअत्रोच्यतेबृहज्जातकेस्माचार्येणोक्तंस्वल्पजातकेन्याचार्यमतेनप्रतिज्ञैयमाचार्येण ज्योतिषमागमशास्त्रंविप्रतिपत्तौनयोग्यमस्माकंस्वयमेवविकल्पयितुंकिंतुबहूनामन्तवस्येयत्राचार्याणांसमसंख्यानांमतभेदसमत्वंभवति तत्रवराहमिहिरोमतद्वयमपिदर्शयति तथाचबृहद्यात्रायामन्यरूपांग्रहकुंडलिकांस्वल्पयात्रायांसामान्यरूपांपठति एवंबृहदल्पयोर्विवाहपटलयोरपि १० अथग्रहकुंडलिकाफलविशेषमनुष्टुभाह उच्चेति ग्रहकुंडलिकायाफलंद्विविधमुक्तं शुभमशुभंच तत्रयच्छुभफलं तदुच्चत्रिकोणस्वक्षसुहृच्छत्रुनीचग्रहार्कगैर्ग्रहैर्दत्तंयथाक्रमंपादोनदलपादाल्पनिष्फलंभवति तेनोच्चस्थो

उच्चत्रिकोणस्वक्षसुहृच्छत्रुनीचग्रहार्कगैः शुभंसंपूर्णपादोनद
लपादाल्पनिष्फलम् ११ इतिबृहज्जातकवि॰ भावाऽध्यायः २०

ग्रहःसंपूर्णंप्रयच्छति मूलत्रिकोणस्थः पादोनंस्वक्षेत्रस्थोर्द्धं मित्रक्षेत्रस्थः पादफलंशत्रुक्षेत्रस्थः पादादप्यल्पंनीचस्थोस्तमितश्चनकिंचिदपि एवंशुभफलं शुभग्रहणादेवाशुभस्यग्रहस्यव्युत्क्रमोव्याख्येयः तत्रास्तमितोनीचस्थश्चाशुभफलंसंपूर्णंप्रयच्छति शत्रुक्षेत्रस्थःपादोनंमित्रक्षेत्रस्थोऽर्धंस्वक्षेत्रस्थःपादं त्रिकोणस्थःपादादप्यल्पमुच्चस्थोनकिंचिदपि एवंजातककालेग्रहस्थावस्थानात्फलंवाच्यम् दशाष्टकवर्गादिफलपंक्तिकालेशुभमशुभंवापुष्टफलंबलवानेवप्रयच्छति एतच्चपूर्वमेवव्याख्यातंउक्तंच तत्कालंबलयुक्तोभवति यदिदशाधिपस्तस्यशुभमशुभंवापिफलंतत्कथ्यम् १३५
नित्यमेवपरिपूर्णं ११ इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौ भावाध्यायोविंशतिःसमाप्तः २० ५ ६

अथानआश्रययोगाऽध्यायोव्याख्यायते तत्रादावेवैकादिसंख्योत्तरवृद्ध्यास्वगृहगतानांग्रहाणांमित्रक्षेत्रगतानांचफलंपुष्पिताग्रयाह कुलसमकुलेति स्वभेषुस्वराशिष्वेकवृद्ध्यास्थितैःग्रहैर्जाताः कुलसमकुलमुख्यबंधुपूज्याधनेसुखभोगिनृपाः पुरुषाभवंति यस्मिन्तस्मिन्ग्रहेस्वक्षेत्रगतजातः कुलसमः स्वकुलतुल्योभवति एवंद्वयोःस्वक्षेत्रस्थयोः कुलमुख्यः स्वकुलप्रधानः स्वकुलाधिकः त्रिषुबंधूनांपूज्यः चतुर्षुधनीवित्तवान् पंचसुसुखी षट्सुभोगीनृपतुल्यः केचिन्नृपइतिपठंति सचोपमानान्नृपतिरिव भूपस्तत्समत्वमेकमुक्तं स्वल्पजातकेप्युक्तं कुल्यतुल्यकुलाधिकबंधुमान्यधनिभोगिनृपसमनरेंद्राः एवंषट्सुनृपसमः सप्तसुनृपोराजा एवंगुणः एकोत्तरवृद्ध्या स्वक्षेत्रगेषुजातोभवति परविभवेत्यादि एक

कुलसमकुलबंधुमुख्यपूज्याधनिसुखभोगिनृपाःस्वभैकवृद्ध्या
परविभवसुहृत्स्वबंधुपोष्यागणपबलेशनृपाश्चमित्रभेषु १

एकवृद्ध्या इत्यनुवर्तते मित्रभेष्वेकवृद्ध्यास्थितेषु परविभवसुहृत्स्वबंधुपोष्यागणपबलेशनृपाश्चजाताभवंति तेनैकस्मिन्मित्रक्षेत्रस्थग्रहेजातः परविभवपोष्योभवति परजीवीत्यर्थः द्वयोः सुहृत्पोष्यः त्रिषुस्वपोष्योज्ञातिपोष्योभवति चतुर्षुबंधुपोष्यः भ्रातृपोष्य इत्यर्थः पंचसुगणपः गणस्वामीषट्सुबलेशःसेनापती सप्तसुनृपोराजा १ अथोच्चगतस्यैकस्यापिमित्रदृष्टस्यफलमेकोत्तरवृद्ध्यानीचशत्रुस्थानांचमालिन्याह जनयतीति एकोप्युच्चगतोग्रहोमित्रदृष्टःसुहृदवलोकितः नृपंराजानंजनयति उत्पादयति एवमेकोप्युच्चगतोमित्रयोगान्मित्रयुक्तोवान् प्रचुरधनसमेतंसिद्धंचजनयति प्रचुरधनसमेतंपयामपि तथुक्तं सिद्धंचसर्वत्रावाप्तपूजंजनयति विधनविसुखमूढेत्यादि एकवृद्ध्येत्यनुवर्तते एक

स्वल्पाशत्रुनीचर्क्षगेषु शत्रुक्षेत्रस्थेषु नीचगेषु वा ग्रहेषु विधनविस्फरत्वमूढव्याधितांबंधनसावधदुरितसमेताजाताः भवंति तेन यस्य जन्मन्येको ग्रहः शत्रुक्षेत्रगो नीचगो वा भवति स विधनः विगतधनो भवति दरिद्रः यस्य द्वौ स विस्फरत्वो दुःखितः यस्य त्रयः स मूढः चिन्तितः यस्य चत्वारः स व्याधितः पीडितः यस्य पंच स बंधनतप्तो भवति यस्य षट् समेतो भवति बहुदुःखसंतप्तः यस्य सप्त स वधदुरितसमेतो भवति वधः बंधो दुरितं दुष्कृतं वध एव दुरितं तेन समेतो युक्तो वा नीचे यद्यपि सप्त न संभवंति तथापि कन्यादिवत् पूर्वशास्त्रानुसारेण तत्फलोपदेशः २ अथ कुंभलग्नजातस्याशुभं फलमुपजातिकयाह नकुंभलग्नमिति सत्याचार्यः कुंभलग्नजन्मनि न शुभमाह न शोभनमुक्तवान् तथा च सत्यः जन्मनि चंद्रः श्रेष्ठः प्रव-

जनयति नृपमेकोऽप्युच्चगो मित्रदृष्टः प्रचुरधनसमेतं मित्रयोगाच्च सिद्धम्
विधनविस्फरत्वमूढव्याधितो बंधतप्तो वधदुरितसमेतः शत्रुनीचर्क्षगेषु २

प्रवदेद्धोरारिनिधनवर्ज्यः स्यात् होरा च भवेद्दिष्टा द्विपदेष्विह कुंभवर्ज्यो हि कुंभाविलग्ने जातो भवति नरो दुःखशोकसंतप्त इति नभागभेदादिति पुराणयवना भागभेदाद्द्वादशभागभेदाज्जन्मनि कुंभलग्नमशुभमिति यस्य तस्य लग्नस्य कुंभद्वादशभागे जन्म न शुभमिति तेषां मतं कुंभलग्ने तथा च तन्मतानुसारिणा श्रुतकीर्तिनाप्युक्तं सर्वस्मिंल्लग्नगते कुंभद्वादशांशको यदा भवति राशौ नूनं तदा सुखितः परान्नभोजी भवेत् पुरुष इति अथ विष्णुगुप्तचाणाक्यावाहतुः कस्यांशभेद इति यदुक्तं भागभेदात् कुंभलग्नजन्मनि न शुभं तत्कस्य राशेर्लग्नगतस्य कुंभद्वादशभागो नास्त्यपि तु सर्वस्यैवास्ति विद्यते यस्माद्यदि कुंभस्य द्वादशभागो न शुभस्तदा सर्वाण्येव लग्नोक्तानि फलानि निरर्थकानि भवंति तस्मादतिप्रसंगः तेन कुंभलग्नमेवा

शुभंनतद्भागभेदइति तथाचतद्वाक्यं कुंभद्वादशभागोलग्नगतोनप्रशस्यतेयवनैः यद्येवंसर्वेषांलग्नगतानामनिष्टफलंनस्यात् षड्योगाद्राशीनांनच तत्सर्वशास्त्रकाराणां तस्मात्कुंभविलग्नोजन्मन्यशुभोनतद्भागइति ३ अधुनाहोरास्थानांग्रहाणांफलंवसंततिलकेनाह यातेष्विति असद्ग्रहाः पापाः तेष्वसत्सुपापेष्वसमभेषुविषमराश्यवस्थितेषुनकेवलंयावद्दिनेशहोरामादित्यहोरांयातेषुप्राप्तेषुविषमराशिषुपापाः प्रथमार्द्धस्थायदाभवति तदाजातः ख्यातः सर्वत्रप्रसिद्धः महोद्यमबलार्थयुतः महत्सुकार्येषुउद्यमरतो बलवान् वीर्यवान् अर्थयुतोधनवान् अतीतेजस्वीभवति चांद्रींशुभेष्विति युजियुग्माशौशुभेषुसौम्यग्रहेषुचांद्रींहोरांयातेषु समराशिषुप्रथमार्द्धस्थाः सौम्याः भवंतितदाजातोमार्दवयुतोमृदुस्वभावः कांतियुतोद्युतिमान् सौख्ययुतः सुखान्वितः सौभाग्ययुतः सर्वजनप्रियः धीयुतः मतिमान् मधुरवाक्ययुतः प्रियंवदः एतैः गुणैर्युक्तोजातोभवति ४ अथपुनरपिहोरागतफलमिंद्रवज्रयाह तास्वेवेति तास्वेवपूर्वोक्ताहोरास्वपरक्षगेष्वन्यराश्याश्रितेषुजातानराः सर्वेषुपूर्वोक्तगुणेषुमध्याः भवंति एतदुक्तंभवति समराशिषुरविहोरायांपापग्रहाणामवस्थानंभवति तदाजातानांपूर्वोक्तगुणामध्याभवंति एवंविषमराशिषुचंद्रहोरायांसौम्यग्रहाणामवस्थानंभवति तदाजातानांपूर्वोक्तगुणामध्याभवंति व्यस्तहोराभवनस्थितेष्विति व्यस्तासुविपरीत-

नकुंभलग्नेशुभमाहसत्योनभागभेदाद्यवनावदंति कस्यांशभेदोनतथास्तिराशेरतिप्रसंगस्त्विति विष्णुगुप्तः ३ यातेष्वसत्स्वसमभेषुदिनेशहोरांख्यातोमहोद्यमबलार्थयुतोतितेजाः चांद्रींशुभेषुयुजिमार्दवकांतिसौख्यसौभाग्यधीमधुरवाक्ययुतःप्रजातः ४ ६ ७

स्यास्तु होरास्तु व्यत्यस्तेषु च भवनेषु राशिषु स्थितेषु ग्रहेषु जाता मर्त्या मनुष्या उक्तगुणैः प्रागुद्दिष्टैः गुणैः विहीना वर्जिता भवंति एतदुक्तं भवति समराशिषु चंद्रहोरायां पापानामवस्थानं भवति तदा जाता महोद्यमबलार्थहीना भवंति वितेजसश्च एवं विषमराशिषु आदित्यहोरायां सौम्यानामवस्थानं भवति तदा जाता मार्दवकांतिसौख्यसौभाग्यधीमधुरवाक्यविहीना जाता भवंति अत्र च दर्शिते ग्रहावस्थाने यथा यथा ग्रहबहुत्वं भवति तथा तथा गुणबहुत्वं वक्तव्यम् ५ अथ द्रेष्काणावस्थानाच्चंद्रस्य फलं वसंततिलकेनाह कल्याणरूपगुणमिति आत्मीयद्रेष्काणे यदा चंद्रः स्थितो भवति अथवा स्वद्रेष्काणे स्थितस्तदा जातः कल्याणरूपगुणः प्रशस्तरूपः प्रशस्तगुणश्च भवति आत्मीयद्रेष्काणमित्रद्रेष्का-

तास्वेव होराः स्वपरर्क्षगेषु ज्ञेया नराः पूर्वगुणेषु मुख्याः
व्यत्यस्तहोराभवनस्थितेषु मर्त्या भवंत्युक्तगुणैर्विहीनाः ५

णावस्थानं विनान्यद्रेष्काणावस्थिते चंद्रमसि विचारः यस्मादुक्तान्यगतस्तदधिनाथगुणं करोति यस्मिन्द्रेष्काणे चंद्रमा व्यवस्थितस्तस्य योधिपतिः स यदि चंद्रस्य तत्काल मध्यस्थस्तदा जातस्य मध्यमो रूपगुणो भवतः अथ द्रेष्काणाधिपतिश्चंद्रस्य तत्कालमरिस्तदा जातो रूपगुणहीनो भवति व्यालोद्यतायुधेति व्यालद्रेष्काणः सर्पद्रेष्काणास्तत्रस्थे चंद्रे जातः तीक्ष्णउग्रो भवति उद्यतायुधद्रेष्काणः सायुधस्तत्रस्थे चंद्रे जातोऽतिहिंस्रो मारणात्मको भवति प्राणिघातरत इत्यर्थः चतुश्चरणः चतुष्पदद्रेष्काणः तत्रस्थे चंद्रे गुरुतल्परतो गुरुदाराभिगामी भवति अंडजद्रेष्काणः पक्षिद्रेष्काणस्तत्रस्थे चंद्रेऽटनः परिभ्रमणशीलो भवति आत्मीयादिद्रेष्काणस्थे चंद्रमसि व्यालद्रेष्काणस्थे चंद्रे संभवतः फलद्वयमपि वक्तव्यम् अत्रया

लद्रेष्काणाः कर्कटाद्वितियः वृश्चिकाद्याः मीनतृतीयः उद्यतायुधद्रेष्काणः मेषाद्यः मेषतृतीयः मिथुनद्वितीयः सिंहाद्यः तुलद्वितीयः कुंभाद्यश्च अत्रापिगुणद्वयोनर्क्षतद्रेष्काणस्थेचंद्रेफलद्वयंवक्तव्यमिति ६ अधुनामेषादिनवांशकजातस्यस्वरूपंशालिन्याह स्तेनइति मेषवर्ज्यमन्यास्मिन्राशौमेषलग्नगते नवांशकेजातस्तेनश्चौरोभवति वृषवर्ज्येवृषनवांशकेजातोभोक्ता असंचयशीलः एवमिथुनवर्ज्येमिथुननवांशकेजातः पंडितोविद्वान्भवति कर्कटनवांशकेजातः आढ्यः ईश्वरः सिंहांशकेनरेंद्रोराजा कन्यांशकेक्लीबः पुरुषाकाररहितः तुलांशकेशूरः संग्रामप्रियः वृश्चिकांशकस्थेविष्टिकृद्भारजीवी धन्वंशकेदासवृत्तिः मकरांशकेपापः कुंभांशकेहिंस्रः क्रूरः मीनांशकेऽभीः निर्भयः केचिद्धीरितिपठंति अधीः

कल्याणरूपगुणमात्मसदृक्काणेचंद्रोन्यगस्तदधिनाथगुणंकरोति व्यालोद्यतायुधचतुष्प-
दगांडजेषुतीक्ष्णोतिहिंस्रगुरुतल्परतोऽटनश्च ६ स्तेनोभोक्तापंडिताढ्योनरेंद्रः क्लीबःशूरोवि-
ष्टिकृद्दासवृत्तिः पापोहिंस्रोऽभीश्चवर्गोत्तमांशेष्वेषामीशाराशिवद्द्वादशांशैः ७

बुद्धिरहितः आचार्यस्यचाभीरभिमतं तथाचस्वल्पजातके तस्करभोक्तृविचक्षणधनिनृपतिनपुंसकाभयदरिद्राः खलपापोत्कृष्टामेषाद्यानां नवांशभवा इति वर्गोत्तमांशेष्वेषामीशाः एष्वेवराशिषुवर्गोत्तमांशेषुजाताएषानवपूर्वोक्तानामीशाः स्वामिनोभवंति एतदुक्तंभवतिमेषलग्नेमेषनवांशकेजातश्चौरस्वामीभवति वृषलग्नेवृषनवांशकेजातोभोक्तृणामसंचयशीलानांस्वामीभवति एवंमिथुनेपंडितस्वामी कर्कटलग्नेईश्वराणांस्वामी महाधनिकः सिंहेनृपस्वामी महाराजाधिराजः कन्यायांक्लीबस्वामी तुलेशूराणांस्वामी वृश्चिकेभारवाहानांस्वामी धन्विनिदासानांस्वा

मी मकरेपापानांस्वामी॰ कुंभेक्रूराणांस्वामी मीनांशके ऽभयानांस्वामी॰ राशिवद्द्वादशांशैरिति द्वादशांशैः राशिवत्फलानिवाच्यानि यानिमेषादिस्थेचंद्रमसिफलान्यभिहितानि वृत्तातान्महगित्येवमादीनितान्येवमेषादि द्वादशांशकजातस्यवक्तव्यानीति ७ अथभौमसौरयोः स्वत्रिंशांशकस्ययोः फलंवसंततिलकेनाह जायान्वितइति जायान्वितोभार्यायुक्तः बलंवीर्यंविभूषणान्यलंकरणानि सत्वमौदार्यंएतैर्युक्तः तथातितेजाः अतिसाहसेनासमीक्षितकार्यकरणेनचयुक्तः एवंविधः कुजेभौमेस्वभागेस्वत्रिंशांशकस्थेजातोभवति रोगीव्याधितः मृतःस्वयुवतिः मृतास्त्रीआत्मीयायुवतिर्भार्यायस्य विषमः क्रूरः अन्यदारोन्यसंबंधिनीदारायस्य परदारासक्तः दुःखीनिःस्वः परिच्छदच्युतः गृहवस्त्रपरिवारापेतः मलिनः

जायान्वितोबलविभूषणसत्वयुक्तस्तेजोतिसाहसयुतश्चकुजेस्वभागे
रोगीमृतःस्वयुवतिर्विषमोन्यदारादुःखीपरिच्छदयुतोमलिनोऽर्कपुत्रः ८

मलोपेतः एवंविधोर्कपुत्रेसौरेस्वत्रिंशांशकस्थेजातोभवति नन्वत्रत्रिंशांशकग्रहणंनास्ति तत्कथंज्ञायतेत्रिंशांशकफलमेतत् उच्यते शुक्रफलाभिधानेत्रिंशांशकग्रहणाज्जातोभवति ८ अथजीवबुधयोः स्वत्रिंशांशकस्थयोः जातस्यस्वरूपंवसंततिलकेनाह स्वांशइति धनेनवित्तेनयशसाकीर्त्यासुखेननिर्दुःखत्वेनबुध्याप्रज्ञयाचयुक्तः तेजस्वीसोत्साहः पूज्यः लोकवंद्यः निरुक्स्वस्थदेहः उद्यमवान् उत्थानशीलः भोगवान् भोगसंयुक्तः एवंविधोगुरौजीवेस्वत्रिंशांशकस्थेजातोभवति मेधाबुद्धिः कलागीतवाद्यनृत्यपुस्तकचित्रकर्मादिकाः कपटः दांभिकत्वं काव्यंकवेःकर्मविवादः वाक्पटुत्वम् शिल्पंतक्षकर्मादि शास्त्रार्थःसतामाचारानुष्ठानं साहसमसमीक्षितकार्यकरणशीलता अतिमान्योतिपूज्यः एवंविधाः शशि

जेबुधेस्त्रिंशांशकस्थेजाताः भवंति केचिदत्र सर्वत्रैकवचनमेवेच्छंति तथापि न कश्चिद्दोषः ९ अथ शुक्रस्य स्वत्रिंशांशकस्थस्य भौमादित्रिंशांशकस्थयोश्चंद्रार्कयोश्च जातस्य स्वरूपं मंदाक्रांतयाह स्वेत्रिंशांशे इति बहुसुतः प्रभूतपुत्रः बहुसुखोपरीमितसुखः आरोग्येणानिरोगतया भाग्यैः जनप्रियत्वेन अर्थेन धनेन रूपेण सुचारुतया संयुक्तः केचिद्भार्यार्थस्वरूप इति पठंति भार्यायाकलत्रेण तथा तीक्ष्णः क्रूरः सुललित वपुः शोभनशरीरः सुप्रकीर्णेंद्रियः विक्षिप्तेंद्रियार्थः सुप्रकीर्णानि विक्षिप्तानींद्रियाणि यस्य बहुस्त्रीगमनशीलः एवंविधः शुक्रे स्वत्रिंशांशकस्थे जातो भवति शूरस्तब्धावित्यादि आरपूर्वांशकेषु भौमप्रथमेषु भागेषु रविशशियुक्तेष्वर्कचंद्रसंयुक्तेषु यथासंख्यं फलानि तद्यथा भौमपं

स्वांशे गुरौ धनयशःसुखबुद्धियुक्तास्तेजस्विपूर्वनिरुगुद्यमभोगवंतः मेधाकलाकपटकाव्यविवादशिल्पशा
स्त्रार्थसाहसयुताः शशिजेतिमान्याः ९ स्वत्रिंशांशे बहुसुतसुखारोग्यभाग्यार्थरूपः शुक्रे तीक्ष्णः सुललि
तवपुः सुप्रकीर्णेंद्रियश्च शूरस्तब्धौ विषमवधकौ सद्गुणाढ्यौ सुखिज्ञौ चार्वंगौ वा रविशशियुतेष्वारपूर्वांश
केषु १० इति आ॰ यो॰ २१

त्रिंशांशकस्थेर्के शूरः संग्रामप्रियः चंद्रस्तब्धः स्थिरकारी सौरत्रिंशांशकस्थेर्के विषमः क्रूरः भवंति चंद्रमसि वधकः जीवत्रिंशांशकस्थेर्के सद्गुणो भवति चंद्रमस्याढ्यः ईश्वरः बुधत्रिंशांशकस्थेर्के सुखी भवति चंद्रे ज्ञः पंडितः शुक्रत्रिंशांशकस्थेर्के चार्वंगः शोभनशरीरः चंद्रमसि इष्टः सर्वजनप्रियः एवमारपूर्वेष्वंशेषु आरोग्यकारकः पूर्वः प्रथमो येषामंशकानां त्रिंशद्भागानां तेष्विति १०

इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृतौ आश्रमयोगाध्याय एकविंशतिः समाप्तः २१

अथातः प्रकीर्णकाऽध्यायो व्याख्यायते मिश्रः प्रकीर्णक इत्युच्यते तत्र ग्रहाणां परस्परं कारकसंज्ञां वैतालीयेनाह स्वर्क्षेति स्वर्क्षे स्वक्षेत्रे यो ग्रहः स्थितः यस्तुंगे स्वोच्चे यश्च मूलत्रिकोणे स्थितः स च यदि लग्नकंटकेषु केंद्रेष्वाश्रितः स्थितो भवति एवंविधस्य ग्रहस्यान्योप्येवंविधः केंद्रगो यदि भवति तदा तौ ग्रहावन्योन्यं परस्परं कारकाख्यौ भवतः अनेन प्रकारेण यः कर्मगः यो यस्मात् ग्रहात् दशमस्थानस्थः स विशेषतः विशेषेण तेषां ग्रहाणामध्यात्कारकसंज्ञां लभते अत उक्तं कर्मगस्तु तेषां विशेषत इति १ अथास्यैवोदाहरणप्रदर्शनार्थं रथोद्धतयाह कर्कटेति यथा कर्कटोदये कुलीरलग्ने तस्येन्दोडुपे चंद्रे कुजोंगारकः यमः सौरः अर्कः आदित्यः सूरिः बृहस्पतिः एते कुजयमार्कसूरयः स्वोच्चगाः आत्मीयतुंगस्था यदि भवंति कु

स्वर्क्षतुंगमूलत्रिकोणगाः कंटकेषु यावंत आश्रिताः
सर्व एव तेन्योन्यकारकाः कर्मगस्तु तेषां विशेषतः १



जो मकरे यमस्तुले अर्को मेषे सूरिः कर्कटे तदा ते परस्परमन्योन्यं कारकानि गदिताः उक्ताः अनेन प्रकारेण यावंतो भवंति तावंतः परस्परं कारकाख्याः अनेनोदाहरणेनैतत्प्रतिपादितं भवति यथा पुरुषस्य जन्मलग्ने केंद्रवर्तिनः स्वक्षेत्रोच्चत्रिकोणगाः अपि संततं परस्परं कंटकगास्तदा कारकसंज्ञामपि लभंते लग्नगस्येति लग्नगस्य ग्रहस्य प्राग्लग्ने समवस्थितस्य सकलः सर्वो ग्रहो वर्गः दशमस्थानस्थश्चाबुणश्चतुर्थस्थानस्थश्च कारकसंज्ञो भवति अनेनैतदुक्तं भवति लग्नगो ग्रहाः स्वक्षेत्रगोच्चत्रिकोणेषु यद्यपि भवति तस्माद्यो दशमस्थः चतुर्थो वा सोप्युच्चत्रिकोणस्वक्षेत्राणामन्यतमस्थो भवति तथापि लग्नग

तस्यसकारककारव्योभवति नतस्यलग्नगतइति अनउक्तं लग्नगतस्यसकलोंबरांबुगइति २ अथपुनरपि अन्यत्कारकलक्षणमनुष्टुभाह स्वत्रिकोणोच्चगतइति स्वत्रिकोणोच्चगोग्रहाः कारकत्वेहेतुः कारणंनकेंद्रस्थः यतोन्योन्यस्यग्रहस्यलग्ने केंद्रंविनाप्यवस्थितस्ययद्दिकश्चिद्ग्रहः कर्मगोदशमस्थानस्थो भवति सचस्वक्षेत्रोच्च मूलत्रिकोणानामन्यतमेनभवति तस्मात्तद्दशमस्थस्ययदिक्षेत्रोन्मित्रांशितोनकेवलयावत्तद्गुणसंपन्नस्तेनामित्रगुणेनसंयुक्तस्तात्कालिकेमित्रामित्रविधिनाधिमित्रतांप्राप्तस्तथाविधः सर्वग्रहः कारकाख्योभवति यस्यचदशमः सनतस्यकालकाख्योनभवति कारकसंज्ञाचयात्रायामुपयुज्यते यतस्तत्रोक्तं रिःफोपहतदशायांजन्मोदयनाथशत्रुपाकेच स्वदशेशकारकदशासंश्रयणीयोनरेंद्रपतिरि-

कर्कटोदयगतोयथोडुपेस्वोच्चगाः कुजयमार्कसूरयः कारकानिगदिताःपरस्परंलग्नगस्यसकलों
बरांबुगः २ स्वत्रिकोणोच्चगोहेतुरन्योन्यंयदिकर्मगः सुहृत्तद्गुणसंपन्नःकारकश्चापिसस्मृतः ३
शुभंवर्गोत्तमेजन्मवेशिस्थानेचसद्ग्रहे अशून्येषुचकेंद्रेषुकारिकाख्यग्रहेषुच ४

ति तथासत्सुरविवेशिग्रहयुक्तः कारकस्त्रोपिचंद्रः जयकरधनदातातरमहर्तान्ययेति ३ अथकारकसंज्ञाप्रयोजनमनुष्टुभाह शुभमिति यस्यलग्नंनवांशेवर्गोत्तमाख्यंजन्मभवति चंद्रोपिवावर्गोत्तमांशगतोभवति तस्यशुभंजन्म यस्मिन्राशौ पुरुषस्यजन्मसमयकेःस्थितस्तस्माद्राशेः योद्वितीयोराशिः सवेशिसंज्ञः यस्यचप्रागुक्तेवेशिस्थानेसद्ग्रहः सौम्यग्रहोयत्तगुरुसितानामन्यतमोभवति तस्यापिशुभंजन्म यस्यजन्मलग्नकेंद्रचतुष्टयादेकमप्यशून्यंकेंद्रंभवति तस्यापिशुभंजन्म अत्रसौम्यग्रहाधिष्ठितकेंद्रविशेषणशुभंजन्म यस्मादुक्तमनेनैव एकस्मिन्नपिकेंद्रेयदिसौम्यानग्र

शोभनि यात्रायां जन्मन्यथवा कर्मणि न तच्छुभं प्राहुराचार्याः यस्य जन्मनि कारकाख्याः कारकसंज्ञा ग्रहा भवंति तस्यापि शुभं जन्म अत्र यथा गुणाधिक्यं तथा शुभतरमेव जन्म ४ अथ येन योगेन जातो यौवने सुखी भवति दशापति फलपाकं वैतालीयेनाह मध्ये वयस इति गुरुर्जीवः जन्मनि यत्र राशौ चंद्रमाः स्थिताः तदधिपतिः जन्मपः यस्मिंल्लग्ने जातः तदधिपो लग्नप एषामन्यतमो यस्य लग्नकेंद्रे भवति तस्य वयोमध्ये सुखप्रदो भवति यौवने सुखप्रदो भवतीत्यर्थः अत्र च यवनेश्वरः लग्नाधिपो लग्नपतिस्त्वयेषां चतुष्टये स्याद्बलवान् गुरुर्वा चतुर्षु होरादिषु संगतः स्याच्चतुर्वयः कालफलप्रदः स्यात् पृष्ठोभयेत्यादि दशापतिर्दशाप्रवेशकाले पृष्ठोदयराशिगो मेषवृषधन्विमकराणामन्यतमास्थितो यदा भवति तदा स्वदशांते फलप्रदो भवति अथोभ-

मध्ये वयसः सुखप्रदाः केंद्रस्था गुरुजन्मलग्नपाः
पृष्ठोभयकोदयर्क्षगास्त्वंतेंतः प्रथमेषु पाकदाः ५

योदये मीने भवति तदांतर्दशामध्ये फलप्रदो भवति अथ कोदये शीर्षोदये मिथुनसिंहकन्यातुलावृश्चिककुंभानामन्यतमे यदा भवति तदा प्रथमदशाप्रवेशसमये फलप्रदो भवति एवं शुभस्याप्यशुभस्य वा पक्तिर्वाच्या दशाकालं त्रिधा परिकल्प्य यस्मिन्काले तस्य फलपक्तिर्जायते आद्ये मध्येत्ये वा तत्र चंद्रः सत्फलबोधनानि कुरुते पापानि चांतोन्यथेति एवं त्रिधा विभक्ते दशाकाले ज्ञेयम् पूर्वोक्तं सर्वं दशाफलं योज्यम् दशापतिः प्रवेशकाले तिष्ठन्नेव तत्फलं ददातीत्येतल्लक्षणं गम्यते यवनेश्वरादिभिः सामान्येन चोक्तं उच्यते भगवतो गर्गवचनात् तथा च भगवान् गार्गिः १५०
आद्यंतमध्यफलदः शिरःपृष्ठोभयोदये दशाप्रवेशसमये तिष्ठन्वाच्यो दशापतिरिति ५ ७ ७ ७

अथाष्टकवर्गफलस्यकालंपृष्टितान्प्रयाह दिनकरेति चारवशात्संक्रांतिकालेयस्मिन्राशौशुभमशुभंवाष्टकवर्गफलंदिनकर आदित्यः प्रयच्छति तस्मिन्राशौप्रवेशकालेआद्येत्रिभागेतिष्ठन्नेवफलंप्रयच्छति एवमेवरुधिरोभौमः गुरुर्जीवः भृगुः शुक्रः एतौगुरुभृगुजौगगनस्थराशेर्मध्ययातौमध्यत्रिभागगतौफलप्रदौभवतः रविसुतः सौरः शशीचंद्रः एतौरविसुतशशिनौविनिर्गमस्थराश्यंतत्रिभागस्थौफलप्रदौभवतः शशितनयोबुधः सर्वकालंफलदः सर्वभागस्थोफलप्रदोभवति सर्वस्मिन्नेवराशौयावत्तिष्ठतितावत्फलंशुभमशुभंवायथाप्राप्तंददातीति ६ इतिश्रीभट्टोत्पलवि० वृ० प्रकीर्णाध्यायोद्वाविंशतिः २२ अथातोऽनिष्टाध्यायोव्याख्यायते तत्रादावेवदारसुतहीनजन्मज्ञानशार्दूलविक्रीडितेनाह लग्नादिति

दिनकररुधिरौप्रवेशकालेगुरुभृगुजौभुवनस्यमध्ययातौ रविसुतशशिनौ
विनिर्गमस्थौशशितनयः फलदस्तुसर्वकालं ६ इतिप्रकीर्णोऽध्यायः २२

यस्यजन्मनिलग्नात् पुत्रभंपंचमस्थानंशुभग्रहेणस्वपतिनाचप्राप्तंसंयुक्तंभवत्यथवा आलोकितंदृष्टंभवति तस्यापिपुत्रसंपत् अस्तीतिवक्तव्यम् चंद्राद्वापंचमस्थानंयस्यशुभग्रहेणस्वपतिनावायुतदृष्टंभवति तस्यापिपुत्रसंपदस्ति यस्यलग्नचंद्रयोरुभयोरपिपंचमस्थानंशुभग्रहेणस्वपतिनावायुतदृष्टंनभवति तस्यपुत्रासंभवः अपुत्रत्वंवक्तव्यम् अत्रकेचिद्द्वादशप्रकारंपुत्रंवर्णयंति औरसः क्षेत्रजः दत्तः कृत्रिमः अधमप्रभवः गूढोत्पन्नः अपविद्धः पौनर्भवः कानीनः सहोढः दासीप्रभवइति तथाचसारावल्याम् शुभभवनमथशुभयुतंशुभदृष्टंवासुतर्क्षमीहयेषांतेषांप्रभवः पुंसांभवत्यवश्यंनाविपरीतं १ एकतमेगुरुवर्गेशुभाराशौवौरसोभवेत्पुत्रः लग्नाच्चंद्राद्थवाबलयुक्ताद्वीक्षितोपिवासौम्यैः २ संख्या

नवांशतुल्यासौम्यांशेतावतीदृष्टा शुभदृष्टेतद्द्विगुणाक्लिष्टापापांशकेतयादृष्टा ३ सौरर्क्षेसौरगुणोबुधदृष्टोगुरुकुजार्कदृग्धीनः क्षेत्रजपु
त्रंजनयति बौधोपिद्विगुणोरविजदृष्टः ४ मांदर्क्षगतमिंदुनिरीक्षितेयदिशनैश्चरेणयुतं दत्तकपुत्रंतस्मिन्क्रीतश्चबुधस्यचैवंस्यात् ५ सप्तमभा
गेकौजेसौरयुतेपंचमेसदाभवने कृत्रिमपुत्रंविंद्याच्छेषग्रहदर्शनान्मुक्ते ६ वर्गेपंचमराशौसौरेसूर्येचतत्रसंयुक्ते लोहितदृष्टेवाच्योजातश्चसु
तोधनप्रभवः ७ चंद्रेभौमांशगतेधीस्थेमंदावलोकितेभवति गुढोत्पत्तिर्भवेत्पुत्रः शेषग्रहदर्शनेयाते ८ तस्मिन्नेवचभौमेशनिवर्गस्थे
निरीक्षितेरविणा पुरुषस्यभवतिपुत्रोऽपविद्धचरकमुनिवचनात् ९ शनिवर्गस्थेचंद्रेशनियुक्तेपंचमेसदासौरे शुक्ररविभ्यांदृष्टेपुत्रः
पौनर्भवोभवति १० चूडायदाकसत्वात्कालाद्दतस्यैवपंचमेभवने रविदृष्टेव्ययसहितेकानीनःसोभवतिपुत्रः ११ वर्गेरविचंद्रमसोःसु
तगेहेचंद्रसूर्यसंयुक्ते शुक्रेणदृष्टमात्रेपुत्रःकथितःसहोढश्च १२ पापैर्बलिभिर्युक्तेपापर्क्षेपंचमेसदाराशौ जातोपुत्रःपुरुषःसौम्यग्र
हदर्शनातीते १३ शुक्रनवांशेतस्मिन्शुक्रेणनिरीक्षितेत्वपत्यानि दासीप्रभवानिवदेच्चंद्रेपिकेचिदाचार्याः १४ सितशशिवर्गेधीरस्थेता
भ्यांदृष्टेयवापिसंयुक्ते प्रायेणदारिकास्युस्तद्वाशिगणापिवान्ययापुत्राइति १५ एवंलग्नाच्चंद्राद्वाकलत्रभंसप्तमंस्थानंयस्यशुभेनस्वपतिना
वायुतदृष्टंभवति तस्यकलत्रसंपदस्तीतिवक्तव्यम् एवंलग्नाच्चंद्राद्वायस्यसप्तमस्थानंशुभग्रहेणस्वपतिनावायुतदृष्टंनभवतितस्यकलत्रसंपन्नभ
वतीतिवक्तव्यं भार्यातस्यनभवतीत्यर्थः यतउक्तं ज्ञेयोन्यथासंभवः अन्यथातयोः पुत्रकलत्रयोरसंभवः अभावोत्तेयोज्ञातव्यः अत्रपुत्रकलत्र
ग्रहणमुपलक्षणार्थं सर्वेषामपितन्वादीनांभावानांलग्नाच्चंद्राद्वास्थितिरन्वेष्या यतोद्वावेतौमूर्तिसंज्ञौ तथाचयवनेश्वरः मूर्तिंचहोरांराशिं
चंद्राविद्यादिति अत्रकलत्रस्थानेपिकेचिद्विशेषंवर्णयंति शुक्रेंदुजीवशशिजैः सकलैस्त्रिभिश्च द्वाभ्यांकलत्रभवनेचतथैककेन एषांग्रहे

मित्रगणे यदि विलोकिते यासांतिःस्त्रियोभवनवर्गस्वगस्य भाया: १ एवं क्रूरैर्नांशे लग्नाच्चंद्राद्द्देद्य बलयोगात् शशिरविजयोः फलंवे भार्यापुंसांपुनर्भूःस्यात् २ भवनाधिपांशतुल्यास्तु बलिनार्यो निरीक्षणाद्वापि एकैवरविकुजांशे गुरुबुधयोश्चापि यामित्रे ३ प्रायेणचंद्रसितयोर्बलसंयुक्तेयत्रापि यामित्रे दृष्टेषांबहुपत्न्यो भवतिशुक्रोविशेषेण ४ गुरुशुक्रयोःस्ववर्णा रविकुजशशिभानुजैर्भवेत्सूना: शक्रेवेश्याभार्याश्चंद्रोपि वदंति केतुमालाख्या: ५ पाथोनेत्यादि पाथोनः कन्यातस्मिन्नुदयगते लग्नस्थे तत्रचरवावर्केस्थिते रविसुतः सौरः मीनस्थोयदिभवति तदादारहा भवति

अथानिष्टाध्यायः लग्नात्पुत्रकलत्रभेशुभपतिप्राप्तेथवालोकिते चंद्राद्वायदिसंपदस्तिहितयोर्ज्ञेयोन्यथासंभवः पाथोनोदयगेरवौरविसुतेमीनस्थितेदारहापुत्रस्थानगतेचपुत्रमरणं पुत्रोवनेर्यच्छति १ उग्रग्रहैःसितचतुरस्रसंस्थितैर्भृगुतनयोथवाग्रयोः सौम्यग्रहैरसहितसन्निरीक्षितेजायावधोदहननिपातपाशजः २

दारान् कलत्राणि हंति घातयति तस्यपुरुषस्यजीवतएवभार्यामरणंवक्तव्यम् अस्मिन्नेवयोगे पाथोनोदयगेरवौ अवनेः भूमेःपुत्रोभौमः पुत्रस्थानगतः पंचमस्थानगतोमकरस्थितोभवति तदापुत्रमरणकृतविपत्तिंयच्छति ददाति तस्यजीवतएवपुत्रमरणंवक्तव्यं १ अथजीवतएवभार्यामरणयोगद्वयंप्रहर्षिण्याह उग्रग्रहैरिति उग्रग्रहाः आदित्यभौमसौराः तैःसितात्शुक्राद्यथासंभवचतुरस्रसंस्थितैः चतुर्थाष्टमगतैः यस्यजन्मभवति तस्यजायावधोभार्याविपत्तिः दहनेनाग्निनाभवतितस्यजीवतएवभार्याग्निनात्मानंव्यापादयति अथवाग्रयोःपापयोः द्वयो-

मध्येशुक्राद्देको द्वादशोऽन्यो द्वितीये भृगुतनयेशुक्रे स्थितेजातस्यनिपातेनोच्छितपतनाजायावधोभवति तस्यजातस्यजीवतएवपत्न्याग्निपतिनाभार्याम्रियतइति अथवैकस्मिन्राशावेकेनमुक्तंस्थानमतिक्रम्यान्येनभुज्यमानमप्राप्ययदिशुक्रस्यावस्थानंतदपिपापद्वयमध्यस्थोभवति अथवायस्यजन्मनिसौम्यग्रहयोरन्यतमेनसहितःसंयुक्तः शुक्रोनभवति नचापितन्निरीक्षितोदृष्टस्तस्यपाशजोजायाया वधोभवति जीवतएवभार्याद्बंधनेनात्मानंव्यापादयति केचिद्योगद्वयमेतद्व्याख्यातं उग्रग्रहैः सितचतुरस्रसंस्थितैरेकः मध्यस्थितेभृगुतनयेयदोग्रयोः द्वितीयः सौम्यग्रहैरसहितः सन्निरीक्षितइति योगद्वयविशेषभूतजायावधीदहननिपातपाशजः इतियोगद्वयेपिविकल्पः तथाचोक्तंयस्मा·

लग्नाद्व्ययारिगतयोःशशितिग्मरश्म्योः पत्न्यासहैकनयनस्यवदंतिजन्म
द्यूनस्थयोर्नवमपंचमसंस्थयोर्वाशुक्रार्कयोर्विकलदारमुशंतिजातम् ३

द्भगवान्गार्गिः चतुर्थाष्टमगैः शुक्रात्सौरारकैर्हुताशनात् तेषांद्वयोस्तुमध्यस्थेतथाशुक्रेनिपातजः शुक्रेसद्योगदृष्टीनेपाशाद्भार्यावधोभवेत् २ अधुनाविकलनयनदारजन्मयोगज्ञानवसंततिलकेनाह लग्नादिति शशीचंद्रः तिग्मरश्मिः सूर्यः एतयोः लग्नद्व्ययारिगतयोः एकोव्ययेद्वादशस्थाने द्वितीयोरिस्थाने षष्ठे पत्न्यासहैकनयनस्यएकाक्षस्यजन्मवदंति कथयंति जातः काणोभवतिनकेवलंयावत् तद्भार्याकाणीभवतीत्यर्थः द्यूनस्थयोरिति शुक्रसूर्ययोर्द्यूनस्थयोः लग्नाद्द्वयोरपिसप्तमस्थयोः नवमयोःपंचमयोर्वाजातंविकलदारमुशंतिकथयंति भार्याहीनांगा·भवतीत्यर्थः अत्रद्यूनस्थयोः नवमपंचमसंस्थयोर्वाशुक्रार्कयोः केचिद्यथासंभवमेवयोगोव्याख्यातः तथाचोक्तं यस्माद्भगवान्गार्गिःपंचमेनवमे द्यू-

नेसमेतौसितभास्करौ यस्मिन्स्यातांभवेद्भार्यातस्यैकांगविवर्जिता ३ अथासुतकलत्रवंध्यापतिजन्मज्ञानंमालिन्याह कोणोदयइति कोणोशनैश्चरस्तस्मिन्नुदये लग्नगते भृगुतनयेशुक्रे अस्तचक्रसंधौवृश्चिककर्कटमीनानामन्यतमांत्यनवांशकस्थेन केवलंयावदस्थे लग्नात्सप्तमस्थानस्थे एवमस्तस्यचक्रसंधौयदिभवतितदाजातो वंध्यापतिर्भवति वंध्यानिष्फलातवा एतन्मकरवृषकन्यालग्नेषुसंभवति अपुत्रइतिवक्तव्ये वंध्यापतिग्रहणेनैतज्ज्ञापयति यथाकौमारेभ्योदारेभ्यः पुत्रोत्पत्तिर्भवत्यविरुद्धकामेभ्योभवति पापग्रहैरिति पापग्रहैःव्ययस्थानंद्वादशमदस्थानंसप्तमं लग्नराशिरुदयः एतेषुद्वयोरेकस्मिन्वापापग्रहैःयथासंभवस्थितैः शशिनिचंद्रेक्षीणेधीस्थेलग्नपंचमगे असुतस्यापुत्रस्याकलत्रस्यचस्त्रीवर्जितस्यपुत्रभार्यावर्जितस्य

कोणोदये भृगुतनयेस्तचक्रसंधौवंध्यापतिर्यदिनसुतर्क्षमिष्टयुक्तं पापग्रहैर्व्ययमदलग्नराशिसंस्थैःक्षीणे
शशिन्यसुतकलत्रजन्मधीस्थे ४ असितकुजयोर्वर्गेस्तस्थेसितेतदवेक्षितेपरयुवतिगस्तौचेत्सेंदुस्त्रियासह
पुंश्चलः भृगुजशशिनोरस्तेभार्योनरोविसुतापिवापरिणततनूनृस्त्र्यौदृष्टौशुभैःप्रमदापती ५

जन्मभवति जातस्यनभार्यानपुत्रोभवतीत्यर्थः ४ अथपरयुवतिगजन्मज्ञानंहरिण्याह असितेति असितकु[illegible]योः सौरभौमयोः अन्यतमस्यवर्गेसितेशुक्रेस्थिते तस्मिंश्चास्तस्थेलग्नात्सप्तमगेतदवेक्षितेतयोरेवसौरारयोरन्यतमेनावेक्षितेदृष्टेजातः परयुवतिगः परदारगामीभवति तौचेदित्यादि तौसौरारौवस्तेसप्तमस्थानेएकराशिस्थितौसेंदुचंद्रसहितौभवतः सितकुजयोः वर्गः तस्थः सितः तदवेक्षितः तदाजातःस्त्रियासहपुंश्चलोभवति सपुरुषः परदारेषुगच्छति तद्भार्यापरपुरुषेषुगच्छति भृगुजशशिनोरित्यादि भृगुजःशुक्रः शशीचंद्रः तयोः भृगुजशशिनोः

एकराशिगतयोः यत्रतत्रावस्थितयोः तावेवासितकुजावस्ते सप्तमस्थाने भवतः तदा जातो नरः अभार्यो भवति विसुतो वा वाशब्दोऽप्यर्थे न विकल्पने अभार्यो भवत्यपुत्रश्च परिणततनू इति नाचस्त्रीचन्द्रास्त्रियौ नरस्त्रीगृहयोरेकराशिगयोरस्ते सप्तमे तावेवासितकुजौ भवतः नीचांशकाद्दृष्टौ सौम्यग्रहेण केनचिन्नो दृश्येते तदा परिणततनूभ्रमदापती भवतः परिणततनूययोः एतदुक्तं भवति तस्य वृद्धत्वं वृद्धा भार्या पतिश्चन इति ५ अथान्यानप्यनिष्टयोगान्मंदाक्रांतयाह वंशच्छेत्तेति चंद्रः शशी दैत्येज्यः शुक्रः पापाः क्रूरग्रहाः आदित्यभौमसौराः एतैः खमदसुखवर्गैः खसंज्ञं दशमं मदस्थानं सप्तमं सुखसंज्ञं चतुर्थं एतेषु स्थानेषु चंद्रदैत्येज्यपापैः गतैः समवस्थितैः जातो वंशच्छेत्ता भवति एतदुक्तं

वंशच्छेत्ता खमदसुखगैश्चंद्रदैत्येज्यपापैः शिल्पी त्र्यंशे शशिसुतयुते केंद्रसंस्थार्किदृष्टे
दास्यां जातो दितिसुतगुरौ रिःफगे सौरभागे नीचेर्केंद्वोर्मदनगतयोर्दृष्टयोः सूर्यजेन ६

भवति यस्य जन्मनि चंद्रमा दशमः शुक्रः सप्तमः पापाश्चतुर्थस्थाः स वंशच्छेत्ता तत्कृतो वंशः उच्छिद्यते कुलविच्छित्तिर्भवति दुर्योधनप्रायः शिल्पी त्र्यंश इति शशिसुतेन बुधेन युक्तो यः अंशो द्रेष्काणः स यस्य राशेः संबंधी तस्मिन्स राशिः लग्नकेंद्रस्थेनार्किणा सौरेण दृष्टे जातः शिल्पी भवति चित्रकर्मादिकर्मणा जीवतीत्यर्थः अथ केचिद्बुधयुक्तराशेः शनैश्चरदृष्टिं वर्णयंति यथा राशौ दृष्टे द्रेष्काणोपि दृष्टः स्यात् यद्येषः पक्षः आचार्याभिप्रेतः स्यात् तदा बुधे केंद्रस्थे न सौरेण दृष्टे शिल्पी भवत्येवं वदेवाचार्यो वक्ष्यत् त्र्यंशग्रहणं नाकरिष्यत् कृतवांश्चातो ज्ञायते नैतदाचार्यस्याभिप्रेतमिति तेन त्र्यंशग्रहणं कृतम् तस्माद्द्रेष्काणराशेर्दृष्टिविचारः न केवलं यथा चाह हि लग्नराशेः स्वनाथेनेत्यत्रैवोदाहार्यं दास्यां जा

नइत्यादि द्वित्रिस्कतगुरोशुक्रके रिःफगेलग्नाद्द्वादशेनकेवलंयावत्सौरभागेशनैश्चरनवांशकव्यवस्थितेदास्यांजातः दासीपुत्रोजातइतिवक्तव्यम् नीचेकेंद्रोरिति अर्केन्द्वोः रविशशिनोः द्वयोरपिलग्नान्मदनगतयोः सप्तमस्थानस्थयोः सूर्यजेनसौरेणदृष्टयोरवलोकितयोः जातोनीचोभवति स्वकुलानुचिताधर्मकर्मकृदित्यर्थः ६ अथान्यानप्यनिष्टयोगान् शार्दूलविक्रीडितेनाह पापालोकितयोरिति सितः शुक्रः अथावनिजोंगारकः एतयोरस्तयोः लग्नात्सप्तमगतयोरपि पापालोकितयोः पापग्रहदृष्टयोर्जातस्य बाध्यरुक् भवति सर्वप्रसिद्धः यत्रतत्रराशौचंद्रेशशिनिकर्कटेवृश्चिकांशयोरन्यतमस्थेतत्रचान्येनपापेनयुतोजातोगुह्यरुग्भवति गुह्यरुक्पुरीषव्याधिः श्वित्रीत्यादि अशुभयोः सौरारयोः रिःफधनस्थयोः

पापालोकितयोःसितावनिजयोरस्तस्थयोर्बाध्यरुक् चंद्रेकर्कटवृश्चिकांशकगतेपापैर्युतेगुह्यरुक् श्वित्रीरिःफधनस्थ
योरशुभयोश्चंद्रोदयेस्तेरवौचंद्रेस्ववनिजेस्तगेचविकलोयद्यर्कजोवाशिगः ७ अंतःशशिन्यशुभयोर्मृगगेपतंगेश्वा
सक्षयप्लिहकविद्रधिगुल्मभाजः शोषीपरस्परगृहांशगयोरवींद्वोः क्षेत्रेथवायुगपदेकगयोः कृशोवा ८

द्वादशद्वितीयगतयोः चंद्रेलग्नेउदयस्थेरवावादित्येस्तेसप्तमस्थेजातः श्वित्रिश्वेतकुष्ठयुक्तोभवति चंद्रेस्वेदशमस्थेऽवनिजेभौमेऽस्तगेसप्तमस्थे अस्मिन्योगेयद्यर्कजः सौरोवेशिस्थानस्थोभवति तदाजातोविकलांगहीनोभवति ७ अथान्यानप्यनिष्टयोगान्वसंततिलकेनाह अंतरिति यत्रतत्रस्थेशशिनिचंद्रेअशुभयोः सौरभौमयोरंतर्मध्येस्थितेपतंगेसूर्येचमृगगतेमकरस्थेजाताः श्वासक्षयप्लीहकविद्रधिगुल्मभाजोभवंति श्वासःप्रसिद्धः क्षयः शरीरक्षयः प्लीहःप्रसिद्धः वामकुक्षिसंस्थोमांसखंडः कविद्रधिगुल्मौरोगौप्रसिद्धौ एषामन्यतमेनरोगेणार्दि

नोभवतीत्यर्थः केचिदत्रैकवचनंपठंति श्वासक्षयप्लीहकविद्रधीगुल्मभावःस्यादिति शोषीति रवींद्वोः चंद्रार्कयोः परस्परमन्योन्यग्रहांशगयोः आदित्यः कर्कटेसिंहेचंद्रोथवायत्रतत्र राशौ सिंहांशकेचंद्रः कर्कटांशेसूर्यः तदाजातः शोषीभवति अत्रकेचित्परस्परग्रहांशगयोरवींद्वोरिति सिंहेसिंहांशकेस्थितेचंद्रे कर्कटेकर्कटांशस्थेसूर्येचजातः शोषीक्षयीभवतीतिविपर्ययंति तच्चायुक्तं यस्मात्भगवान्गार्गिः परस्परगृहयातौयदिवापितदंशगौ भवेतामर्कशीतांशूतदाशोषीप्रजायते १ क्षेत्रेथवेति युगपत्तुल्यकालंतयोरेवपरस्परक्षेत्रेयदाद्वावपिभवतः सिंहेयदोभावपित्यर्कचंद्रौस्थितौकर्कटेवाभवतः तदाजातः शोषीभवति कृशोवाकृशोदुर्बलः ८ अथान्यानप्यनिष्टयोगान्वसंततिल

चंद्रेशिवमध्यझषकर्किमृगाजभागे कुष्ठीसमंदरुधिरेतदवेक्षितेवा
यातेस्त्रिकोणमलिकर्किवृषेमृगेच कुष्ठीचपापसहितेरवलोकितेवा ९

केनाह चंद्रइति अश्विमध्येधन्वीपंचमनवांशकेचंद्रेस्थितेतत्रचसमंदरुधिरे मंदेनसौरेणरुधिरेणांगारकेणयुक्ते ययासंभवमन्यतमेनतदवेक्षितेवाताभ्यामन्यतमेनदृग्जातः कुष्ठीभवति अथवायत्रतत्रराशौ झषकर्किमृगाजभागे झषोमीनः कर्कीकुलीरः मृगोमकरः अजोमेषः एषामन्यतमेनवांशकस्थेचंद्रे तत्रमंदरुधिरयोरन्यतमेनयुतेदृष्टेवाजातः कुष्ठीभवति अत्रचंद्रोयदाशुभग्रहदृष्टोभवति तदाकंडुविकारी भवति नकुष्ठी यस्माद्यवनेश्वरः मीनांशकेमेषमृगांशकेवाचंद्रस्थितोनैवाहपापदृष्टः किलासकुष्ठादिविनष्टदेहोपिशुभेक्षितः कंडुविकारिणंच-भयातेस्त्रिकोणमिति अलिकर्किवृषैः वृश्चिककुलीरवृषभैः मृगेचमकरेएतैश्चत्रिकोणयातैः प्राप्तैः तथाविधोलग्नोभवति यस्यैषामन्यत

मेनवमेपंचमेवास्थानेभवति सचपापानामन्यतमेन युक्तोदृष्टोवाभवति तदाजातः कुष्ठीभवति ९ अथान्यानप्यनिष्टयोगान्वसंततिलकेनाह निधनेति रविरादित्यः चंद्रःशशी आरःअंगारकः यमःसौरः एतेरविचंद्रारयमाः तथातथायेनकेनप्रकारेणनिधनारिधनव्ययस्थिताः अष्टमषष्ठद्वितीयद्वादशकास्तदाजातानामनुजानांमनुष्याणांमनेत्रतामांध्यंजनयंत्युत्पादयंति यथातथेतिक्रमनिवारणार्थः तांचानेत्रतांबलवद्ग्रहदोषकारणैः तेषांचतुर्णांग्रहाणांमध्याद्योबलवांस्तस्ययोवातपित्तश्लेष्मणांमध्याद्दोषउक्तः तेनदोषकारणेनतत्प्रकोपेनतस्याक्षिविनाशोभवति १० अथान्यानप्यनिष्टयोगान्वैतालीयेनाह नवेति अशुभाः पापाः नवमायतृतीयधीयुताः नवमएकादशेतृतीयेधीस्थाने पंचमे एतेषु

निधनारिधनव्ययस्थितारविचंद्रारयमायथातथा बलवद्ग्रहदोषकारणैर्मनुजानांजनयंत्यनेत्रताम् १०
नवमायतृतीयधीयुतानचसौम्यैरशुभानिरीक्षिताः नियमाच्छ्रवणोपघातदारदवैकृत्यकराश्चसप्तमे ११
उदयत्युडुपेऽसुरास्यगेसपिशाचोऽशुभयोस्त्रिकोणयोः सोपप्लवमंडलेरवावुदयस्थेनयनापवर्जितः १२

यथासंभवंयुताः समवस्थिताः तेचसौम्यैः शुभग्रहैर्निरीक्षितानदृष्टः तदाबलवद्ग्रहदोषकारणेनैवपुरुषस्यनियमान्निश्चयाच्छ्रवणोपघातदाः श्रोत्रयोः कर्णयोःउपघातदा बाधिर्यकराः अत्राशुभग्रहणेनार्कचंद्रारसौराः प्रागुक्ताएवज्ञेयाः रदवैकृत्यकराश्चसप्तमेइति तएवार्कचंद्रारसौराः लग्नात्सप्तमेस्थानेस्थिताः सौम्यैरदृष्टाः रदानांदंतानांवैकृत्यकराःस्युः ११ अथान्यानप्यनिष्टयोगान्वैतालीयेनाह उदयतीति उडुपेचंद्रेउदयतिलग्नगतेतस्मिंश्चनाकपाश्वगेराहुग्रस्ते तस्माच्चलग्नादशुभयोः सौरभौमयोः त्रिकोणयोः नवमपंचमस्थयोःजातःसपिशाचोभवति पिशाचाधि

ष्ठितोभवतीत्यर्थः एवंवावादित्येमंडलेसोपप्लवे अस्फरास्यगे अर्केराहुग्रस्तेतस्मिन्नेवोदयस्थेलग्नगेलग्नाद्दशमयोः सौरभौमयोः त्रिकोणगतयोः जातोनयनापवर्जितोभवति अंधइत्यर्थः १२ अथान्यानप्यनिष्टयोगान् शार्दूलविक्रीडितेनाह संस्पृष्टइति यस्यजन्मनिमंदगः सौरेद्यूनेसप्तमेयुतःस्थितोभवति विलग्नेचगुरुःबृहस्पतिः सपवनेनवायुनासंस्पृष्टोभवति वातरोगीभवतीत्यर्थः अवनीः भूः तस्याःजातोवनिजःतस्मिन्नस्तभवनेसप्तमस्थानेस्थितेविलग्नाश्रितेप्राग्लग्नगेचजीवेगुरौजातः सोन्मादोभवति विचित्तइति तद्वदितिसूर्यसुतःसौरःतस्मिन्नुदयेलग्नेस्थितेअवनिसुतेभौमेधर्मात्मजद्यूनगे नवमपंचमसप्तमस्थानानामन्यतमस्थानस्थेजातनरस्तद्वत्सोन्मादएवभवति केचित्तद्वाहुः यमोदयइति

संस्पृष्टःपवनेनमंदगयुतेद्यूनेविलग्नेगुरौसोन्मादोवनिजेस्थितेऽस्तभवनेजीवेविलग्नाश्रिते तद्वत्सूर्यसुतोदयेऽवनि
सुतेधर्मात्मजद्यूनगेजातोवासहस्ररश्मितनयेक्षीणेव्ययेशीतगौ १३ राश्यंशपौष्णाकरशीतकरामरेज्यैर्नीचाधि
पांशकगतैररिभागगैर्वा एभ्योल्पमध्यबहुभिःक्रमशःप्रसूताज्ञेयाःस्करभ्युपगमक्रयगर्भदासाः १४

अथवाक्षीणेशीतगौचंद्रेसहस्ररश्मितनये नशनैश्चरेणसंयुक्ते व्ययंद्वादशस्थानंयातेप्राप्तेवाग्रहणात्सोन्मादएवभवति १३ अथान्यानप्यनिष्टयोगान्वसंततिलकेनाह राश्यंशपेति यस्मिन्नवांशकेचंद्रोवर्ततेसराश्यंशकः तस्यपःपतिः राश्यंशपः उष्णकरःसूर्यः शीतकरश्चंद्रः अमरेज्योजीवः एतैःराश्यंशपौष्णाकरशीतकरामरेज्यैः आत्मीयादुच्चात्सप्तमराश्यधिपोनीचाधिपस्तदीयेनीचाधिपतिनवांशकेव्यवस्थितैः अरिभागगैः शत्रुनवांशगैर्वाजातादासाभवंति एभ्योल्पमध्यबहुभिरिति एभ्योग्रहेभ्यः एकोल्पःद्वौमध्यमौ यत्रचत्वारोवावहवः एभ्यःप्र

सूताः क्रमशो दासा भवंति यस्यैको नीचाधिपांशगे शत्रुनवांशके वा गतो भवंति सोऽभ्युपगमे नात्मना जीवितार्थी दासत्वमुपपद्यते यस्य द्वौ सौम्येन क्रीतो विक्रीतः येन क्रीतस्तस्य दासो भवति यस्य त्रयश्चत्वारो वा सगर्भदासो दासस्य पुत्रो दास्यां वा पुत्रो लोके गृहदास इति प्रसिद्धः १४ अथान्येषामनिष्टयोगानां ज्ञानार्थं हरिण्याह विकृतेति वृषः प्रसिद्धः अजो मेषः हयो धन्वी एषामुदयेऽन्यतमे लग्ने पापैर्दृष्टेऽवलोकिते विकृतदशनो विरूपदंतो भवति अशुभसंज्ञानि पापग्रहराशयः मेषसिंहवृश्चिकमकरकुंभाः एषामन्यतमे लग्ने हये धन्विनि वा वृषभेऽपि वा लग्ने पापग्रहैर्जातः खलइलखल्वाटो भवति रवावादित्ये नवमसुतगे लग्नान्नवमपंचमयोरन्यतमस्थानस्थे पापग्रहदृष्टे जातः अदृढेक्षणो भवत्यसारनय-

विकृतदशनः पापैर्दृष्टे वृषाजहयोदये खलतिरशुभक्षेत्रे लग्ने हये वृषभेऽपि वा नवमसुतगे पापैर्दृष्टे रवावदृ-
ढेक्षणो दिनकरसुतेऽनेकव्याधिः कुजे विकलः पुमान् १५ व्ययसुतधर्मगैरसौम्यैर्भवनसमाननिबंधनं
विकल्प्यम् भुजगनिगडपाशभृद्दृकाणैर्बलवदसौम्यनिरीक्षितैश्च तद्वत् १६ ७ ७

नः एवं दिनकरसुते सौरे लग्नान्नवमपंचमस्थे पापैः दृष्टेऽनेकव्याधिः बहुरोगो भवति एवमेव कुजे भौमे लग्नान्नवमपंचमस्थे पापदृष्टे पुमान् पुरुषो जातो विकलोऽङ्गहीनो भवति १५ अथान्यानप्यनिष्टयोगान्पुष्पिताग्रयाह व्ययसुतेति असौम्यैः पापैः व्ययसुतधनधर्मगैः द्वादशपंचमद्वितीयनवमस्थानानां यथासंभवमन्यतमस्थानस्थैः जातस्य निबंधनं भवति स बध्यत इत्यर्थः तच्च निबंधनं भवनसमानं राशिसदृशं समाणीये न प्रकारेण स राशिः बध्यते तेन प्रकारेणेत्यर्थः तद्यथा मेषवृषधनुर्धराणामन्यतमे लग्ने तस्य रज्ज्वादिना बंधनं भवति मिथुनकन्यातुलाकुंभानाम

न्यतमे लग्ने निगडैः बध्यते कर्कटमकरमीनानामन्यतमे लग्ने बंधूनं विनाद्दुर्गे स्थितो रक्ष्यते वृश्चिकलग्ने भूगृहे बध्यते भुजगनिगडपाशभृदिति यस्मिन्द्रेष्काणे पुरुषो जातः स चेद्भुजगपाशभृद्भवति सर्पद्रेष्काणो निगडपाशभृद्द्रेष्काणः स च प्रथमपंचमनवमानामित्यनयोर्गणनयोर्यस्य राशेः संबंधी भवति स चेद्राशिः बलवताव्यवस्थितः असौम्येन पापग्रहेणान्यतमेन दृश्यते तथा जातस्य तद्भवनसमानं निबंधनं तदुक्तं नैवमकारेण विकल्प्य नभुजगद्रेष्काणाः कर्कटाद्यः वृश्चिकाद्यः वृश्चिकद्वितीया मीनांत्यस्य निगडस्य द्रेष्काणे मकराद्यः भुजगनिगडपाशभृदिति केचिद्व्याख्यानं तत्र पाशभृदनेन द्रेष्काणो न पठितः तस्माद्भुजगनिगडपाशभृन्निगडपाशभृदिति व्याख्येयं भुजगपाशभृन्निगडपाशभृद्भुजगादिस्सार्गेर्व

पुरुषवचनोपस्मारार्तः क्षयीच निशापतौ सरवितनये वक्रालोकं गते परिवेषगे रवि
यमकुजैः सौम्यादृष्टैर्नभस्थलभाश्रितैर्भृतकमनुजः पूर्वोद्दिष्टैर्वराधममध्यमा १७
इति बृहज्जातके० वनिष्टाऽध्यायः समाप्तः २३

लसौम्यनिरीक्षितैश्चेतद्भूत् इति स्पष्टो भवेदित्यर्थः अस्मिन् श्लोके पठीन इति १६ अथान्याननिष्टयोगान् हरिण्याह परुषवचन इति निशापतौ चंद्रे सरवितनये सौरसहिते वक्रालोकगते भौमेन दृष्टे परिवेषगे तत्काल परिवेषयुक्ते जातः पुरुषः परुषवचनः सदाऽप्रियाभिधायी अपस्मारार्तः क्षयी च भवति अत्र चंद्रमसस्त्रयः प्रकारा व्याख्याताः त्रयस्त्र दोषाः यस्यैकप्रकारश्चंद्रमा भवति तस्यैको दोषो भवति यस्य प्रकारद्वयं तेन चंद्रः सौरेणयुक्ते परुषवचनः सदैवाप्रियाभिधायी भवति सरवितनये भौम दृष्टे अपस्मारार्तोऽपस्मारः मृत्युः सरवितनये भौमदृष्टे तत्कालं परिवेषगे क्षयी भवति रवियमकुजैरिति रविरादित्यः यमः सौरः कुजो

गारकः एतैः नभस्स्थलमाश्रितैः दशमस्थानस्थैः सौम्यदृष्टैः शुभग्रहाणां मध्यान्न्हकेनचिद्दृष्टैरवलोकितैः जातो मनुजो मनुष्यो भृतको भवति तैः पूर्वोद्दिष्टैर्ग्रहैः रवियमकुजैः वराधममध्यमो भृतको भवति तेषां ग्रहाणामेवंविधेनैकेन भृतकोपि वरः श्रेष्ठो भवति अजुगुप्सितां भृतिं करोति द्वाभ्यां मध्यमो भवति मध्यमां भृतिं करोति त्रिभिरधमो जुगुप्सितां भृतिं करोति १७ इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृतौ अनिष्टाध्यायस्त्रयोविंशतिः २३ अथातः स्त्रीजातकाध्यायो व्याख्यायते तत्रादावेव पुरुषजन्मोक्तफलातिदेशं तदधिकं च वसन्ततिलकेनाह यद्यत्फलमिति नरभवे पुंजन्मनि यद्यत्फलमङ्गनानां स्त्रीणामक्षममसम्भाव्यं तत्पतिषु तद्भर्तृषु वदेद्ब्रूयात् पुंजन्मोक्तफलं यद्वृत्तात्ताम्रहागिरया-

यद्यत्फलं नरभवे क्षममङ्गनानां तत्तद्वदेत्पतिषु वा सकलं विधेयं तासां तु भर्तृमरणं निधने वपुस्तु लग्नेन्दु
गं सुभगतास्तमये पतिश्च १ युग्मेषु लग्नशशिनोः प्रकृतिस्थिता स्त्री सच्छीलभूषणयुता शुभदृष्टयो
श्च ओजस्थयोश्च मनुजाकृतिशीलयुक्ता पापा च पापयुतवीक्षितयोर्गुणोना २ ७ ७

दि तत्र यत्स्त्रीणां क्षमं योग्यं तत्तासामेव वक्तव्यम् यच्चाक्षमं न सम्भवति राज्यादि तत्पतिषु तज्जातककाले दृष्ट्वा वक्तव्यम् यच्च सम्भवति स्तनफादियोगानां फलं तदखिलं सकलमुभयोरेव वक्तव्यम् तानि च त्रिविधानि फलानि कानिचित्स्त्रीणां वक्तव्यानि कानिचित्पतिषु कानिचिद्द्वयोरपि वृत्तातामहागित्यालकारप्रदर्शनानि स्त्रीणामेव वक्तव्यानि राजयोगादिफलानि तत्पतिषु तत्पतीनां स्तनफादियोगफलानि सुखदुःखप्रदर्शकानि उभयोरपि अथवा सकलं समग्रं स्त्रीजातकफलं तत्पतिषु विधेयं वक्तव्यम् तासामित्यादि तासां स्त्रीणिषु

नेष्टमेस्थानेभर्तृमरणंयथावक्तव्यं तथापरिष्टाद्वक्ष्यति वपुस्तुशरीरंलग्नेंदुगंलग्नचंद्रयोर्गतम् तच्चापितासांयथावक्तव्यम् तथा वक्ष्यति तासांशुभगतासौभाग्ययाहृष्याविपतिर्वाताद्दगस्तमयेसप्तमस्थानाद्वक्तव्यम् तदपिवक्ष्यति यदुक्तं वपुस्तुलग्नेंदुगतत् १ पतिदर्शनं वसंततिलकेनाह युग्मेत्यादि लग्नशशिनोरुदयचंद्रयोरपिसमराशिषुस्थितयोः स्त्रीयोषित्प्रकृतिस्थितास्त्रीस्वभावाभवति प्रकृतौ स्वभावेतिष्ठति तयोरेवलग्नेंद्वोः शुभदृष्टयोः सौम्यग्रहावलोकितयोः सच्छीलभूषणयुता भवति सच्छीलशोभनचारित्रं तदेवभूषणमलंकरणं तेनयुता अथवाशोभनेनशीलेनभूषणैश्चयुता ओजस्थयोरिति तयोरेवलग्नेंद्वोरोजस्थयोर्विषमराशिगतयोःमनुजाकृति

कन्यैवदुष्टाव्रजतीह दास्यं साध्वीसमायाकुचरित्रयुक्ता
भूम्यात्मजर्क्षेक्रमशोंशकेषु वक्रार्किजीवेंदुजभार्गवानाम् ३

शीलयुक्ता पुरुषाकारा पुरुषशीलाचभवति तयोः लग्नेंद्वोः पापयुतवीक्षितयोः पापसंयुतयोः अवलोकितयोर्वापापापापशीलागुणोनासर्व गुणरहिताचभवति अर्थादेवैकस्मिसमराशिगे अन्यस्मिन्विषमराशिगेपुंस्त्रियोर्मध्यस्वरूपाकाराभवति एवमेकस्मिन्शुभग्रहयुते अन्यस्मिन्पापयुतेसच्छीलाभवति असच्छीलाचमिश्रित्यर्थः एवमेकस्मिन् शुभग्रहदृष्टे अन्यस्मिन्पापदृष्टेपि एवमुभयोरपिसौम्यायुतदृष्टयोश्च अनयादिशाशेषकल्पनाकार्या २ अथभौमर्क्षेलग्नगेचंद्रगेवाभौमादित्रिंशांशकजातायाःस्वरूपमिंद्रवज्रयाह कन्यैवेति भूम्यात्मजर्क्षे भौमक्षेत्रेमेषवृश्चिकयोरन्यतमेलग्नगतेचंद्रगतेवा तत्रवक्रार्किजीवेंदुजभार्गवानां कुजयमजीवज्ञसितानांमशकेषु त्रिंशद्भागेषुक्रमेणफलनिर्देशोवक्तव्यः तद्यथा भौम

लग्नेभौमत्रिंशांशके लग्नगतेचंद्रगते वाजाताकन्यैवदुष्टाभवत्यनूढापि सा पुरुषसंप्रयोगेन व्रजतिगच्छतीत्यर्थः सौरत्रिंशांशकजाताकन्यैवदास्यंदासभावं व्रजति जनयति इहास्मिन्भौमक्षेत्रेजीवत्रिंशांशकेसाध्वी सच्छीलाभवति बुधत्रिंशांशकेजातासामायायुक्ताभवति शुक्रत्रिंशांशकेजाताकुचारित्रयुक्ताभवति दुर्वृत्ताइति एवंत्रिंशांशकफलंसर्वंद्वारगुणनया परीक्षितव्यम् ३ अथबुधशुक्रक्षेत्रयोरन्यतमेलग्नेचंद्रगेवाभौमादित्रिंशांशकजातायाः स्वरूपमिंद्रवज्रयाह दुष्टेति अंशकेषु वक्रार्किजीवेंदुजभार्गवाणामितिसूर्यश्चानुवर्तते असुर-पूजितः शुक्रस्तस्यर्क्षे वृषतुलयोरन्यतमेलग्नगेचंद्रगेवा भौमत्रिंशांशकेजातादुष्टादुष्टशीलाभवति शनित्रिंशांशकेजाता पुनर्भूःपाणिग्र

दुष्टापुनर्भूः सगुणाकलाज्ञाख्यातागुणैश्चासुरपूजितर्क्षे स्या
त्कापटीक्लीबसमासतीचबौधेगुणाढ्याप्रविकीर्णकामा ४

हणादनंतरं अन्यस्य भार्याभवति जीवत्रिंशांशकेजाता सगुणागुणवतीभवति बुधत्रिंशांशकेजाताकलाज्ञाभवति गीतवाद्यनृत्यक्रियादिषु कुशला शुक्रत्रिंशांशकेजातागुणैः शीलादिभिः ख्याताभवति स्यात्कापटीत्यादिबौधे मिथुनकन्ययोरन्यतमे लग्नगेचंद्रगेवा भौमत्रिंशांशकेजाता कापटीकपटासक्ताभवति सौरत्रिंशांशकेजाताक्लीबसमानपुंसकतुल्याभवति गुरुः बृहस्पतित्रिंशांशकजातासाध्वीभवति बुधत्रिंशांशकजाता गुणाढ्यागुणबहुलाभवति शुक्रत्रिंशांशकजाता प्रविकीर्णकामाविक्षिप्तमन्मथासर्वपुरुषगामिनीभवतीति

४ अथचंद्रार्कजीवसौरक्षेत्राणा मन्यतमेलग्नगेचंद्रगे वाभौमत्रिंशांशकजातायाःस्वरूपंशार्दूलविक्रीडितेनाह स्वच्छंदेति इंदुभेकर्कटेलग्नेतेहनेवाचंद्रेभौमत्रिंशांशकजातास्वच्छंदास्वैरिणीयथेष्टव्यवहारिणीभवति सौरत्रिंशांशकेपतिघातिनीभवतिजीवत्रिंशांशकेजाताबहुगुणाभवति बुधत्रिंशांशकजाताशिल्पिनीशिल्पकर्मनिरताभवति शुक्रत्रिंशांशकजाताअसाध्वीदुःशीलाभवति न्याचरेति अर्कभेसिंहलग्नेतद्गतेवाचंद्रेभौमत्रिंशांशकेजातान्याचारापुरुषाचाराभवति तुरीवाचारोयस्याः केचिद्वाचाराइतिभवति बहुभाषिणी सौरत्रिंशांशकेजाताकुलटा असाध्वीभवति जीवत्रिंशांशकेजातानृपवधूराजभार्याभवति बुधत्रिंशांशकेजातापुंचेष्टापुरुषस्वभावाभवति शुक्रत्रिंशांशकेजाता

स्वच्छंदापतिघातिनीबहुगुणाशिल्पिन्यसाध्वींदुभेन्याचाराकुलटार्कभेनृपवधूपुंचेष्टितागम्यगा
जैवेनैवगुणाल्परत्यतिगुणाविज्ञानयुक्तासतीदासीनीचरतार्किभेपतिरतादुष्टाप्रजास्वांशकैः ५

ता अगम्यगागम्यपुरुषगामिनीभवति जीवक्षेत्रेधन्विमीनयोरन्यतमेलग्नगतेतद्गतेवाचंद्रेभौमत्रिंशांशकजातानैकगुणाबहुगुणाभवतिसौरत्रिंशांशकजाता अल्परतीशीघ्रवेगाभवति बृहस्पतित्रिंशांशकजाताअतिगुणाबहुगुणवतीभवति बुधत्रिंशांशकेजाताविज्ञानयुक्ता आश्चर्ययुक्ताभवति शुक्रत्रिंशांशकेजाता असती असाध्वीभवति दासीति आर्किभेसौरक्षेत्रेमकरकुंभयोरन्यतमेलग्नगेचंद्रगेवाभौमत्रिंशांशकजातादासीभवति सौरत्रिंशांशकजातानीचरतानीचपुरुषसक्ताभवति जीवत्रिंशांशकजातापतिरताभर्तृभक्ताभवति बुधत्रिंशांशकजातादुष्टाभवति शुक्रत्रिंशांशकेजाताऽप्रजाभवतीवंध्या ५ एतदर्शकैरितितदर्थमनुष्टुभाह शशीति राशिं राशिमधिकृत्ययदेतत्त्रिंशांशकेऽक्तंफलं तच्छशिलग्न-

समायुक्तैश्चंद्रलग्नयुक्तैस्त्रिंशांशकैः यस्मिन्राशौ यद्ग्रहः त्रिंशांशके चंद्रमा भवति तद्वत्फलं वाच्यं यो वा लग्ने भवति तस्य यः त्रिंशांशः तद्वशाद्वा कथमुच्यते बलाबलविकल्पेनेत्यादि चंद्रलग्नयोः यो बलवान्स यत्र राशौ यत्र त्रिंशांशके भवति व्यवस्थितः तस्य यदुक्तं फलं तदेवो विचिंतयेत् एतदुक्तं भवति अन्यस्मिन्राशावन्यस्मिन्त्रिंशांशके चंद्रमा भवति अन्यस्मिन्राशौ अन्यस्मिंस्त्रिंशांशके लग्नात्तदा तयोर्यो बलवान् स यस्मिन्त्रिंशांशके भवति तस्यैव फलं वदेत् यो बलरहितस्तस्य फलं न भवतीति ६ अथ यस्मिन् योगे जाताः स्त्रियः पुरुषाकारसंस्थाभिः सह मदनं शमयंति तद्योगद्वयज्ञानं महर्षिर्यथाह दृक्संस्थाविति असितः सौरः सितः शुक्रः एतावसितसितौ परस्परांशे अन्योन्यांशगतौ सौरः शुक्रांशगतः

शशिलग्नसमायुक्तैः फलं त्रिंशांशकैरिदम् बलाबलविकल्पेन तयोरुक्तं विचिंतयेत् ६ दृक्संस्थावसितसितौ परस्परां
शे शौक्रे वा यदि घटराशिसंभवोंशः स्त्रीभिः स्त्रीमदनविषानलं प्रदीप्तं संशांतिं नयति नराकृतिस्थिताभिः ७ ७

शुक्रः सौरांशगतस्तौ च परस्परं दृक्संस्थौ अन्योन्यं पश्यतः एको योगः अथवा शौक्रे राशौ वृषतुलयोरन्यतमे लग्नगते तत्कालं यदि घटराशिसंभवोंशः कुंभनवांशकोदयो भवति तदा द्वितीयो योगः अस्मिन् योगद्वये जाता स्त्री अन्याभिरपराभिः स्त्रीभिः योषिद्भिः नराकृतिस्थिताभिः पुरुषसंस्थानाभिः पुरुषाकारयुताभिः मदनविषानलं प्रदीप्तं कामविषाग्निं प्रज्वालितं शांतिं नयति शमयति एतदुक्तं भवति अन्या स्त्री स्वजघनेन पुरुषरूपेण चर्ममयं लिंगं बध्वा पुंवत् तस्या रतिमभिजनयति यतोतिकामार्तत्वात् पुरुषयोगं गंतुं न शक्नोति ७ अथास्तमये पतिस्त्वनियदुक्तं तद्विज्ञानं शार्दूलविक्रीडितेनाह शून्येति लग्नाच्चंद्राद्वा यः सप्तमो राशिः स यदि शून्यः सर्वग्रहवियुक्तो भवति अबले बलहीनश्च नास्मि

भर्त्तभवनेशून्ये अबलेच बलरहिते तथासौम्यैः शुभग्रहैर्निरीक्षितेनकेनचिच्छुभग्रहेण दृश्यमानेन केनचित्सौम्यग्रहेण युतेजातायाः भर्ताकापुरुषः कुत्सितपुरुषोभवति अथवालग्नाच्चंद्राद्वायः सप्तमोराशिस्तत्र बुधमंदयोर्ज्ञसौरयोरन्यतमोस्थितेजातायाः भर्ताक्लीबः पुरुषाकारहीनोभवति यस्याश्चरगृहंचरराशिः सप्तमेभवति तस्याः नित्यंसर्वकालंभर्ताप्रवासान्वितः प्रवासशीलोभवति अर्थाद्वास्थिरेसप्तमेनित्यंगृहेस्थितोभवति द्विःस्वभावेकिंचित्प्रवासेकिंचिद्गृहेस्थितोभवति उत्सृष्टारविणाकुजेनविधवेति तरणौरवावस्तास्थितेसप्तमगेजातापतिनोत्सृष्टाभर्त्रात्यक्ताभवति एवंकुजेसप्तमगेतेतस्मिंश्चाशुभैः पापैः वीक्षितेबाल्येविधवारंडाविगतभर्तृकाभवति अर्कतनयेसौरेद्यूनेसप्तमगेत-

शून्येकापुरुषोबलेस्तभवनेसौम्यग्रहावीक्षितेक्लीबोस्तेबुधमंदयोश्चरगृहेनित्यंप्रवासान्वितः उत्सृ
ष्टारविणाकुजेनविधवाबाल्येस्तराशिस्थितेकन्यैवाशुभवीक्षितेर्कतनयेद्यूनेजरांगच्छति ८ ७

स्मिंश्चाशुभैः पापैर्वीक्षितेदृष्टेकन्यैवजरामुपगच्छति कुमार्येववृद्धाभवति वृद्धत्वंप्राप्नोतीति विवाहंनकरोतीत्यर्थः अत्रचंद्रलग्नयोर्बलवशादेवैतद्वक्तव्यं ८ ननुचंद्रात्सप्तमस्थानादप्येतत्फलंकथमवगम्यतेउच्यते सप्तमेस्थानेचंद्रमसः फलदर्शनाभावात् पुनरपिजाताकीदृशीभविष्यतीतितज्ज्ञानंशार्दूलविक्रीडितेनाह आग्नेयैरिति एकैकस्मिन्पापग्रहेसप्तमेफलमुक्तंयदिबहवः आग्नेयाः क्रूराः सप्तमस्थाभवंति तदाप्रतिग्रहोक्तंफलंत्यक्त्वातैराग्नेयैरस्तराशिसहितैः विधवाभवतिमिश्रैः क्रूरैः सौम्यैश्च सप्तमस्थैः पुनर्भूर्भवेत् स्वपाणिग्राहिणंत्यक्त्वा अन्यस्यभार्याभवतीत्यर्थः द्विःसंस्कृता तथाचग्रंथांतरे पुनर्भूलक्षणमुक्तं स्वैरिणीस्वपतिंहित्वासवर्णंकामतः श्रयेत् अक्षतंचप्रजाद्वारंपुनर्भूःसंस्कृतापुनःक्रूर

इतिक्रूरआदित्यांगारकशनैश्चराणामन्यतमेऽस्तगेलग्नात्सप्तमस्थेतस्मिंश्चहीनबलेसर्वबलरहितेतथाभूतेसौम्यैरीक्षितेशुभग्रहाणांबुधगुरुसिता नामन्यतमेनदृष्टेजातास्त्रीपतिनाआत्मीयेनैवभर्त्राप्रोज्झितात्यक्ताभवति अन्योन्यांशगयोरितिसितःशुक्रः अवनिजोंगारकः एतयोःसितावनिजयो अन्योन्यांशगयोः परस्परनवांशकस्थितयोः यत्रतत्रराशौसितनवांशकेभौमोभौमनवांशकेशुक्रः तदासांगनास्त्री अन्यप्रसक्तापरपुरुषरताभवति अथवाद्यूनेलग्नात्सप्तमेस्थानेतावेवयद्यंगारकशुक्रौ शीतरश्मिसहितौ चंद्रसहितौभवतस्तथाप्यन्यपुरुषासक्ताभवति किंतुभर्तुरनुज्ञया पत्युराज्ञयेति ननुस्वातंत्र्येणेति ९ अथयेनयोगेनजातामात्रासहबधकीभवति योरुगार्दितयोनिर्येनचसुभगातद्योगत्रयंमालिन्याह

आग्नेयैर्विधवास्तराशिसहितैर्मिश्रैः पुनर्भूर्भवेत्क्रूरे हीनबलेस्तगेस्वपतिनासौम्येक्षितेप्रोज्झिता अन्योन्यांशग
योःसितावनिजयोरन्यप्रसक्तांगनाद्यूनेवायदिशीतरश्मिसहितौभर्तुस्तदानुज्ञया ९ सौरारर्क्षेलग्नगेसेंदुशुक्रे
मात्रासार्द्धंबंधकीपापदृष्टे कौजेस्तांशेशौरिणाव्याधियोनिश्चारुश्रोणीवल्लभासद्ग्रहांशे १० ५ ५

सौरारर्क्षेइति सौरःशनैश्चरः तदृक्षेमकरकुंभौ आरोभौमस्तदृक्षेमेषवृश्चिकौ एषामन्यतमेलग्नगतेतस्मिंश्चसेंदुशुक्रेइंदुनाचंद्रेणशुक्रेणचसंयुक्ते तथाभूतेपापदृष्टेपापग्रहावलोकितेजाताबंधकीपरपुरुषगामिनीभवति नकेवलं यावन्मात्रासार्द्धंजनन्यासहबंधकीजातातन्मातापिबंधकीपर पुरुषगामिनीभवति अस्तांशेलग्नात्सप्तमेस्थानेयोराशिस्तत्कालकौजोभौमनवांशकोभवति तस्मिंश्चकौजेऽस्तांशेसौरिणार्किजेनदृष्टेजाता व्याधियोनिः सरोगगाभवति यदुक्तं सुभगतास्तमये तदर्थमाहचारुश्रोणीवल्लभासद्ग्रहांशइति यदालग्नात्सप्तमेस्थानेसद्ग्रहस्यशुभ

ग्रहस्यनवांशकोदयो भवति तदाचारुश्रोणीशोभनभगावहुभापत्युः प्रियाचभवति १० अथयस्याःसप्तमस्थानंशून्यंभवतितस्याःशनैश्च
रांगारकशुक्रक्षेत्रेतद्दशेवासप्तमेयादृशोभवतितद्विज्ञानंमालिन्याह वृद्धइति यस्याजन्मनिलग्नात्सप्तमेस्थानेसूर्यजस्यसौरस्यर्क्षेमकरकुंभयोः
रन्यतमसंबंधीनवांशकोवासप्तमेभवतितस्याःवृद्धःमूर्खश्चभर्ताभवतितस्याःआवनेयस्यांगारकस्यर्क्षेमेषवृश्चिकयोरन्यतमस्तद्दशकोवासप्तमेभवति-
तस्याः स्त्रीलोलः स्त्रीषुस्पृहयालुः क्रोधनः क्रोधशीलश्चभर्ताभवति एवंशौक्रराशौवृषतुलयोरन्यतमे तदंशकेवासप्तमस्थेकांतोतीवदर्श
नीयोऽतीवसौभाग्ययुक्तोवहुभश्चभर्ताभवति बौधेमिथुनकन्ययोरन्यतमेतदंशकेवासप्तमस्थेजातायाः भर्ताविद्वान्पंडितोनैपुण्यज्ञश्चसर्वत्र

वृद्धो मूर्खः सूर्यजर्क्षेंशकेवास्त्रीलोलःस्यात्क्रोधनश्चावनेये शौक्रेकांतोतीवसौभाग्ययुक्तोविद्वान्भर्तानैपुणज्ञश्च
बौधे ११ मदनवशगतोमृदुश्चचांद्रेत्रिदशगुरौगुणवान्जितेंद्रियश्च अतिमृदुरतिकर्मकृच्चसौर्येभवतिगृहेस्तम
यस्थितेंशकेवा १२

सूक्ष्मदृष्टिर्भवति ११ अथचंद्रराशौसप्तमेतन्नवांशकेजीवराशौवादित्यराशौवातन्नवांशकेवातद्विज्ञानंपुष्पि
ताग्रयाह मदनेति यस्याः जातायाः सप्तमेस्थानेचांद्रोराशिःकर्कटस्तद्दशकोवाभवति तस्याः भर्तामदनवशगतः कामातुरोमृदुश्चाकठि
नश्चभवति त्रिदशगुरोःजीवस्यराशौधन्विमीनयोरन्यतमेसप्तमस्थे तदंशकेवाजातायाः भर्तागुणवान्शौर्यादिभिर्गुणैर्युक्तोजितेंद्रियो-
दांतश्चभवति सौर्यराशौसिंहेतदंशकेवासप्तमस्थेजातायाः भर्तातिमृदुरतीवाकठिनः अतिकर्मकृदतीवव्यापारकृद्भवति व्यापारकरण-
शीलःकेचिद्रतिकर्मकृदतिकामातुरोकामासक्तोभवति एवमस्तमयस्थितेसप्तमस्थानस्थेगृहराशावंशकेवाफलमभिहित यत्रान्यसंबंधीरा-

शिः सप्तमे वा इति अन्यसंबंधीनवांशःस्वतंत्रराश्यंशपयोः यो बलवांस्तदीयं फलं वाच्यमिति १२ अथ चंद्रशुक्रबुधानां द्वौ त्रयो वा लग्नगता यस्या भवंति तस्याः स्वरूपं वसंततिलकेनाह ईर्ष्येति यस्याः जन्मलग्ने शशिशुक्रौ चंद्रसितौ समेतौ भवतः साईर्ष्यान्विता मात्सर्ययुक्ता सुखपरा सुखासक्ता च भवति ज्ञेन्द्वोः बुधचंद्रयोः लग्नगतयोः कलासु निपुणा तत्कलासुखिता संजातसुखा वा भवति गुणाढ्या गुणबहुला च शुक्रज्ञयोः सितबुधयोर्लग्नगतयोरुचिरा दर्शनीया सुकान्ता सुभगा भर्तृवल्लभा कलाज्ञा च भवति त्रिष्वपीति यस्यास्त्रयोऽपि चंद्रबुधशुक्रा लग्नगता भवंति सानेकवसुसौख्यगुणा अनेकैर्वसुभिर्धनैः सौख्यैरनेकैर्बहुभिश्च गुणैर्युक्ता भवति अपिशब्दात्त्रिषु शुभेषु बुधगुरुसितेषु लग्नगतेषु जाता अनेकवसुसौख्यगुणा भवति १३ अत्र वृ:

ईर्ष्यान्विता सुखपरा शशिशुक्रलग्ने ज्ञेन्द्वोः कलासु निपुणा सुखिता गुणाढ्या शुक्रज्ञयोस्तु रुचिरा सुभगा कलाज्ञा
त्रिष्वप्यनेकवसुसौख्यगुणा शुभेषु १३ क्रूरेऽष्टमे विधवता निधनेश्वरांशे यस्य स्थितो वयसि तस्य समे प्रदिष्टा
सत्स्वर्थगेषु मरणं स्वयमेव तस्याः कन्यालिगोहरिषु चाल्पसुतत्वमिंदौ १४

वैतासां भर्तृमरणमिति यदुक्तं तद्विज्ञानं वसंततिलकेनाह क्रूरेऽष्टम इति यस्याः क्रूरग्रहोऽष्टमे स्थाने भवति तस्या विधवता भवति कस्मिन्काल इत्याह निधनेश्वरांशे इति निधनेश्वरोऽष्टमस्थानाधिपतिर्यस्य ग्रहस्य नवांशके भवति तस्य यद्वयस्तस्मिन् वयसि विवाहात्परतस्तस्याः वैधव्यं वक्तव्यं एकं द्वौ नव विंशतिरित्यादि ग्रहवयः एवं केचिद्वदंति वयं पुनः दशांतर्दशाकालं वयः शब्देन ब्रूमः यत्र निधनेश्वरश्चंद्रभौमयोरन्यतमांशे भवति तत्र चंद्रभौमयोर्वयः प्रमाणं वर्षत्रितयं तत्र प्रायः कुमारीणां विवाहासंभवस्तस्मादष्टमस्थानाधिपतिर्यस्यांशके व्यवस्थितस्तस्यांतर्दशाधिपति

स्तस्या विवाहात्परं विधवता प्रदिष्टोक्ता तास्त्विति यस्या जन्मनि क्रूरग्रहोऽष्टमगो भवति सद्ग्रहः शुभग्रहः कश्चिदर्थगो द्वितीयस्थानगतो भवति· तस्याः भर्तुः परस्तात् स्वस्यैव मरणं भवति यस्या जन्मनि कन्यायामलिनि वृश्चिके गवि वृषे हरौ सिंहे वा इन्दुः स्थितो भवति तस्या अल्पसुतत्वं स्वल्पपुत्रत्वं वक्तव्यम् कन्यालिगोहरिणामन्यतमश्चन्द्रराशिर्यस्यास्तस्याः अल्पाः पुत्रा भवन्तीति १४ अथ यस्मिन्योगे जाता पुरुषिणी भवति यस्मिंश्च ब्रह्मवादिनी भवति तद्योगद्वयं शार्दूलविक्रीडितेनाह सौर इति सौरे शनैश्चरे मध्यबलेनातिबलवति नचातिबलहीने तथा शीतांशुशुक्रेन्दुजैः शशिसितबुधैः बलेन वीर्येण रहितैः विवर्जितैः शेषैरादित्यभौमजीवैर्वीर्यसमन्वितैः सबलैर्यत्र तत्रावस्थितैर्यद्योजराशिः विषमराशिरुद्गमः

सौरे मध्यबले बलेन रहितैः शीतांशुशुक्रेंदुजैः शेषैर्वीर्यसमन्वितैः पुरुषिणी यद्योजराश्युद्गमः जीवारास्फु-
जिदैंदवेषु बलिषु प्राग्लग्नराशौ समे विख्याता भुवि नैकशास्त्रनिपुणा स्त्री ब्रह्मवादिन्यपि १५ छ छ

उद्गमो उदये लग्ने भवति विषमराशिः लग्ने जाता भवतीत्यर्थः तदा जाता मेषमिथुनसिंहतुलाधन्विकुंभानामन्यतमे सा पुरुषिणी भवति बहुपुरुषेत्यर्थः जीवारास्फुजिदैंदवेष्विति जीवो बृहस्पतिः आरो भौमः आस्फुजिच्छुक्रः ऐंदवो बुधः एतेषु यत्र तत्रावस्थितेषु बलिषु वीर्यवत्सु तथा प्राग्लग्ने यदि समराशिर्भवति तदा जाता स्त्री भुवि भूमौ विख्याता सर्वत्र प्रथिता अनेकशास्त्रकुशला अनेकेषु बहुषु शास्त्रेषु कुशला तज्ज्ञा ब्रह्मवादिन्यपि मोक्षशास्त्रे कुशला भवति १५ अथ यद्योगजाता प्रव्रज्यामाश्रयति तद्विज्ञानं महर्षिराह पापेति पूर्वं सप्तमस्थस्य ग्रहस्य पृथक्पृथक्फलमुक्तं तत्र लग्नात्पापक्रूरग्रहस्ते सप्तमस्थे यद्यन्यः कश्चिद्ग्रहो लग्नान्नवमगतो भवति तदासौ स्त्री प्रागुक्तं फलं न प्राप्नोति नवमगतस्य ग्रहस्य तुल्यां तत्कारि

तांप्रव्रज्यांयुवतिः स्त्रीअसंशयेननिःसंशयेनोपैतिप्राप्नोति एवंस्त्रीजातकंव्याख्यातं उद्वाहेइति अत्रयेयोगाव्याख्यातास्तेचेदुद्वाहेविवाहकालेभवं ति तदायोगोक्तफलंवाच्यम् तथातस्यावरणविधौकन्यामार्गणकालेप्रदानकालेकन्यादानकालेचचिंतायांप्रश्नकालेप्येवंसकलंसर्वंविधेयंवक्तव्यं स्त्रीजातकेषुयेशुभाशुभयोगाउक्तास्तेतत्रापिशुभाशुभावक्तव्याः नसकलजातकोक्ताः तेचयथाप्रदर्शितकालेनैवज्ञेयाः येषांचवक्ष्यमाणविवाह परलोकयोगैर्बाधोभविष्यति तेत्रनवक्तव्याः युक्त्यैतद्विवाहपटलमुक्तमिति १६ इतिश्रीमहोत्पलविरचितायांबृहज्जातकविवृत्तौस्त्रीजातकाध्या यश्चतुर्विंशतिः २४ अथातोनैर्याणिकाध्यायोव्याख्यायते तत्रादावेवाष्टमस्थानेग्रहदृष्टेवियुक्तेयुतेवायथाम्रियतेतद्विज्ञानंशार्दूलविक्रीडितेना

पापैस्तेनवमगतेग्रहस्यतुल्यांप्रव्रज्यांयुवतिरुपैत्यसंशयेन उद्वाहेवरणविधौप्रदानकाले
चिंतायामपिसकलंविधेयमेतत् १६ इतिबृहज्जातके॰स्त्रीजातकाध्यायश्चतुर्विंशतिः २४

ह मृत्युरिति बलिभिर्ग्रहैर्मृत्युग्रहेक्षणेनमृत्युर्भवति यस्यजन्मलग्नान्मृत्युग्रहमष्टमंस्थानंशून्यंयोग्रहोबलवान्पश्यति तस्यग्रहस्ययोधातुरु क्तस्तद्धातुकोपोद्भवस्तेनधातुनाप्रकुपितेनसम्म्रियते तद्यथाऽर्कस्यपित्तंचंद्रस्यवातकफौ भौमस्यपित्तंबुधस्यत्रयोपिवातपित्तश्लेष्माणः बृहस्प तेः कफः शुक्रस्यवातकफौ सौरस्यवातइति तत्संयुक्तभागात्तज्जइति तदित्यनेनलग्नादष्टमस्थानस्यपरामर्शः तेनाष्टमेनयुक्तेयद्भागात्रं तत्संयुक्त भागात्र तज्जातस्तत्रसंभूतः लग्नादष्टमोराशिः यस्मिन्नंगेकालाख्यपुरुषस्यवर्तते तस्मिन्नंगेदृष्टग्रहोक्तदोषकोपान्म्रियते भूरिभिर्बहुभिः वीर्यान्वितैः सबलैः बहुभवान्मृत्युः यदाबहवोपिवीर्यान्वितास्तच्छून्यमष्टमस्थानंपश्यंति तदायावंतः पश्यंति तावतांग्रहाणामुक्तदोषप्र-

कोपेन तेन बहवो दोषा यस्मिन् काले पुरुषाणां लग्नादष्टमराशिर्वर्तते तस्मिन्नंगेषु कुप्यन्निधनं कुर्वतीति आग्न्यंब्वायुधज इति सूर्यादिभिरष्टमे स्थाने स्थितैरग्न्यादिभिर्मृत्युर्भवति तद्यथा यस्य लग्नादष्टमे स्थानेऽर्को भवति तस्याग्निहेतुको मृत्युर्भवति एवं चंद्रेऽष्टमे जलहेतुकः भौमे आयुधहेतुकः बुधे ज्वरहेतुकः जीवे आमयकृतः अविज्ञातव्याधिहेतुकः शुक्रे तृट्हेतुकः सौरे क्षुद्धेतुक इति एतैर्ग्रहैर्बलिभिर्योगकैरेव मृत्युः शमनेन कर्मणा भवति बलहीनैरशमनेन मध्यबलैर्मध्यमेनेति विज्ञातमरणप्रकारस्य मरणदेशज्ञानार्थमाह निधनं चरादिष्विति यस्य निधनेऽष्टमस्थाने चरराशिर्भवति स परदेशे म्रियते यस्य स्थिरः स्वस्वदेशे यस्य द्विस्वभावः सोऽध्वप्रदेशे पथि म्रियत इति १ अथ शैलाद्याभिघातेषु ये योगे म्रियते॰

अथ नैर्याणिकाध्यायप्रारंभः मृत्युर्मृत्युग्रहेक्षणेन बलिभिस्तद्धातुकोपोद्भवस्तत्संयुक्तभगात्रजो बहुभवो वीर्यान्वितैर्भूरिभिः अग्न्यंब्वायुधजो ज्वरामयकृतस्तृट्क्षुत्कृतश्चाष्टमे सूर्याद्यैर्निधने चरादिषु परस्वाध्वप्रदेशेष्विति १

तान् शार्दूलविक्रीडितेनाह शैलाग्राभिहतस्येति सूर्यकुजयोः रविभौमयोः युगपत्तुल्यकालं स्वबंधुस्थयोर्दशमयोश्चतुर्थयोर्वा जातस्य शैलाग्राभिहतस्य शैलाग्रप्रहारेणाभिहतस्य मृत्युर्भवति कूप इति मंदशशांकभूमितनयैः सौरेंदुभौमैर्यथासंख्यं बंध्वस्तकर्मस्थितैश्चतुर्थसप्तमदशमस्थैः तद्यथा सौरे चतुर्थगे चंद्रे सप्तमगे भौमे दशमगे जातः कूपे पतितो म्रियते कन्यायामिति हिमोष्णकरयोश्चंद्रार्कयोः कन्यायां स्थितयोश्च पापग्रहदृष्टयोर्जातः स्वजनेन म्रियते स्वजनेन व्यापाद्यते उभयोदये हि स्वभावराशावुदये लग्नगते तत्र चार्कशशिनौ रविचंद्रौ यदा स्यातां तावेतौ तदा तोये जले मज्जितो मग्नो म्रियते २ अथान्यानपि मृत्युयोगान् शार्दूलविक्रीडितेनाह मंद इति मंदे शनैश्चरे कर्कटगे कुलीरस्थे मृगांके चंद्रे मृगे मकरस्थि

तेजातस्यजलोदरकृतोजलोदरेणमृत्युर्भवति शस्त्राग्निप्रभवइति शशिनिचंद्रेकुजर्क्षेमेषवृश्चिकयोरन्यतमस्थे तत्रचाशुभयोर्द्वयोः पापयोर्मध्यस्थेजातस्यशस्त्राग्निप्रभवः शस्त्रेणाग्निनावाभवति तत्कृतोमृत्युः कन्यायामिति शीतगौचंद्रेकन्यायांतद्वास्थितेपापद्वयमध्यगतेजातस्यरुधिरोत्थशोषजनितोमृत्युर्मरणंभवति दुष्टेनरक्तेनशोषेणवाउत्थितोजनितः उत्पन्नः सौरर्क्षइति हिमगौचंद्रेसौरर्क्षेमकरकुंभयोरन्यतमस्थेतद्वत्तस्मिंश्चपापद्वयमध्यगतेयदिचेज्जातस्तदारज्ज्वाग्निपातैः रज्ज्वाग्निनापाताद्वाम्रियतइति ३ अथान्यानपिमृत्युयोगान् शार्दूलविक्रीडितेनाह

शैलाग्राभिहतस्यसूर्यकुजयोर्मृत्युःखबंधुस्थयोः कूपेमंदशशांकभूमितनयैर्बंध्वस्तकर्मस्थितैः
कन्यायांस्वजनाद्धिमोष्णकरयोःपापग्रहैर्दृष्टयोःस्यातांयद्युभयोदयेकशरीरिणौतोयेतदामज्जितः २
मंदेकर्कटगेजलोदरकृतोमृत्युर्मृगांकेमृगेशस्त्राग्निप्रभवःशशिन्यशुभयोर्मध्येकुजर्क्षेस्थिते कन्या
यांरुधिरोत्थशोषजनितस्तद्वत्स्थितेशीतगौसौरर्क्षेयदितद्वदेवहिमगौरज्ज्वग्निपातैः कृतः ३

येदाद्धीनवमस्थयोरिति अशुभयोर्द्वयोः पापयोर्धीनवमस्थयोः पंचमनवमस्थानस्थयोस्तयोश्चसौम्यग्रहैरदृष्टयोरनवलोकितयोर्जातः बंधाद्बंधनेनम्रियते द्रेष्काणैरिति येनलग्नेनपुमान्जातस्तस्मादष्टमस्थानयोराशिस्तत्काले वर्तते तत्रयदिसपाशसर्पोद्रेष्काणोभवति सनिगडोवातदाजातः बंधनेनम्रियते तत्रभुजगपाशाख्यद्रेष्काणः वृषद्वितीयः कन्यानिभश्च कन्यायामिति मीनलग्नजातः

कन्यायामस्तगेसप्तमस्थेचंद्रेतस्मिंश्चाशुभान्विते नकेनचित्सौम्येनसहिते सितेशुक्रे मेषगेसूर्येरवौलग्नगतेजातस्यमरणंमंदिरेगृहेस्त्रीहेतुकं स्त्रीनिमित्तंविद्धिजानीहि ४ अथान्यानपिमृत्युयोगान्शार्दूलविक्रीडितेनाह शूलोद्भिन्नतनुरिति सुखेचतुर्थेस्थानेऽवनिसुते भौमेस्थितेसूर्येऽपिवाइति रवौचतुर्थस्थेखेदशमेस्थानेयदियमःसौरोभवति तदाजातः शूलोद्भिन्नतनुर्म्रियते शूलोद्भिन्नतनुर्यस्यशूलप्रोतस्यतस्यमरणंभवति संप्रक्षीणेति पापैःरविभौमसौरैः संप्रक्षीणहिमांशुभिरतिक्षीणचंद्रसंयुक्तैश्चयुगपत्तुल्यकालंत्रिकोणाद्यगैः पंचमनवमलग्नस्थैः एतदुक्तंभवति

बंधाद्धीनवमस्थयोरशुभयोः सौम्यग्रहादृष्टयोर्द्रेष्काणैश्चससर्पपाशनिगडैश्छिद्रस्थितैर्बध्यतः कु-
न्यायामशुभान्वितेस्तमयगेचंद्रेस्थितेमेषगेसूर्येलग्नगतेचविद्धिमरणंस्त्रीहेतुकंमंदिरे ४ शू-
लोद्भिन्नतनुःसुखेवनिसुतेसूर्येपिवाऽर्कजे संप्रक्षीणहिमांशुभिश्चयुगपत्पापैस्त्रिकोणा-
द्यगैः बंधुस्थेचरवौवियत्यवनिजेक्षीणेंदुसंवीक्षिते काष्ठेनाभिहतः प्रयातिमरणंसूर्यात्मजेने-
क्षिते ५

संक्षीणचंद्राणांपापानामेतत्स्थानत्रयमुक्त्वाऽन्यत्रावस्थितिर्नभवति तदाचकाराच्छूलोद्भिन्नतनुर्म्रियते बंधुस्थेचेति रवौसूर्येबंधुस्थे लग्नाच्चतुर्थगे वियतिदशमेऽवनिसुतेभौमेस्थितेतस्मिंश्चक्षीणेंदुनाक्षीणचंद्रेणसंवीक्षिते तदाजातश्चकाराच्छूलोद्भिन्नतनुर्म्रियते अस्मिन्नेवयोगेचतुर्थगेरवौदशमस्थेभौमेतस्मिंश्चसूर्यात्मजेनशनैश्चरेणेक्षितेदृष्टेजातः काष्ठेनाभिहतः कुष्ठाघातेन ताडितोमरणंप्रयातिप्राप्नोतीत्यर्थः ५ ६ ६ ६ ६ ६

अथान्यानपिमृत्युयोगान्वसंततिलकेनाह रंध्रास्पदेति रंध्रमष्टमंस्थानं आस्पदंदशमं अगंलग्नं हिबुकस्थानंचतुर्थं एतैःरंध्रास्पदांगहिबुकैर्यथासंख्यं प्रक्षीणचंद्ररुधिरार्किदिनेशयुक्तैः एतदुक्तंभवति अतिक्षीणचंद्रोष्टमेरुधिरो भौमः दशमेआर्किः सौरोंगे दिनेशोरविश्चतुर्थे एवंविधेयोगेजातोलगुड हतांगोलगुडताडितावयवोम्रियतेकेचित्पठंति लगुडाहतांतइति लगुडाहतोभवति तैरेवेति तैरेवग्रहैः प्रक्षीणचंद्ररुधिरार्किदिनेशैः यथासंख्यं कर्मनवमोदयपुत्रसंस्थैः दशमनवमलग्नपंचमस्थैः क्षीणचंद्रमादशमे भौमोनवमे सौरोलग्नेअर्कः पंचमेयदिभवति तदाजातस्य धूमेनाग्निनाबंधनेनशरीरनिकुट्टनेनकाष्ठादिनाप्रहरेणनवा तस्यमृत्युर्भवति ६ अथान्यानपिमृत्युयोगान्वसंततिलकेनाह बंध्वस्तकर्मसहितैरिति

रंध्रास्पदांगहिबुकैर्लगुडाहतांगः प्रक्षीणचंद्ररुधिरार्किदिनेशयुक्तैः तैरेवकर्मनवमोदयपुत्रसंस्थै
र्धूमाग्निबंधनशरीरनिकुट्टनांतः ६ बंध्वस्तकर्मसहितैःकुजसूर्यमंदैर्निर्याणमायुधशिखिक्षितिपालकोपात्
सौरेंदुभूमितनयैःस्वसुखास्पदस्थैर्ज्ञेयःक्षतकृमिकृतश्चशरीरघातः ७ छ

कुजोंगारकः सूर्योरविः मंदः सौरः एतैर्यथासंख्यंबंध्वस्तकर्मसहितैः चतुर्थसप्तमदशमस्थैः चतुर्थेभौमः सप्तमेसूर्यः दशमेसौरः यस्य जन्मनिभवंति तस्यायुधेनखड्गादिनाशिखिनाग्निनाक्षितिपालकोपेन नृपक्रोधेन वाएषामन्यतमेननिर्याणंमृत्युर्भवति सौरेंदुभूमितनयैः शनिशशिभौमैः यथासंख्ये स्वसुखास्पदस्थैर्द्वितीयेचतुर्थदशमस्थैर्द्वितीयेसौरः चतुर्थेचंद्रः दशमेभौमः यस्यजन्मनिभवंति तस्यक्षतकृमिकृतः क्षतेछिद्रेकृमयः कीटाउत्पद्यंते तत्कृतश्च शरीरपातोभवति क्षतकृमिभिः पातितैर्मृत्युर्भवति ७ छ छ छ छ

अथान्यानपिमृत्युयोगान्शार्दूलविक्रीडितेनाह स्वस्थइति अर्केरवौस्वस्थेदशमस्थानगतेकुजेरसातलगतेचतुर्थस्थेजातस्ययानप्रपातात् वाहनासत्तितस्यबधोमृत्युर्भवति यंत्रोत्पीडनजइति कुजेंगारकेस्तमयगेसप्तमस्थेसौरेंद्विनाभ्युद्गमेसौरश्चेंदुश्चेनश्चतेसौरेंद्विनाः शनिचंद्ररविभिरभ्युद्गमेलग्नेस्थितैः जातस्ययंत्रोत्पीडनजोवधः यंत्रपीडितोम्रियतेकेचित्क्षीणेंद्विनाभ्युद्गमइतिपठंति क्षीणेंदुःक्षीणचंद्रमाइनआदित्यः आर्किःसौरः एतैः लग्नेस्थितैः जातस्ययंत्रोत्पीडनजोवधः विण्मध्यइति रुधिरोंगारकः आर्किःसौरः शीतकरणश्चंद्रः एतैःयथासंख्यंजूकाजसौरर्क्षगैः जूकस्तुलःअजोमेषः सौरर्क्षेमकरकुंभौतेनतुलेकुजोभौमः मेषेसौरः मकरकुंभयोरन्यतमेचंद्रः एवंयस्यजन्मनिभवंति साविण्मध्ये

स्वस्थेर्केबनिजेरसातलगते यानप्रपाताद्बधो यंत्रोत्पीडनजः कु-
जेस्तमयगेसौरेंद्विनाभ्युद्गमे विण्मध्येरुधिरार्किशीतकिरणै-
र्जूकाजसौरर्क्षगैर्यातैर्वागलितेंदुसूर्यरुधिरैर्व्योमास्तबंध्वाह्वयान् ८

मेध्यमध्येम्रियते यातैर्वेति गलितेंदुःक्षीणचंद्रः सूर्यआदित्यः रुधिरोंगारकः एतैर्यथासंख्यंव्योमास्तबंध्वाह्वयान् यातैःप्राप्तैः व्योम्निदशमेक्षीणचंद्रः अस्तमये सप्तमेसूर्यः बंध्वाह्वयेबंधुसंज्ञकेचतुर्थेभे बंधित्याह्वयंसंज्ञायस्य एवंयस्यजन्मनिभवति सवाग्रहणातविण्मध्येम्रियते ८ अथान्यानप्यनिष्टयोगान्वैतालीयेनाह वीर्यान्वितेति क्षीणेंदौक्षीणचंद्रे वीर्यान्वितेनसबलेनवक्रेणभौमेणदृष्टेवीक्षितेर्कजेसौरेनिधनस्थितेऽष्टमेजातस्य गुह्योद्भवरोगपीडयागुह्येयउद्भूतउत्पन्नरोगोगदस्तत्पीडयाऽर्शोभगंदरार्त्याकृमिशस्त्रदाहजः कृमिजः शस्त्रजः दाहजः अर्शोभिर्गंद-

रादिरोगदोषात् कृमिपातेनशस्त्रकर्मणावाद्दाहेनवाक्रियमाणेनतस्यमृत्युर्भवति ९ अथान्यानपिमृत्युयोगान्वसंततिलकेनाह अस्तेरवाविति अस्तेसप्तमे रवावादित्येसरुधिरेणभौमेनसंयुक्तेस्थितेऽर्कपुत्रेसौरेनिधनेष्टमेक्षीणेहिमगौचंद्रेरसातलगतेचतुर्थस्थानस्थेजातः खगांतोभवति खगःपक्षीतत्कृतोमृत्युर्भवति तस्यमृतस्याग्निसंस्कारोनभवतीत्यर्थः लग्नात्मजाष्टमेति इनःसूर्यः भौमःकुजःमंदःसौरः चंद्रःशशांकः एतैर्यथासंख्यंलग्नात्मजाष्टमतपःस्थितैः लग्नपंचमाष्टमनवमस्थैः तैर्नलग्नेर्कः पंचमेभौमः अष्टमेसौरः नवमेचंद्रोयस्यजन्मनिभवति तस्यशैलशिखरात् पर्वतमस्तकात् पतितस्याशनिपातेनचोल्कयावज्रपातेन कुड्यपातेनभित्तिपातेनवामृत्युर्भवति १० अथयस्यजन्मन्येतेषां योगानांमध्यादन्यतमोयोगोनभवति नचाष्टमेस्थानेकश्चिद्ग्रहोभवति नचाष्टमंस्थानंकश्चिद्ग्रहः पश्यतितन्मृत्युकारणंवैतालीयेनाह द्वाविंशइति येनद्रेष्काणेनपुमान्जातस्तस्माद्यो द्वाविंशोद्रेष्काणोभवति ससूरिभिः पंडितैःनिधनस्यमृत्योः कारणंनिमित्तंकथितः कथमित्याह तस्याधिपतिरित्यादि तस्यद्वाविंशस्यद्रेष्काणस्ययोधिपतिर्ग्रहस्तस्याग्न्यम्बायुधजइत्यादि स्वगुणैर्योहेतुःपठितस्तेननिर्याणंमरणंप्रयच्छतिददाति अथवायस्मिन्राशौसद्वाविंशोद्रेष्काणोभवति तस्यराशेर्यःस्वामीतत्संभवोभवति सवास्वगुणैरात्मीयहेतुभिः निर्याणंमरणं-

वीर्यान्वितवक्रवीक्षितेक्षीणेंदौनिधनस्थितेऽर्कजे गुह्योद्भवरोगपीडयामृत्युः स्या-
त्कृमिशस्त्रदाहजः ९ अस्तेरवौसरुधिरेनिधनेर्कपुत्रेक्षीणेरसातलगतेहिमगौखग-
गांतः लग्नात्मजाष्टमतपस्विनभौममंदचंद्रैस्तुशैलशिखराशनिकुड्यपातैः १०

प्रयाति १० सचद्वाविंशोद्रेष्काणोलग्नाद्ष्टमराशौभवति सकथंज्ञायतेउत्पद्यते यदिलग्नस्यप्रथमोद्रेष्काणस्तदाष्टमस्यापिप्रथमोथलग्नस्य द्वितीयस्तदाष्टमस्यापिद्वितीयोथलग्नस्यस्तृतीयस्तदाष्टमस्यापितृतीयः नकेवलंयावत्सर्वराशीनामेषैवव्यवस्था अनेनक्रमेणप्रकारेणयोऽष्टमराशिः द्रेष्काणः सएवद्वाविंशोद्रेष्काणइति तत्रैतज्जातं यस्योक्तयोगानामन्यतमोयोगोनभवति नचाष्टमंस्थानंग्रहयुतवीक्षितं तस्यद्वाविंशद्रेष्काणाधिपाष्टमराश्यधिपयोर्योबलवांस्तदुक्तदोषेणमृत्युकरिति ११ अथयादृग्भूमौम्रियतेतद्विज्ञानंवसंततिलकेनाह होरानवांशेतिपुरुषस्यजन्मसमयेहोरायांलग्नेयोनवांशकोभवति तस्ययोधिपतिः ग्रहस्तेनयोयुक्तोराशिः सराशिर्यत्रस्थितइत्यर्थः तस्यराशेर्यायोग्याभूमिस्तस्याभूमौसम्रियते

द्वाविंशःकथितस्तुकारणंद्रेष्काणोनिधनस्यसूरिभिः
तस्याधिपतिर्भवोपिवानिर्याणंस्वगुणैः प्रयच्छति ११

तद्यथासचेद्राशिद्वयेभवति तदाअधिकसंचारभूमौसचेद्राशिः मेषोभवति तदाजाविकल्पसंज्ञेभूमौ वृषभश्चेत्तदावृषभप्रचारभूमौ मिथुनश्चेत्तदागृहे कर्कटश्चेत्तदाकूपेसिंहश्चेत्तदारण्ये कन्याचेत्तदाकूपे तुलाचेत्तदापणगृहे वृश्चिकश्चेत्तदाश्वभ्रे धन्वीचेत्तदाऽश्वप्रचारभूमौ मकरश्चेत्तदानूपे कुंभश्चेत्तदागृहे मीनश्चेत्तदानूपइति येषांतु पुनर्मृत्युयोगेजलादौमरणमुक्तंतेषांतत्रैव नकेवलंदर्शितराशिवशेनभूप्रदेशोवक्तव्यः अपितुयोगेक्षणादिभिरिति सलग्ननवांशकाधिपतिर्यस्मिन्राशौ व्यवस्थितः तत्रयद्यनेनग्रहेणतस्ययोगोभवति तदातस्यचयाभूमिः-

ईक्षणादिर्योवातस्यपश्यति आदिग्रहणाद्यस्यनवांशकेस्थितस्तस्यापियाभूमिरुक्तातस्यांसम्रियतइति अत्रचबहुभूमिसंभवेग्रहबलाद्वक्तव्याः ननुचग्रहस्यकाभूमिः उच्यतेग्रहस्यात्मीयराशेर्याभूमिःसैवेति ननुयस्यराशिद्वयंतस्यकाभूमिरित्युच्यते तत्रत्रिकोणराशेःसंबंधिनीभूमिः तद्यथा आदित्यस्यसिंहभूमिःअरण्यंचंद्रमसः कर्कटभूमिरनूपंभौमस्यमेषभूमिरित्युच्यते तत्रत्रिकोणराशेः संबंधिनीभूमिः जीवस्यधनुर्भूमिरश्वप्रचारः शुक्रस्यतुलाभूमिः विपणिः शनैश्चरस्यकुंभभूमिःगृहमिति केचिदत्रदेवालयेअग्निविहारकोशशयनक्षित्युत्कराः स्युरित्यादिकंस्थानमिच्छंति एतच्चशोभनंयतः एतेषुस्थानेषुम्रियमाणादृश्यंतइति एवमेतस्मादन्यत् परिकल्प्यचिंत्यम् मोहस्त्विति यावंतोलग्नस्यनवा

होरानवांशकप्रयुक्तसमानभूमौ योगेक्षणादिभिरतःपरिकल्प्यमेतत्
मोहस्तुमृत्युसमयेऽनुदितांशतुल्यः स्वेशेक्षितेद्विगुणितस्त्रिगुणःशुभैश्च॥१२

शकाअनुदिताः शेषास्तेषामंशानांसपीडितानांयावत्कालोभवति एतदुक्तंभवति यावत्कालोलग्नादवशिष्टः पुरुषस्यजन्मनिविषयेभवतितावत्स्तावत्कालमिति सचेल्लग्नराशिः यदिस्वेशेनस्वपतिनेक्षितोदृष्टस्तदासएवकालोद्विगुणोवक्तव्यः अर्थदिवस्वामिनासौम्यग्रहेणचदृष्टस्तदाषड्गुणकालोवक्तव्यः १२ अथमृतस्यशरीरपरिणामज्ञानमालिन्याह दहनेति निधनभवनेष्टमेस्थानेयोद्रेष्काणोव्यवस्थितं तद्वशाच्छवपरिणामश्चिंतनीयः सचगणनयाद्वाविंशोद्रेष्काणोभवति सचयदिदहनद्रेष्काणोऽग्निद्रेष्काणोभवति तदाभस्मत्वेनपरिणमत्यग्निनादह्यतेपापद्रेष्काणोग्निद्रेष्काणः अथजलद्रेष्काणोभवति तदासक्लिद्यते जलमध्येक्षिप्यते सौम्यग्रहद्रेष्काणोजलद्रेष्काणः अथमिश्रद्रेष्काणोभवति तदाशुष्यति नदह्यतेन

चापिजलमध्येक्षिप्यते सौम्यग्रहद्रेष्काणः पापयुक्तोभवति पापग्रहद्रेष्काणोचासौम्ययुक्तस्तदामिश्रद्रेष्काणः तथानिधनभवनसंस्थैरष्टमराश्याश्रितैः व्यालवर्गैः सर्पद्रेष्काणैः विडंबितोभवति तदाश्वशृगालकाकादिभिर्भुज्यते भक्ष्यतइत्यर्थः अत्रव्यालद्रेष्काणाः कर्कटाद्याः कर्कटाद्वितीयः वृश्चिकाद्यः मीनांत्यश्चउक्तंच शशिगृहपूर्वापरगोकीटस्यचमीनपश्चिमोपगतः निधनेयस्यभवंतिद्रेष्काणास्तस्यचमृतस्यभुंजंतिवायसाद्याः प्राणिसमूहानचास्तिसंदेहः पापग्रहद्रेष्काणोयस्याष्टमराशिसंस्थितोभवति दहनंप्राप्नोतिनरोमृतमात्रोनिश्चयात्प्रवदेत् एवंसौम्यद्रेष्काणोजलमध्येक्षिप्यतेनरोत्रमृतः सौम्यद्रेष्काणः पापैः पापद्रेष्काणोपिसौम्ययुक्तः यस्याष्टमभवनगतः शोषंप्राप्नोतिसोपिमृतइति एवंप्रकारःशवा-

दहनजलविमिश्रैर्भस्मसंक्लेदशोषैर्निधनभवनसंस्थैर्व्यालवर्गैर्विडंबः
इतिशवपरिणामश्चिंतनीयोयथोक्तः पृथुविरचितशास्त्राद्गत्यनूकादिचिंत्यम् १३

नांमृतानांपरिणामोविपत्तिश्चिंतनीयोविचार्यः पृथुविरचितशास्त्राद्विस्तीर्णाच्छास्त्राद्गत्यर्थकादिमरणादिचिंत्यम् मृतस्यकागतिर्भविष्यति कस्माल्लोकादयमागतः आदिग्रहणात्तत्रकीदृगासीदिति अनूकशब्देनेहातीतजन्मोच्यते १३ अथयोयंजातोजंतुः सकस्माल्लोकादागतइति यदुक्तं तद्विज्ञानंमालिन्याह गुरुरिति गुरुर्जीवः उडुपतिशक्रौ चंद्रसितौ सूर्यभौमौ रविकुजौ यमज्ञौसौरबुधौ एतेविबुधपितृतिरश्चोनारकीयांश्च जातान्कुर्युः विबुधलोकेदेवलोकः पितृलोकःप्रसिद्धः तिरश्चतिर्यग्लोकः नरकः नरकलोकःप्रसिद्धः एभ्यः आगतान्प्रवदेत् कथमितितदर्थमाह दिनकरशशिवीर्याधिष्ठितात्र्यंशनाथादिति दिनकरःसूर्यः शशीचंद्रः अनयोः दिनकरशशिनोः मध्याद्योबलीवीर्यवान् तेनाधिष्ठितोयुक्तोयस्त्र्यं

शोद्रेष्काणः तस्ययोनाथः स्वामीतस्ययोलोकस्तस्मादागतइतिवक्तव्यं तत्रसयद्विद्रेष्काणोगुरोःजीवस्यसंबंधीभवति तदाविबुधलोकादागतइतिवक्तव्यं अथचंद्रशुक्रयोरन्यतमसंबंधीभवति तदापितृलोकादागतइतिवक्तव्यं अथसूर्यभौमयोरन्यतमसंबंधीभवति तदातिर्यग्लोकादागतइतिवक्तव्यं अथशनैश्चरबुधयोरन्यतमसंबंधीभवति तदानरलोकादागतइतिवक्तव्यं यस्माल्लोकादागतस्तत्रापिश्रेष्ठमध्यमहीनत्वज्ञानमाह प्रवरेत्यादि यस्यग्रहस्यप्रदर्शितलोकात्तस्यजन्मज्ञानमाह ग्रहस्तुंगस्थः स्वोच्चराशिगतोभवतितदातत्रप्रवरः प्रधानमासीदितिविज्ञेयं अथोच्चराशिच्युतोनीचमप्राप्य तदातत्रासौमध्यमआसीदितिविज्ञेयं नीचस्थः निकृष्टः हीनः एतदनूकेप्राग्जन्मनिज्ञेयं १४ अथमृतस्यका-

गुरुरुडुपतिशुक्रौसूर्यभौमौयमज्ञौविबुधपितृतिरश्चोनारकीयांश्चकुर्युः
दिनकरशशिवीर्याधिष्ठितात्र्यंशनाथाप्रवरसमनिकृष्टास्तुंगह्रासादनूके १४

गतिर्भविष्यति तद्विज्ञानंमालिन्याह गतिरिति यस्यजन्मनिलग्नात्षष्ठसप्तमाष्टमस्थानानिशून्यानिभवंति तस्यतत्कालंरिपुस्थानेत्र्यंशोद्रेष्काणोवर्तते तयोर्यावधिपति तयोर्मध्येयोबलवांस्तस्ययोलोकोभिहितः सएवगतिः एवंरिपुरंध्रत्र्यंशपइति तत्रतेनमृतेनगंतव्यमितिअस्तास्थितोवा अथलग्नात्षष्ठसप्तमाष्टमस्थानानामन्यतमेस्थानेकश्चिद्ग्रहोभवति तदातस्यदर्शितलोकेतेनगंतव्यं अथलग्नात्षष्ठसप्तमाष्टमस्थानानांद्वेस्थानेत्रीणिवासग्रहाणिभवंति सोप्येकस्मिन्नपिद्व्यादयोग्रहाभवंति तदातेषांग्रहाणांयोबलवांस्तस्ययः प्रदर्शितोलोकस्तेनगंतव्यमिति नन्वस्तास्थितोवेतिकैश्चिद्दलमुक्तं तत्रसप्तमस्थग्रहणंकृतं तत्षष्ठाष्टमस्थोपिस्वांगतिंनयतीति किंव्याख्यातंउच्यते अस्तास्थितोवेतिवाशब्दश्चशब्दार्थी

ज्ञेयः नकेवलमस्तास्थितश्चकाराद्रिपुरंध्रगश्चेति केचिदस्तास्थितश्चेतिपठंति तथाचस्वल्पजातकेउक्तं सुरपितृतिर्यङ्नारकान् गुरुरुडपसिताव-
सृग्वीज्ञयमौ रिपुरंध्रत्र्यंशकपानयतिचास्तारिनिधनस्थाः गुरुरथेति अथशब्दः पादपूरणार्थे यस्यजन्मनिगुरुर्बृहस्पतिर्लग्नाद्रिपुस्थानेषष्ठे
भवति केंद्रेषुवाछिद्रेष्टमेवासचस्वोच्चस्थः कर्कटेभवति तदैकोयोगः अथवात्ये भवनेमीनराशावुदयतिविलग्नगतेतत्रचगुरुवर्ज्यशेषाग्रहा
अन्येग्रहाबलेनवीर्येणप्रोज्झितावर्जिताभवंति तदाद्वितीयोयोगः अस्मिन्योगद्वयेजातस्यमोक्षोभविष्यसीतिवक्तव्यंउदयतिभवनेंत्यसौ

गतिरपिरिपुरंध्रत्र्यंशपोऽस्तस्थितोवागुरुरथरिपुकेंद्रच्छिद्रगःस्वोच्चसंस्थः
उदयतिभवनेंत्येसौम्यभागेचमोक्षोभवतियदिबलेनप्रोज्झितास्तत्रशेषाः १५
इतिबृहज्जातकविवृत्तौनैर्याणिकाऽध्यायःपंचविंशतिःसमाप्तः २५ छ

म्यभागेचमोक्षइत्यत्रचकारोवाशब्दस्यार्थेयथापुरुषस्यजन्मकालग्नहवशात् तथामरणकाललग्नवशादपिगतिर्वक्तव्या यस्मात्स्वल्प
जातकेउक्तं षष्ठाष्टमकंटकगोगुरुश्चेद्भवतिमीनलग्नेवा शेषैःखगैर्जन्मनिमरणेवामोक्षगतिमाहुरिति १५ इतिश्रीभट्टोत्सलविरचिता-
याबृहज्जातकविवृत्तौनैर्याणिकाऽध्यायःपंचविंशतिःसमाप्तः २५ छ छ छ छ छ

अथनष्टजातकाध्यायो व्याख्यायते तत्रादावेव प्रसूतिकाज्ञानमिदं वज्रयाह आधानेति यस्याधानकालो ज्ञायते तस्याधानकालात् पूर्वमेवजन्मव्याख्यातम् तत्कालमिंदुसहित इत्यादिना जन्मकालश्च व्याख्यात एव एवमाधानजन्मकालयोरपरिबोधेअज्ञानेसतिसंपृच्छतः प्रष्टुः विलग्नात्प्रश्नलग्नाज्जन्मवदेत् ब्रूयात् येनलग्नेनप्रष्टा पृच्छति तस्ययदिपूर्वार्द्धे प्रथम होराभवति तदाप्रष्टुः भानावादित्ये उद्गते उत्तरायणस्थे जन्मवक्तव्यं मकरादिराशिषट्कस्थेजातइत्यर्थः अथलग्नस्यापरार्धे द्वितीया होराभवति तदाभानौ दक्षिणगते दक्षिणायनस्थे जन्म वक्तव्यं कर्कटादि राशिषट्कस्थे जातइत्यर्थः तथाच आधान जन्मनीयस्यनविज्ञायेतदेहिनः जन्मसंपृच्छतस्तस्यप्रश्नलग्नाद्विनिर्दिशेत् १ अथवर्षर्तुज्ञानमुपजातिकया

अथनष्टजातकाध्यायप्रारंभः आधानजन्मापरिबोधकालेसंपृच्छतोजन्मवदेद्विलग्नात् पूर्वापरार्धे भवनस्यविंद्या
भानावुदग्दक्षिणगे प्रसूतिम् १

ह लग्नत्रिकोणेष्विति त्रिभागैर्द्रेष्काणैः लग्नत्रिकोणेषु प्रथम पंचम नवम स्थानेषु गुरुर्जीवोज्ञेयाः तद्यथा प्रश्न लग्नस्य यदिप्रथम द्रेष्काणोभवति तदायएव लग्नराशिः तत्रस्थे गुरौ जन्म वक्तव्यं अथ लग्नस्य द्वितीयो द्रेष्काणः तदालग्नाद्यः पंचमोराशिस्तत्रस्थे गुरौ जन्म वक्तव्यं अथलग्नस्यतृतीयोद्रेष्काणस्तदालग्नाद्यो नवमोराशिस्तत्रस्थे गुरौजन्म वक्तव्यं एवंकेषांचिन्मतं अथान्येषां मतं यथा प्रश्न लग्नस्य यदा प्रथमो द्रेष्काणोदयो भवति तदालग्नराशितोयावत्संख्येराशौ बृहस्पतिस्तिष्ठति तावत्संख्यानिप्रष्टुर्वर्षाणि वक्तव्यानि अथ लग्ने द्वितीयो द्रेष्काणस्तदा लग्नात्पंचमराशितोयावत्संख्येराशौ बृहस्पतिर्भवति तावत्संख्यानिप्रष्टुर्वर्षाणि वक्तव्यानि यदालग्नस्य द्वितीयो द्रेष्काणो भवति तदालग्नान्नवमराशितोयावत्संख्येराशौ बृहस्पतिर्भवति तावत्संख्यानिप्रष्टुर्वर्षाणि वक्तव्यानि एतद्व्याख्यानं नशोभनं पूर्व-

व्याख्यानमेवश्रेयः यस्माद्यवनेश्वरः द्रेष्काणलग्नेकमतस्तकराशौ गुरुर्विलग्नादित्रिकोणगोभूत् समुद्भवेच्चद्भवनक्रमेण स्वाच्चार भादब्दगतिं प्रगण्यात् यद्यप्यत्रसामान्येनोक्तं बृहस्पतेरवस्थानं तथाचद्वादशभागक्रमेणप्रतिराशौसंचार्यः तद्यथा यदिप्रश्नलग्नस्य प्रथम द्वादशभागो दयो भवति तदालग्नस्थेजीवेजातः द्वितीयद्वादशभागश्चेत्तदालग्ना द्वितीयेगुरौज्ञातः एवंतृतीयादिद्वादशभागोदये तृतीयादिषुस्थानेषु ऊह्यं विकल्प्यवर्षाणि वयोनुमानादेव बृहस्पतेरवस्थानंज्ञात्वातस्यएववयोनुमानात्तस्याकृतिंशरीरमेवेक्ष्यवर्षाणिविकल्प्यवयः प्रमाणंबुध्वा द्वादश सुद्वादश सुवर्षेषु विकल्पनाकार्या किमस्मिन्नेव भगणपरिवर्त्तेज्ञातराशेः बृहस्पतेरवस्थानमभूत् तद्द्वितीयउततृतीयादिषु एवंतस्याकृति मवेक्ष्यवयो नुमानंवक्तव्यं यत्र द्वादशसुवर्षेषुभ्रांति र्भवति तत्रपुरुषलक्षणोक्तेन दशाविभागेन द्वादशवार्षिकीदशांशक्षेत्रेषु परिकल्प्य यत्तत्क्षेत्रांगसंस्पर्शाद्रूपज्ञानं तथाचपुरु

लग्नत्रिकोणेषु गुरुस्त्रिभागैर्विकल्प्य वर्षाणि वयोनुमानात्

षलक्षणे पठ्यते पादौसगुल्फौ प्रथमं प्रदिष्टं जंघे द्वितीयंतुसजानुचक्रे मेढ्रोरुमुष्काश्चततस्तृतीयं नाभिंकटिंचेति चतुर्थमाहुः उदयं कथयंति पंचमे हृदयंषष्ठमथस्तनान्वितं अथसप्तमंराजजत्रुणी कथयंत्यष्टमयोष्ठकंधरे नवमेनयनेसभ्रुणीसललाटंदशमंशिरस्तदा अशुभेष्व शुभंदशाफलं चरणाद्येषु शुभेषु शोभनमिति किलत्रिंशत्यधिकंवर्षशतंयस्यजन्मनोतीतं तस्यनष्ट जातकवर्षज्ञानोपाय एवनास्ति एवंवर्षेषु ज्ञातेषु ऋतुज्ञानमाह ग्रीष्मोर्के लग्न इति येनलग्नेनप्रष्टापृच्छति तत्रचेदर्कः सूर्यः स्थितस्तद्द्रेष्काणोवालग्नेतदा ग्रीष्मेजातइतिवक्तव्यं कथितास्तुशेषैरिति शेषैरन्यैश्चंद्रादिभिर्ग्रहैर्लग्नस्थैः ऋतुः पूर्वमेवकथितउक्तः द्रेष्काणैः शिशिरादयइत्यादिनाग्रंथेनोक्तः तत्रयदाशनैश्चरोलग्नेभवति तद्द्रेष्काणोवातदाशिशिरे जात

इतिवक्तव्यं एवंशुक्रेलग्नगतेवा तद्द्रेष्काणोतदावसंतेजातः एवंभौमेग्रीष्मे एवमेवरवावपि चंद्रेलग्नगते तद्द्रेष्काणेवा वर्षासुबुधेशरदि जीवेहेमंत इति यदाबहवोलग्नगताः भवंतितदातेषांमध्येयोबलवान् तदुक्तर्तौ जातइतिवक्तव्यं अथनकश्चिद्ग्रहादिलग्नगतोभवति तदातस्य संबंधि द्रेष्काणोदयोभवति तदातदुक्तर्तौजातइत्येववक्तव्यं अन्यायनर्तावृतुरर्कचारादिति अन्यस्मिन्नयने ऽन्यस्मिन्नृतावर्कचारादृतुः अन्यस्मिन्नयने तदयनासंभवश्चेदृतुरन्योभवति तदृतुरर्कचारवशेनवक्तव्यं एतदुक्तंभवति सौरेणमानेन ऋतुर्वक्तव्यः नतुचांद्रेणयथाशिशिरेज्ञातेमकरकुंभयो रन्यतमे राशौ सूर्यस्यावस्थानंज्ञेयं एवंशेषराशिष्वप्यूह्यं अनेनलौकिकश्चांद्रमासो निराकृतोभवतीति अथायने विलोमे ग्रहपरिज्ञाना दृतुपरिज्ञानं मासपरिज्ञानंचें

ग्रीष्मोर्के लग्ने कथितास्तु शेषै रन्यायनर्तौ ह्यृतुरर्कचारात् २ चंद्रज्ञजीवाः परिवर्तनीयाः
शुक्रारमंदैरयनेविलोमे द्रेष्काणभागेप्रथमेतुपूर्वोमासोनुपाताच्च तिथिर्विकल्प्यः ३

द्रवज्रयाह चंद्रज्ञेति अयनेविलोमेसति चंद्रज्ञजीवाः शुक्रारमंदैः परिवर्तनीयाः शशिबुधगुरवः शितभौमशनैश्चरैः अयनव्यत्ययेप्राप्तेसतिपरिवर्तनीयाः व्यत्ययेनव्यवस्थाप्याः एतदुक्तंभवति यद्युत्तरायणेज्ञाते प्रावृट्काले ज्ञातस्तदावसंते ज्ञातइतिवक्तव्यं चंद्रा च्छुक्रेणाचपरिवर्तितः अथोत्तरायणे शरदिप्राप्तायां ग्रीष्मेजातः दक्षिणायने ग्रीष्मेज्ञाते शरदिजातः अथबुधो रविभौमयोरपवर्तितौ रविभौमौ बुधेनच उत्तरायणे हेमंतेज्ञाते शिशिरेजातः दक्षिणायने शिशिरेप्राप्ते हेमंतजातः इतिवक्तव्यम् अथजीवमंदौ परस्परमपवर्तितौ एवमृतौ ज्ञाते मानसज्ञानमाह द्रेष्काणभागइति प्रथमलग्नेयोद्रेष्काणो वर्तते तस्यच द्रेष्काणस्ययदिप्रथमभागो वर्ततेतदाज्ञातर्तौप्रथमेमासिजातइतिवक्तव्यं

अथलग्ने द्रेष्काणस्य द्वितीयोभागोवर्तते तदाज्ञाततौ द्वितीयेमासिजातः तृतीयद्रेष्काणे द्वौविभागौ पूर्वपरावत्रापि अर्कावस्थानत एवमासज्ञानं अथएवंमासंज्ञात्वा तिथिज्ञानार्थमाह अनुपाताञ्च तिथिर्विकल्प्यः अनुपातात्त्रैराशिकात्तिथिर्विकल्प्या विकल्पनीयाः लग्नस्य षट्त्रिशांशाता त्रिद्रेष्काणः द्रेष्काणेनचज्ञाततु ऋतुज्ञानंतदर्थं लिप्ताशतत्रयं लिप्ताशतत्रयेणमासज्ञानं अत्रानुपातात्तिथिर्लिप्ता दशके नैकेकोज्ञेयः एषश्चतिथिरादित्यभागः एवमादित्यस्यराशयोभागाज्ञेयाः मासाराशयस्तिथयोभागाः यस्मिंश्चतिथौ ज्ञातवर्षेयथाप्रदर्शिता दित्योभवति तस्मिन् तिथौ तस्यजन्मइतिवक्तव्यं ३ अथचंद्रमानतिथिज्ञानोपायमिंद्रवज्रयाह अत्रापीति अत्रास्मिं स्तिथिज्ञाने द्विजेंद्रा मुनयो होरा शास्त्रज्ञाः सूर्यांशतु

अत्रापिहोरापटवो द्विजेंद्राः सूर्यांशतुल्यां तिथिमुद्दिशंति
रात्रिद्युसंज्ञेषु विलोमजन्म भागैश्चवेलाः क्रमशो विकल्प्याः. ४

ल्यां अंशस्थाने स्फुटार्कभागसमां तिथिमुद्दिशंति कथयंति प्रश्नकाले तात्कालिके नादित्ये नयावंतो भागा भुक्ता स्तावंतः शुक्लप्रतिपत्प्रभृतिज्ञातमासस्य तिथयो व्यतीताः अत्रचंद्रमाने मकरमासेजाते माघमासो ज्ञेयः एवमन्येष्वपि मासकल्पनाकार्या तयाचमणित्थः पृच्छाकाले रविणा यावंतोंशाः स्फुटेनसंभुक्ताः राशेस्तातिथयः स्युः शुक्लादावर्कमासस्य एवं दिनेज्ञाते किमयंरात्रौजातो दिवावेति तदर्थमाह रात्रिद्युसंज्ञेष्विति रात्रिद्युसंज्ञा पूर्वव्याख्याताः गोजाश्विकर्कि मिथुनाइत्यादिना तत्रप्रश्नकाले यदिरात्रिसंज्ञोलग्नो भवति तदातस्यविलोमतादिवाजन्मवक्तव्यं अथद्युसंज्ञो लग्नो भवति तदारात्रौजन्मवक्तव्यं एवंदिनरात्रिविभागोज्ञातेवेलाज्ञानमाह भागैश्चवेलाः क्रमशोविकल्प्याः यस्मिन्दिनेपुरुषस्यजन्मज्ञानं.

तस्मिन्दिनेअंशादित्योपिज्ञातः ततस्तस्यपुरुषस्ययदिदिवाजन्मतदा तस्मादादित्याद्दिनप्रमाणंकार्यं अथरात्रौजन्मतदारात्रिप्रमाणं तत्रप्रश्नलग्नस्य तस्मिन्कालेयावंतश्चषकाभुक्तास्तैरनुपातः कार्यः यदिपुरुषस्यदिवाजन्म तदादिनप्रमाणेन यदारात्रौ तदारात्रिप्रमाणेन तात्काललग्नभुक्तचषकानां गुणनं कृत्वातस्यैवलग्नस्यस्वदेशराश्युदयप्रमाणेन भागमपहृत्यावाप्तांवेलां तावताकालेनगतेनदिनस्यरात्रेर्वाजन्मवक्तव्यं एवंलग्नभागैः क्रमशः परिपाट्यावेलासमयः विकल्प्या विकल्पनीयाः ४ अर्थांतरेणमासज्ञानमिंद्रवज्रयाह केचिदिति केचिदाचार्याः शशांकाध्युषिताच्चंद्रयुक्तान्नवांशाच्छुक्लांतसंज्ञमासंकथयंति प्रश्नकालेयस्मिन्नवांशकेनवमेंशेचंद्रमाभवति तमपिनवांशकंत्रिधापरिकल्प्य तस्मिन्नवांशकेनवमेंशे चं-

केचिच्छशांकाध्युषितान्नवांशाच्छुक्लांतसंज्ञं कथयंतिमासं
लग्नत्रिकोणोत्तमवीर्ययुक्तं संप्रोच्यतेगालभनादिभिर्वा ५

द्रमाव्यवस्थितइतिचंद्रनवांशकोगतंनक्षत्रमन्वेष्यं तन्नक्षत्रशुक्लांतसंज्ञकेमासितस्यजन्मवक्तव्यं अथयस्य नक्षत्रस्यशुक्लांतसंज्ञोमासोनास्ति तस्यबृहस्पतिचारोक्तविधिनाशुक्लांतसंज्ञामासः परिकल्प्यः तत्रोक्तं नक्षत्रेणसहोदयमस्तंवायेनयातिसुरमंत्री तत्संज्ञंवक्तव्यं वर्षंमासंक्रमेणैववर्षाणिकार्तिकादीन्याग्नेयाद्भद्वयानियोज्यानि क्रमशस्त्रिभंतुपंचममुपांत्यमंत्यंचयद्वर्षमिति तत्रचंद्रमायदि वृषनवांशकेतन्नवांशकसप्तकस्यार्वाग्भवति तदाकार्तिकेमासिजात इतिवक्तव्यं अथवृषनवांशकस्योर्ध्वंभवति मिथुननवांशकेतन्नवांशक षट्कस्यार्वाक्यदाचंद्रमाभवति तदामार्गशीर्षेमासिजात इतिवक्तव्यं अथमिथुननवांशकेतन्नवांशक षट्कस्योर्ध्वं कर्कटनवांशके तन्नवांशकपंचकस्यार्वाग्यदाचंद्रमाभवति

मेषादिराशीनांचषकाः		
मे·	२००	मी·
वृ·	२४०	कुं·
मि·	२८०	म·
क·	३२०	ध·
सिं·	३६०	वृ·
क·	४००	तु·

तदापौषेमासिजात इति वक्तव्यं अथकर्कटे तन्नवांशकस्योर्ध्वे सिंहे नवांशके तन्नवांशचतुष्टयस्यार्वाग्यदा चंद्रमाभवति तदामाघेमासिजन्मइतिवक्तव्यं
अथसिंहनवांशकेतन्नवांशक चतुष्टयस्योर्ध्वे कन्यानवांशकसप्तकस्यार्वाग्यदा चंद्रमा भवति तदाफाल्गुनेमासिजातइति वक्तव्यं अथकन्यानवांशक स
प्तकस्योर्ध्वे तुलनवांशकेतन्नवांशकषट्कस्यार्वाग्यदाचंद्रमाभवति तदाचैत्रेमासिजातइतिवक्तव्यं अथतुलानवांशके तन्नवांशकषट्कस्योर्ध्वे वृश्चिकनवां
शकेतन्नवांशक पंचकस्यार्वाग्यदा चंद्रमाभवति तदावैशाखेमासिजात इतिवक्तव्यं अथवृश्चिकेतन्नवांशकपंचकस्योर्ध्वे धन्विनवांशकेतन्नवांशक चतुष्ट
स्यार्वाग्यदाचंद्रमाभवति तदाज्येष्ठेमासिजातइत्यवगंतव्यं अथ धन्विनवांशके तन्नवांशकचतुष्टयस्योर्ध्वे मकरनवांशकत्रयस्यार्वाग्यदा चंद्रमाभवति·
तदा आषाढेमासि जातइतिवक्तव्यं अथ मकरनवांशके तन्नवांशकत्रयस्योर्ध्वे कुंभनवांशके तन्नवांशकद्वयस्यार्वाग्यदा चंद्रमा भवति तदाश्रावणे
मासि जात इति वक्तव्यं अथकुंभनवांशके तन्नवांशकद्वयस्योर्ध्वे मीननवांशके तन्नवांशपंचकस्यार्वाग्यदाचंद्रमाभवति तदाभाद्रपदेमासि जातइ
ति वक्तव्यं अथमीननवांशकेतन्नवांशक पंचकस्योर्ध्वे मेषनवांशकेतन्नवांशकषट्कत्रयस्यार्वाग्यदा चंद्रमाभवति तदाऽश्वयुजि मासिजात इतिवक्तव्यं
अथमेषनवांशके तन्नवांशाष्टकस्योर्ध्वे यदि चंद्रमा भवति तदाकार्तिकेमासि जातइत्यवगंतव्यं यस्मिन्कृत्तिकासरोहिणीकार्तिकः मृगशिरार्द्राच मार्ग
शीर्षः पुनर्वसुपुष्यश्च पौषः आश्लेषामघाचमाघः पूर्वाफाल्गुन्युत्तराफाल्गुनीहस्तश्च फाल्गुनः चित्रास्वातीच चैत्रः विशाखानुराधाच वैशाखः ज्ये
ष्ठामूले ज्येष्ठः पूर्वाषाढोत्तराषाढश्चाषाढः श्रवण धनिष्ठाच श्रावणः शतभिषक्पूर्वाभाद्रपदोत्तराभाद्रपदाश्च भाद्रपदः रेवत्यश्विनी भरण्यश्चाऽश्वयु
जः यस्मादुक्तं त्रिभंतु पंचममुपांत्यमंत्यंचयद्वर्षमिति एवंशुक्लांतस्य मासस्य निश्चयः शुक्लांतग्रहणेनैतत्प्रतिपादयति यत्तथा शुक्लपक्षांते येननक्ष
त्रेण युक्तस्तदुपलक्षितोमासोवक्तव्यः यथा कार्तिकशुक्लपक्षांते कृत्तिकारोहिणीस्थमन्यतमेनयश्चंद्रमाभवति तेनकार्तिकोमास उच्यते एवमन्येषा-

मपियोज्यते तदेव द्रुपते एतदुक्तं भवति नशुक्लांतोमासइत्यतोमास कृष्णांत एव तथाच यवनेश्वरः मासेतुशुक्लप्रतिपत्प्रवृत्ते पूर्वेशशीमध्यबलोदशाहे तथाच यद्राशिसंज्ञे शीतांशुः प्रश्नकाले नवांशके स्थितस्तद्राशिगः पूर्णोयस्मिन्भवति चंद्रमाः जन्ममासः पुरुषस्यतु पृच्छतः कृष्णपक्षांतिकोमासोज्ञेयोयतु विपश्चितालग्नत्रिकोणेत्यादि लग्नस्य प्रथमलग्नस्यत्रिकोणयोश्च नवमपंचमयोर्मध्याद्यस्तत्कालमुत्तमेनप्रधान वीर्येण बलेन युक्तस्तद्राशिः प्रोच्यते कथ्यते यस्मिन्नाशौगते चंद्रमसिजात इति वक्तव्यं तथाच यवनेश्वरः होरादिवीर्याधिकलग्नभाजिस्थाने त्रिकोणे शशिनो विधार्यः अंगालभनादिभिर्वा कालांगानीत्यनेन प्रदर्शितोयः कालपुरुषस्यांगविभागस्तदालभनाख्यानेनविधिना स्पृष्टुः स्पृशतः यदेवकालपुरुषस्यांगंस्पृशति

यावान्गतः शीतकरो विलग्नाच्चंद्राद्वदेत्तावति जन्मराशिः
मीनोदये मीनयुगंप्रदिष्टं भक्ष्याहृताकाररुतैश्च चिंत्यम् ६

तत्स्थे चंद्रमसि जातइतिवक्तव्यं आदिग्रहणात्प्राण्युक्तसत्वदर्शनश्रवणे गृह्यते ५ अथप्रकारांतरेणजन्मेशराशिज्ञानमिंद्रवज्रयाह यावानिति विलग्नात्पृच्छा लग्नाच्छीतकरश्चंद्रोयावानागतोजन्मराशौव्यवस्थितस्तस्माद्यस्तावतिराशिः तत्रस्थे चंद्रमसिजात इतिवक्तव्यं मीनोदयेयदि मीन लग्नगतोभवति तदामीनयुगमेव प्रदिष्टमुक्तं मीनस्थचंद्रमाइति वक्तव्यं ननुदर्शितविधिनाराशिरनेकप्रकारोयत्रप्राप्तो भिन्नरूपस्तत्रकोवक्तव्य इत्याशंक्याह भक्ष्याहृताकाररुतैरिति यस्यराशेः संबंधिभक्ष्यद्रव्यं तस्मिन्काले कृत्रिममानीयते तदाकारश्चकश्चिद्दृश्यते यथामार्जारादिदर्शने सिंहो महिषादिदर्शने वृष इत्यादि अथवाराश्युक्तरूप पुरुषस्यहस्तायवारुतेनयस्यराशेःसदृशप्राणिनोरुतंशब्दः क्रियते तत्रस्थे चंद्रमसिजात इतिवक्तव्यं ६ ६७

एवंजन्मराशौ ज्ञातेलग्नज्ञान मिंद्रवज्रयाह होरेति होरायांप्रश्नलग्नेयस्यराशेर्नवांशक स्तत्कालं वर्तते तस्मात्तावति तमंतस्मातिमंतमे वांशकराशिंतस्य-
जन्मलग्नंवक्तव्यं अथवालग्नाल्लग्नद्रेष्काणादारभ्यरविः सूर्योयावति यावत्संख्येद्रेष्काणेव्यवस्थितस्तस्माल्लग्नादारभ्यतावतिराशौ लग्नगतेतस्य जन्मवक्त
व्यं अत्रचद्वादशेभ्योधिके द्रेष्काणेद्वादशकमपास्यसंख्यानिर्देशः चतुर्विंशतेरधिके चतुर्विंशतिमपास्यशेषंवदेत् एवंशास्त्रमाह शास्त्रंकथयति नवमनी
षिकयोक्तमित्येतत्प्रतिपादयति शास्त्रग्रहणेनैतत्प्रतिपाद्यते उक्तंच प्रच्छालग्ननवांशस्ययोराशिसंज्ञयासमस्तास्मिन्लग्नगतेराशौ जन्मवक्तव्यं पृच्छतस्ता
वत्संख्योपगतेलग्ना दृक्काणे दिनकृत् ततः प्रश्नलग्नात्तावत्संख्ये कृतेलग्नराशौ प्रष्टुर्जन्म विनिर्दिशेत् ७ अथप्रकारांतरेणलग्नानयनमिंद्रवज्रमाह

होरानवांशप्रतिमंविलग्नं लग्नाद्रविर्यावतिचदृकाणे
तस्माद्वदेत्तावतिवाविलग्नंप्रष्टुःप्रसूतावितिशास्त्रमाह ७

जन्मादिशेदिति लग्नगेग्रहे जन्मादिशेत् प्रश्नलग्नेयोग्रहोव्यवस्थितस्तं तात्कालिकं कृत्वालिप्ता पिंडीकार्यं अथबहवोलग्नागता भवंति तदातेषां यो-
बलवान् तं तात्कालिकंकृत्वा लिप्तापिंडीकार्यं ततः सलिलसमीपकृतायामवनौ द्वादशांगुलेन शंकुना तात्कालिकानि छायांगुलानि गृहीत्वा तैरंगुलै
रेकैकं ग्रहं यद्दर्शितकालेलिप्तापिंडीकृतंगुणयेत् अथवासर्वंग्रहेभ्योयोबलवान् ग्रहस्तं तात्कालिकंकृत्वा लिप्तापिंडं कृत्वाछायांगुलाहतं चार्कशकृद्गुकार
येत् द्वादशभिर्विभजेत्तत्रयावत्संख्यमवशिष्टं तावत्संख्यो मेषादेरारभ्ययो राशिर्भवति तस्मिन् राशौ लग्नगते तस्यजन्म वक्तव्यं अथप्रकारांतरेणाह आ
सीनेत्यादि आसीन उपविष्टोयदाप्रष्टा पृच्छति तदालग्नाद्यज्जायास्थानं सप्तमराशिस्तस्मिन् लग्नगतेतस्य जन्मवक्तव्यं अथसुप्तः सुप्तोऽ-

शयनपतितो विहीतः लग्ननिरूस्यप्रश्नाभावात् तत्रपतितोयदापृच्छति तदालग्नाद्यत्सुखस्थानंचतुर्थराशि स्तस्मिन् लग्नगते तस्यजन्म वक्तव्यं अयोत्थितः पृच्छति तदातस्माल्लग्नाद्यदाज्ञास्थानंदशमोराशिस्तस्मिन्लग्नगते तस्यजन्मवक्तव्यं अथशयनादासनाद्वोत्थितः उत्तिष्ठतः पृच्छति-तदोदयलग्नराशौतस्मिन्नेवजन्मवक्तव्य उक्तंच उत्तिष्ठतो विलग्नात्सुप्तःसुप्तस्यबंधुलग्नाच्चउपविष्टस्यास्तमये व्रजतोमे षूरणस्थानादिति ८ अथप्रकारांतरेण सर्वमेवनष्टजातकंवक्ति ततः प्रश्नकाले तात्कालिकंलग्नंकृत्वापिंडीकार्यं ततस्तस्य लिप्तापिंडीकृतस्यगुणकारविज्ञानार्थं शार्दूलविक्रीडितेनाह गोसिंहाविति गोसिंहादयोराशयोयथाक्रमंदशादिभिर्गुणकारैः संवर्ग्यागुणनीयाः तद्यथा गोसिंहौ दशभि १० गुणयेत् वृषलग्नं लिप्ता-

जन्मादिशेल्लग्नगे वीर्यगेवाछायांगुलघ्नोर्कहतेवशिष्टम्
आसीनसुप्तोत्थिततिष्ठताभंजायासुखाज्ञोदयगंप्रदिष्टम् ८

पिंडीकृतंदशभिर्गुणयेत् एवंसिंहं दशभिरेव जितुमाष्टमौ मिथुनवृश्चिकौ लग्नगतावष्टभि ८ गुणयेत् क्रियतुले मेषतुले एतौ सप्तभि ७ गुणयेत् कन्यामृगौ कन्यामकरौ एतौ लग्नगतौ विषयैः पंचभि ५ गुणयेत् स्वमेतेयथाक्रमेसंवर्ग्या गुणनीयाः शेषा अनुक्ताराशयः स्वसंख्यागुणआलीय संख्याया गुणनीयाः तत्रगणनया कर्कटं चतुर्भिर्गुणयेत् एवंधन्विनवभिः ९ कुंभमेकादशभिः ११ एवं मीनोद्वादशभिः १२ एवंतावल्लग्नस्वगुणकारेणावश्यमेवगुणयेत् दशकाष्टसप्तविषयैः ततस्तत्रयदिग्रहोभवति तदाग्रहगुणकारेणावश्यमेवगुणयेत् तत्रग्रहगुणकारविधिः जीवारास्कुजिवेंदवाःप्रथमवद्दशकाष्टसप्तविषयैरिति जीवगुरौलग्न

मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.	मी.
७	१०	८	४	१०	५	७	८	९	५	११	१२

गतेतमेवलग्नंस्वगुणकारैराहतंदशभिर्गुणयेत् आरेभौमेलग्नगतेअष्टभिः आस्फुजिच्छुक्रः तस्मिन्लग्नगतेसप्तभिः ऐंदवेबुधेपंचभिः शेषारविशशि-

र	चं	मं	बु	गु	शु	श	रा	के
५	५	८	५	१०	७	५	०	०

सौरास्तेचसौम्यवत् बुधवत् पंचभिर्गुणनीयाइत्यर्थः एवंतात्कालिकलग्नंअवश्यंराशिगुणकारेण गुणयेत् ततः सग्रहोक्तगुणकारैरपितत्रचयदाग्रहोभवति तदाग्रहगुणकारेण गुणयेत् यदाबहवोग्रहाभवंति तदासर्वेषांगुणकारैर्गुणयेत् एवंचतद्गुणितमेकांतेस्थापयेत् ९ अथनक्षत्रानयनंवसंततिलकेनाह सप्ताहतमिति सप्ताहतंसप्तभिर्गुणयेत् दत्वाथवेति ततस्तत्रनवदेयाःशोध्यावानकिंचिद्भाउदेत्युच्यते यदिस्वचरराशिर्लग्नगतोभवति तदानवदेयाः स्थिरेनदेयानापिशोध्याः द्विस्वभावे विलग्ने नवशोध्याः ए-

गोसिंहौजितुमाष्टमौ क्रियतुलेकन्यामृगौचक्रमा त्संवर्ग्योदशकाष्टसप्तविषयैःशेषाःस्वसंख्यागुणाः
जीवारास्फुजिदैदवाःप्रथमवच्छेषाग्रहाःसौम्यवद्राशीनांनियतोविधिर्ग्रहयुतैः कार्याचतद्वर्गणाः ९

वंकेचिद्व्याचक्षते वयंपुनर्ब्रूमः यदिप्रश्नलग्नेप्रथमोद्रेष्काणोभवति तदानदेयाः द्वितीयेनदेयानापिशोध्याः तृतीयेनवशोध्याः एवंकृत्वातस्यराशेस्त्रिधनेनसप्तविंशत्याभागमपहृत्यावाक्षंत्याज्यतत्रयावत्संख्याकोवशेषोभवति तावत्संख्यमश्विन्यादितोपन्नक्षत्र तस्यप्रष्टुर्वक्तव्यं केचिद्वदंतियथास्थितस्यराशेः सप्तविंशत्याभागमपहृत्यावशेषांकनवकदानेनविशोधनेनवायथास्थितेनांकेनसंवादउत्पद्यते तथानक्षत्रंवक्तव्यं एवमित्यादिकलत्रसहजात्मजशत्रुभेभ्यइति भार्याभर्तृपुत्ररिपुपुनष्टजातकंयदापृच्छतितदातद्भेभ्यस्तद्भावेभ्यः एवंप्रष्टुः पृच्छकस्यवदेद्ब्रूयात् तमेवोदयराशिंपरिकल्पयेदित्यर्थः एतदुक्तंभवति यदिपुरुषःस्वपत्न्यानक्षत्रंपृच्छति तदातात्कालिकेलग्नेराशिषट्कंज्ञेयं अथभ्रातुःपृच्छति तदाराशिद्वयंदेयमथपुत्रस्यपृच्छति

तदाराशिचतुष्कंदेयमथयशाब्दोः पृच्छतितदाराशिपंचकंज्ञेयं एवंकृत्वायद्भवतितदेवोदयराशिंप्रकल्प्यतद्गुणकारेण गुणयेत् तत्स्थग्रहगुणकारेणच ततस्तत्रभाग्यन्नवकदानविशोधने कृत्वासप्तविंशत्याभागमपहृत्यावशेषांकसमयंयस्यप्रष्टापृच्छतितस्यनक्षत्रं वक्तव्यं एतदप्युपलक्षणार्थमेव त्रिराशि सहितातात्कालिकाल्लग्नान्मित्रस्यवक्तव्यमेतन्नक्षत्रानयनमप्युपलक्षणमेवंसकलमपिनष्टजातकंवक्तव्यं १० अथवर्षाद्यानयनंवसंततिलकेनाह वर्षंतुमासेति वर्षादिनीसर्वाणिस्वविकल्पेनभागेहृतेयथापाठक्रमेणानयितव्यानि तद्यथा तात्कालिकंलग्नं लिप्तापिंडीकृतं राशिगुणाकारहतंग्रहसंयुक्तं चेद्ग्रहगुणाकाराहतमपियदेकांतेस्थापितंतत्पुनरपिदशादिगुणंकार्यं एतदुक्तंभवति सराशिः स्थानचतुष्टयेधार्यः एकत्रदशगुणोऽन्यत्र द्वितीयेऽ

सप्ताहतंत्रिधनभाजितशेषमृक्षंदत्वाथवानवविशोध्यनवाथवास्मात् एवंकलत्रसहजात्मजशत्रुभेभ्यः प्रष्टर्वदे-
दुदयराशिवशेनतेषां ॥ १० ॥ वर्षंतुमासतिथयोद्युनिशंह्युडुनिवेलोदयेक्षनवभागविकल्पनाःस्युः भूयोदशादि
गुणिताः स्वविकल्पभक्ताद्वर्षादयोनवकदानविशोधनाभ्याम् ११

ष्टगुणोऽन्यत्र तृतीयेसप्तगुणः चतुर्थेपंचगुणः कार्यः यतउक्तंभूयोदशादिगुणितान्भूयः पुनरपिदशकाष्टसप्तविषयैर्गुणनीयाः ततस्तस्मिन्राशिचतुष्टयेभाग्यन्नवकदानविशोधनेकृत्वास्वविकल्पैर्भागमपहृत्यावशेषंवर्षादयोज्ञेयाः ११ अथनज्ञायतेकस्माद्राशेः कस्यानयनंकार्यं तदनुष्टुप्त्रयेणाह विज्ञेयादशकेष्वब्दाइति अत्रबहुवचनंबहुधोपयोगित्वात्कृतं यदुक्तं स्वविकल्पभक्ताद्वर्षादयस्तद्व्याख्यायते एतेचत्वारोराशयः स्थापितास्तेषां नवकदानविशोधनंकृत्वाकर्मयोग्याः सर्वेभवति ततोदशगुणस्यपृथवस्थस्यपरमायुषाविंशत्यधिकेनवर्षशतेनभागमपहृत्यतत्तु संख्ययांकोवशि

ष्यते तदंकसमं तस्यवर्षसंख्यानंवर्तते तस्यैवषड्भिर्भागमपहृत्यऋतुसंख्यायातत्रयोंको वशिष्यते तदंकसमे शिशिरादावृतौजातइतिवक्तव्यं तस्यैवतुमाससंख्ययाद्वाभ्यांभागमपहृत्ययद्येकोवशिष्यते तदाज्ञाततौ प्रथमेमासि जातइतिवक्तव्यं अथशून्यमवशिष्यते तदाद्वितीयेमासिजातः एवंकृत्वादशगुणः कर्मयोगोराशिरपास्यः यस्यविंशत्यधिकाद्दर्शशतादप्यधिकंजन्मक्रोतीतं तस्यनष्टजातकज्ञानोपायएवनास्ति अष्टकेष्वित्यादि योसावष्टहतोराशिस्तस्यपृथक्स्थस्यकर्मयोगस्यपक्षसंख्यया द्वाभ्यांभागमपहृत्ययद्येको वशिष्यते तदाशुक्लपक्षे जातइतिवक्तव्यं नकिंचिदवशिष्यते तदाकृष्णपक्षे तस्यैवतिथिसंख्यया पंचदशभिर्भागमपहृत्ययोंकोवशिष्यते तदंकसमानेतिथौ जातइतिवक्तव्यं एवंकृत्वाष्टगुणः क

विज्ञेयादशकेष्वब्दाऋतुमासास्तथैवच अष्टकेष्वपिमासार्द्धास्तिथयश्चतथास्मृताः १२
दिवारात्रिप्रसूतिंचनक्षत्रानयनंतथा सप्तकेष्वपिवर्गेषुनित्यमेवोपलक्षयेत् १३

र्मयोगोराशिरपास्यः १२ दिवेत्यादि योसौसप्तहतोराशिस्तत्रप्राग्वदेवनवकदानविशोधनेकृत्वातत्कर्मयोग्यं राशिंस्थापयेत् तस्यदिवारात्रिसंख्यया द्वाभ्यांभागमपहृत्ययद्येकोवशिष्यते तदादिवसेजातोऽथनकिंचिदवशिष्यते तदारात्रौजातइति वक्तव्यम् योसौसप्तहतोराशिस्तस्यनक्षत्रसंख्यया सप्तविंशत्याभागमपहृत्ययोंकोवशिष्यतेतदंकसंख्येनक्षत्रेऽश्विन्यादितआरभ्यजातनक्षत्रइतिवक्तव्यंअस्यकर्मणःपुनरभिधानंनक्षत्रानयनस्यबाहुल्योपयोगित्वात् १३ वेलेत्यादि यस्मिन्दिनेपुरुषस्यजन्मज्ञानंतद्दिनप्रमाणंघटिकादिकंकर्तव्यम् रात्रौचेत्तदारात्रिप्रमाण ततः पंचगुणस्यराशेस्तेन दिनप्रमाणेनरात्रिप्रमाणेनभागमपहृत्ययोंकोवशिष्यते तस्मिन्कालेदिनगतेरात्रिगतेवातस्यजन्मवक्तव्यं अथविलग्नमित्यादि अथशब्दःपादपूरणार्थे का-

लेज्ञाते राश्यादिलग्नं कर्तव्यं ततस्तस्य होराद्रेष्काणनवांशद्वादशांशत्रिंशांशभागाः कर्तव्याः तात्कालिकाग्रहाश्च कर्तव्याः ततो यथाभिहितेन विधिना दशांतरदशाष्टकवर्गादेरभिहितस्य फलस्य निर्देशः कार्यः एवं नष्टजातकं साधयेत् १४ अथ प्रकारांतरेण नक्षत्रानयनमार्ययाह संस्कारनामेति संस्कारेण नाम संस्कारनाम तस्य मात्राः संस्कारेणागतस्य नाम्नो मात्राः संस्कारनाममात्राः संस्कारग्रहणेनैतत्प्रतिपादितं भवति संस्कारेण यत्पुरुषस्य नामकृतं तस्य मात्राः ग्राह्याः नाम्न्यस्य कस्यचित्कुनामादेः मात्राश्चेह गृह्यंते हल् अर्धमात्रिकः अच् मात्रिकः इत्यनया स्थित्या ताः संस्कारनाममात्राः संगृह्य द्विगुणीकार्याः ततस्तात्कालिकानि शंकुच्छायांगुलानि गृहीत्वा ता द्विगुणमात्रास्तैरंगुलैः संयुक्ताः कार्याः एवं कृते यद्भवति तस्य त्रिनवव

वेलामथविलग्नं च होरांशकमेव च पंचकेषु विजानीयान्नष्टजातकसिद्धये १४ संस्कारनाममात्रा द्विगुणाश्छायां-
गुलैः समायुक्ताः शेषं त्रिनवके भक्तान्नक्षत्रं तद्धनिष्ठादि १५ द्विघ्नी चतुर्दशदशातिथिसप्त त्रिगुणा नवाष्टचंद्रा
द्याः पंचदशघ्नास्तद्दिङ्मुखान्विताश्च धनिष्ठादि १६

केन सप्तविंशत्या भागमपहृत्य यः शेषो भवति तदंकसमं तस्य धनिष्ठादित आरभ्य नक्षत्रं वक्तव्यं १५ अथ नक्षत्रानयनं प्रकारांतरेणार्ययाह द्विघ्नी चतुर्दशेति पूर्वाभिमुखो यदा प्रष्टा पृच्छति तदा द्वयोरंकाः स्थाप्याः अथाग्नेयाभिमुखस्तदा त्रयाणा अथ दक्षिणाभिमुखस्तदा चतुर्दशानां अथ नैर्ऋत्यमुखस्तदा दशानां अथ पश्चिमाभिमुखस्तदा तिथिसंख्यानां पंचदशानां अथ वायव्याभिमुखस्तदा सप्तत्रिगुणा एकविंशतिः उत्तराभिमुखस्तदा नवानां ऐशान्याभिमुखस्तदाष्टानां तद्यथा एवं दिगभिमुखप्रष्टृवशेनांकं गृहीत्वा ततः पंचदशगुणः कार्यः ततस्तस्मिन्प्रदेशे यावंतः पुरुषास्तदभिमुखाः स्थितास्तत्संख्यायान्वितो युक्तः कार्यः एवं कृते यद्भवति तस्य सप्तविं-

शत्वा भागमपहृत्यर्पोको वशिष्यते तदंकसमंतस्य धनिष्ठाद्यारभ्य नक्षत्रं वक्तव्यं १६ अथनष्टजातकोपसंहारं आर्ययाह इतिनष्टजातकमिति इतिशब्दः उपसंहारे मयावराह मिहिराचार्येण नष्टजातकं बहुप्रकारं बहुभेदं विनिर्दिष्टम् उक्तमिदं अतोस्माद्धेतोः सच्छिष्यैः शोभनसच्छास्त्रैर्ग्राह्यं यत्नात्परीक्ष्य विचार्य यथायेन प्रकारेण संभवति सत्यरूपंतथाग्राह्यमिति येनप्रकारेणासंभवतितथा गृहीतव्यमित्यर्थः बहुभिरागमैर्मयाविचार्य पराशरवसिष्ठयवनसत्यमणित्थादीनांमतानि आलोक्यकृतं तदेवभूयो निर्मल गुणनिपुण बुध्याविचार्य संविदयाकार्यं येनस्फुटसिद्धो सौ संपद्यते १७ इतिश्रीभट्टोत्पलविरचितायां बृहज्जातक विवृत्तौनष्टजातकाध्यायः षड्विंशतिः समाप्तः २६ अथद्रेष्काणाध्यायो व्याख्यायते

इतिनष्टजातकमिदं बहुप्रकारं मया विनिर्दिष्टम् ग्राह्यमतः सच्छिष्यैः परीक्ष्ययत्नाद्यथा
भवति १७ इतिनष्टजातकाऽध्यायः समाप्तः २६ अथद्रेष्काणाध्यायप्रारंभः कल्यांसि
तवस्त्रवेष्टितः कृष्णः शक्तइवाभिरक्षितुं रौद्रः परशुंसमुद्यतं धत्तेरक्तविलोचनः पुमान् १

तत्रादौमेषाद्य द्रेष्काणस्य स्वरूपज्ञानं वैतालियेनाह कल्यामिति कल्यांजघनेसितंश्वेतं वस्त्रमंबरं वेष्टितं येनकृष्णः असितवर्णः शक्तइवअभिरक्षितुमाभिमुख्येनरक्षां कर्तुंशक्तः समर्थइव रौद्रोभीषणः यः परशुं कुठारं समुद्यतं धत्ते धारयति रक्तविलोचनोलोहिताक्षः सचपुमान् पुरुषःपुरुषद्रेष्काणः सायुधोभौमासक्तश्च १ अथमेषद्वितीयद्रेष्काणस्यस्वरूपमिदंध्वजयाह रक्तांबरेति रक्तांबरालोहितवस्त्रा भूषणमलंकरणं भक्ष्यंभोज्यंतत्रचित्तंयस्याः कुंभाकृतिः घटोदरीवाजिमुखी अश्ववक्त्रा त्रिषार्तापिपासार्ता एकेनपादेनचरणेनोपलक्षिता इदंद्रेष्काणरूपं मेषमध्ये मेषद्वितीये-

यवनोपदिष्टं यवनाचार्यैः कथितं एतच्चतुष्पद द्रेष्काणः स्त्रीद्रेष्काणोऽर्कसक्तश्च यस्मादाचार्यैश्चतुष्पान्मुखाच्चतुष्पद द्रेष्काण इति व्याख्यात् स्तथा·
खगमुखो द्रेष्काणश्च २ अथमेषतृतीय द्रेष्काणस्यस्वरूपमिंद्रवज्रयाह क्रूरोविषमस्वभावः कलाज्ञः कलावित् कपिलः पिंगलः क्रियार्थी कर्मस्व
भिक्षाभुकः भग्नव्रतः स्खलितनियमः अभिमुख्येनोद्यतोदंडः हस्तेपाणौयस्य रक्तानिलोहितानि वस्त्राण्यंबराणि बिभर्ति धारयति चंडः क्रोध
शीलः अयंमेषतृतीय स्त्रिभागोद्रेष्काणः कथितः उक्तः एषनर द्रेष्काणः सायुधोजीवसक्तश्च ३ अथवृष प्रथमद्रेष्काणस्य जातस्य स्वरूपं दोधके

रक्तांबराभूषणभक्ष्यचिंताकुंभाकृतिर्वाजिमुखीतृषार्ता एकेनपादेनचमेषमध्ये द्रेष्काणरूपंयवनो-
पदिष्टं २ क्रूरःकलाज्ञः कपिलः क्रियार्थीभग्नव्रतोभ्युद्यतदंडहस्तः रक्तानिवस्त्राणि बिभर्तिचंडो
मेषेतृतीयःकथितस्त्रिभागः ३ कुंचितलूनकचाघटदेहादग्धपटातृषिताशनचिन्ता आभरणान्य-
भिवांछतिनारीरूपमिदंवृषभप्रथमस्य ४ क्षेत्रधान्यगृहधेनुकलाज्ञोलांगलेसशकटे कुशलश्च
स्कंधमुद्वहति गोपतितुल्यक्षुत्परोजवदनोमलवासाः ५

नाह कुंचितेति कुंचिताः कुटिलाः लूनाः कचाः केशायस्याः कुटिलाच्छिन्नकेशा घटदेहा कुंभसदृशोदरी दग्धपटा दग्धवस्त्रा तृषिता·
पिपासार्ता अशनेभोजनेचिन्तायस्याः आभरणानिभूषणानि अभिवांछंति साचनारीस्त्री इदंवृषभप्रथमस्यद्रेष्काणस्यस्वरूपंएषःस्त्रीद्रे
ष्काणःसाग्निकःशुक्रसक्तश्च ४ अथद्वितीयद्रेष्काणस्यस्वरूपंस्वागतयाह क्षेत्रधान्येति क्षेत्रंकेदारःधान्यानिशालयः गृहंवेश्मधेनुःगौः कलाःगीता

वाद्यनृत्यलेखकर्मचित्रकर्मादि एतासांज्ञः पंडितः लांगलेहलेसशकटेशकटसहिते कुशलः शिक्षितःगोपतितुल्यंवृषभसदृशांस्कंधेककुदमुद्वहति धारयतिस्फुटस्वरः क्षुधयार्तः अजवदनः छागवक्त्रः मलवासामलिनांबरः एषोनरद्रेष्काणः चतुष्पादद्रेष्काणो बुधसक्तश्च ५ अथवृष तृतीयद्रेष्काणस्य स्वरूपंदोधकेनाह द्विपसमकायइति द्विपसमकायोमहाशरीरोहस्तितुल्यदेहः नधुनः हस्तिशरीरः पांडुरदंष्ट्रः श्वेतदंतः शरभसमांघ्रिः बृहत्पादोन्युनः शरभसदृशपादः पिंगलमूर्तिः कपिलदेहः अविः प्रसिद्धः मृगआरण्यपशुः अविमृग लोभार्यं व्याकुलं चित्तयस्य अयंवृषभवनस्य वृषराशेःप्रांतग स्तृतीयद्रेष्काणः चतुष्पादः सौरसक्तश्च ६ अथमिथुनस्य प्रथमद्रेष्काणस्य स्वरूपज्ञानं वसंततिलकेनाह सूच्याश्रयमिति नारी स्त्री

द्विपसमकायः पांडुरदंष्ट्रः शरभसमांघ्रिः पिंगलमूर्तिः अविमृगलोभव्याकुलचित्तो वृषभ
वनस्यप्रांतगतोयम् ६ सूच्याश्रयंसमभिवांछति कर्मनारी रूपान्विताभरणकार्यकृतादराच
हीनप्रजोच्छ्रितभुजर्तुमती त्रिभागमाद्यंतृतीयभवनस्यवदंति तज्ज्ञाः ७

सूच्याश्रयंकर्मसीवन क्रियांसम्यगभिवांछतीति रूपान्वितासुरूपा आभरणकार्ये भूषण कर्मणिकृत आदरो अभिलाषो श्रद्धायया हीन प्रजा अपत्यरहिता उच्छ्रितभुजोर्ध्वबाहु कीऋतुमतीसार्तवाकामार्तावा तृतीयभवनस्य मिथुनस्याद्यं प्रथमं त्रिभागं द्रेष्काणं तज्ज्ञाः पंडिताः प्रवदंतिकथयंति एषस्त्री द्रेष्काणो बुधसक्तश्च ७ अथमिथुनद्वितीयद्रेष्काणस्यस्वरूपमुपजातिकयाह उद्यानसंस्थइति उद्यानसंस्थउपवनेतिष्ठति कवचीसन्नाह प्रावृतशरीरः धनुष्मान्चापहस्तः शूरोरणप्रियः शरास्त्रधारीवापाठः शराः कांडानितान्येवास्त्राणि तद्धारणेशीलंयस्येति गरुडा

ननोपक्षिसदृशवक्त्रः क्रीडनंक्रीडा आत्मजाः पुत्राः अलंकरणमाभरणं अर्थोवित्तं एषांसंबंधिनीं चिंतांकरोति अथ मिथुनस्यराशेर्मध्ये द्वितीयद्रेष्काण इत्यर्थः एषनरद्रेष्काणः सायुधः खगद्रेष्काणः शुक्रसक्तश्च ८ अथमिथुनस्यतृतीयद्रेष्काणस्वरूपंस्वागतयाह भूषितइति भूषितो लंकृतः वरुणवत्समुद्रवत् बहुरत्नः प्रभूतमणिः तूणंशराधानं कवचंसन्नाहः एतौबद्धौग्रथितौयेन सधनुष्कः चापयुक्तः नृत्यवादिते वाद्यविषये कलासु चनिः शेषासुविद्वांस्तज्ज्ञः काव्यकृत्पंडितः काव्यकर्मकार्यं तत्करोति एषामिथुनस्यराशेरवसाने तृतीयद्रेष्काणे इत्यर्थः एषः नरद्रेष्काणः सायुधः सौरसक्तश्च ९

उद्यानसंस्थः कवचीधनुष्मान् शूरोस्त्रधारी गरुडाननश्च क्रीडात्मजालंकरणार्थचिंतांकरोतिमध्येमिथुनस्यराशेः ८
भूषितोवरुणवद्बहुरत्नोबद्धतूणकवचः सधनुष्कः नृत्यवादितकलासुचविद्वान्काव्यकृन्मिथुनराश्यवसाने ९ पत्र
मूलफलभृद्द्विपकायः काननेमलयगः शरभांघ्रिः क्रोडतुल्यवदनोहयकंठः कर्कटे प्रथमरूपमुशंति १० पद्मार्चिता-
मूर्द्धनिभोगियुक्तास्त्रीकर्कशारण्यगताविरौति शाखांपलाशस्यसमाश्रिताचमध्येस्थिताकर्कटकस्यराशेः ११

अथकर्कटपूर्वस्यस्वरूपंस्वागतयाह पत्रेति पत्राणिमूलानिफलानिचबिभर्ति धारयति द्विपकायो हस्तिसदृशशरीरः कानने मलयगः मलयश्चंदनवृक्षः तत्रोपगतः स्थितः शरभांघ्रिः शरभसदृशपादः क्रोडः सूकरस्तत्तुल्यवदनः तत्सदृशवक्त्रः हयकंठोऽश्वग्रीवः कर्कटे कर्कटराशौप्रथमद्रेष्काणस्यस्वरूपमुशंति कथयंति एतद्द्रेष्काणस्यतुष्पाच्चंद्रसक्तश्च १० अथकर्कटद्वितीयद्रेष्काणस्यस्वरूपमिंद्रवज्रयाह पद्मार्चितेति स्त्रीयोषिन्मूर्धनिशिरसिपद्मैःकमलैरर्चितापूजिता भोगियुक्तासर्पा कर्कशाकठिनयौवनोपेता अरण्यगता एकांतस्थिता विरौति आक्रोशयति:

पलाशवृक्षस्य शाखांलतां समाश्रितातत्रासक्तास्थिता कर्कटस्यराशेर्मध्येस्थिता एषस्त्रीद्रेष्काणो व्यालद्रेष्काणो भौमसक्तश्च ११ अथ कर्कटस्य तृतीयद्रेष्काणस्यस्वरूपं वैतालीयेनाह भार्येति भार्या जायातस्या आभरणार्थं अलंकरण निमित्तमर्णवंसमुद्रं नौस्थोनावमारूढः सर्पवेष्टितां गो गच्छतियाति हेमैः सुवर्णनिर्मितैः विभूषणै रलंकरणैर्युतः चिपिटास्यः चर्पटमुखः कर्कटेंत्यगतः तृतीयद्रेष्काणः इत्यर्थः एषनरद्रेष्काणोव्यालद्रेष्काणोजीवसक्तश्च १२ अथसिंह पूर्वस्य द्रेष्काणस्य स्वरूपज्ञानंरथोद्धतयाह शाल्मलेरिति शाल्मली वृक्षस्योपर्यग्रे गृध्रः पक्षीजंबुकः सृगालः एतौस्थितौ तथाश्वासारमेयः नरोमनुष्यः सचमलिनैः मलोपेतैरंबरैर्वस्त्रैरन्वितोयुक्तः मातृपितृ विप्रयोजितोजननीजनक विरहितोरौत्याक्रुश्यति इदमाद्यं प्रथमं रूपंसिंहस्योच्यते कथ्यते सिंहप्रथमद्रेष्काण इत्यर्थः एषनरद्रेष्काणश्चतुष्पदद्रेष्काणः खगद्रेष्काणोर्क सक्तश्च १३ अथसिंह द्वितीयस्य स्वरूपंवंशस्थेनाह हयाकृतिरिति हयाकृतिः अश्वाकारः पांडुरमीषच्छुक्लयुतंमाल्यपुष्पनिचयं शेखरेशिरसि यस्य कृष्णाजिनं कृष्णमृगचर्म कंबलमौर्णिकं बिभर्ति धारयति केचित्कृष्णाजिनचीवरमिति पठंति चीवरंजीर्णवासः नरोमनुष्यो दुरासदः दुर्ज्ञेयः दुःसाध्यः सिंह इव आत्तकार्मुकः गृहीतचापः नताग्रनासः नताग्रानासायस्य मृगराजस्य सिंहस्य मध्यमो द्वितीयोद्रेष्काणः हयाकृतिः पुरुष एवायं नचतुष्पद द्रेष्काणः एषनरद्रेका

भार्याभरणार्थमर्णवंनौस्थोगच्छतिसर्पवेष्टितः ॥ हैमैश्चयुतोविभूषणैश्चिपिटास्योंत्यगतश्चकर्कटे १२ शा-
ल्मलेरुपरिगृध्रजंबुकौश्वानरश्चमलिनांबरान्वितः रौतिमातृपितृविप्रयोजितः सिंहरूपमिदमाद्यमुच्यते १३
हयाकृतिःपांडुरमाल्यशेखरो बिभर्तिकृष्णाजिनकंबलंनरः दुरासदःसिंहइवात्तकार्मुको नताग्रनासो मृगरा-
ज मध्यमः १४

णः सायुधो जीवसक्तश्च १४ अथसिंह तृतीयस्य स्वरूप मुपजातिकयाह ऋक्षाननइति वृक्षः प्राणी ऋक्षाननः ऋक्षसदृशवक्त्रः वानर तुल्यचेष्टः वानरेण कपिना तुल्या सदृशाचेष्टा स्वभावोयस्य दंडं आयुधं फलं आस्वादि आमिषं मासंच विभर्ति धारयति कूर्चीदीर्घश्मश्रुः मनुष्यः पुरुषः कुटिलैः केशैर्मूर्द्धजैर्युक्तः मृगेश्वरस्यसिंहस्यांत्यग स्त्रिभागः एषनरद्रेष्काणः चतुष्पदद्रेष्काणः सायुधो भौमसक्तश्च १५ अथकन्या पूर्वस्य स्वरूप मुपजातिकयाह पुष्पप्रपूर्णे नेति कन्याकुमारी पुष्पप्रपूर्णेन कुसुम परि पूरितेन कुंभेन उपलक्षिता मलप्रदिग्धे रतिमलोपेतैः अंबरैर्वस्त्रैः

ऋक्षाननो वानरतुल्यचेष्टो बिभर्त्तिदंडं फलमामिषंच कूर्चीमनुष्यः कुटिलैश्चकेशैर्मृगेश्वरस्यां
त्यगतस्त्रिभागः १५ पुष्पप्रपूर्णेन घटेन कन्यामल प्रदिग्धांबर संवृतांगी वस्त्रार्थसंयोग-
मभीप्समाना गुरोः कुलवांछतिकन्यकाद्यः १६ पुरुषः प्रगृहीतलेखनिः श्यामो वस्त्रशिराव्य
यायकृत् विपुलंच बिभर्तिकार्मुकंरोमव्याप्ततनुश्च मध्यमः १७

संवृतांगी संवृतावयवा वस्त्राण्यंबराणि अर्थोधनं एषांसंयोगमभीप्समानावांछमाना गुरोः कुलंव्रजति गच्छति कन्यकाद्यः प्रथमद्रेष्काणः एषस्त्रीद्रेष्काणोबुधसक्तश्च १६ अथकन्या द्वितीयस्य स्वरूपंवैतालीयेनाह पुरुषोनरः प्रगृहीतलेखनिः येनाक्षराणि लिख्यंते सालेखनिः श्यामोश्यामवर्णः वस्त्रशिराः कर्पटसंयमितमूर्द्धाकेचिद्रूक्षशिरा इतिपठंति संयमितशिराः व्ययंव्ययकृत् आयंप्रवेशंचकरोति गणयति विपुलं विस्तीर्णकार्मुकं धनुर्बिभर्ति धारयति रोमव्याप्ततनुः रोमशशरीरः एषमध्यमो द्वितीयद्रेष्काणः एषनरद्रेष्काणः सायुधः सौरसक्तश्च १७ छ

अथकन्यातृतीयस्य ज्ञानमुपजातिकयाह गौरीगौरवर्णा सुधौताप्राणियस्मिन् दुकूलेपटविशेषेतेनगुप्ताच्छादिता केचित्तुदुकूलहस्ता इति पठंति· समुच्छ्रिताअत्युच्चा कुंभोघटः कटच्छुर्दर्वीप्रसिद्धागृहोपयोगिकंलोहभाडंतत्करेहस्ते यस्याः देवालयंसुरगृहंस्त्रीयुवतिः प्रयतासमाहिताप्रवृत्ता गंतुमुद्यतावदंतिकथयंति मुनयः कन्यांत्यगतस्त्रिभागः तृतीयद्रेष्काणः एषस्त्रीद्रेष्काणः शक्रसक्तस्य १८ अथतुलाद्यस्वरूपंवसंततिलकेनाह वीथ्यंतरेति वीथ्यंतरेमार्गमध्येयत्तदापणप्रसारकः समवस्थितस्तत्रगतः हट्टपुरुषोनरस्तुलावान् तुलाहस्तः विद्यमानतुलः उन्मानेऊर्ध्वमानेतुलादिकेमानेमानशब्देनकुडवादौच तस्मिन्कुशलः तज्ज्ञः प्रतिमानंयेनद्रव्याणिसुवर्णरत्नानि परिछिद्यंतेतेतुहस्तेयस्याः भांडंक्रयद्रव्यंतद्विद्यतेयस्य-

गौरीसुधौतायदुकूलगुप्तासमुच्छ्रिताकुंभकटच्छुहस्ता देवालयंस्त्रीप्रयताप्रवृत्तावदंतिकन्यांत्यगतस्त्रिभागः १८ वीथ्यंतरापणगतःपुरुषस्तुलावानुन्मानमानकुशलःप्रतिमानहस्तः भांडंविचिंतयतितस्यचमूल्यमेतद्रूपंवदंतियवनाः प्रथमंतुलायाः १९ कलशंपरिगृह्यविनिःपतितुंसमभीप्सतिगृध्रमुखः पुरुषः क्षुधितस्तृषितश्चकलत्रसुतान्मनसैतितुलाधरमध्यगतः २०

विचिंतयतिध्यायति तस्यभांडस्यैतन्मूल्यमिति तस्यचभांडस्यचमूल्यं विचिंतयति एतद्यवनास्तुलायाः प्रथमद्रेष्काणस्य रूपंवदंतिकथयंति एषनरद्रेष्काणः शक्रसक्तस्य १९ अथतुलाद्वितीयस्यस्वरूपंत्रोटकेनाह कलशमिति गृध्रः पक्षी गृध्रमुखोगृध्राननः पुरुषः कलशं·कुंभं गृहीत्वाविनिः पतितुंनिर्विशेषंपतितुमभीप्सति वांछतियतःक्षुधितोबुभुक्षितः तृषितः पिपासितोतः कलत्रंभार्यां सुतान् पुत्रान् मनसाचित्तेनैति गच्छति अभीप्सति अभिलषति स्मरतीत्यर्थः इत्येवंप्रकारः तुलाधरमध्यगतः तुला द्वितीयद्रेष्काणः एषनरद्रेष्काणः खगद्रेष्काणः

खगद्रेष्काणः शनैश्चरसक्तश्च २० अथतुल तृतीयस्यस्वरूपं वंशस्थेनाह बिभीषयन्निति रत्नचित्रितोमणिभिर्विभूषितः वनेरण्येमृगान् हरिणान् बिभीषयन् भीषान्कुर्वन् तिष्ठति कीदृशः कांचनंसौवर्णं तूणंशराधानं वर्मसन्नाहं तेचबिभर्तिधारयति फलान्यामिषंचमासं बिभर्तिनरोमनुष्यो वानररूपभृत् वानरस्यकपेरिवरूपं बिभर्तिधारयति फलान्यामिषादिनीकेचिद्धनुर्धरः किन्नररूपभृन्नरः इतिपठंति धनुर्धरः चापहस्तः किन्नरोदेवयोनिरश्वमुखः पुरुषः तुलावसानेतुलस्य तृतीयद्रेष्काणे यवनैः पुराणयवनैरुदाहृतः कथितः नरोमनुष्योवानराकारोऽयंचतुष्पद द्रेष्काणो बुधसक्तश्च

बिभीषयन्तिष्ठतिरत्नचित्रितोवनेमृगान्कांचनतूणवर्मभृत् फलामिषंवानररूपभृन्नर स्तुलावसाने यवनै
रुदाहृतः २१ वस्त्रैर्विहीनाभरणैश्चनारी महासमुद्रात्समुपैतिकूलं स्थानच्युता सर्पनिबद्धपादामनोरमा वृ
श्चिक राशिपूव : २२ स्थानसुखान्यभिवांछतिनारीभर्तृकृते भुजगावृतदेहा कच्छपकुंभ समान शरीरा
वृश्चिकमध्यमरूपमुशंति २३

२१ अथवृश्चिक प्रथमस्य स्वरूप मुपजातिकयाह वस्त्रैरिति नारीस्त्रीवस्त्रैरंबरैस्तथाभरणैरलंकरणैश्चविहीनावर्जिता महासमुद्रान्महासागरात् कूलंसमुपैत्यागच्छति स्थानच्युतास्वस्थानात् भ्रष्टासर्पनिबद्धपादाभुजगनियमितचरणामनोरमाचित्तानंदविधायिनी चित्ताल्हादकरीवृश्चिकराशेः पूर्वः प्रथमद्रेष्काणः एषस्त्रीद्रेष्काणो भौमसक्तश्च २२ अथवृश्चिक द्वितीयस्य स्वरूपं दोधकेनाह स्थानेति नारीस्त्री स्थानसुखानि अभिवांछति भर्तृकृते पतिनिमित्तं भुजगावृतदेहा सर्पव्याप्तशरीरा कच्छपः कूर्मः कुंभोघटः तत्समानशरीरातत्तुल्यदेहा वृश्चिकेमध्यमरूपं द्वितीयं द्रेष्काण सुशंतिकथयंति एषस्त्रीद्रेष्काणो व्यालद्रेष्काणः जीवसक्तश्च

अथवृश्चिक तृतीयस्वरूपज्ञानंपुष्पितायाह पृथुलचिपिटमिति पृथुलंविस्तीर्णं चिपिटं चर्पटं कूर्मतुल्यंकच्छपसदृशं वक्त्रंमुखंयस्य श्वासारमेयः मृगोहरिणः सृगालः क्रोष्टावराहः सूकरः एषांभीषकारी भयकारी मलयस्य चंदनस्याकरस्यप्रदेशमुत्पत्तिस्थानमवतिरक्षति सचमृगपतिः सिंहः अंत्यगतोवृश्चिकस्य तृतीयद्रेष्काणः एषः कूर्माननः सिंहद्रेष्काणः चतुष्पदद्रेष्काणः चंद्रसक्तश्च २४ अथ धन्विपूर्वस्यस्वरूपज्ञानमिंद्रवज्रयाह मनुष्यवदिति मनुष्यवक्त्रोनरवदनःअश्वसमानकायःतुरंगसदृशदेहः आयतंदीर्घं धनुश्चापंगृहीत्वा आश्रमस्थः तत्राश्रमे तिष्ठति क्रतूपयोज्यानि य-

पृथुलचिपिटकूर्मतुल्यवक्त्रः श्वमृगवराहसृगालभीषकारी अवतिचमलयाकरप्रदेशं मृगपतिरंत्यगतस्यवृश्चिकस्य २४ मनुष्यवक्त्रोश्व समानकायो धनुर्विगृह्यायतमाश्रमस्थः क्रतूपयोज्यानितपस्विनश्चररक्षपूर्वोधनुषस्त्रिभागः २५ मनोरमाचंपकहेमवर्णा भद्रासनेतिष्ठति मध्यरूपा समुद्ररत्नानि विघट्टयंती मध्यत्रिभागोधनुषः प्रदिष्टः २६

ज्ञोपकरणादीनि यज्ञभांडानिस्रुक् स्रुवादीनि तपस्विनः तापसान्रक्षति अवतिरक्षितवान् आद्यः प्रथमो धनुषस्त्रिभागो धन्विद्रेष्काणः केचिच्चररक्ष पूर्वोति पठंति धनुषः पूर्व स्त्रिभागः प्रथमद्रेष्काणः एषोऽश्व समान कायः नरद्रेष्काणः चतुष्पात्सायुधद्रेष्काणः जीवसक्तश्च २५ अथधन्वी द्वितीयस्य स्वरूपज्ञान मुपजातिकयाह मनोरमेति मनोरमाचित्ताल्हादकारिणी चंपकपुष्पविशेषः हेमसुवर्णं तत्सदृशवर्णा तत्समकांतिः भद्रासने आसनविशेषेतिष्ठति तत्रउपविष्टा मध्यमरूपा नचातिशोभना नाप्यत्यशोभना समुद्ररत्नानिसागरमणीन् विघट्टयं स्त्री तिष्ठति धनुषोमध्यत्रिभागो द्वितीयद्रेष्काणो मुनिभिः प्रदिष्टउक्तः एषस्त्री द्रेष्काणो भौमस

कुर्चीनरोहाटकचंपकाभोवरासनेदंडधरोनिषण्णः कौशेयकान्युद्वहतेजिनंचतृतीयरूपंनवमस्यराशेः २७ रोमचितो
मकरोपमदंष्ट्रः सूकरकायसमानशरीरः योक्त्रकजालकबंधनधारीरौद्रमुखोमकरप्रथमस्तु २८ कलास्वभिज्ञाब्जद-
लायताक्षीश्यामाविचित्राणिचमार्गमाणा विभूषणालंकृतलोहकर्णीयोषाप्रदिष्टा मकरस्यमध्ये २९

क्रमश्च २६ अथधन्वीतृतीयस्य स्वरूपमुपजातिकयाह कूर्चीनर इति नरोमनुष्यः कूर्ची दीर्घश्मश्रुः हाटकं सुववर्णं चंपकः पुष्पविशेषः तदाभोतत्सदृशकांतिः तत्समानद्युतिः वरासने प्रधानासने निषण्णः उपविष्टः दंडधरोदंडहस्तः कौशेयकानि पट्टविशेषाणि उद्वहते धारयति अजिनं मृगचर्म नवमस्यराशेर्धनुषः तृतीयद्रेष्काणस्य स्वरूपं एषनरद्रेष्काणः सायुधः अर्कसंक्रमश्च २७ अथमकरप्रथमस्य स्वरूपं दोधकेनाह रोमेति रोमचितोरोमशः मकरोपमदंष्ट्रः मकरतुल्यदंष्ट्रः मकरोजलचरप्राणी सूकरस्तुवराहस्तु कायोदेहः तत्समानशरीरः तत्तुल्यतनुः योक्त्रकं येनबलीवर्दायोज्यंते जालकः प्रसिद्धः येनपक्षिणो बध्यंते बंधनंनिगडादि एतानिधारयति तच्छीलः रौद्रमुखोवक्रीताननः मकरप्रथमः प्रथमद्रेष्काणः एषः पुरुषद्रेष्काणः बंधनधारित्वात्सनिगडः सूकरसमानशरीरः नसूकरः तस्माच्चतुष्पात् शनैश्चरसंक्रमश्च २८ अथमकरद्वितीयस्यस्वरूपमुपजातिकयाह कलास्वभिज्ञाब्जदलायताक्षीति कलास्वभिज्ञा अब्जदलायताक्षीति कलास्वभिज्ञा आभिमुख्येनजानाति अब्जदलायताक्षी अब्जदलंपद्मपत्रं तद्वदायते दीर्घे अक्षिणीयस्याः सादीर्घनेत्राचश्यामाशामवर्णा विचित्राणिनानाप्रकाराणि वस्तूनिचमार्गमाणा अभीप्समाना विभूषणैरलंकरणैरलंकृता लोहकर्णा लोहयुक्तश्रोत्रालोहाभरणंकर्णयोर्यस्याः सायोषास्त्रीमकरस्यमध्येद्वितीयद्रेष्काणेप्रदिष्टाउक्ताएषः स्त्रीद्रेष्काणः शुक्रसंक्रमश्च २९

अथमकर तृतीयस्य स्वरूपंरथोद्धतयाह किंनरोपमेति किंनरोपमतनुः किंनरादेवयोनयः अश्वमुखाः पुरुषास्तत्सदृशीतनुः सकंबलः कंबलेनसहितः तूणंशराधारंचापंधनुः कवचंसन्न एतैस्तूणचापकवचैः शराधारधनुः सन्नाहैः समन्वितोयुक्तः कुंभंघटंरत्नविचित्रं मणिविरचितं स्कंधगं अंसासक्तं उद्वहतिधारयति मकरराशेः पश्चिमतृतीयद्रेष्काण एषपुरुषद्रेष्काणः सायुधः बुधसत्कश्च ३० अथकुंभप्रथमद्रेष्काणस्य स्वरूपंदोधकेनाह स्नेहजलमद्य भोजनेति स्नेहस्तैलादि मद्यपान विशेषः जलमुदकंभोजनमशनं एतेषांयआगमः तेनव्याकुलितंमनः चित्तंयस्य सकंबलः कंबल स-

किन्नरोपमतनुःसकंबलस्तूणचापकवचैः समन्वितः कुंभमुद्वहति रत्नचित्रितं स्कंधगं
मकरराशिपश्चिमः ३० स्नेहमद्यजलभोजनागमव्याकुलीकृतमनाः सकंबलः कोशका
र वसनो जिनान्वितोगृध्रतुल्यवदनो घटादिगः ३१ दग्धेशकटे सशाल्मले लोहान्याह
रतेंगनावने मलिनेनपटेनसंवृता भांडैर्मूर्ध्निगतैश्चमध्यमः ३२

हितः कोशकार वसनः पट्टवासाः अजिनान्वितः कृष्णमृगचर्मयुक्तः गृध्रः पक्षीतत्तुल्यवदनः तत्समवक्त्रः घटादिगः कुंभप्रथमद्रेष्काणः एषनरद्रेष्काणः सौरसत्कश्च ३१ अथकुंभद्वितीयस्वरूपंवैतालीयेनाह दग्धेशकटेइति शकटेगंत्र्यादग्धे अग्निनाभस्मीकृते सशाल्मलेशाल्मलवृक्षैः सहितेअंगनास्त्रीलोहान्याहरते गृह्णाति वनेअरण्येमलिनेनपट्टेनसमलेनवाससासंवृताप्रावृता भांडैः भांडप्रकारैः मूर्ध्निगतैः मस्तकारोपितैः उपल शिलाकेचिद्भांडैरारोपितैः परिपूर्णैरिति पठंति मध्यमो द्वितीयद्रेष्काणः एषस्त्रीद्रेष्काणः साग्निको बुधसत्कश्च ३२

अथकुंभत्रितीयस्यस्वरूपज्ञानमिंद्रवज्रयाह श्यामइति श्यामःश्यामवर्णः सरोमश्रवणः लोमशकर्णः किरीटीमौलियुक्तः त्वक्चर्मपत्रं पर्णंनिर्यासो वृक्षनिर्यासः यथागुग्गुलुः स्नेहः फलंचसुप्रसिद्धमेवाम्रादिः एतैः सहभांडानिलोहव्यतिमिश्रितानिलोहसंयुक्तानिबिभर्ति धारयति तानिचसंचारयति स्थानात् स्थानांतरंनयति घटस्थःकुंभस्यांतगतः तृतीयद्रेष्काणः एषनरद्रेष्काणः शुक्रसक्तश्च ३३ अथमीनाद्यस्य स्वरूपमिंद्रवज्रयाह स्रुग्भांडेति स्रुग्भांडानि यज्ञोपकरणंभांडानि मुक्तामौक्तिकंमणयः प्रसिद्धाः शंखः प्रसिद्धएव एतैर्मिश्रैरेकीकृतैः व्याक्षिप्तोहस्तोयस्य आकुलकरः सर्वाभूषणः साभरणः भार्याजाया तद्विभूषार्थमलंकरणार्थमपांनिधानंसमुद्रंनावाप्लुवाति नौस्थोगच्छति केचिन्महार्णवंचनावाप्लुवतीति पठंति

श्यामः सरोमश्रवणः किरीटीत्वक्पत्रनिर्यासफलैर्बिभर्ति भांडानिलोहव्यतिमिश्रितानि संचारयंत्यंत्यगतोघटस्य ३३
स्रुग्भांडमुक्तामणिशंखमिश्रैर्व्याक्षिप्तहस्तः सर्वाभूषणश्च भार्याविभूषार्थमपांनिधानंनावाप्लवत्यादिगतोझषश्च
३४ अत्युच्छ्रितध्वजपताकमुपैतिपोतं कूलंप्रयातिजलधेः परिवारयुक्ता वर्णेनचंपकमुखा प्रमदात्रिभागो मी
नस्यचैषकथितोमुनिभिर्द्वितीयः ३५

झषस्य मीनस्यादिगतः प्रथमद्रेष्काणः एषनरद्रेष्काणः जीवसक्तश्च ३४

अथ मीनद्वितीयस्यस्वरूपज्ञानं वसंततिलकेनाह अत्युच्छ्रितेति अत्युच्छ्रिता अतीवोच्चाः ध्वजाः पताकायास्मिन्पोते तमुपैति आरोहति जलधेः समुद्रस्यकूलं तटं प्रयाति प्रमदास्त्री कीदृशी परिवारयुक्ता सखीजनेनावृता चंपकंपुष्पविशेषः चंपककांतिः मुखवर्णेनचंपककांति मुष्णाति अपहरति एषः मीनस्यद्वितीयत्रिभागोमुनिभिर्गदितउक्तः एषः स्त्रीद्रेष्काणोचंद्रसक्तश्च ३४ छ छ

अथमीनस्य तृतीयद्रेष्काणस्यस्वरूपंज्ञानमिंद्रवज्रयाह श्वभ्रांतिकेति श्वभ्रांतिकेवर्गसमीपे सर्पवेष्टितांगोभुजगावृतावयवः वस्त्रैरंबरैर्विहीनो रहितः पुरुषोनरः अटव्यां अरण्येचोरैस्तस्करैः अनलेनाग्निनाव्याकुलितः क्षुभितोंतरात्मायस्य विक्रोशतेरोदिति झषस्यमीनस्यात्योपगतः तृतीयद्रेष्काणः एषः व्यालद्रेष्काणः भौमसक्तश्च द्रेष्काणस्वरूपस्यप्रयोजनंप्रदेशेषुव्याख्यातं तथाचयात्रायांवक्ष्यति द्रेष्काणाकार चेष्टागुण सदृश फलंयोजयेद्बुद्धिहेतौ द्रेष्काणेसौम्यरूपे कुसुमफलयुते रत्नभांडान्वितेच सौम्ये दृष्टेजयः स्यात्प्रहरणसदृशेपापदृष्टेचभंगः संमोहोवाथबंधः सुभुजगनिगडेपापमुक्तः पिपासुरिति अन्यच्च अस्यप्रयोजनं चौररूपस्यानादिज्ञानं उक्तंचषट्पंचाशिकायांपृथुयशसा अंशकाज्ज्ञायते द्रव्यं द्रेष्काणे-

श्वभ्रांतिके सर्पनिवेष्टितांगो वस्त्रैर्विहीनः पुरुषस्त्वटव्यां चौरानलव्याकुलितांतरात्मा विक्रोशतेंत्योपगतो झषस्य ३६ इतिबृहज्जा॰ द्रेष्काणस्वरूपाऽध्यायः समाप्तः २७ अथातउपसंहाराध्यायोव्याख्यायते राशिप्रभेदो ग्रहयोनिभेदो वियोनिजन्माथनिषेककालः जन्माथसद्योमरणंतथायुर्दशाधिपाकोऽष्टकवर्गसंज्ञः १

स्तस्करास्मृताः राशिभ्यः कालदिग्देशोवयोजातिश्चलग्नपात् एवंवृत्तानि ३६ इतिश्रीभट्टोत्पलविरचितायां बृहज्जातकविवृत्तौ द्रेष्काणाऽध्यायः॥२७ अथातउपसंहाराध्यायोव्याख्यायते अथाध्यायसंग्रहमुपजातिकयाह राशिप्रभेदइति राशिप्रभेदः प्रथमोऽध्यायः १ ग्रहयोनिभेदोद्वितीयः २ वियोनिजन्मातृतीयः ३ अथशब्दोआनंतर्येनिषेककालश्चतुर्थः ४ जन्मविधिःपंचमः ५ अथसद्योमरणमरिष्टाध्यायःषष्ठः ६ आयुर्विभागःसप्तमः ७ दशाविभागोऽष्टमः ८ अष्टकवर्गसंज्ञोनवमः ९

अथशेषाध्यायसंग्रहं शालिन्याह कर्माजीवइति कर्माजीवोदशमः १० राजयोगाध्यायएकादशः ११ खयोगाः नाभसयोगाध्यायो द्वादशः १२ चां
द्रयोगाः सुनफाद्याश्चंद्रयोगाध्यायस्त्रयोदशः १३ द्विग्रहत्रिग्रहयोगाध्यायश्चतुर्दशः १४ प्रव्रज्यायोगाध्यायः पंचदशः १५ अथो नेतरं रा
शि शीलाध्यायः षोडशः १६ दृष्टिफलाध्यायः सप्तदशः १७ तस्मात्परो भावाध्यायोष्टादशः १८ अथातः परमाश्रयाध्यायएकोनविंशति तमः
१९ प्रकीर्णाध्यायो विंशतिः २० २ अथशेषाध्यायसंग्रहं शालिन्याह अनिष्टयोगाइति अनिष्टयोगाध्याय एकविंशतिः २१ कामिनीनां
स्त्रीणांजातकाध्यायोद्वाविंशतिः २२ निर्याणंमरणज्ञानाध्यायस्त्रयोविंशतिः २३ नष्टजातकाध्यायश्चतुर्विंशतिः २४ द्रेष्काणस्वरूपाध्या

कर्माजीवोराजयोगाः खयोगाश्चांद्रायोगाद्विग्रहाद्याश्चयोगाः प्रव्रज्यायोराशिशीलानिदृष्टिर्भावस्तस्मादाश्रयोथ
प्रकीर्णाः २ नेष्टायोगाजातकंकामिनीनांनिर्याणंस्यान्नष्टजन्मद्रकाणः अध्यायानां विंशतिः पंचयुक्ताजन्मन्येतद्या-
त्रिकंचाभिधास्ये ३ प्रश्नास्तिथिर्भादिवसः क्षणाश्चचंद्रोविलग्नंलग्नयलग्नभेदः शुद्धिर्ग्रहाणामथचापवादो विमिश्र-
काख्यंतनुवेपनंच ४

यः पंचविंशतिः २५ एवंपंचयुक्ताध्यायानां विंशतिः जन्मनिजातके उक्ताकथितोक्ता एतज्जातके ३
एवमिदानीं यात्रिके यात्रायांनिबद्धमध्यायसंग्रहामभिधास्येकथयिष्येतत्रोपजातिकयाह प्रश्नास्तिथिरितिप्रश्नाः प्रश्नप्रभेदाध्यायः ति
थिस्तिथिबलाध्यायः भंनक्षत्राभिधानं दिवसोदिवसाभिधानं वारफल लक्षणं क्षणोमुहूर्तनिर्देशः चंद्रश्चंद्रबलाध्यायः लग्नंचलग्नवि
निश्चयः अथानंतरलग्नभेदोहोराद्रेष्काणनवांशक द्वादशभागत्रिंशद्भागानांलक्षणं सफलंग्रहाणांशुद्धिःसफलासमस्त ग्रहाणां

कुंडलिकाफलं अथानंतरं अपवादाध्यायः विमिश्रकाख्यं मिश्रिकाध्यायः तनुवेपनं देहास्पंदनं ४ शेषाध्यायस्यकीर्तन मुपजातिकयाह
अतः परमिति अतोऽस्मात्परं गुह्यकपूजनं स्याद्भवेत् स्वप्नं स्वप्नाध्यायः ततोनंतरं स्नानविधिः प्रदिष्टः उक्तः ग्रहाणांयज्ञो ग्रहयज्ञः अथानंतरं
निर्गमः प्रस्थानिकं क्रमात्परिपाद्यादिष्टउक्तः शकुनोपदेशः शकुनरुतज्ञानं एषयात्रायांसंग्रहः ५ अथशेषवस्तुसंग्रह मुपजातिकयाह वि
वाह कालइति विवाहकालो विवाहपटलं ग्रहाणांकरणं पंचसिद्धांतिकायां प्रोक्तं कथितं पृथग्विभज्य तद्विपुलातस्य करणस्यशुभाशुभज्ञा
नाय विपुला विस्तीर्णाशाखा कथिता त्रिभिः स्कंधैरेतैर्गणितहोरासंहिताख्यै रवंज्योतिः शास्त्रंसंग्रहोमया वराहमिहिराचार्येणदेवविवादां-

अतः परंगुह्यकपूजनंस्यात्स्वप्नंततः स्नानविधिः प्रदिष्टः यज्ञोग्रहाणामथनिर्गमश्च क्रमाच्चदिष्टः शकुनोपदेशः ५
विवाहकालः करणंग्रहाणांप्रोक्तंपृथक्तद्विपुलाचशाखा स्कंधैस्त्रिभिर्ज्योतिषसंग्रहोयंमयाकृतादेवविदांहिता-
य ६ पृथुविरचितमन्यैः शास्त्रमेतत्समस्तं तदनुलघुमयेदं तत्प्रदेशार्थमेव कृतमिह हिसमर्थं धीविषाणामलत्वे
ममयदिहयसुक्तंसज्जनैः क्षम्यतांतत् ७

सांवत्सरिकानांहितायहितार्थं कृतो विरचितः विस्तीर्णशास्त्राण्यालोच्यसंक्षेपतोमया
कृतं ६ एतन्मालिन्याह पृथुविरचितमन्यैरिति एतत्समस्तंसकलशास्त्रमन्यैराचार्यैर्यवनेश्वरादिभिः पृथुविस्तीर्णावरचितंकथितं तदनुतदेवशोभ
नतरं मयातत्प्रदेशार्थंतदुपदिष्टार्थंलघुस्वल्पंकृतं तत्प्रदेशोपियोर्थः सोऽस्मिन्तात्पर्यार्थः हियस्मादर्थइहास्मिन्शास्त्रेकृतं धीविषाणामलत्वबुद्धिशृंग
निर्मलीकरणविषयेसमर्थमुक्तमेतत् कृतंमयाचेहसंग्रहे यदुक्तमशोभनमुक्तंकथितं तत्सज्जनैः पंडितैर्मेमक्षम्यतांक्षंतव्यमित्यर्थः ७ छ

अथ कालविशेषेण कुकृताल्पकृतयोश्च पुनः करणे सतां प्रार्थनाय वसंततिलकेनाह ग्रंथस्येति अस्य ग्रंथस्य यत्प्रचरतो विचरमाणस्य यद्विनाशमेति यातिलेख्याल्लेखकदोषात् तद्बहुश्रुतमुखाधिगमक्रमेण बहुश्रुतानां पंडितानां मुखाद्धिगम्य ज्ञात्वा क्रमेण परिशोध्या विदुषा पंडितेन रागमात्सर्यमपहृत्य विहाय कर्तव्यं ते च शास्त्रार्थापेक्षया संस्कारेण समर्थाः यद्वा मया कुकृतं कुत्सितं कृतं तथाल्पमपरिपूर्णं तद्विचार्य विचारेण कर्तव्यमित्यर्थः तत्रादित्यदासाख्यस्य पितुर्नाम कापित्थाख्ये ग्रामे वरदनामादित्यदासाच्च विज्ञानागमं स्वनिवासमुज्जयिनीं च नाम होराशास्त्रनाम च वसंततिलकेनाह ८

ग्रंथस्य यत्प्रचरतोस्य विनाशमेति लेख्याद्बहुश्रुतमुखाधिगमक्रमेण यद्वा मया कुकृतमल्पमिहाकृतं-
वा कार्यं तदत्र विदुषा परिहृत्य रागं ८ आदित्यदासतनयस्तदवाप्तबोधः कापित्थके सवितृलब्धवरप्रसादः
आवंतिको मुनिमतान्यवलोक्य सम्यग्घोरां वराहमिहिरो रुचिरां चकार ॥ ९ ॥ ॥ ॥

आदित्यदासेति आदित्यदासाख्यो ब्राह्मणः तस्य तनयः पुत्रः तस्मादेव पितुरादित्यदासाद्वा सः बोधः ज्ञानं येन कापित्थाख्ये ग्रामे योसौ भगवान् सविता सूर्यस्तस्माल्लब्धः प्राप्तो वरः प्रसादो येन आवंतकः आवंतके देशे उज्जयिन्यां वास्तव्यः कोसौ वराहमिहिरः अयं मुनिमतानि ऋषिप्रणीतानि शास्त्राण्यवलोक्य विचार्य सम्यग्यथावस्तु कृत्वा होरां जातकशास्त्रं रुचिरां शोभनां सुगमां चकार कृतवानिति १ छ छ

अथसतांप्रणाम पूर्वकाणि शास्त्राणि प्रणामं तानिकृत्वाततः शास्त्रावसान पूर्वप्रणेतृणांनमस्कार्य याह दिनकरेति दिनकरो कस्तादादिकाः सर्व एवग्रहाः
मुनयोवसिष्ठाद्याः गुरुरादित्यदासः तेषांचरणप्रणिपातेन पाद नमस्कार करणेनकृतोयः प्रसादोनुकंपातेनानुनयेन मतिर्बुद्धिर्यस्य तेन दिनकर मुनि
गुरुचरण प्रणिपातकृत प्रसाद मतिना मयेदंशास्त्रमुपसंगृहीतं स्वीकृतमस्ति तस्मात्पूर्वप्रणेतृभ्यः पूर्वशास्त्रकारेभ्योनमोस्तुनमस्करणेनयः कृत प्र-
सादः नमइतिभद्रम् १० इतिश्रीभट्टोत्पलविरचितायां बृहज्जातक विवृत्तौ उपसंहाराध्यायः समाप्तः २८ वराहमिहिराचार्य कृते होरा महोदधौ अर्थिनाः

दिनकरगुरुचरणप्रणिपातकृतप्रसादमतिनेदम् शास्त्रमुपसंगृहीतं नमोस्तुपूर्वे
प्रणेतृभ्यः १० इतिश्री बृहज्जातक विवृत्तौउपसंहाराध्यायः समाप्तः ॥२८॥ ॥छ॥

मुसलभ्रमकेऽर्थाप्तये विवृत्तिध्रुवम् १ चिंतामणि रितिख्याताटीकाशास्त्रज्ञवल्लभा सप्तसार्धसहस्राणि ७५०० मानमस्यामनुष्टुभाम् २ प्रीतिदोष्यंप
रित्यज्यटीकांसम्यग्विचार्यच उपयोग्यात्रशास्त्रेचेत्संग्राह्यानोपरोधतः ३ व्याख्येयं यन्मयात्यक्तं यच्चयुक्ति विवर्जितम् भ्रांत्या विलिखितं यच्च त-
त्सर्वस्फुटतांनयेत् ४ चैत्रमासस्यपंचम्यां सितायांगुरुवासरे वस्वष्टाष्टमितेशाके ८८८ कृतेयं विकृतिर्मया ५ विधायटीकां शास्त्रेस्मिन् य-
त्किंचित्पुण्यमवर्जितम् तेननिर्मत्सरीभूयात्सौजन्यालंकृतोजनः ६ दीर्घस्वरोष्ठ्यादि विधेयतां ताहाष्टादशे क्ष्मांजनसप्तकेन स्वार्थेचवेद्या सम

वस्थितेन भाष्योत्पलेनैव लिखापितस्तु ७ इति भट्टोत्पलकृता बृहज्जातक विवृतिः समाप्ता श्रीमज्जगदंबार्पणमस्तु ॥ ॥ श्रीसीतारामचंद्रार्पणमस्तु ॥ ७ ॥ ॥ शुभंभूयात् ॥ ॥ ७ ॥ ॥ ॥

हें पुस्तक मुंबईयेथें नवेहनुमानगल्लींत बापूसदाशिवशेट झोल्ये हेगिष्टे श्रीवर्धनकर यांणी आपल्या छापखान्यांत छापिलें मिति अश्वीनकृष्ण ३० गुरुवार तारीख २५ अक्टोबर सन १८८९ इसवी. शके १८११

इतिबृहज्जातकं सटीकं समाप्तम्.